आ०र० 1

अथात्रकिंचित्प्रास्ताविकम् ।

आचाररत्ननामधेयोऽस्त्ययंब्राह्माचारप्रतिपादकोऽभिनवआह्निकप्रमाणनिबंधः । अत्रारुणोदयादारभ्याद्वितीयसूर्योदयमहरहःकर्तव्यानां ब्राह्मणकर्तृकाचाराणांतत्तद्विधिनिषेधानामकरणप्रत्यवायानांचयथावद्विचारःप्रमाणैर्निर्णीतोस्ति । तत्रकोनामायंब्राह्माचारःकिंचब्राह्मणलक्षणमितिसंभवतिजिज्ञासेतितदत्रकिंचिदुल्लिख्यते—**आचारः**प्रवृत्तिविषयत्वं, यथाऽऽलौकिकाविगीतशिष्टाचारविषयत्वमिति, अपिच—विद्वेषरागरहिताअनुतिष्ठतियंद्विजाः । विद्वांसस्तसदाचारंधर्ममूलंविदुर्बुधाः । इत्याचारलक्षणम् । **ब्राह्मणश्चा**ऽदृष्टविशेषप्रयोज्यधर्मवान् । ब्रह्मवेदं, परब्रह्मवा वेत्त्यधीतेवेतिब्राह्मणशब्दव्युत्पत्तिः । **लक्षणंच**—विशुद्धमातापितृजन्यत्वंब्राह्मणत्वमिति । विशुद्धत्वंनामषट्कर्माधिकारवत्त्वम् । तथा—जात्याकुलेनवृत्तेनस्वाध्यायेनश्रुतेनच । एभिर्युक्तोहियस्तिष्ठेन्नित्यंसद्विजउच्यते । इति । **वसिष्ठोपि**—योगस्तपोदमोदानंसत्यंशौचंदयाश्रुतम् । विद्याविज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् । इत्याह । **ब्राह्मणगुणप्रयुक्तंफलंतु**—सर्वत्रदाता.श्रुतपूर्णकर्णाजितेंद्रियाःप्राणिवधान्निवृत्ताः । प्रतिग्रहेसंकुचिताग्रहस्तास्तेब्राह्मणास्तारयितुंसमर्थाः—। इति । एवंगुणविशिष्टत्वमीप्सिततममस्तिलोकानाम् । तदेवचेह ब्रह्मवर्चसतेजोर्पकत्वेनात्यंतनिश्रेयसकरंभवतिस्वःपदास्पदंचामुत्र । तदिदंयथावद्ब्राह्माचारावगमपूर्वकाचरणमृतेनसुलभं सदाचारोप्याह्निकप्रमाणनिबंधैकवेद्यइत्यन्योन्यसंबद्धत्वादत्यंतावश्यकीतज्ज्ञानापेक्षा । आचाराशंसकाविद्यन्तेयद्यपिभूयिष्ठाआह्निकग्रंथास्तथापिनैकेनपुंसानेकेषांसंग्रहालोचनपरस्परविसंवादमार्जनादिशक्यमिति श्रीमद्वाराणसीक्षेत्रमंडनायमानश्रीमन्नारायणभट्टपौत्रेणलक्ष्मणभट्टविदुषाखिलाह्निक-

निर्णायकप्रमाणसमुच्चयात्मकोयंग्रंथोऽप्यरचि । सोयंभूयसायासेनसंपाद्ययथामतिसंशोध्यानंक्यचप्रकाशितोस्माभिरधुना । अस्यादर्शपुस्तकेष्वेकं गोमांतकांतर्गतमाशेलग्रामवासिभिः वे. शा. सं. वासुदेवशास्त्रिधूपकरैर्दत्तमाद्यंतेषद्वागरहितमंतरांतरात्रुटियुङ्नातिशुद्धंच । द्वितीयंश्रीकाशी-क्षेत्रवासिभिः वे. शा. सं. बाबुरामचंद्रदीक्षितजडेइत्याख्ययाप्रसिद्धैर्दत्तंपांक्तंनातिशुद्धंचेत्युभाभ्यांप्रतिस्थलंपरस्परविसदृशाभ्यामप्यस्मत्पु-स्तकंसंवाद्ययथाकथंचित्संस्कृत्यप्रकाशितमिमंग्रंथंनिसर्गदयालवोविद्वांसोत्रत्यानि शोधनावसरेमानुषमेमुषीसुलभानिस्खलितानिपरिशोध्यानेना-भिनवग्रंथरत्नेनस्वीयस्वीयभारतीकोशोद्वसितानिमंडयंत्वित्याशास्ते—

विद्वदेकांतवशंवदःपणशीकरोवासुदेवशर्मा ।

आचाररत्नविषयानुक्रमणिका ।

विषया.	पत्रं	विषया॰	पत्रं	विपया	पत्रं	विषया॰	पत्र
मंगलाचरणम्	१	संकल्पनिर्णय	४	स्वशाखोक्तकर्मोभ्यचरणानुज्ञा	६	देशपरत्वेनाचारभेदः	७
परिभाषा	१	नित्यकर्मसंकल्प	४	प्रधानागावृत्त्यादिविचारः	६	अथाह्निकम्	७
उपवीतविचार	२	ताम्रेगव्यप्रक्षेपस्थलानि	५	वारिधारयाकर्मनिपेध॰	७	ब्राह्ममुहूर्तलक्षणम्	७
ऊर्ध्ववृतलक्षणम्	२	प्रौढपादलक्षणम्	५	दक्षिणबाहूद्धारविचारः	७	मातृपित्रादिनमनम्	८
उपवीतमानम्	२	क्षुतादावन्येनशतंजीवेतिकथनम्	५	जपकालेऽसंभाष्या.	७	अभिवाद्याभिवादनविचारः	८
उपवीतस्यस्कधावरोहणेप्रायश्चित्तम्	३	समिदादिग्रहणविचारः	५	तत्कालव्यापिनीतिथिविचारः	७	वाक्पाणिपादचापल्यादिनिषेध॰	८
उत्तरीयविचारः	३	दीपादिछायावर्जनम्	५	एकद्विञ्यह सुकर्मलोपेप्रायश्चित्तम्	७	मातृपित्रादिभि.कलहनिषेध	९
आचमनम्	३	मौनस्थानानि	५	गृहिणाकर्तव्यानि	७	पापगंधाघ्राणादौप्रायश्चित्तम्	९
प्राणायामः	३	कर्मकर्तुर्दिङ्नियम.	६	द्वारदेशेरंगवल्यादिकरणम्	७	प्रात स्मरणादि	९
विद्वत्ताप्रशंसा	४	मुख्यकालासभवेगौणकालानुज्ञा	६	मार्जनीचुल्ल्याद्यान्यनतिक्रमणीयानि	७	बहिर्विहार मलमूत्रोत्सर्गविचारः	१०
आर्षछदोदैवतस्मरणविचार॰	४	रात्रावपिविहितकर्माणि	६	अग्निब्राह्मणाद्याअनतरागमनीया.	७	शौचेग्राह्यामृत्	१०
कटिसूत्रविचार	४	अल्पद्वादश्यादावुष कालेपिकर्म	६	पादत्राणनिषिद्धस्थानानि	७	शौचकालेउपवीतधारणविचारः	११

विपया.	पत्रं
कर्णादुपवीतस्खलनेप्रायश्चित्तम्	११
शौचस्थलविचारः	११
यज्ञियकाष्ठानि	१२
शौचेउपानद्धारणनिपेध· ...	१२
दिन–रात्रि–सध्याकालविचार·	१२
श्रुतिस्मृतिविरोधेश्रुते प्रावल्यम्	१२–५८
स्नानाभ्यंगाद्युत्तरमूत्रपुरीषोत्सर्ग-निपेध	१२
अभ्यंगलक्षणम्	१२
ब्रह्मसूत्रंविनाभुक्तौमलोत्सर्गेचप्राय०	१२
देवोद्यानेमूत्रोच्चारेदंड. ...	१३
वालादीनानैतेनियमाः ...	१३
शौचविचारः	१३
शौचेकतिविधामृदोग्राह्या. ...	१३
गृहिब्रह्मचार्यादिभेदेनशौचम् ...	१४
आतुरस्त्रीशूद्रादिशौचम् ..	१४
गंधलेपक्षयंयावच्छौचम् ...	१४
विषया	**पत्रं**
नाभेरूर्ध्वंदक्षहस्तोऽधस्तुवाम ...	१४
पादप्रक्षालननिर्णय	१५
गंडूपसख्या	१५
नृणाद्वादशमला.	१५
शौचनियमातिक्रमेप्रायश्चित्तम्...	१५
आचमनविचारः	१५
हस्तवर्तिब्राह्मादितीर्थानि ...	१६
सव्योपगृहीतदक्षहस्तेफलाधिक्यम्	१६
धृतब्रह्मग्रथिपवित्रोनाचामेत् ...	१६
आचमनेजलप्रमाणम्	१६
गोकर्णाकृतिहस्तेनाचमनम् ...	१६
आचमनेशीर्षण्यानाखानास्पर्शः	१७
उपस्पर्शेदक्ष-शखादिमतभेदौ	१७–१८
व्याघ्रपादमतेनाचमनम् ...	१७
गायत्रीपादैर्व्याहृतिभिर्वाचमनम्	१७
आचमननिमित्तानि	१८
रौद्रपित्र्यासुरमंत्रातेऽपसर्श. ...	१८
विषयाः	**पत्र**
आचमनासंभवेकर्णसर्शः ...	१९
द्विस्त्रिराचमननिमित्तानि ...	१९
कालतआचमनापवाद·... ...	१९
महानिशालक्षणम्	२०
निमित्तेप्यनाचमनेप्रायश्चित्तम् ...	२०
आचमनापवादः	२०
आचमननिपेधः	२०
यज्ञोपवीतेनष्टेविचार.	२०
आचातेप्यशुचित्वम्	२१
अशुच्छिष्टस्थलानि	२१
अलाब्वादियतिपात्राणि... ..	२१
यते परदत्तोदकेनाचमनम् ...	२१
दंतधावनम्	२१
दंतधावनकाष्ठानि	२१
निपिद्धकाष्ठानि...	२२
दंतधावनेनिषिद्धदिनानि ...	२२
विहितनिषिद्धानिकाष्ठानि ...	२२
विषया.	**पत्रं**
प्रोपितभर्तृकायारजस्वलायाश्चदंतधावन निषेध	२२
कर्तुर्नियमा प्रतिनिधेरपिस्यु ...	२२
दंतधावननिपेधेपिजिह्वोल्लेख्या ...	२३
उप.पानलक्षणम्	२३
पुंड्रधारणम्	२३
आज्यावलोकनम्	२३
कुशविचार.	२३
पवित्रकरणप्रकारः	२३
वृत्तग्रंथिब्रह्मग्रथिलक्षणम् ...	२४
पवित्रस्यमंत्रवद्धारणम् ...	२४
पवित्रेदर्भसख्या	२४
हेम-रजत-खड्ग धारणविचारः ...	२४
लोहत्रयधारणविचारः ...	२४
रक्षार्थमंगुलीयकम्	२५
माणिक्यादिरत्नखचितागुलीयकधारणम्	२५

विषया	पत्रं
कुशग्रहणविचार	२५
कुशानासमूलनिर्मूलग्रहणनिर्णय	२५
अमेध्यादर्भा	२५
दर्भग्रहणमत्र	२६
दशविधादर्भा	२६
गोरोमकृतपवित्रधारणम् ...	२६
प्रात स्नानम्	२६
सभर्तृकाणामशिरस्कस्नानम् ...	२६
उष काललक्षणम्	२७
आश्रमभेदेनप्रातर्मध्याह्नत्रिषवण-स्नानविचार	२७
कठस्नानमातुरादीनाम्	२७
नदीस्नानप्रशसा	२७
महानदीषुसमुद्रगासुविशेष ...	२७
पारक्यजलाशयस्नानेमृत्पिंडोद्धार	२७
स्नानेनिषिद्धजलानि	२८
रजस्वलासुनदीपुनस्नानम् ...	२८
नदीलक्षणम्	२८
महानदीपरिगणनम्	२८
रजस्वलास्वपिनोत्सर्जनादौस्नाननिषेध	२८
रात्रौनद्यादिस्नाननिषेध. ...	२८
मंगलेषुविहितनिषिद्धस्नानानि ...	२९
नित्यस्नानेतिथ्यादिनविचार्यम् ..	२९
द्विवास स्नानमेकवाससाच . .	२९
स्नानेमृदादिसभारा	२९
शिखाबंध	२९
स्रोतोभिमुखंसूर्याभिमुखंवास्नानम्	२९
गृहेगृहमुखंस्नानम्	३०
स्नानकालेकर्णनासादिनिरोध	३०
स्नानकालेगंगादिस्मरणम् ...	३०
परिशिष्टोक्त स्नानविधि .	३०
शखमुद्रालक्षणम्	३०
योनिमुद्रालक्षणम्	३०
असामर्थ्येमंत्रस्नानप्रकारः ...	३०
कुशप्रतिकृतिद्वारास्नानम् ...	३१
स्नानागतर्पणविचार	३१
नित्येतिलनिषेधः	३१
निवीतस्थलानि	३२
दर्भत्यागस्थलानि	३२
स्नानलोपेप्रायश्चित्तम्	३२
स्नानोत्तरकृत्यम्	३२
पुन.स्नानहेतून्यस्पृश्यवस्तूनि ...	३२
स्नानवस्त्रेणनागमार्जनम् ...	३२
वस्त्रधारणविचार.	३२
वस्त्रधारणेमत्रा	३२
वर्णपरत्वेनवस्त्रवर्णा.	३३
निषिद्धवस्त्राणि	३३
विधवायानीलीधारणनिषेध. ...	३३
नीलवस्त्रनिषेध	३३
धौतवस्त्रप्रागग्रमुदगग्रंवाप्रसारयेत्	३३
शाणक्षौमादिधारणम्	३३
उत्तरीयलक्षणम्	३३
उत्तरीयस्थानेतृतीययज्ञोपवीतम्	३४
कच्छविचार	३४
तिलकविचार.	३४
त्रिपुंड्रविचार.	३४
ऊर्ध्वपुंड्रविचारः	३५
गोपीचंदनाद्याधार्यामृदः ...	३५
जलेनापितिलकोमृदसंभवे	३५
तिलकप्रमाणानि	३५
कर्मभेदेनतिलकभेदः	३६
ग्राह्यंभस्म	३६
भस्मधारणेमंत्राः	३६
शंखचक्रादिमृत्तिलकाः	३६
उपासनाभेदेनतिलकभेदा ...	३६
तप्तमुद्राधारणविचार.	३७
सध्यानिर्णयः	३७
यथाकालेजलाभावेधूल्यार्घ्यदानम्	३७

विषयाः	पत्रं
संध्याप्रशंसा	३८
संध्यास्वरूपम्	३८
आसननिर्णयः	३८
प्राणायामनिर्वचनम्	३९
पूरक-कुंभक-रेचकलक्षणम् ...	३९
मात्रास्वरूपम्	३९
नासिकाधारणेऽङ्गुल्यः	४०
प्रणवस्वरविचारः	४०
ऋष्यादिस्मरणविचारः	४०
व्याहृतीनामृषयः	४०
न्यासविचारः	४०
संध्यायाजलग्रहणविचारः ...	४०
मार्जनम्	४०
मंत्राचमनम्	४१
नवभिर्द्वितीयंमार्जनम्... ...	४१
अघमर्षणम्	४१
सूर्यार्घ्यदानम्	४२

विषयाः	पत्रं
संध्याभेदेनार्घ्यभेदाः	४२
अर्घ्योत्तरक्वचित्तर्पणम्	४२
गायत्रीस्वरूपम्	४२–४४
गायत्र्याश्चतुर्थपादः	४२
आत्मरक्षा	४२
प्रणवन्यासः	४२
महाव्याहृतिन्यासः	४२
अक्षरन्यासः	४३
पदन्यासः	४३
पादन्यासः	४३
अक्षरदेवताः	४३
मुद्राप्रकारः	४३
गायत्रीजपप्रकारः	४४
जपस्थानानि	४५
जपकालेऽदर्शनीयानि	४५
जपगताविविधाभेदाः	४५
जपमालाविचारः	४६

विषयाः	पत्रं
मालासंस्कारविधिः	४६
अग्राह्यामालाः	४६
अंगुलिभिर्जपप्रकारः	४७
विधानातरम्	४७
गायत्रीतर्पणम्	४७
गायत्रीपुरश्चरणम्	४७
पुरश्चरणप्रयोगः	४८
उपस्थानम्	४८
अभिवादनम्	४९
नामविचार.	४९
उत्तरकृत्यम्	४९
संध्यायाउक्तकालातिक्रमेप्रायश्चित्तम्	४९
रात्रिप्रहरपर्यंतंदिवाकर्माभ्यनुज्ञा	५०
औपासनहोमनिर्णयः ...	५०
औपासनहोमः	५०
अन्यकर्तृकहोमेविशेषः ...	५१
अनुदितादिलक्षणम्	५१

विषयाः	पत्रं
अनुदितहोमिनोगौणकालः ...	५१
होमेमुख्यगौणकालावाह ...	५१
होमकालातिक्रमेप्रायश्चित्तम्	५१–५२
अर्धाधानिनोहोमक्रमः ...	५२
सुसमिद्धेग्नौहोमविधानम् ...	५२
अग्निधमनसाधनानि	५२
होमद्रव्याणि	५२
आहुतिमानम्	५२
आपत्कालेहोमप्रकारः ...	५२
समस्यहोमः	५२
पुनराधानप्रसगाः	५२
औपासनविच्छेदेप्रायश्चित्तम् .	५३
ग्रामसीमालक्षणम्	५३
ब्रह्मचारिणोऽग्निकार्यम् ...	५३
अग्निकार्यलोपेप्रायश्चित्तम् ...	५३
ऋत्विजानियमाः	५३
व्रतिनामभक्ष्यवस्तूनि	५

विषया	पत्रं
दिनद्वितीयेदेवपूजापचमेवा	५४–७१
नित्यदानम्	५४
शुभवस्त्रालंभ.	५४
तृतीयभागेदेवादिदर्शनानि	५४
चतुर्थभागेमध्याह्नस्नानम्	५४
मृदास्नानेनिपिद्धदिनानि	५४
गोमयस्नानम्	५५
बौधायनोक्त स्नानविधिः	५५
कात्यायनोक्त स्नानविधिः	५५
आश्वलायनपरिशिष्टोक्तस्नानम्	५५
पाद्मभविष्योक्त स्नानविधिः	५५
स्नानगताभेदा	५६
अनेकस्नानानायुगपत्प्राप्तौव्यवस्था	५६
स्नाननिमित्तानि	५६
अत्यजपरिगणनम्	५६
एकशाखैकपाषाणयोश्चाडालोपवेशे	५७
स्पृष्टास्पृष्टिविचार	५७
रात्रिस्नानेविशेषः	५७

विषयाः	पत्रं
रजस्वलायाआतुरायाःशुद्धि·	५८
आमलकस्नानम्	५८
अभ्यगस्नानम्	१२–५८
तिथ्यृक्षपरत्वेनविहितनिषिद्धदिनानि	५८
उष्णोदकस्नानम्	५९
मंत्रस्नानंवह्वृचपरिशिष्टे	५९
विभूतिस्नानम्	५९
स्नानप्रकार क्रियासारे	६०
पंचमहायज्ञा	६०
ब्रह्मयज्ञ	६०
तद्विधिस्तैत्तिरीयकश्रुतौ	६०
पचयज्ञाकरणेप्रायश्चित्तम्	६१
पचमहायज्ञाधिकारिणः	६२
तर्पणेतिलग्रहणविचारः	६२
मन्वाद्यायुगाद्याश्च	६३
कस्मिन्संस्कारेकतिदिनंतर्पणंवर्ज्यम्	६३
आर्द्रवाससाप्यभ स्थेनकर्मकार्यम्	६३
उद्धृतजलेनतर्पणेविशेष	६३

विषया	पत्रं
पितृगाथायांतर्पणप्रशंसा	६४
पितृगणक्रमोवोपदेवस्य	६४
अत्रसविस्तरोनिर्णय.	६४
विधवाकर्तृकतर्पणम्	६५
तर्पणेदर्भा कथंग्राह्या·	६५
अंजलिसंख्या	६५
प्रत्यंजलिमंत्रावृत्तिः	६६
अंजलिनातर्पणनिर्णय.	६६
तर्पणेविभक्तिविचार·	६६
संबुद्ध्यतेनद्वितीयातेनवातर्पणम्	६७
नामाज्ञानेबौधायनः	६७
काडर्ष्यादितर्पणम्	६८
यमतर्पणेविशेष·	६८
भीष्मतर्पणम्	६८
मोदप्रमोदादितर्पणम्	६९
श्राद्धागतर्पणम्	६९
वस्त्रनिष्पीडनविचार	७०

विषया.	पत्र
मध्याह्नसंध्या	७०
देवपूजा	५४–७१
पूजापात्राणि	७१
पूजोपचारक्रम.	७१
देवप्रबोधनम्	७२
प्रतिमाविचार.	७२
मधुपर्कमानम्	७३
देवानास्नानप्रकारः	७३
ताम्रप्रतिमायामपिगव्यासिषेक·	७३
स्नानादिपुद्रव्यमानम्	७३
महाभिषेकस्नानमानम्	७३
माषपलादिमानम्	७३
वस्त्रादिविचार.	७३
यक्षकर्दम	७४
पुष्पार्पणविचार·	७४
निषिद्धपुष्पाणि	७४
पर्युषितविचारः	७४

विषयाः	पत्रं
तुलसीग्रहणादौविशेषः	७५
अधोमुखपुष्पार्पणनिषेधः	७६
लक्षपूजायाविशेषः	७६
विल्वपत्रेषुविशेषः	७६
धूपविचारः	७६
विजयधूप	७६
दीपविचार	७६
वर्त्यादिप्रमाणम्	७७
दीपनिर्वाणनिषेधः	७७
नैवेद्यविचारः	७७
पक्वान्नैवेद्यवैश्वदेवस्यपूर्वापरीभाव	७७
नैवेद्याशदानम्	७७
फलताम्बूलदानम्	७७
प्रणामविधि	७७
प्रदक्षिणाविधिः	७८
गीतवादित्रादिदानम्	७८
शंखपूजा	७८

विषयाः	पत्रं
शंखमानम्	७८
प्रस्थप्रमाणम्	७८
पूजाधिकारिण	७८
क्षत्रियादीनापूजाप्रकारः	७८
स्त्रीशूद्रविषयेविचारः	७८
देवप्रतिष्ठाधिकारिणः	७८
श्रौतार्चनम्	७९
न्यासादिविधि	७९
पुरुषसूक्तन्यासः	८०
षडंगन्यासः	८०
पुरुषसूक्तेनार्चनक्रमः	८०
पूजान्तेहोम	८०
ब्रह्मविष्णुदुर्गादिपूजाविचारः	८०
पौराणक्रमः	८१
आगमोक्तक्रमः	८१
पंचायतनस्थापनविचारः	८१
पूज्यपूजकातरालंप्राची	८१

विषयाः	पत्रं
पूजनेदिङ्नियम	८१
सूर्यपूजा	८१
परार्थपूजाजपादौदोषः	८१
पुष्पविचारः	८२
गणेशपूजा	८२
पुष्पाध्यायोदेवीपुराणीय	८२
शिवपूजा	८३
रुद्राक्षधारणविचारः	८३
शिवमूर्तिलिंगादिविचारः	८४
शिवनाभिलिंगलक्षणम्	८४
लिंगमानम्	८४
बौधायनोक्तशिवपूजा	८४
शिवपूजायाविशेष	८५
विहितनिषिद्धपुष्पाणि	८५
धूपविचारः	८६
प्रदक्षिणाप्रमाणम्	८६
सोमसूत्रविचारः	८६

विषयाः	पत्रं
शिवनिर्माल्यलंघननिषेधः	८६
पुरुषार्थप्रबोधेचतुर्वर्णव्यवस्था	८७
नैवेद्यग्रहणाग्रहणविचारः	८७
चंडाधिकारः	८७
विष्णुनैवेद्योग्राह्यः	८८
विष्णुपूजा	८८
विष्णुपूजाप्रशंसा	८८
केशवादिचतुर्विंशतिमूर्तयः	८८
पंचायतनपूजासारेशालग्रामपूजाविचारः	८९
पूजालोपेदिनसंख्ययार्चाशुद्धिः	८९
चंद्रिकायाविष्णुपूजाविधिः	८९
अन्नपुष्पाणि	९०
द्वात्रिंशदपराधाः	९०
प्रकारांतरेणद्वात्रिंशदपराधाः	९१
शालग्रामचिह्नविशेषेणमूर्तयः	९१
पूज्यशालिग्रामपरिगणनम्	९१

श्रीगणेशायनमः ॥ श्रीवेदपुरुषायनमः ॥ **मंगलाचरणम्** । सिंदूरारुणगंडदेवंविघ्नौघतिमिरमार्तंडम् । नृत्यन्छुडादंडसिद्धीशंगणपतिं वंदे ॥ १ ॥ सतिमिरजगदुद्द्योतद्युमणेर्वंशांकुरःश्रीमत् । तज्जयतिरामनामरजनिचराणांविभेदनंधाम ॥ २ ॥ नारायणराजभिरर्चितांघ्रिनमामिहंसीवयदीयकीर्तिः । तेजोंतरात्तन्महसांविभेदंस्वस्यापिकीर्त्येतरतस्तमाह ॥ ३ ॥ विद्याप्रद्योतनोद्द्योतखद्योतीकृतवादिनम् । पितररामकृष्णाख्यंवंदेस्नेहभरान्वितम् ॥ ४ ॥ स्पर्धामग्निनिवेशादुमयाप्राप्तामुमासमाख्यातः । द्युनदीनिर्मलचित्तांमातरमेकांसतीसदावदे ॥ ५ ॥ येनोद्धृतास्वस्यकुलप्रतिष्ठामहावराहेणमहीवतोयात् । गंगेवविद्याभिससारयस्माद्दिवाकरनौमितमग्रजाग्र्यम् ॥ ६ ॥ अधीत्यलक्ष्मणाख्येनकमलाकरसोदरात् । आचाररत्नसुधियायथामतिवितन्यते ॥ ७ ॥ ॥ **तत्रपरिभाषा** ॥ ॥ तत्रविधिरूपआचारेशुचित्वमधिकारितावच्छेदकम्—सदाकुर्याद्धर्मकार्यमापद्यपिशुचिर्नर इति**टोडरानंदेससर्पिस्मृतेः** । श्रुतिस्मृत्युदितकर्मनकुर्यादशुचिःक्वचिदिति**प्रयोगपारिजातेभृगूक्तेश्च** । अतएव**त्रिकांडमंडनः**—पतितोनैवकुर्वीतशास्त्रीयंकर्मकिंचन । अद्विजेष्वेवयोधर्मोधर्मःसाधारणोऽपिवा । सत्यंवक्तव्यमित्यादिःपतितोऽपिसमाचरेत् । नन्वेवंपतितस्यस्नानसंध्यादिनस्यात् । स्यात् । सचतेपूदकोपस्पर्शीशुद्ध्येदिति**गौतमोक्तेः** पतितस्यस्नानांगमंत्रप्राप्तिः सांगाधिकारन्यायात् । नचमंत्रहीनंस्नानम् । तद्राहित्यविध्यभावात् । अतएवाशौचेपिसमंत्रकंस्नानंभोजनंचभवतीत्युक्तं **स्मृत्यर्थसारे** । शुचिनाकर्मकर्तव्यमित्यस्यसर्वकर्मसाधारण्याच्छौचार्थसंध्याप्राप्तिः । संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मस्विति**स्मृतेः** । अत्रसंध्यापदंसर्वसंध्यापरमविशेषादिति**विज्ञानेश्वरः** । नचद्विजातिकर्मभ्योहानिः पतनमितिवचनान्नसंध्येतियुक्तम् । पतितस्यव्रतोपदेशात्तदंगत्वेनैवसंध्यादिप्राप्तेः । वचनंत्विज्याध्ययनादिनिवृत्त्यर्थमिति**विज्ञानेश्वरः** । तेनव्रतारंभात्प्राक्पतितावस्थायांसंध्यादि नेतिसिद्धम् । **त्रिकांडमंडनः**—पतितोऽपिनिषिद्धानांवर्जनेऽधिकृतोभवेदिति । **केचितु**—अदीक्षितस्यवामोरुकृतंसर्वंनिरर्थकमितिपाद्मात्**कार्तिकमाहात्म्या**

दागमदीक्षाप्यधिकारिविशेषणमित्याहुः । तन्न । उपक्रमानुरोधेनतस्यकार्तिकव्रतमात्रपरत्वात् । अनर्थकंपरमपुरुषार्थसाधनंनेत्याचारचं
द्रोदयः। शक्तिश्चाधिकारिविशेषणम् । तदभावेऽन्येनकारणीयं षाष्ठन्यायात् ।—यथाकथंचिन्नित्यानिशक्त्यवस्थानुरूपतः । येनकेनापिका
र्याणिनैवनित्यानिलोपयेदिति **माधवीयेबौधायनोक्तेश्च**। यथाकथंचित्किंचिदङ्गहीनेनापीत्यर्थः। येनकेनापि स्वतःपरतोवेत्यर्थः । नित्या
नीतिनैमित्तिकप्रारब्धकाम्योपलक्षणम्। नैत्यिकस्याप्यकरणेप्रत्यवायात्। समाप्तेःशास्त्रार्थत्वेनप्रारब्धंकाम्यंनित्यायतइतिन्यायाच्च । **यत्तु**—का
म्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेचसइति तदनारब्धकाम्यपरम्। अन्येनाप्यसंभवेनदोषः। अत्यंतरोगयुक्तेंगेराजचौरभयादिषु । गुर्वग्निदेवकृत्ये
षुनित्यहानौनपापभागितिमा**धवीयेशैवागमात्** । अत्रनित्यपदेनप्रारब्धकाम्यग्रहणम् । औपदेशिकनित्यग्रहेणैवसिद्धावातिदेशिकनित्यग्रहे
मानाभावात् । शौचेस्नानादौचनप्रतिनिधिः । अन्यशौचेनान्यस्याप्रायत्यानपगमात् । मंत्रस्नानादिविधिवैयर्थ्यापत्तेश्च । उपवासोऽप्यधिका
रिविशेषणम् । स्नानंसंध्यातर्पणादिजपहोमामरार्चनम् । उपवासवताकार्यंसायंसंध्याहुतीर्विनेति**वाराहात्** । उपवासवताऽनश्नतेत्यर्थः । उप
वासोऽनशनम् । अनुवादोयम्—सायंप्रातर्द्विजातीनां उपास्यपश्चिमांसंध्यामित्यादिनैवसिद्धेरितिकेचित् । तन्न । इहवचनाभावेकर्मवैगुण्या
नापत्तेः । सायंसंध्याहुत्योःपौर्वाह्निकस्यच भोजनोत्तरपूर्वकालत्वसिद्धावपिमाध्याह्निकादेरनश्नदधिकारित्वासिद्धेश्च । इक्षुरापःफलंमूलतांबू
लंपयऔषधम् । भक्षयित्वापिकर्तव्याःस्नानदानादिकाःक्रिया इति**चतुर्विंशतिमतेस्मृत्यर्थसारे**चेक्ष्वादिपरिगणनानुपपत्तेश्च । नचायम
पूर्वविधिः । रागतःप्राप्तेः । नापिभक्षयित्वैवेतिनियमः । अपिशब्दवैयर्थ्यापत्तेः । इक्ष्वादिभक्षणोत्तरमनाचम्यापिक्रियाःकार्याइति**स्मृतिरत्ना
वली** । तन्न—आचांतःकर्मशुद्धःस्यात्तांबूलौषधजग्धिकृदिति**विष्णूक्ति**विरोधात् । अनाचम्येत्यध्याहारप्रसंगाच्च । तस्मादशक्तंप्रत्येतदपि
शब्दादितियुक्तम् । अस्नाताशीमलंभुंक्तेअजपीपूयशोणितम् । अहुताशीकृमीन्भुंक्तेअदत्वाविड्भोजनः । अजपीअदत्वेत्यत्राशीत्यनुषज्यते ।

कालिकापुराणे—जलस्नापिनरश्रेष्ठप्राशनाद्रेपजायते । नित्यक्रियानिवर्तेतकाम्यनैमित्तिकै:सह । शिवपुराणे—उपवासयुतःकर्मशिव पूजादिकंचरेत् । स्नानमप्यधिकारिविशेषणम्—स्नातोऽधिकारीभवतिदैवेपित्र्येचकर्मणि । पवित्राणांतथाजप्येदानेचविनिदर्शित इतिवर्धमान परिभाषायांविष्णूक्तेश्च । पवित्रंपुनातेमैत्रःपवित्रमुच्यतइतिनिरुक्तात् । अस्नात्वानाचरेत्कर्मजपहोमादिकिंचनेतिदक्षोक्तेश्च । आग्नेये— स्नानानामपिसर्वेषावारुणेनचमानवः । कर्तुमर्हतिकर्माणिविधिवत्सर्वदाद्विजः । मार्कंडेये—शिरःस्नातस्तुकुर्वीतदैवंपित्र्यमथापिवा । आ ग्नेये—अशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणाम् । तथा—असामर्थ्याच्छरीरस्यकालशक्त्याद्यपेक्षया । मंत्रस्नानादयःपंचकल्पयन्तिसुराः । आर्द्रेणवाससावापिमार्जनंदैहिकंविदुः । उपवीतित्वंबद्धशिखत्वंचाधिकारिविशेषणम् ।—सदोपवीतिनाभाव्यंसदाबद्धशिखेनच । विशिखो व्युपवीतश्चयत्करोतिनतत्कृतमितिकात्यायनोक्तेः ॥ ॥ उपवीतंद्विधा—नवसूत्रसंस्थानविशेषश्च । तत्राद्यशूद्रस्यनेत्युक्तमिताक्षरा याम् । अत्यशूद्रस्यापिभवति । उपवीतिनाकर्मकर्तव्यमित्यस्यापिसर्वकर्मशेषत्वेनशूद्रस्याप्यदृष्टार्थकर्मण्युपवीतावश्यंभावात् । यत्तुशूद्रंप्र कृत्य—नशिखीनोपवीतीस्यान्नोच्चरेत्संस्कृतागिरमितिपाश्नंतदसच्छूद्रपरमकर्मकालपरंनवसूत्रपरंवा । उपवीतान्युत्तरीयवस्त्रेणापीतिपारिजा तकल्पतरू । विश्वामित्रः—यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि । तृतीयमुत्तरीयार्थंवस्त्राभावेतदिष्यते । तृतीयमुत्तरीयार्थमित्येताव तैवानुकल्पत्वेसिद्धेवस्त्राभावइत्युक्तिरुत्तरीयाभावएवानुकल्पत्वार्था । तेनतृतीयेधृतेउत्तरीयलाभेतदपिधार्यमितिकेचित् । तन्न । एकस्यैवकदा चिदनुकल्पत्वेप्राधान्येचविरोधात् । वयंतूत्तरीयस्यसर्वकर्मार्थत्वात्प्रतिकर्मधारणानुपपत्तेश्चतदुपवीतवत्सर्वार्थंसकृदेवधार्यम् । एवंतृतीयोप वीतमपितदंगीकारेणकर्मविशेषारंभोत्तरमुख्योत्तरीयलाभेपिनतद्ग्रहः । पाठन्यायात् । नचतृतीयत्यागापत्तिः । सर्वार्थत्वेनधृतत्वात् उत्तरीय

१ रोगिणामिति पाठ । २ उत्तरीयार्थं ।

स्यसर्वदासत्त्वासंभवादितियुक्तमुत्पश्यामः । शिष्टाचारोप्येवम् । **उपवीतमुक्तंगोभिलसूत्रे**—उपवीतंकुरुतेसूत्रंवस्त्रंवाकुशरज्जुमिति । सूत्रोपवीतकरणप्रकारश्छं**दोगपरिशिष्टे**—शुचौदेशेशुचिःसूत्रंसंहतांगुलिमूलके । आवेष्ट्यषण्णवत्यातत्त्रिगुणीकृत्ययत्नतः । त्रिगुणीकृत्य षण्णवतित्रयंगृह्णीयादित्यर्थः । अब्लिंगकैस्त्रिभिर्मंत्रैःप्रक्षाल्योर्ध्ववृतंत्रिवृत् । सप्रदक्षिणमावर्त्यगायत्र्यात्रिगुणीकृतम् । ततःप्रदक्षिणावर्तंसमं स्यान्नवसूत्रकम् । त्रिरावेष्ट्यदृढंबद्ध्वाब्रह्मविष्णवीश्वरान्नमेत् । यज्ञोपवीतंपरममितिमंत्रेणधारयेत् । सूत्रंसलोमकंचेत्स्यात्ततःकृत्वाविलोमकम् । सावित्र्यादशकृत्वोद्भिर्मंत्रिताभिस्तदुक्षयेत् । विधवारचितंसूत्रमनध्यायकृतंचयत् । विच्छिन्नंवाप्यधोयातंभुक्त्वानिर्मितमुत्सृजेत् । अधःकटि देशात् ॥ ॥ **ऊर्ध्ववृतलक्षणंमदनरत्ने**—करेणदक्षिणेनोर्ध्वगतेनत्रिगुणीकृतम् । वलितंमानवेशास्त्रेसूत्रमूर्ध्ववृतंस्मृतम् । **श्राद्धालोके देवलः**—यज्ञोपवीतंकुर्वीतसूत्राणिनवतंतवः । एकेनग्रंथितस्तंतुर्द्विगुणस्त्रिगुणोथवा । त्रिगुणनवतंतुकासंभवेएकेनेति**गोपालसिद्धांतः** । **हरनाथीयेश्राद्धालोकेचवृद्धमनुः**—त्रिवृताग्रंथिरेकेनत्रिभिःपंचभिरेववा । एकेनैतत्प्रवरसंख्ययाग्रंथौचवेष्टनमितिह**रनाथः** । **रत्ना वल्याम्**—यज्ञोपवीतेमौंज्यांचतथाकुशपवित्रके । ब्रह्मग्रंथिंविजानीयादन्यत्रतुयथारुचि । **देवलः**—सावित्र्यात्रिवृतंकुर्यान्नवसूत्रंचतद्भ वेत् । बध्नीयात्तत्सजीवंतुपितृभ्योनमइत्यथ । अमदेवोक्षितव्यंस्यात्पितॄणांतृप्तिदंहितत् । त्रिस्ताडयेत्करतलेदेवानांतृप्तिदंहितत् । सव्येमृदं गृहीत्वास्मिंस्थापयेद्भूरितिब्रुवन् । अभिमंत्र्याथभूरग्निश्चेतिवृत्तत्रयंत्रिभिः । हरिब्रह्मेश्वरेभ्यश्चप्रणम्यचदधात्यथ । **मनुः**—ॐकारश्चाग्निनागौच सोमःपितृप्रजापती । वायुःसूर्यःसर्वदेवाइत्याहुस्तंतुदेवताइति॥ ॥**उपवीतमानंछंदोगपरिशिष्टे**—पृष्ठवंशेचनाभ्यांचधृतंयद्विंदतेकटिम् । तद्धार्यमुपवीतंस्यान्नातोलंबंनचोच्छ्रितम् । **देवलः**—स्तनादूर्ध्वमधोनाभेर्नकर्तव्यंकदाचन । **मदनरत्नेभृगुः**—उपवीतंबटोरेकंद्वेतथेतरयोः स्मृते । एकमेवयतीनांस्यादितिशास्त्रविनिश्चयः । इतरौगृहिवनस्थौ । यतिस्त्रिदंडी । **स्मृत्यर्थसारे**—ब्रह्मचारिणएकंस्यात्स्नातस्यद्वेबहूनिवा ।

आपस्तंबः—वहूनिवायुष्कामस्येति । **हेमाद्रौभरद्वाजः**—दक्षिणंवाहुमुद्धृत्यवामस्कंधेनिवेशितम् । यज्ञोपवीतमित्युक्तंदेवकार्येषुश
स्यते । कंठावलंबितंचैवब्रह्मसूत्रंयदाभवेत् । तन्निवीतमितिख्यातंशस्तंकर्मणिमानुषे । उत्क्षिप्तेवामवाहौतुदक्षिणस्कंधमाश्रितम् । प्राचीनावीत
मित्युक्तंतत्पित्र्येष्वेवकर्मसु । **कृष्णभट्टीयेऽत्रिः**—ऋषितर्पणचंडालभाषणेशववाहने । विण्मूत्रोत्सर्जनेस्त्रीणांरतिसंगेनिवीतयः । **देवलः**—
सकृच्चोद्धरणात्तस्यप्रायश्चित्तीयतेद्विजः । **आशार्के**—मंत्रन्यस्तोपवीतयन्नोद्धरेत्तत्कदाचन । मोहाद्द्विजस्तदुद्धृत्यपुनर्मंत्रेणधारयेत् । **हेमा
द्रौभृगुः**—मंत्रपूतंस्थितंकार्येयस्माद्यज्ञोपवीतकम् । नोत्तारयेत्ततःप्राज्ञोयइच्छेच्छ्रेयआत्मनः । देहस्थमेवतत्क्षाल्यमुत्तार्यंनकदाचन । **कृष्ण
भट्टीयेआचारचंद्रोदयेचभृगुः**—चैत्रोमैत्रःकठःकण्वश्चरकोवाजसेनकः । कंठादुत्तीर्यसूत्रतुकुर्याद्वैक्षालनंद्विजः । वहृचःसामगश्चैवयश्चा
न्योयाजुषस्तथा । कंठादुत्तार्यसूत्रंतुपुन संस्कारमर्हति । अभ्यंगेचोदधिस्नानेमातापित्रोःक्षयेहनि । कंठादुत्तार्यसूत्रंतुकुर्याद्वैक्षालनंद्विजः । **श्राद्धा
लोकेयमः**—श्राद्धेधावनकालेचतैलाभ्यगादिकर्मणि । अन्नकायाद्बहिःकुर्यान्नान्यत्रेत्यब्रवीन्मनुः । **अपरार्के**—उपानहौचवासश्चधृतमन्यै
र्नधारयेत् । उपवीतमलंकारंछत्रंकरकमेवच । **टोडरानंदेगौतमः**—उपानद्वस्त्रेतुकृतनिर्णेजनेआपदिधार्येइति । **मनुः**—मेखलामजिनंदंडमु
पवीतंचनित्यशः । अप्सुप्रास्यविनष्टानिगृह्णीतान्यानिमंत्रतः । **हारीतः**—मनोव्रतपतीभिश्चतस्रआज्याहुतीर्हुत्वापुनर्यथार्थप्रतीयादिति ।
यथार्थप्रतीयात् उपनयनोक्तमार्गेणसमंत्रकधारयेदित्यर्थः ॥ ॥ **स्कंधावरोहणेप्रायश्चित्तमुक्तंभृगुणाधर्मप्रकाशे**—स्कधावरोहणे
यज्ञसूत्रेत्रिःप्राणसंयमः। षट्कूर्परगतेतस्मिन्द्विषट्कंमणिबंधके । वामहस्तव्यतीतेतुतत्त्यक्त्वाधारयेन्नवम् । तस्माद्यज्ञोपवीतस्यचलनंनकदाचनेति
प्रायश्चित्तंसर्वोपवीतनाशे ॥ ॥ **कात्यायनवाक्येपूर्वार्धेपुरुषार्थःशिखाबंधउक्तः** । उत्तरार्धेतस्यकर्मार्थतोक्ता । प्रायश्चित्तद्वयार्थमनृतवदनवर्जनव
त्नतुशिखाबंधद्वयंउपवीतेऽपिभेदापत्तेरित्युक्त**प्रयोगरत्नेपितामहचरणैः** । **वर्धमानोप्प्येवम्** । एतेनप्रतिकर्मशिखाबंधोऽपास्तः । या

तुस्नानकालेशिखाबंधोक्तिःसादैवान्मुक्तशिखस्यशिखाबंधार्थंनतुसतीमपिशिखांमुक्त्वापुनर्बंधनीयेत्येतदर्थमित्या**चारादर्शः** । शूद्रस्यत्वनियताःकेशवेषाइति**वसिष्ठोक्तेः**शिखाविकल्पः । सचसदसच्छूद्रविषयत्वेनव्यवस्थितइतिशिखाबंधेपिविकल्पइति**शूद्राचारशिरोमणिः** । **कौमुद्यां**तुकर्मकालेशूद्रस्यनशिखाबंधनियमइत्युक्तम् । सर्वेषांशिरसिक्वचित्केशसत्वेतत्रैवशिखाबंधः । सशिखवपनेनखल्वाटत्वादिनावासर्वथाकशाभोवकौशीशिखाब्रह्मग्रंथियुतादक्षिणकर्णेस्थाप्येति**दिवोदासः** । तथा**चाचारचंद्रोदयेकाठकगृह्ये**—अथचेत्प्रमादान्नशिखास्यात्तदाकौशीशिखांब्रह्मग्रंथियुतांदक्षिणकर्णेनिदध्यादिति । शिखाभिन्नकेशानामपिकर्मकालेबंधः । मुक्तकेशैर्नकर्तव्यंप्रेतस्नानंविनाक्वचित् । स्नानंदानंजपंहोमंमुक्तकेशोनकारयेदिति**वृद्धवसिष्ठोक्तेः** । नचपूर्वार्धेप्रेतस्नानान्यस्नानएवमुक्तकेशनिषेधः । उत्तरार्धेस्नानपदवैयर्थ्यापत्तेः । स्नानेतदनुवादेदानादौतद्विधौवैरूप्यापत्तेः उत्तरार्धेएवसर्वत्रतन्निषेधेवाक्यभेदापत्तेःपूर्वार्धवैयर्थ्यापत्तेश्च । नचप्रेतस्नानपर्युदासार्थंपूर्वार्धं । आद्यपादवैयर्थ्यापत्तेः । तेनोत्तरार्धैकवाक्यतया प्रेतस्नानान्यकर्ममात्रेमुक्तकेशनिषेधः । नचोत्तरार्धवैयर्थ्यम् । सर्वकर्मप्राप्त्यर्थत्वात् । नचकेशपदंशिखापरम् । लक्षणायांमानाभावात् । मुक्तकेशइत्यत्रापितथापत्तेश्च ॥ ॥ **उत्तरीय**मप्यधिकारिविशेषणम् । सोत्तरीयस्ततःकुर्यात्सर्वकर्माणिभावितइति**ब्रह्मांडात्** । **यत्तु**—कर्तव्यमुत्तरंवासःपंचस्वेतेषुकर्मसु । स्वाध्यायोत्सर्गदानेषुभोजनाचमनेतथेति**बौधायनोक्तौ**पंचग्रहणानर्थक्यप्रसंगान्नसर्वत्रवस्त्रद्वयनियमइति । तन्न । सर्वत्वस्यानुपसंहार्यत्वात् । अतःसर्वत्रवस्त्रद्वयनियमइति**माधवः** ॥ ॥ **आचमन**मप्यधिकारिविशेषणम् । देवार्चनादिकार्याणितथागुर्वभिवादनम् । कुर्वीतसम्यगाचम्यप्रयतोपिसदाद्विजइति**मार्कंडेयात्** । यःक्रियाकुरुतेमोहादनाचम्येहनास्तिकः। भवंतिहिवृथातस्यक्रियाःसर्वानसंशयइति**वर्धमानपरिभाषायांवायुपुराणाच्च** ॥ ॥ **प्राणायामोपि**—प्राणानायम्यकुर्वीतसर्वकर्माणिसंयतइति**वृद्धमनूक्तेः** । **प्रयोगपारिजातेसंग्रहे**—देवार्चनेजपेहोमेसंध्ययोःश्राद्धकर्मणि । यागेदानेव्रतेस्नानेप्र

णायामास्त्रयस्त्रयः । **प्रणवोपि**—त्रिमात्रस्तुप्रयोक्तव्यःकर्मारंभेषुसर्वतइतिस्मृतेः । सर्वतइतिसार्वविभक्तिकस्तसिः । अनोंकृत्यकृतंसर्वंनभवेत्सि
द्धिकारकमितिशांतिहेमाद्रौयोगियाज्ञवल्क्योक्तेश्च ॥ ॥ **विद्वत्तापि**—नह्यविद्वान्विहितोस्तिहि विदुषएवकर्मण्यधिकारात् ॥
॥ आर्षछंदोदैवतंचविनियोगस्तथैवच । ब्राह्मणेनप्रयत्नेनवेदितव्यंविपश्चिता । अविदित्वातुयःकुर्याद्याजनाध्यापनंजपम् । होममंतर्जलादीनि
तस्यचाल्पफलंभवेदितितत्रैवतदुक्तेश्च—मंत्रार्थज्ञोजपन्जप्यंकुर्वन्नध्ययनद्विजः । स्वर्गलोकमवाप्नोतिनरकतुविपर्ययेइति**प्रयोगपारिजातेव्या
सोक्तेः** । अविदित्वामुनिंछंदोदैवतंयोगमेवच । योऽध्यापयेद्यजेद्वापिपापीयान्जायतेहिसः । ब्राह्मणंविनियोगचछंदआर्षंचदैवतम् । अज्ञात्वा
पंचयोमन्त्रेनसतत्फलमश्नुतइति**चंद्रिकायांव्यासोक्तेश्च** । अयमेवऋष्यादिस्मरणक्रमः । **यजुसर्वानुक्रमे**ऋपिदैवतच्छंदांस्यनुक्रमिष्या
मोनह्येतज्ज्ञानमृतेश्रौतस्मार्तकर्मप्रसिद्धिरिति तदृग्वेदिपरम् । अथऋग्वेदाम्नायेशाकलकइत्युपक्रमात् । **कृष्णभट्टीयेसंग्रहे**—नचस्मरे
दृषिच्छंदःश्राद्धेवैतानिकेमखे । ब्रह्मयज्ञेचवैतर्हियज्ञतर्पणकर्मणिइति ॥ ॥ **कटिसूत्रं**गृहस्थेनधार्यम् । कौपीनंकटिसूत्रंचब्रह्मचारीतुधारयेदिति
यमोक्तस्तस्य सर्वेषांचैतदविरोधीति**गौतमीये**गृहस्थादावतिदेशात् । गृहस्थस्यकौपीननिषेधानुपपत्तेश्चेतिकेचित् । तन्न । यत्किंचित्कुरुतेध
र्मंवैदिकंवाथतांत्रिकम् । कटिबधेनसंयुक्तंसर्वतन्निष्फलंभवेत् । रौप्यंकार्पासकंहैमंपट्टसूत्रकृतंतथा । वर्जयेत्कर्मकालेषुकांचीविप्रोविशेपत इति**सं
स्कारप्रयोगपारिजातेगृहस्थधर्मेष्वाश्वलायनोक्तेः** । कटिबंधःकटिसूत्रबंधः । प्रकरणाद्गृहस्थस्यैवायंनिपेधः । कर्मकालग्रहादकर्मकाले
ननिषेधः । रौप्यादेरेवनिषेधेत्यंतादृष्टार्थत्वापत्तेरौर्णादेरपिनिषेधः । श्रुतौ नम्लेच्छितवैनापभाषितवैम्लेच्छोहवाएषयदपशब्दइतितत्कर्मकालपरम् ।
पर्वाणस्तर्वाणोनामऋषयोबभूवुस्तेपर्वाणस्तर्वाणइतिप्रयोक्तव्येयद्वानस्तद्वानइतिप्रयुजतेयाज्ञेपुनःकर्मणिनापभाषंतइतिश्रुतेरितिकेचित् । अन्ये
तु तेसुराहेलयोहेलयइतिवदंतःपराबभूवुरित्यकर्मकालेपिदोषश्रुतेरकर्मकालेप्यपभाषणेदोषइत्याहुः । **पृथ्वीचंद्रोदयेनारदः**—आसनेशयने

दानेपादुकादंतधावने । पलाशाश्वत्थकौवर्ज्यौसर्वकुत्सितकर्मसु ॥ ॥ **विष्णुः**—संकल्प्यचयथाकुर्यात्स्नानदानव्रतादिकम् । अन्यथापुण्य कर्माणिनिष्फलानिभवंतिवै । यथा यथावदित्यर्थः। पुण्येत्युक्तेःशौचभोजनादौदृष्टार्थे नसकल्पः । **कालहेमाद्रावादित्यपुराणे**कलिवर्ज्य प्रकरणे—प्रतिमाभ्यर्चनार्थायसंकल्पश्चसधर्मकः । वर्ज्यइत्यर्थः । **हारीतः**—स्मरेत्सर्वत्रकर्मादौचांद्रंसंवत्सरंसदा । **गर्गः**—तिथिनक्षत्र वारादिसाधनंपुण्यपापयोः । **प्रयोगदीपिकायाम्**—मासपक्षतिथीनांचनिमित्तानांचसर्वशः । उल्लेखनमकुर्वाणोनतस्यफलमाप्नुयात् । निमित्तपदंमासादिपदविशेषणमिति**मैथिलाः** । तन्न । सक्रमादिनिमित्तानुल्लेखनापत्तेः । **गोपालसिद्धांतस्तु**—निमित्तपदंमासादिविशे षणमनिमित्तमासाद्यनुल्लेखार्थं । चकाराद्ग्रहणादिग्रहः । यद्वा चःउक्तसमुच्चये । निमित्तपदेननिमित्तत्वावच्छिन्नग्रहइत्याहुः । तदपिन । चद्वयेनवि शेषणत्वाप्रतीतेः । सर्वशइत्यनेनैवनिमित्तत्वावच्छिन्नग्रहाच्च । एवंच पृथङ्मासादिग्रहोऽनिमित्ताद्यर्थोवामासादिशब्दोल्लेखपरोवा । व्यतीपाताद्य नेकनिमित्तपातेकस्यचिदनुल्लेखेतन्निमित्तंस्नानादिपुनःकार्यमिति**हेमाद्रिः** । उक्तंच—उद्देशेनहितादर्थ्यंविविच्यइति तिथेरौदयिक्याउल्लेखः । यांतिथिसमनुप्राप्यउदयंयातिभास्करः । सातिथिःसकलाज्ञेयादानाध्ययनकर्मस्वितिवचनात् । व्रतोपवासस्नानादौघटिकैकापियाभवेत् । उदयेसा तिथिर्ग्राह्याविपरीतातुपैतृकइत्य**परार्के भविष्या**च्चेतिकेचित् । **अन्येतु**—कर्मणोयस्ययःकालस्तत्कालव्यापिनीतिथिः । तयाकर्माणिकुर्वी तह्रासवृद्धीनकारणमितिवाक्यान्नित्यस्नानकालेवर्तमानतिथेरुल्लेखः । पूर्ववाक्यंतुद्वितीयादियुक्तप्रतिपद्व्रतादौद्वितीयादावपिप्रतिपदाद्युल्लेखपरं वा दिनद्वयेकर्मकालव्याप्त्यभावेउदयस्थतिथेःसंपूर्णतापरंवेत्याहुः ॥ ॥ नित्यकर्मणामुपात्तदुरितक्षयार्थत्वमितिकेचित् । **भट्टसोमेश्वरस्तु** सर्वोपात्तक्षयेऽन्यानर्थक्यात्कस्यचित्क्षयेविनिगमकाभावात्तेषांप्रत्यवायपरिहारार्थत्वमाह । **प्रयोगपारिजातस्तु**—ब्रह्मण्याधायकर्माणिनिः संगः कामवर्जितः। प्रसन्नेनैवमनसाकुर्वाणोयातितत्पदमिति**चंद्रिकायांकौर्मा**द्ब्रह्मार्पणबुद्ध्यानित्यकर्माणिकार्याणीत्याह । ब्रह्मण्याधानंब्रह्मार्पण

मितिचंद्रिका । कामवर्जितइत्युक्तेः काम्यपरतास्यात्तदपितेनैवोक्तम्—नातः कर्तामिवैभेतत्रौ तु कुर्नोमदा । एतत्कार्पणप्रोक्तमृषिभिस्त
त्त्वदर्शिभिः । प्रचेताः—ताम्बूलाभ्यंजनंचैव कांस्यपात्रेचभोजनम् । यतिश्चब्रह्मचारीचविधवाचविवर्जयेत् ॥ ॥ पंचायतनतत्त्वसारेषट्
त्रिंशन्मते—स्नानतर्पणदानेषुताम्रेगव्यंनदुष्यति । होमेकार्यंतथादोहेपाकेचपरिवेषणे । अपरार्केमरीचिः—निंबस्यभक्षणंतैलंतिलैस्त
र्पणमंजनम् । सप्तम्यांनैवकुर्वीतताम्रपात्रेचभोजनम् । भारते—बलिभिक्षातथार्घ्यंचपितृणांचतिलोदकम् । ताम्रपात्रेणदातव्यमन्यथाल्प
फलंभवेत् । श्राद्धहेमाद्रौपैठीनसिः—लौहानासीसकागमरीतिशेषाणिपात्राणिनेष्टायश्रियानि । ब्राह्मे—कृत्वामूत्रपुरीषेचरथ्यामाक्रम्य
वापुनः । पादप्रक्षालनंकुर्यात्स्वाध्यायेभोजनेतथा ॥ ॥ शाट्यायनिः—दानमाचमनंहोमंभोजनंदेवतार्चनम् । प्रौढपादोनकुर्वीतस्वा
ध्यायपितृतर्पणम् । इदंसर्वकर्मोपलक्षणम् । प्रौढपादलक्षणंतेनैवोक्तम्—आसनारूढपादोवाजान्वोर्वाजंघयोस्तथा । कृतावसक्थिकोयश्च
प्रौढपादःसउच्यते । पादोपरिपाददाताप्रौढपादइतिहरदत्तः । तन्न । नाकम्प्यपादपादेननन्यवर्द्धितौकरौ । जंघेनप्रौढपादस्तुनप्रकाशकरः
सदेतिस्मृतिरत्नावल्यांपुनःप्रौढपादोक्तेः ॥ ॥ मदनरत्नेवर्धमानपरिभाषायांचवायवीये—दानप्रतिग्रहोहोमोभोजनंबलिरे
वच । सांगुष्ठेनसदाकार्यमसुरेभ्योऽन्यथाभवेत् । अंगुलिसंगतांगुष्ठेनेतिहेमाद्रिः । बौधायनः—भोजनंहवनंदानमुपहारःप्रतिग्रहः । बहि
र्जानुनकार्याणितद्वदाचमनंस्मृतम् । ज्योतिर्निबंधे—क्षुतस्खलनजृंभासुनृणामायुःप्रहीयते । तदंतरेणकर्तव्योजीवपूर्वोगुलिध्वनिः । मद
नरत्नेविष्णुपुराणे—जीवेतिक्षुवतोब्रूयांजीवेशुक्लवेपिच[1] ॥ ॥ अपरार्केआपस्तंबः—अजाविरेणुसंसर्गादायुर्लक्ष्मीश्चहीयते । श्वका
कोष्ट्रखरोलूकसूकरग्रामपक्षिणाम् । कृष्णभट्टीये—शूर्पवातोनखाग्रांबुस्नानवस्त्रघटोदकम् । मार्जनीरेणुकेशांबुहंतिपुण्यंपुराकृतम् । दिवाकृत

---

[1] जीवेत्युक्त सदैतिच इति पाठ ।

मितिक्वचित्पाठः । घटोदकंघटस्फोटप्रेतकुंभोदकम् । **स्मृतिसारे**—अजारजःखररजस्तथासंमार्जनीरजः । दीपमंचकयोश्छायाहंतिपुण्यंदि
वाकृतम् ॥ ॥ **हारीतः**—समित्पुण्यकुशादीनिश्रोत्रियःस्वयमाहरेत् । शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्व्रजत्यधः । अत्रशूद्रानीतैःक्रयक्रीतै
रितिसामानाधिकरण्येनसंबंधः । अन्यथावेतनदानेनक्रयत्वाविशेषादारामादेःस्वयमपिपुष्पाद्याहरणेदोषापत्तेः । कुशेष्वप्येवम् । अतोद्विजे
भ्यःकुशक्रयेनदोषः । स्वयमितिशक्तपरम् । तेनैवनियमसिद्धौशूद्राहृतनिषेधानुपपत्तेः । तेनस्वाशक्तौशिष्यपुत्राद्याहरणेप्यदोषः । **श्राद्धहे
माद्रौ**—जपेहोमेतथादानेस्वाध्यायेपितृकर्मणि । तत्सर्वंनश्यतिक्षिप्रमूर्ध्वपुंड्रंविनाकृतम् । **स्कांदेकार्तिकमाहात्म्ये**—अधौतेनतुवस्त्रे
णनित्यांनैमित्तिकींक्रियाम् । कुर्वन्फलंनचाप्नोतिदत्तंभवतिनिष्फलम् । **चंद्रिकायांयमः**—अभ्युक्षेत्तुप्रयत्नेनप्रातरात्र्युषितोगृहम् । मध्याह्ने
चैवसायंचनचानभ्युक्षितेयजेत् । **तत्रैवप्रचेताः**—वैश्वानरेणयत्किंचित्कुरुतेप्रोक्षणंद्विजः । गंगातोयसमंसर्वंप्रवदंतिमनीषिणः । **भारते**—
सर्वाणियेषांगांगेयैस्तोयैःकार्याणिदेहिनाम् । गांत्यक्त्वामानवाविप्रदिवितिष्ठंतितेजनाः । **मार्कंडेये**—दीपभांडमयीछायाविभीतककुरंटजा ।
वर्जनीयासदापुत्रयदिजीवितुमिच्छसि । अधोवस्त्रेणयोवायुंकुरुतेशिरसिद्विज । स्थालेनचर्मशूर्पाभ्यांसुकृतंतस्यनश्यति । **भारते**—रक्तंमाल्यं
नधार्यस्याच्छुक्लंधार्यंतुपंडितैः । वर्जयित्वातुकमलंतथाकुवलयंप्रभो । रक्तंशिरसिधार्यंतुतथावानेयमित्यपि । कांचनीयापियामालानसादुष्यतिक
र्हिचित् ॥ ॥ **अग्निपुराणे**—प्रचारेमैथुनेचैवप्रस्रावेदंतधावने । स्नानेभोजनकालेचषट्सुमौनंसमाचरेत् । प्रचारःपुरीषोत्सर्गः । प्रस्रावो
मूत्रोत्सर्गः । अत्रविशेषोवक्ष्यते । **नागदेवाह्निकेंगिराः**—संध्ययोरुभयोर्जप्येभोजनेदंतधावने । पितृकार्येचदैवेचस्नानेमूत्रपुरीषयोः ।
गुरूणांसंनिधौदानेयागेचैवविशेषतः । एषुमौनंसमातिष्ठन्स्वर्गमाप्नोतिमानवः । **चंद्रोदयेयोगीश्वरः**—यदिवाग्यमलोपःस्याज्जपादिषुकथं

१ वैश्वानरोअजीजनदित्यृक् ।

चन । व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययम् । **छंदोगपरिशिष्टे**—यत्रदिङ्नियमोनस्याज्जपहोमादिकर्मसु । तिस्त्रस्तत्रदिशःप्रोक्ताऐंद्रीसौम्यपराजिता । तत्रैव—यत्रोपदिश्यतेकर्मकर्तुरंगंनकथ्यते । दक्षिणस्तत्रविज्ञेयःकर्मणांपारगःकरः । **मनुः**—कुत्सितेवामहस्तःस्याद्दक्षिणःस्यादकुत्सिते । **छंदोगपरिशिष्टे**—आसीनऊर्ध्वःप्रह्वोवानियमोयत्रनेदृशः । तदासीनेनकर्तव्यनप्रह्वेणनतिष्ठता । **श्राद्धदीपकलिकायां विष्णुः**—दक्षिणाभिमुखःकर्मचरेत्पित्र्यंयथाविधि । उत्तराभिमुखोदैवमितिदिङ्नियमःस्मृतः । पित्र्येदक्षिणामुखत्वंचहूचेतरपरम् । तेषां पिंडपितृयज्ञप्रकरणेसर्वकर्माणितांदिशमितिसूत्रेपित्र्येआग्नेयीमुखत्वोक्तेः । **कात्यायनः**—मुख्यकालेयदावश्यंकर्मकर्तुंनशक्यते । गौणकालेपिकर्तव्यगौणोप्यत्रेदृशोभवेत् । **त्रिकांडमंडनः**—स्वकालादुत्तरःकालोगौणःसर्वस्यकर्मणः । उत्तरग्रहान्नपूर्वकालस्यगौणत्वम् । तेनसमस्तपक्षहोमादावल्पद्वादश्यांचमाध्याह्निकस्यचापकर्षे नप्रायश्चित्तम् । उत्तरकालावधिरुक्तोबृहन्नारदीये—दिवोदितानिकर्माणिप्रमादादकृतानिवै । यामिन्याःप्रथमयामंयावत्कर्माणिकारयेत् । **चंद्रोदयेसंग्रहे**—रात्रौप्रहरपर्यंतदिवाकर्माणिकारयेत् । ब्रह्मयज्ञंचसौरंचवर्जयित्वाविशेषतः । रात्रौब्रह्मयज्ञनिषेधस्तैत्तिरीयेतरपरः । तस्यद्वावनध्यायौयदात्माऽशुचिर्यद्देशइतितत्सूत्रात् । **तैत्तिरीयश्रुतौ**रात्रावपिब्रह्मयज्ञोक्तेश्च । नित्यश्राद्धमपिरात्रौवेतिवक्ष्यते । **त्रिकांडमंडनः**—यद्वागामिक्रियामुख्यकालस्याप्यंतरालवत् । गौणकालत्वमिच्छंतिकेचित्प्राक्तनकर्मणि । इदंश्रौतपरम् । **स्मृत्यर्थसारे**—सर्वत्रगौणकालेषुकर्मचोदितमाचरन् । प्रायश्चित्तंव्याहृतिभिर्हुत्वाकर्मसमाचरेत् ।—प्रायश्चित्तमकृत्वावागौणकालेसमाचरेत् । अनयोःपक्षयोःशक्ताशक्तविषयत्वेनव्यवस्थेतिपारिजातः । **रत्नावल्याम्**—मुख्यकालंसमाश्रित्यगौणमप्यस्तुसाधनम् । नमुख्यद्रव्यलोभेनगौणकालप्रतीक्षणम् । **कालहेमाद्रौस्कांदे**—यदाभवतिचाल्पातुद्वादशीह्यरुणोदये । उपःकालेद्वयंकुर्यात्प्रातर्माध्याह्निकंतदा । सर्वधर्मादिकंकृत्वाद्वादशींसाधयेन्नरः । यत्त्वतएवाब्दिकादिश्राद्धापकर्षोपीतिकेचित् । तन्न । तस्यापराह्णका

लनियमात् । धर्मपदस्यप्रातर्माध्याह्निकपदाभ्यामुपसंहाराच्च ॥ ॥ **शांतिहेमाद्रौ**—तस्मात्सर्वप्रयत्नेनस्वसूत्रंनविलंघयेत् । **वसिष्ठः**—
पारंपर्यागतोयेषांवेदःसपरिबृंहणः । तच्छाखंकर्मकुर्वीततच्छाखाध्ययनंतथा । **वर्धमानपरिभाषायां**—स्वशाखांयःसमुत्सृज्यपरशाखा
श्रयंद्विजः । कर्तुमिच्छतिदुर्मेधामोघंतत्तस्ययत्कृतम् । **शातातपः**—सर्वश्रुत्युपसंहारादुक्तःश्रौतोयथाविधिः । सर्वस्मृत्युपसंहारात्स्मार्तोप्युक्त
स्तथाविधिः । अस्यापवादश्छंदोगपरिशिष्टे—बह्वल्पंवास्वगृह्योक्तंयस्यकर्मप्रचोदितम् । तस्यतावतिशास्त्रार्थेकृतेसर्वःकृतोभवेत् । अत्र
कर्मोपासनाद्येवनतुश्राद्धादीति**स्मृतिरत्नावली**—यत्तुस्वगृह्येनोक्तंयच्चसाकांक्षमुक्तंतत्परकीयमपिग्राह्यम् । तथाच**कर्मप्रदीपे**—यन्नाम्ना
तंस्वशाखायांपारक्यमविरोधिच । विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् । **अपरार्केप्येवम्** । **यत्त्वाशार्के**—अक्रियात्रिविधाप्रोक्ताविद्वद्भिः
कर्मकारिणाम् । अक्रियाचपरोक्ताचतृतीयाचायथाक्रिया । परोक्तापरशाखोक्ता । तत्स्वगृह्यविरुद्धपरशाखोक्तनिषेधकम् । शक्तस्यसर्वस्मृत्युप
संहारः । अशक्तस्यस्वगृह्योक्तमितिनिष्कर्षः । आपस्तंबादीनांस्वसूत्रेऽनुक्तौविशेषो**यज्ञकांडे**—आपस्तंबादिभिरपिस्वसूत्राभावतस्तथा ।
बौधायनोक्तंकर्तव्यमन्यथापतितोभवेत् । अग्निहोत्रादिकंचयच्छाखोक्तमाध्वर्यवंतदीयमेवांगीकार्यम् । आधानंयेनसूत्रेणतेनैवेज्यादिकाःक्रिया
इति**यज्ञपार्श्वोक्तेः** । **छंदोगपरिशिष्टे**—प्रवृत्तमन्यथाकुर्याद्यदिमोहात्कथंचन । यतस्तदन्यथाभूतंततएवसमापयेत् । समाप्तेयदिजा
नीयान्मयैतदन्यथाकृतम् । तावदेवपुनःकुर्यान्नावृत्तिःसर्वकर्मणः । प्रधानस्याक्रियायांतुसांगंतत्क्रियतेपुनः । तदंगस्याक्रियायांतुनावृत्तिर्नच
तत्क्रिया । अन्यथावैपरीत्येनेत्यर्थइति**हेमाद्रिः** । तन्न । तदंगस्येत्यग्रिमग्रंथविरोधात् । गुणक्रमानुरोधेनप्रधानावृत्तेरन्याय्यत्वाच्च । अतस्त्या
गस्तदर्थः । यतइति प्रयोगमध्येंगत्यागेप्रधानत्यागेवाज्ञातेतदारभ्यांगावृत्तिःप्रधानादिचकार्यमित्यर्थः । तावदेवेत्यंगपरम् । पुनस्त्वर्थे ।
तदंगस्येत्यंगांगपरम् । आवृत्तिःसांगप्रधानस्यतत्क्रियांगांगानुष्ठानं । तेनसांगप्रधानांगस्यांगांगस्यचोपवीतित्वादेरकरणे नसांगप्रधानप्रवृत्तिर्नापि

तन्मात्रकरणं किंतुविष्णुस्मरणादिकंप्रायश्चित्तमितिवर्धमानः । कल्पतरुरपिप्रधानांगस्यैवाकरणेप्रायश्चित्तंनत्वंगागाकरणइत्याह । अंगि
रा:—मार्जनतर्पणश्राद्धंनकुर्याद्वारिधारया । हारीतः—मार्जनार्चनबलिकर्मभोजनानिदेवतीर्थेनकुर्यादिति । अपरार्केपैठीनसिः—आ
चमनहोमतर्पणानिप्राजापत्येनकुर्यादिति । आपस्तंवः—देवागारेतथाश्राद्धेगवांगोष्ठेतथाध्वरे । सध्ययोश्चद्वयोःसाधुसगमेगुरुसंनिधौ । अग्न्य
गारविवाहेपुस्वाध्यायेभोजनेतथा । उद्धरेद्दक्षिणंवाहुंब्राह्मणानांक्रियापथे । उद्धरेत् सव्येसेउत्तरीयकृत्वादक्षिणवाहुमुत्तरीयाद्बहिःकुर्यादित्यर्थः
इतिव्रतहेमाद्रिः । बौधायनः—नाभेरधश्चसंस्पर्शकर्मयुक्तोविवर्जयेदिति । वृद्धपराशरः—प्रच्छन्नानिचदानानिज्ञानचनिरहंकृतम् ।
जप्यानिचसुगुप्तानितेपांफलमनंतकम् । योगियाज्ञवल्क्यः—स्त्रीशूद्रपतितांश्चैवरासभंचरजस्वलाम् । जपकालेनभापेतव्रतहोमादिकेपुच ।
अस्यापवादमाहसएव—एतेष्वेवावसक्तेतुयद्यागच्छेद्द्विजोत्तमः । अभिवाद्यततोविप्रंयोगक्षेमंचकीर्तयेत् । कालहेमाद्रौस्कांदे—अभ्यगे
जलधिस्नानेदंतधावनमैथुने । जातेचनिधनेचैवतत्कालव्यापिनीतिथिः । भारते—प्रसाधनंचकेशानांदंतधावनमंजनम् । पूर्वाह्णएवकर्तव्य
देवतानांचपूजनम् । तत्रैव—नक्तंनकुर्यात्पित्र्याणिभुक्त्वाचैवप्रसाधनम् । पित्र्यतर्पणश्राद्धादि । सध्योपासनहानौतुदिवास्नानविलुप्यच ।
होमचनैत्यकशुद्ध्येत्सावित्र्यष्टसहस्रकृत् । द्वादशशतदक्षिणेतिचेदष्टाधिकसहस्रम् । यत्तुजमदग्निः—एकाहसमतिक्रम्यप्रमादादकृतयदि ।
अहोरात्रोपितःस्नात्वागायत्र्याश्चायुतजपेत् । द्विरात्रेद्विगुणंप्रोक्तंत्रिरात्रेत्रिगुणंतथा । त्रिरात्रात्परतश्चैवशूद्रएवनसंशयः । इति तदेकदिनसाध्या
ह्निकलोपेज्ञेयम् । तथा—नित्ययज्ञात्ययेचैववैश्वदेवद्वयस्यच । भोजनेपतितान्नस्यचरुर्वैश्वानरोभवेत् । उज्ज्वलायाम्—दिवोदितानांनि
त्यानांकर्मणांसमतिक्रमे । स्नातकव्रतलोपेचप्रायश्चित्तमभोजनम् । (गृहिणांकर्तव्यानि) मार्कंडेयः—उदुंबरेवसेन्नित्यंभवानीसर्व

१ उदुंवरोत्रभापाया उंवराइतिप्रसिद्ध ।

देवता । ततःसाप्रत्यहंपूज्यागंधपुष्पाक्षतादिभिः । अशून्यादेहलीकार्याप्रातःकालेविशेषतः । यस्यशून्याभवेत्सातुशून्यंतस्यकुलंभवेत् । पाद स्यस्पर्शनंतत्रह्यसंपूज्यचलंघनम् । कुर्वन्नरकमाप्नोतितस्मात्तत्परिवर्जयेत् । प्रातःकालेस्त्रियाकार्यंगोमयेनानुलेपनम् । निशायाःप्रथमेयामेधान्य संस्करणादिकम् । कुरुतेयातुमोहेनवन्ध्याजन्मनिजन्मनि । अकृतस्वस्तिकांयातुक्रमेल्लिप्तांचमेदिनीम् । तस्यास्त्रीणिविनश्यंतिवित्तमायुर्यश स्तथा । मार्जनींचुल्लिकांष्ठीवं[1]धपदंचोपलंतथा । नाक्रमेदंघ्रिणाजातुपुत्रदारधनक्षयात् । उलूखलंचमुसलंतथाचैवघरट्टकम् । पादक्रमणात्पा पीयान्नाप्नुयादुत्तमांगतिम् ॥ ॥ **मदनरत्नेवसिष्ठः**—नाग्निब्राह्मणांतरे[2]व्यवेयान्नाग्न्योर्नब्राह्मणयोर्नगुरुशिष्ययोः अनुज्ञयाव्यवेयादिति । **अंगिराः**—दंपत्योर्विप्रयोरग्न्योर्विप्राग्न्योर्गोद्विजातिषु । अंतरंयदिगच्छेत्तुविप्रश्चांद्रायणंचरेत् । एतत्कामतोऽत्यंताभ्यासे । सकृत्त्वेत्वेकदि नाभोजनमितिशूलपाणिः । **आपस्तंबः**—अग्न्यगारेगवांगोष्ठेब्राह्मणानांचसंनिधौ । आहारेजपकालेचपादुकेपरिवर्जयेत् । आरुह्यपादुके यस्तुगृहात्परगृहंव्रजेत् । छेत्तव्यौचरणौतस्यनान्योदंडोविधीयते । **प्रयोगपारिजातेभृगुः**—नैकवासानचद्वीपेनांतरालेकदाचन । श्रुति स्मृत्युदितंकर्मनकुर्यादशुचिःक्वचित् । **द्वीपेविशेषस्तेनैवोक्तः**—वृषभैकशतंयत्रगवांतिष्ठत्यसंयतम् । नतद्भूमेर्हतंद्वीपमितिब्रह्मविदोविदुः । **चंद्रिकायांदेवलः**—येषुदेशेषुयत्तोयंयाचयत्रैवमृत्तिका । येषुदेशेषुयच्छौचंधर्माचारश्चयादृशः । तत्रतन्नावमन्येतधर्मस्तत्रैवतादृशः ॥ इतिश्रीमन्नारायणभट्टात्मजरामकृष्णभट्टसुतदिनकरभट्टात्मजलक्ष्मणभट्टकृताचाररत्नेपरिभाषा ॥

अथाह्निके । [ब्राह्ममुहूर्तलक्षणं] चंद्रोदयेब्राह्मे—ब्राह्मेमुहूर्तेउत्थायचिंतयेदात्मनोहितम् । तल्लक्षणंतत्रैवस्कांदे—रजनी प्रांत्ययामार्धंब्राह्मःसमयउच्यते । **विष्णुपुराणे**—रात्रेःपश्चिमयामस्यमुहूर्तोयस्तृतीयकः । सब्राह्मइतिविज्ञेयोविहितःसप्रबोधने ।

[1] ष्ठीवं ष्ठीवनथूत्कृतं । [2] व्यपेयादितिपाठ ।

चंद्रिकायाम्—रात्रेस्तुपश्चिमोयामोमुहूर्तोब्राह्मउच्यते । **स्मृतिरत्नावल्याम्**—ब्राह्मेमुहूर्तेयानिद्रासापुण्यक्षयकारिणी । तांकरोतितु योमोहात्पादकृच्छ्रेणशुद्ध्यति । एतन्निषिद्धकर्मश्रान्तनिद्रापरम् । अन्यथातूक्तंबह्वृच**कारिकायाम्**—अविध्युक्तक्रियाश्रांतमतिनिद्राव शगतम् । अर्कोऽभ्युदेतिचेदह्नःशेषस्थित्वासवाग्यतः । उदितेयस्यतेविश्वेत्यृग्भिश्चतमृभीरविम् । उपतिष्ठेतविहितकर्मश्रांतस्यनेष्यते । ब्राह्ममुहूर्तोत्थानमावश्यकत्वार्थम् । **अंगिराः**—उत्थायपश्चिमेयामेरात्रिवासःपरित्यजेत् । प्रक्षाल्यहस्तपादास्यान्युपरपृश्यहरिंस्मरेत् । **वामनपुराणे**—ब्राह्मेमुहूर्तेबुद्ध्येतस्मरेद्देववरानृपीन् । स्मृतिरशुचित्वेऽपि । यदास्यादशुचिस्तत्रस्मरेन्मत्रनतूच्चरेदिति**नारसिंहात्** । नाशुचिर्देवर्षिपितॄणांनामानिकीर्तयेदितिविष्णुभिन्नपरम् ॥ ॥ **ब्राह्मे**—उत्थायमातापितरौपूर्वमेवाभिवादयेत् । आचार्यमथविप्रांश्च भूमावेकेनपाणिना । इदंमूर्खकर्मके । अजाकर्णेनविदुपोमूर्खाणामेकपाणिनेतिविष्णूक्तेः । श्रोत्रसमौकरौकृत्वापुनःसयुक्तेनकरद्वयेनेति **मदनपारिजातः** । अजावत्कर्णावानम्येतिवा । **यत्तु**—जन्मप्रभृतियत्किंचिद्व्रतधर्मसमाचरेत् । सर्वतन्निष्फलंतस्यएकहस्ताभिवादना दिति**मदनपारिजातेवचन** तद्भूम्यसस्पृष्टपाणिपरम् ॥ ॥ अत्रप्रसङ्गात् **अभिवाद्यनिर्णयः** । **जमदग्निः**—देवताप्रतिमांदृष्ट्वाय तिंदृष्ट्वात्रिदंडिनम् । नमस्कारनकुर्याच्चेदुपवासेनशुद्ध्यति । यतिग्रहणमान्यमात्रपरमितिस्**मृतिरत्नावल्याम्** । यवीयसोमातुलादीन्नाभिवा दयेदित्याह**गौतमः** । ऋत्विक्श्वशुरपितृव्यमातुलानांप्रत्युत्थानमनभिवाद्याहितेइति । **वृहस्पतिः**—जपयज्ञगणस्थचसमित्पुष्पकुशानलान् । उदपात्रार्घभैक्षान्नवहंतनाभिवादयेत् । **नारदीये**—तथास्नानंप्रकुर्वतंजलमध्यगततथा । विवादशीलमशुचिशयानंनाभिवादयेत् । **शाता तपः**—पाखंडंपतितव्रात्यमहापातकिनशठम् । सोपानत्ककृतघ्नचनाभिंवादेत्कदाचन । धावतचप्रमत्तचमूत्रोच्चारकृतंतथा । उच्चारः

---

१ नाभिवादेदितिछदोनुरोधात् । नाभिवादयेदित्यर्थः ।

पुरीषोत्सर्गः । भुंजानमाचमानार्ह(?)नास्तिकंनाभिवादयेत् । वमंतंजृम्भमाणंचकुर्वंतंदंतधावनम् । अभ्यक्तशिरसंचैवस्नांतंनैवाभिवादयेत् । स्रुक्पाणिकमनाज्ञातमशक्तंरिपुमातुरम् । योगिनंचतपःसक्तंकनिष्ठंनाभिवादयेत् । **स्मृत्यर्थसारे**—अभिवाद्यद्विजश्चैतानहोरात्रेणशुद्ध्यति । सर्वेवापिनमस्कार्याःसर्वावस्थासुसर्वदा । **विष्णुधर्मे**—समित्पुष्पकुशादीनिवहंतंनाभिवादयेत् । तद्धारीचैवनान्यान्हिनिर्माल्यंतद्भवेत्तयोः । **मदनरत्ने**—सभायांयज्ञशालायांदेवतायतनेषुच । प्रत्येकंतुनमस्कारोहंतिपुण्यंपुराकृतम् । **मिताक्षरायाम्**—दंतधावनगीतादिब्रह्मचारी विवर्जयेदिति । **योगीश्वरः**—वाक्पाणिपादचापल्यंवर्जयेच्चातिभोजनम् । **मनुः**—नेक्षेतोद्यंतमादित्यंनास्तंयंतंकदाचन । नोपसृष्टंनवारिस्थंनमध्यंनभसोगतम् । अत्रनञ्पर्युदासार्थोननिषेधार्थः । व्रतशब्दैकवाक्यत्वात् । **सएव**—नाश्नीयाद्भार्ययासार्धंनैनामीक्षेतचाश्नतीम् । क्षुवतीजृंभमाणांवानचासीनांयथासुखम् । नांजयंतीस्वकेनेत्रेनचाभ्यक्तामनावृताम् । नपश्येच्चप्रसूयंतीतेजस्कामोद्विजोत्तमः । **योगी**—ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सुननिक्षिपेत् । पादौप्रतापयेन्नाग्नौनचैनमभिलंघयेत् । जलंपिबेन्नांजलिनानशयानंप्रबोधयेत् । शयानंश्रेष्ठम् । श्रेयांसं नप्रबोधयेदित्युक्तेः । नाक्षैःक्रीडेन्नधर्मघ्नैर्व्याधितैर्वानसंविशेत् । विरुद्धंवर्जयेत्कर्मप्रेतधूमंनदीतरम् । केशभस्मतुषांगारकपालेषुचसंस्थितिम् । नाचक्षीतधयंतीगांनाद्वारेणविशेत्क्वचित् । **गौतमः**—नवाय्वग्निविप्रादित्यापोदेवान्गाश्चप्रतिपादौप्रसारयेदिति । तत्रक्वचिद्दृष्टदोषःक्वचिददृष्टो बोध्यः । देवर्त्विक्स्नातकाचार्यराज्ञांछायांपरस्त्रियः । नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानिच । गुरोर्वभ्रुणोदीक्षितस्यचेतिमनौ । स्नानोदकंश्लेष्म वांतानिचनाक्रमेत् । दूरादुच्छिष्टविण्मूत्रपादांभांसिसमुत्सृजेत् । श्रुतिस्मृत्युदितंसम्यङ्नित्यमाचारमाचरेत् । विप्राहिक्षत्रियात्मानोनावज्ञेयाः कथंचन । आमृत्योःश्रियमाकांक्षन्नकंचित्कर्मणिस्पृशेत् । गोब्राह्मणानलान्नानिनोच्छिष्टोनपदास्पृशेत् । ननिंदाताडनेकुर्यात्पुत्रंशिष्यंचताडयेत् ।

---

१ नोपरक्तइतिपाठ । २ नपश्येत्प्रसवर्तींच ।

कर्मणामनसावाचागनाङ्गमेममाचरेत् । अध्वर्यलोकनिद्विष्टामिगष्याचरेत्नतु । मातृणिनितिविभातृणामिमनविमानृले । गृहनाज्ञानुराचार्यैर्घसश्रितबांधवै. । ऋलिक्पुरोहितापत्यभार्यादासमुतादिभि. । विवादंनाचिन्तानुगतांस्तो कान्नगोष्ठी । पगशय्यापरोयानगृहानानिवर्जयेत् । पराण्यदत्तानीति—दाक्षायणीत्रयमूर्तीणुमान्म कमडलु । कुर्यान्मदक्षिणेहस्तेष्ठविमानस्पर्शनीन । दाक्षायणसूत्रतन्नयेकुडले । वैणवीं धारयेद्यष्टिंसोदकचकमंडलुम् । यज्ञोपवीतेदंडनशुभेरौक्मेनकुडलेइतिमनुः । योगीश्वरः—गृशुद्धिर्माजनादाहात्कालाद्गोकमणात्तथा । सेकादुल्लेखनाल्लेपाद्गृहंमार्जनलेपनात् । गृहसापृयग्रहोमाजनलेपयो प्रत्यहंप्राप्यतेइतिविज्ञानेश्वरः । बह्वृचगृह्ये—पापकृगनमात्रायाक्षि सदनेकर्णध्वननेसुचक्षाअहमक्षीभ्यांभूयासमुवर्चासुमेनसुश्रुत्कर्णाभ्यांभविदक्ष कतुद्रतिजपेदगमनीयांगत्वाऽयाज्ययाजयित्वाऽभोज्यभुक्त्वाऽ प्रतिग्राह्यप्रतिगृह्यचैत्ययूपवोपहत्य—पुनर्मामैत्विन्द्रियपुनरायुःपुनर्भग । पुनर्द्रविणमैतुमापुनर्ब्राह्मणमैतुमास्वाहा । इमेविष्ण्यासोजग्नयोयथा स्थानमिहकल्पताम् । वैश्वानरोवावृधानोतर्यन्ऋतुमेमनोहृ्दयतरमृतस्यकेतु.स्वाहेतिजपेत् ॥ इतिश्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णभट्टसूनु दिनकरभट्टानुजलक्ष्मणभट्टकृतेआचाररत्नेप्रातःकृत्यपरिभाषाशेष· ॥ ॥

अथप्रातःस्मरणादि । **विष्णुपुराणे**—प्रात स्मरामिभवभीतिमहार्तिशांत्यैनारायणगरुडवाहनमंब्जनाभम् । ग्राहाभिभूतवरवारण मुक्तिहेतुचक्रायुधतरुणवारिजपत्रनेत्रम् ॥ १ ॥ प्रातर्नमामिमनसावचसाचमूर्ध्नापादारविंदयुगुलंपरमस्यपुंस. । नारायणस्यनरकार्णवतारण स्यपारायणप्रवणविप्रपरायणस्य ॥ २ ॥ प्रातर्भजामिभजतामभयंकरतंप्राक्सर्वजन्मकृतपापभयापहत्यै । योग्राहवक्रपतिताघ्रिगजेंद्रघोरशोकप्र णाशमकरोद्धृतशंखचक्र. ॥ ३ ॥ **पंचायतनसारे**—प्रात.स्मरामिगणनाथमनाथबंधुंसिंदूरपूरपरिशोभितगंडयुग्मम् । उद्दंडविघ्नपरिखंड

१ भजनाभमितिपाठ । २ गिरपूर्णपगेतिपाठ ।

नचंडदंडमाखंडलादिसुरनायकवृंदवंद्यम् ॥ १ ॥ प्रातर्नमामिचतुराननवंद्यमानमिच्छानुकूलमखिलंचवरंदधानम् । तंतुंदिलंद्विरसनाधिपयज्ञसूत्रपुत्रंविलासचतुरंशिवयोःशिवाय ॥ २ ॥ प्रातर्भजाम्यभयदंखलुभक्तशोकदावानलंगणविभुंवरकुंजरास्यम् । अज्ञानकाननविनाशनहव्यवाहमुत्साहवर्धनमहंसुतमीश्वरस्य ॥ ३ ॥ श्लोकत्रयमिदंपुण्यंसदासाम्राज्यदायकम् । प्रातरुत्थायसततंयःपठेत्प्रयतःपुमान् ॥ ४ ॥ प्रातःस्मरामिखलुतत्सवितुर्वरेण्यंरूपंहिमंडलमृचोथतनुर्यजूंषि । सामानियस्यकिरणाःप्रभवादिहेतुंब्रह्माहरात्मकमलक्ष्यमचिंत्यरूपम् ॥ १ ॥ प्रातर्नमामितरणितनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैःस्तुतमर्चितंच । वृष्टिप्रमोचनविनिग्रहहेतुभूतंत्रैलोक्यपालनपरंत्रिगुणात्मकंच ॥ २ ॥ प्रातर्भजामिसवितारमनंतशक्तिपापौघशत्रुभयरोगहरंपरंच । तंसर्वलोककलनात्मककालमूर्तिंगोकंठबधनविमोचनमादिदेवम् ॥ ३ ॥ श्लोकत्रयमिदंभानोःप्रातःप्रातःपठेत्तुयः । सर्वव्याधिविनिर्मुक्तःपरमंसुखमाप्नुयात् ॥ ४ ॥ प्रातःस्मरामिशरदिंदुकरोज्ज्वलाभांसद्रत्नवन्मकरकुंडलहारभूषाम्[1] । दिव्यायुधोर्जितसुनीलसहस्रहस्तांरक्तोत्पलाभचरणांभवतीपरेशाम् ॥ १ ॥ प्रातर्नमामिमहिषासुरचंडमुंडशुंभासुरप्रमुखदैत्यविनाशदक्षाम् । ब्रह्मेंद्ररुद्रमुनिमोहनशीललीलांचंडींसमस्तसुरमूर्तिमनेकरूपाम् ॥ २ ॥ प्रातर्भजामिभजतामभिलाषदात्री[2]धात्रीसमस्तजगतांदुरितापहंत्रीम् । संसारबंधनविमोचनहेतुभूतांमायांपरा[3]मधिगतांपरमस्यविष्णोः ॥ ३ ॥ श्लोकत्रयमिदंदेव्याश्चंडिकायाःपठेत्तु[4]यः । सर्वान्कामानवाप्नोतिविष्णुलोकेमहीयते ॥ ४ ॥ प्रातःस्मरामिभवभीतिहरंसुरेशंगंगाधरंवृषभवाहनमंबिकेशम् । खट्वांगशूलवरदाभयहस्तमीशंसंसाररोगहरमौषधमद्वितीयम् ॥ १ ॥ प्रातर्नमामिगिरिशंगिरिजार्धदेहंसर्गस्थितिप्रलयकारणमादिदेवम् । विश्वेश्वरंविजितविश्वमनोभिरामंसंसाररोगहर० ॥ २ ॥ प्रातर्भजामिशिवमेकमनंतमाद्यंवेदांतवेद्यमनघंपुरुषंपुराणम् । नामादिभेदरहितंपड्भावशून्यंसंसार० ॥ ३ ॥ प्रातःसमुत्थायशिवंविचिंत्यश्लोकत्र

---

१ हारशोभाम् । दिव्यायुधैर्जितेतिपाठ । २ मखिलार्थदात्रीइतिपाठ । ३ परासमधिगम्येतिपाठ । ४ पठेन्नर ।

यंयःपठतीहभक्त्या । सदुःखजातंविविधप्रभूतंहित्वापदंयातितदेवशंभोः ॥ ४ ॥ **पराशरमाधव्याम्**—ब्रह्मामुरारिस्त्रिपुरांतकारीभानुः शशीभूमिसुतोबुधश्च । गुरुश्चशुक्रःराहभानुजेनकुर्वंतुसर्वेममसुप्रभातम् ॥ १ ॥ भृगुर्वसिष्ठःक्रतुरंगिराश्चमनुःपुलस्त्यःपुलहःसगौतमः । रैभ्योमरीचिश्च्यवनश्चदक्षःकुर्वंतुसर्वेममसुप्रभातम् ॥ २ ॥ सनत्कुमारःसनकःसनंदनःसनातनोप्यासुरिपिंगलौच । सप्तस्वराःसप्तरसातलानि कुर्वंतुसर्वेममसुप्रभातम् ॥ ३ ॥ सप्तार्णवाःसप्तकुलाचलाश्चसप्तर्षयोद्वीपवराश्चसप्त । भूरादिकृत्वाभुवनानिसप्तकुर्वंतुसर्वेममसुप्रभातम् ॥ ४ ॥ पृथ्वीसगंधासरसास्तथापःस्पर्शीचवायुर्ज्वलितचतेजः । नभःसशब्दमहतासहैवकुर्वंतुसर्वेममसुप्रभातम् ॥ ५ ॥ श्रीःकामधेनुःसचवक्रतुडश्चिंतामणिःश्रीतुलसीचगंगा । अरुंधतीकौस्तुभकल्पवृक्षाःकुर्वंतुसर्वेममसुप्रभातम् ॥ ६ ॥ इत्थंप्रभातेपरमपवित्रंपठेत्स्मरेद्वाशृणुयाच्चभक्त्या । दुःस्वप्ननाशस्त्विहसुप्रभातंभवेच्चनित्यंभगवत्प्रसादात् ॥ ७ ॥ पुण्यश्लोकोनलोराजापुण्यश्लोकोयुधिष्ठिरः । पुण्यश्लोकाचवैदेहीपुण्यश्लोकोजनार्दनः ॥ १ ॥ कर्कोटकस्यनागस्यदमयंत्यानलस्यच । ऋतुपर्णस्यराजर्षेःकीर्तनंकलिनाशनम् ॥ २ ॥ अश्वत्थामाबलिर्व्यासोहनूमांश्चविभीषणः । कृपःपरशुरामश्चसप्तैतेचिरजीविनः ॥ ३ ॥ सप्तैतान्संस्मरेन्नित्यंमार्कंडेयमथाष्टम् । जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः ॥ ४ ॥ अहल्याद्रौपदीकुंतीतारामंदोदरीतथा । पंचैताःसंस्मरेन्नित्यंमानवोनैवबध्यते ॥ ५ ॥ इत्यादिपठेत् ॥ **प्रयोगपारिजातेस्कांदे**—समुद्रवसनेदेविपर्वतस्तनमंडिते । विष्णुपत्निनमस्तेस्तुपादस्पर्शंक्षमस्वमे ॥ **कात्यायनः**—श्रोत्रियंसुभगंगांचअग्निमग्निचितंतथा । रोचनांचंदनंगंधंमृदंगंदर्पणंमणिम् । गुरुमग्निरविंपश्यन्नमस्येत्प्रातरेवहि । **आचारादर्शेविशेषःभारते**—अवलोक्योनचादर्शेमलिनोबुद्धिमत्तरैः ॥

---

१ शनिराहुकेतव इतिपाठः । २ ज्वलनंसतेजा इतिपाठः । ३ सीतातारामंदोदरीतथा । पंचकंनास्मरेन्नित्यंमहापातकनाशनमितिपाठः ।

॥ **कात्यायनः**—पापिष्ठंदुर्भगं[1]मंधंनग्नमुत्कृत्तनासिकम् । प्रातरुत्थाययःपश्येत्तत्कलै[2]रुपलक्षणम् । न[3]ग्नंबालभिन्नम् । दुष्टत्वात् । इतिश्रीलक्ष्मणभट्टकृतेआचाररत्नेप्रातःस्मरणम् ॥

अथबहिर्विहारः ॥ **प्रयोगपारिजातेशौनकः**—ग्रामाद्वहिःसमागत्यमलमूत्रेसमुत्सृजेत् । **पराशरः**—ग्रामाद्धनुःशतंगच्छेन्नगराच्चचतुर्गुणम् । धनुर्द्विपदमितिकेचित् । चतुररत्नीतिस्मृत्यर्थसारे । **माधवीयेविष्णुपुराणे**—नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकंभुवः । दूरादावसथान्मूत्रंपुरीषंचसमाचरेत् । **मनुरपि**—दूरादावसथान्मूत्रंदूरात्पादावनेजनम् । उच्छिष्टान्ननिषेकंचदूरादेवसमुच्चरेत् । दिनपरमिदम् । रात्रौमूत्रपुरीषेतुगृ[4]हाभ्याशेसमाचरेदितिसंग्रहादितिचंद्रोदयः । **देवलः**—विण्मूत्राद्याचरेन्नित्यंसंध्यासुपरिवर्जयेत् । एतन्निरुद्धेतरपरम् । नवेगंधारयेन्नोपरुद्धःक्रियांकुर्यादितिगौतमोक्तेः । **विष्णुः**—ब्राह्मेमुहूर्तेमूत्रपुरीषोत्सर्गंकुर्यादिति । स्वापादौनिमित्तेआचम्यमूत्रपुरीषेकुर्यादित्युक्तंचंद्रिकायाम् । **प्रयोगपारिजातेदक्षः**—उभेमूत्रपुरीषेतुपूर्वमादायमृत्तिकाम् । आददानश्चवैपश्चात्सचैलोजलमाविशेत् । नचप्रह्वोनचोत्तिष्ठन्नाशुचिर्नलपन्द्विजः । क्रमादक्ष्यादिवाय्वंतदिङ्मुखोनाहरेन्मृदम् । **हलायुधे**—अष्टांगुलंखनित्वाचद्वादशांगुलमेववा । तदधोमृत्तिकाग्राह्यासर्वत्रैवविचक्षणैः । चाचतुरंगुलम् । **यत्तु**—विनालोहविनाकाष्ठंमृत्तिकायेनचोद्धृता । विष्ठानुलेपनंतस्यपुनःस्नानेनशुद्ध्यतीत्याचारचंद्रोदयेवचनंतन्निर्मूलम् । **सायणीयेमरीचिः**—विप्रेशुक्लातुमृच्छौचेरक्ताक्षत्रेविधीयते । हारिद्रवर्णावैश्येतुशूद्रेकृष्णेतिनिर्दिशेत् । **कौमुद्यांकश्यपः**—कृष्णास्त्रीशूद्रयोस्तथेत्याह । **मनुः**—यस्मिन्देशेतुयत्तोयंयाचयत्रैवमृत्तिका । सैवतत्रप्रशस्तास्या

---

१ चार्धंनग्नइतिपाठ । २ तत्प्रायश्चित्तमाह–कर्कोटकस्यनागस्येतिश्लोकपठेदितिस्मार्तकुतूहले । ३ छदोविरहितोनग्नइतिवेदविरहितोब्राह्मणइत्यर्थइतितत्रैव । ४ गृहेशौचस्थलाभावे–मूत्रोच्चारविसर्गंवागृहेकुर्याच्छुचिस्थलेइतिस्मरणात् । ज्योतिषग्रंथेपिगृहेमूत्रपुरीषस्थाननियमादितिशेषकृतआह्निके ।

त्तयाशौचंविधीयते। एतेनयथोक्तमृदलाभेकिंचिद्गुणहीनामृदेवग्राह्यानतुतद्वर्णद्रव्यांतरंप्रतिनिधेयम्। युक्तंचैतत्। गुणीभूतगुरुत्वानुरोधेन प्रधानीभूतमृत्त्वत्यागेमानाभावात्। **आश्वलायनः**—अंतर्जलेदेवगृहेवल्मीकेमूषकस्थले। अन्यशौचावशेषाश्चनग्राह्याः पंचमृत्तिकाः। अ न्यशौचेत्यत्रकर्मधारयोनतुषष्ठीतत्पुरुषः। तत्पुरुषापेक्षयाकर्मधारयस्यलघुत्वात्। तेनैकस्यैवशौचांतरशेषाअपिनिषिद्धाः। **स्मृत्यं**—मार्गर थ्याश्मशानस्थांपांशुलांमलिनांत्यजेत्। कीटांगारास्थिसहितांनाहरेच्छर्करान्विताम्। वापीकूपतडागेषुनाहरेद्वाह्यमृत्तिकाम्। अंतर्जलगताग्राह्या दूरतोमणिबंधनात्। जलांतःस्थितमृन्निषेधउद्धृतोदकशौचविषयः। जलांतःशौचेतु**यमः**—वापीकूपतडागेषुनाहरेद्बाह्यतोमृदम्। इदंचारण्य विषयम्। **स्मृत्यर्थसारे**—आरण्यकेपुत्वेवस्याद्ग्राम्येष्वाहरणंविदुरित्युक्तेः। **स्मृतिचिंतामणावप्येवम्। आचारादर्शेहारीतः**—मृ द्वार्त्रीकंठेसमासज्यदक्षिणपार्श्वेकमंडलुमाधायेति। **चंद्रिकायांविष्णुः**—ब्रह्मसूत्रग्रीवायामासज्योच्चरेदिति। तत्रैव**आपस्तंबः**—कृत्वामू र्ध्न्युपवीतकमितिमाधवीयेऽगिराः। कृत्वायज्ञोपवीतंतुपृष्ठतःकंठलंबितम्। विण्मूत्रंतुगृहीकुर्याद्यद्वाकर्णेसमाहितम्। पृष्ठेनिधानंचानेकव स्त्रस्य। एकवस्त्रस्य**सांख्यायनेन**यद्येकवस्त्रोयज्ञोपवीतंकर्णेकृत्वेत्युक्तेरितिपृथ्वीचंद्रचंद्रिकादयः। कर्णश्चदक्षिणः। पवित्रंदक्षिणेकर्णे कृत्वाविण्मूत्रमुत्सृजेदितिलिङ्गात्। पवित्रस्यदक्षिणकर्णस्थत्वोक्तेरुपवीतमपितत्रैवेति**माधवीये**। द्विवस्त्रत्वे—नियम्यप्रयतोवाचंनिवीताङ्गो वगुंठितइतिमनू**क्तेर्निवीतमित्याचारादर्शः। मदनरत्नेप्येवम्। स्मृतिरत्नावल्यांतु**—दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखइति ब्रह्मचारिप्रकरणे**याज्ञवल्क्योक्ते**र्ब्रह्मचारिणःकर्णेनिधानं गृहिणस्तुपृष्ठलंबितमित्युक्तम्। वस्तुतस्तुनिवीतपृष्ठलंबितयोर्विवस्त्रादिपरत्वात् यद्येकवस्त्रइत्यस्यब्रह्मचारिपरत्वासंभवात् **पृथ्वीचंद्रोक्ति**रेवन्याय्या। ब्रह्मचारिप्रकरणे**याज्ञवल्क्योक्ति**स्तुप्रथमंब्रह्मचारिधर्माभिधानात् प्रत्युतसाधिका। **गौतमीये**इतरेषांचैतदविरोधीतिगृहस्थादौब्रह्मचारिधर्मातिदेशसाधकत्वादित्युक्तम्। अतएव**स्मृत्यर्थसारे**—उपवीतनि

वीतंपृष्ठतःकंठलंवितंकृत्वाएकवस्त्रश्चेद्दक्षिणकर्णेनिधायेति । **ज्योतिर्निबंधे**—दक्षेकर्णेचमूत्रेतुपुरीपेवामकर्णके । धारयेद्ब्रह्मसूत्रंतुमैथुनेह्युप वीतवानित्युक्तम् । **स्मृतिसारेकृष्णभट्टीये**चैवम् । अत्रमूलंमृग्यमित्यपिकेचित् । तत्रदेशाचारतोव्यवस्था । शूद्रस्यनकर्णेनिधानं उपवी ताभावात् । नचोपवीतंवस्त्रविन्यासादितिबौधायनादिभिरुपवीतकार्यत्वेनोक्तस्यवस्त्रोत्तरीयादेःकर्णेनिधानंतत् कर्णेनिधानसंस्कारोननिवीता दिवदंगम् । मानाभावात् । विशिखोव्युपवीतश्चेत्यादेःश्रौतस्मार्तकर्मपरत्वात् । नचैतत्स्मार्तं रागतःप्राप्तेः । भोजनादौतुप्रायश्चित्ताम्नानात्तन्नि यमः । नच—पिवतोमेहतश्चैवभुंजतोऽनुपवीतिनः । प्राणायामत्रयंषट्कंनक्तंचत्रितयंक्रमादितिवाक्यान्मेहनांगत्वं । तस्यद्विजपरत्वात् । तदा हवृद्धपराशरः—यज्ञोपवीतेनविनाभोजनंकुरुतेद्विजः । अथमूत्रपुरीषेवारेतःसेचनमेववा । त्रिरात्रोपोषितोविप्रःपादकृच्छ्रंतुभूमिपः । अहो रात्रोपितोवैश्यःशुद्धिरेषापुरातनी । अतःशूद्रस्योत्तरीयवाससोनकर्णेनिधानमितिशूद्राचारशिरोमणिः । तन्न । संस्कारत्वेमानाभावात्भोजना दावपिप्रायश्चित्तस्यद्विजपरत्वापत्तेश्च । नैमित्तिकंहीदंकर्णेनिधानम् । केचित्तुत्र्यंगुलादिनिर्मितोत्तरीयस्यकर्णेनिधानंस्थूलवस्त्रादेरसंभवादित्याहुः । वस्तुतस्तुकर्मकालेएवोपवीतोत्तरीयादिधारणनियमात्सदोपवीताभावान्नकर्णेनिधानमिति ॥ ॥ **यमः**—राजमार्गेश्मशानानिक्षेत्राणिचखलानि च । उपरुद्धोनसेवेतछायांदृश्यंचतुष्पथम् । उदकंचोदकांतंचपंथानंचविवर्जयेत् । राजमार्गचतुष्पथयोरुक्तिर्दोषाधिक्यार्था पथःपृथगुक्तेरित्ये के । दंडधारणरूपदृष्टप्रयोजनिकेत्याचारादर्शः । समीपलक्षणार्थेतिहलायुधः । स्वच्छायायांत्वेवमेहेदित्युक्तेःपुरुषांतरच्छायापिनिषिद्धे त्याचारादर्शः । **शौनकः**—अग्नौचगच्छंस्तिष्ठन्वैरथ्यांतीर्थेश्मशानके । अंगारेगोमयेनद्यांयज्ञभूमिषुसर्वदा । फालेजलेचितायांचवल्मीके गिरिमस्तके । देवालयेनदीतीरेदर्भपुष्पकुशस्थले । सेव्यच्छायेषुवृक्षेषुमार्गगोष्ठांबुभस्मसु । स्थानेष्वेतेषुसर्वेषुकुर्यान्मूत्रादिकंचन । वाय्वर्यर्क गोसोमतुलसीस्त्रीद्विजन्मनः । पश्यन्नभिमुखोमूत्रपुरीषादीन्नकारयेत् । नफालकृष्टेनजलेननद्यांनचपर्वतेइतिमनुनापर्वतमात्रनिषेधात् । गिरि

मस्तकग्रहणंदोपाधिक्यार्थम् । अतःपर्वतवासिनांपर्वतापरिहारेगिमस्तकःपरिहार्यइतिचंद्रिका । कात्यायनः—मूत्रपुरीषष्ठीवनचातपेनकुर्यादिति । याज्ञवल्क्यः—नप्रत्यग्न्यर्कगोसोमसंध्यांबुस्त्रीद्विजन्मनः । विष्णुः—गोमयांगारचर्मीकफालकृष्टेंउवगेंनगे । संमदेनगादक्लेशप्रानेनमेहेतकदाचन । अवरंऽतरिक्षे । विष्णुः—नोत्तरंदाकाशेइति । आकाशेऽगवृते । यदाकाशःस्पृनोभीगम्तस्माद्वासवृतेकचित् । कुर्यान्मूत्रपुरीषवानभुंजीतपिबेन्नवेतिवायुपुराणात् । अतोट्टालिकादौननिषेधइत्याचारादर्शः । तन्न । अंतरिक्षनिषेधेनैवतन्निषेधात् । चंद्रोदयेवृद्धमनुः—दशहस्तपरित्यज्यमूत्रंकुर्याज्जलाशयात् । शतहस्तपुरीषेतुतीर्थेनचनुर्गुणम् । मनुः—दूरादावसथान्मूत्रंदूरात्पादावनेजनम् । उच्छिष्टान्ननिषेकचदूरादेवसमाचरेत् । मदनपारिजातेवृद्धविष्णुः—अनर्धायतृणैर्भूमिशिरःप्रावृत्यवाससा । वाचनियम्यथयत्नेनष्ठीवनोच्छ्वासवर्जितः । तृणैरयज्ञियैः । अयज्ञियैरनार्द्रैःमच्छायकाष्ठतृणैर्महीमितियमोक्तेः ॥ ॥ यज्ञियकाष्ठान्युक्तानिब्राह्मे—शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः । अश्वत्थोदुंबरौबिल्वश्चंदनःसरलस्तथा । सालश्चदेवदारुश्चखदिरश्चेतियज्ञियाः । काष्ठायतर्धानंकुर्यान्नवेतिस्मृत्यर्थसारे । प्रयोगपारिजातेसंग्रहे—नसोपानत्पादुकीवाछत्रीनानांतरिक्षगः । हारीतः—घ्राणास्येसमावेष्टयेदिति । याज्ञवल्क्यः—दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः । कुर्यान्मूत्रपुरीषेचरात्रौचेद्दक्षिणामुखः । केचित्तुदिवापदेनैवसंध्याप्राप्तौपुनरुक्तिरहितमनूक्तसुखमुखत्वबाधार्थेत्याहुः । तन्न । संध्यायादिवारात्रिभेदेनपुनरुक्तेरुपपत्तेः । अतएवार्धमंडलावच्छिन्नःकालोदिवसः । स्वडमंडलावच्छिन्नःकालःसंध्या । तद्भिन्नारात्रिरितिशास्त्रेपुचव्यवहारः । अतोरात्रौदक्षिणामुखोऽन्ययोरुदङ्मुखइतिवान्येपुनःसंध्याग्रहोऽव्यभिचारा

---

१ ससत्वप्राणिप्रचुरम् । २ स्नातकधर्मप्रकरणेआपस्तंबः—नसोपानत्कोमूत्रपुरीषेकुर्यादिति । इदंचस्नातकधर्मप्रकरणात्स्नातकविषयम् । उपानहनिषेधस्तुस्नानेऽवयात्राद्युपयुक्तोपानहपरोद्दष्टार्थः । सोपानत्क प्रकुनातमूत्रोचारविसर्जनमितिस्मृत्यंतरात् ।

र्थइतितुवयम् । यत्तु—प्रत्यङ्मुखस्तुपूर्वाह्णेपराह्णेप्राङ्मुखस्तथा । उदङ्मुखस्तुमध्याह्नेनिशायांदक्षिणामुखइतियमोक्तिः सासूर्यसांमुख्यनिषेधपरा । सदैवोदङ्मुखःप्रातःसायाह्नेदक्षिणामुखइतिदेवलोक्तेरितिपृथ्वीचंद्रपारिजातादयः । प्रातःपदंदिनपरम् । सायाह्नपदंरात्रिपरम् । योगीश्वरोक्त्यनुसाराद्विकल्पइतिचंद्रिकामदनपारिजातकृत्यरत्नेषु । युक्तस्तूपसंहारः सामान्यविशेषयोर्विकल्पायोगात् । तस्याष्टदोषग्रस्तत्वाच्च । केचित्तुतुल्यार्थत्वेपिमनुविपरीतायास्मृतिःसानशस्यतइति बृहस्पतिस्मृतेरन्यस्मृतीनांदुर्बलत्वेनाप्रामाण्यनतुविकल्पइत्याहुः । तन्न । प्रत्यक्षश्रुतिविरोधेपिस्मृतीनामप्रामाण्यंनास्तीत्युक्तमाचार्यैर्विरोधाधिकरणे । किंत्वनुष्ठानलक्षणंतत् । स्मृतिविरोधेप्यप्रामाण्यंस्मृतीनांदूरापास्तम् । बृहस्पतिस्मृतिस्तुप्राशस्त्यार्थाकृतयुगपरा । कृतेतुमानवाधर्मास्त्रेतायांगौतमाःस्मृताः । द्वापरेशंखलिखितौकलौपाराशरस्मृतिरितिमाधवीयेबृहस्पतिस्मृतेः । यत्तुमनुः—छायायामंधकारेवारात्रावहनिवाद्विजः । यथासुखमुखःकुर्यात्प्राणबाधाभयेषुच । तन्नीहारादिजातदिङ्मोहविषयमितिमाधवः । शिवधर्मोत्तरे—नविण्मूत्रमवेक्षेतछायांनैवात्मनोऽपिच । दर्शनेयमः—दृष्ट्वासूर्यनिरीक्षेतगामग्निंब्राह्मणंतथा । कृत्यरत्नेजाबालिः—स्नानंकृत्वार्द्रवासास्तुविण्मूत्रंकुरुतेयदि । प्राणायामत्रयंकृत्वापुनःस्नानेनशुद्ध्यति । कौर्मे—तैलाभ्यक्तोऽथवाकुर्याद्यदिमूत्रपुरीषके । अहोरात्रेणशुद्ध्येतश्मश्रुकर्मणिमैथुने ॥ ॥ अभ्यंगउक्तःप्रायश्चित्तशूलपाणावायुर्वेदे—मूर्ध्निदत्तंयदातैलंभवेत्सर्वांगसंगतम् । स्रोतांसितर्पयेद्बाहूअभ्यंगःसउदाहृतः । तैलमल्पंयदांगेषुनचस्याद्बाहुतर्पणम् । सामार्ष्टिःपृथगभ्यंगोमस्तकादौप्रकीर्तितः । माधव्यांशातातपः—अनुदकमूत्रपुरीषकरणे सचैलंस्नानंव्याहृतिहोमंचकुर्यादिति । एतच्छौचंविनाचिरकालंस्थितावितिमदनपारिजातः । विलंबाभावेस्नानमात्रम् । विनाद्भिरप्सुवाप्यंतःशरीरंयोनिषेवते । सचैलोवाद्भिराप्लुत्यगामालभ्यविशुद्ध्यतीतिमनूक्तेः । अत्यंतार्तस्येदमितिशूलपाणिः । मिताक्षरायांमरीचिः—ब्रह्मसूत्रंविनाभुंक्तेविण्मूत्रंकुरुतेतथा । गायत्र्यष्टसहस्रेणप्राणायामेनशुद्ध्य

ति । **स्मृत्यर्थसारे**—विनायज्ञोपवीतेनविण्मूत्रेपद्प्राणायामाः । मत्याभक्षपानविण्मूत्रेत्वष्टशतजपइति । **प्रयोगपारिजातेभरद्वाजः**—मलमूत्रेत्यजेद्विप्रोविस्मृत्यैवोपवीतधृक् । उपवीतंतदुत्सृज्यदध्यादन्यन्नवतदा । निवीतादिविस्मृत्येत्यर्थः । **स्मृत्यर्थसारे**—चांडालादिस्पृष्टश्रेत्पुरीषादिकरोतितदात्रिरात्रमुपवासइति । **माधवीयेसंवर्तः**—कृतमूत्रपुरीषोवाभुक्तोच्छिष्टोपिवाद्विजः । श्वादेःस्पर्शेजपेद्देव्याःसहस्रस्नानपूर्वकम् । **प्रयोगपारिजातेकौर्मे**—देवोद्यानेतुयःकुर्यान्मूत्रोच्चारंसकृद्विजः । छिंद्यान्छिश्नंतुशुद्ध्यर्थंचरेच्चांद्रायणव्रतम् । देवायतनेप्येतत् । **विष्णुपुराणे**—तिष्ठेन्नातिचिरतत्रेति । तत्र मूत्रपुरीषोत्सर्गस्थले । **हारीतः**—लोष्ठेनप्रमृजीतशुष्ककाष्ठेनवेति । लोष्ठकाष्ठाभावेगौतमोक्तिविरोधादित्याचारादर्शः । **भरद्वाजः**—अपकृष्यचविण्मूत्रकाष्ठलोष्ठतृणादिना । **यत्तुगौतमः**—नपर्णलोष्ठाश्मभिर्मूत्रपुरीषेअपकर्षयेदिति । तदशीर्णविषयं यज्ञियपर्णविषयंवा । मार्जनंवामहस्तेनवीरणाद्यैरयज्ञियैरितिस्मृत्यतरात् । **गौतमोक्तिरुक्तकाष्ठादिसभवइतिचंद्रिका । अत्रिः**—शुद्ध्यर्थंचत्रिभिःकाष्ठैस्तृणैर्वापिनिघर्षयेत् । **आश्वलायनः**—विण्मूत्रोत्सर्जनंकुर्याद्धृतशिश्नउदङ्मुखः । **स्कांदे**—वामेनपाणिनाशिश्नंधृत्वोत्तिष्ठेत्सदाद्विजः । **देवलः**—आशौचान्नोत्सृजेच्छिश्नंप्रस्रावोच्चारयोस्तथा । नैतेनालस्यनियमाउदङ्मुखादयः । तंप्रकृत्य—नतस्याचमनकल्पोविद्यतेनतस्योदङ्मुखोदिवारात्रौदक्षिणामुखइत्यादयोनियमाइति**गौतमोक्तेः** ॥ इतिश्रीमन्नारायणभट्टात्मजश्री० लक्ष्मणभट्टकृतेआचाररत्नेमूत्रपुरीषोत्सर्गविधिः ॥ ॥

अथशौचम् ॥ **दक्षः**—शौचेयत्नःसदाकार्यःशौचमूलोद्विजःस्मृतः । शौचाचारविहीनस्यसमस्तानिष्फलाःक्रियाः । **ब्रह्मांडपुराणे**—सुनिर्णिक्तेमृदंदद्यान्मृदंतेत्वपएवच । सुनिर्णिक्तेक्षालितेपाणिपादादावितिकल्पतरुः । काष्ठादिप्रोंच्छितइत्यन्ये । **गौतमः**—गंधलेपाद्यपगमेशौचममेध्यस्यतदद्भिःपूर्वंमृदाचेति । अपगमइतिनिमित्तसप्तमी । **स्मृत्यर्थसारे**—त्रिपर्वपूरमात्रावामृत्तिकाक्षप्रमाणिका । अक्षोऽशीति

गुंजः । परिमाणमिदंनगुदे । अर्धप्रसृतिमात्रमितिदक्षेणगुदेप्रमाणांतरोक्तेरित्याचारादर्शः । मृद्ग्रहणंग्रावासक्तमृद्धात्रीतः । तदसंभवेन्यतो वेति । शौचंदिवोदङ्मुखोरात्रौदक्षिणामुखःकुर्यादित्युक्तम् । **चंद्रिकायांशौनकः**—लिंगशौचंपुराकार्यंगुदशौचंततःपरम् । एकातुमृत्तिका लिंगेतिस्रःसव्यकरेमृदः । करद्वयेमृद्द्वयंस्यान्मृत्प्रमाणमथोच्यते । आर्द्रामलकमात्राचलिंगशौचेतुमृत्तिका । मूत्रात्तुद्विगुणंशुक्रेमिथुनेत्रिगुणं भवेत् । शुक्रेमैथुनंविनाशुक्रोत्सर्गे । पुरीषेतु—पंचापानेमृदःक्षेप्याःकरेवामेदशस्मृताः । हस्तयोःसप्तदातव्याःपुरीषेमृत्प्रमाणकम् । अर्धप्र सृतिमात्रंस्यात्तदर्धंतुततःपरम् । ऐकैकंपादयोर्दद्याद्धस्तयोर्लिंगशौचवत् । एकैकमितिमूत्रपरमिति**कृष्णभट्टीये** । उभयपरमितियुक्तम् । **दक्षः**—अर्धप्रसृतिमात्रातुप्रथमामृत्तिकास्मृता । द्वितीयाचतृतीयाचतदर्धार्धाःप्रकीर्तिताः । लिंगेप्येवंसमाख्यातात्रिपर्वीपूर्यतेयया । **चंद्रि कायांत्वंगिराः**—प्रथमाप्रसृतिर्ज्ञेयाद्वितीयातुतदर्धिका । तृतीयामृत्तिकाज्ञेयात्रिभागकरपूरिणीति । एकालिंगइतिमूत्रशौचे । पंचापानेइति विट्शौचे । पंचापानेदशैकस्मिन्नुभयोःसप्तमृत्तिकाइति**याज्ञवल्क्योक्तेः** । **यत्तुविवस्वान्**—तिस्रोमृदोलिंगशौचेग्राह्याःसांतरमृत्तिकाः । वामेपाणौमृदःपंचतिस्रःपाण्योर्द्वयोरपीति । सांतराःकिंचिन्न्यूनाइत्यर्थः । **यच्चयमः**—द्वेलिंगेमृत्तिकेदेयेइति । यदपि**शंखः**—मेहनेमृत्तिकाः सप्तलिंगेद्वेपरिकीर्तितइति । तल्लेपभूयस्त्वेविण्मूत्रोत्सर्गशुद्ध्यर्थम् । मृद्वार्यादेयमर्थवदिति**मनूक्तेः** । गुदेपंचेति**प्रयोगपारिजातपृथ्वीचं द्रादयः** । **चंद्रिकाचारादर्शौतु**—एकालिंगेगुदेतिस्रस्तथैकत्रकरेदशेति[1]**मनूक्ते**र्गुदेतिस्रः । गुदेपंचसख्यातु—अर्धप्रसृतिमात्रातुप्रथमामृ त्तिकाभवेत् । पूर्वपूर्वार्धमात्रास्तुचतस्रोन्याःप्रकीर्तिताइति**वृद्धवसिष्ठे**नाल्पपरिमाणोक्तेरविरुद्धा । **यत्तुशातातपः**—[2]आर्द्रामलकमात्रास्तु

---

१ दशविभागा करमध्येचतस्र पृष्ठेपडिति । पट्पृष्ठतइतिहारीतीयादितिमैथिला । २ अर्धामलकमात्रास्तुइतिपाठ ।

ग्रासाइंदुव्रतेस्मृताः। तथैवाहुतयःसर्वाःशौचार्थेयाश्चमृत्तिकाइति तद्भक्तशौचपरम्। गुदलिंगयोर्मृत्परिमाणांतरोक्तेरित्यूचतुः। यमः—
उभयोःसप्तदातव्याःपुनरेकागुदेतथेति पुनर्दानमर्वपक्षेपुज्ञेयमितिचंद्रिका। हारीतः—दशमध्येपदपृष्ठेमत्तोभाभ्यांतिसृभिःपादौक्षाल
येदिति। पृष्ठेसव्यहस्तस्य। तिसृभिरितिलेपभूयस्त्वइत्याचारादर्शः। एकत्वत्रित्वयोस्तुल्यवद्विकल्पइत्यन्ये। मिताक्षरायांशौनकः—
एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणाम्। त्रिगुणंस्याद्वनस्थानांयतीनांस्याच्चतुर्गुणम्। दिवायद्विहितंशौचंतदर्धंनिशिकीर्तितम्। तदर्धमातुरे
प्रोक्तमातुरस्यार्धमध्वनि। द्वैगुण्यादिसंख्यामात्रेतदुत्तरस्मृतिष्वभिधानादितिटोडरानंदः। नैतद्युक्तम्। संख्यार्धासंभवात्। अत्रमध्यामृद
र्धपरिमाणाग्राह्येतिस्मृतिकौमुदीशूद्राचारशिरोमणिश्च। आतुरेऽर्धमशक्तपरम्। शक्तस्यपूर्णमेव। दिवाशौचस्यनिश्यर्धंपथिपादोवि
धीयते। आर्तःकुर्याद्यथाशक्तिस्वस्थःकुर्याद्यथोदितमित्यादिपुराणादितिचंद्रिका। योगीश्वरः—स्त्रीशूद्रादेरशक्तानांबालानांचोपनीतिनाम्।
गंधलेपक्षयकरंशौचंकुर्यान्नसंख्यया। वातादिनाशुष्केलेपेगंधनिवृत्तावपिलेपक्षयार्थंलेपग्रहः। तन्निवृत्तावपिगंधानुवृत्तौतद्वारणायगंधपदम्।
बालस्यपंचमवर्षप्रभृतिमृदाद्यावश्यकम्।—बालस्यपंचमाद्वर्षाद्रक्षार्थंशौचमाचरेदितिस्मृतेः। आदित्यपुराणे—स्त्रीशूद्रयोरर्धमानप्रोक्त
शौचमनीषिभिः। एतच्छौचद्विजातीनामर्धंशूद्रेप्रकीर्तितमिति। तद्गृहस्थशूद्रान्यपरम्। तस्य—एतच्छौचगृहस्थानामित्येवसिद्धेरितिकेचित्।
तन्न। गृहस्थेशूद्रेअर्धेनैतच्छौचमित्यस्यबाधात्। अतएव—नयावदुपनीयतेद्विजाःशूद्रास्तथांगनाः। गंधलेपक्षयकरंशौचमेषांविधीयतइतिपरा
शरस्मृतौ। स्त्रीशूद्रपदमकृतोद्वाहपरम्। अनुपनीतसाहचर्यात्पराशरमाधवीये। अतएवार्धसंख्यागृहस्थपरा। वस्तुतस्तुशूद्रगृहस्थप
दयोःसामान्यविशेषाभावस्यतुल्यत्वाच्छूद्रगृहस्थस्यविकल्पइति सोपिव्यवस्थितः। विवाहाभावेद्वादशवर्षोत्तरंषोडशवर्षोत्तरंवामृत्संख्यानिय
मोऽन्यथानेतिकौमुदी। एतेन स्त्रिया अर्धसंख्याचशूद्रस्यचनविधवापरा। अन्यथागंधलेपक्षयकरशौचबाधापत्तेरित्याचारचंद्रोदयो

क्तिःपरास्ता । **बृहन्नारदीये**—व्रतस्थानांचसर्वेषांयतिवच्छौचमिष्यते । विधवानांचराजेंद्रएवंशौचंप्रकीर्तितम् । अतोऽर्धसंख्यासधवास्त्री परेतिवयंप्रतीमः । **यत्तुदक्षः**—एकस्मिन्विंशतिर्हस्तेद्वयोर्दयाश्चतुर्दशेति । तत्पूर्वोक्तशौचेनगंधलेपानपगमेज्ञेयमितिकेचित् । ब्रह्मचार्यादिप रमिति**माधवीये** । गृहस्थस्याप्यवदानसमामृत्स्यादिति**मरीच्युक्त**ाल्पपरिमाणश्रुतेरविरोधइति**चंद्रिका** । **अपरार्केदक्षः**—न्यूनाधिकंन कर्तव्यंशौचंशुद्धिमभीप्सता । प्रायश्चित्तेनयुज्येतविहितातिक्रमेकृते । इदंसंख्यामानमुभयपरमविशेषादिति**टोडरानंदः** । तदपि यावदुक्तेन गंधलेपनाशे । अनाशेत्वधिकम् । यावत्तुशौचंमन्येततावच्छौचंविधीयतइतितत्रैव**देवलोक्तेः** । तेनशौचंदृष्टार्थं संख्यानियमोऽदृष्टार्थइत्युक्त मित्या**चारादर्श**ःपरास्तः । यावन्नापैत्यमेध्याक्तोगंधोलेपश्चतत्कृतः । तावन्मृद्वारिचादेयंसर्वासुद्रव्यशुद्धिष्विति**मनूक्ति**विरोधात् । **चंद्रि का**प्येवम् । इदंवाक्यद्वयंदक्षोक्तिविरोधाच्चातुराश्रम्येतरपरं तत्रसंख्यादेरश्रुतेरितिप्रांचः । सगंधलेपानामेवतेषांकर्मस्यादितियत्किंचिदेतत् । पुरीषाद्युत्सर्गेप्रवृत्तस्यतदभावे**सायणीयेप्रयोगपारिजातेचवृद्धपराशरः**—उपविष्टस्तुविण्मूत्रंकर्तुंयश्चनविंदति । सकुर्यादर्धशौचंतुस्व ल्पशौचस्यसर्वदा । दातव्यमुदकंतावन्मृदभावोयदाभवेत् । **बृहस्पतिः**—भुंजानस्यतुविप्रस्यकदाचित्स्रवेद्गुदम् । उच्छिष्टमशुचित्वंचत स्यशौचंविधीयते । पूर्वंकृत्वैवशौचंतुततःपश्चादुपस्पृशेत् । ततःकृत्वोपवासंचपंचगव्येनशुद्ध्यति । **पैठीनसिः**—मूत्रोच्चारेकृतेशौचंनस्यादं तर्जलाशये । इदंनद्यादिविषयमिति**प्रयोगपारिजाते** । असंभवइति**स्मृतिरत्नावल्याम्** । पात्रवतोवा । अपात्रस्यतु**विवस्वान्**— रत्निमात्रंजलंत्यक्त्वाकुर्याच्छौचमनुद्धृतैः । पश्चात्तच्छोधयेत्तीर्थमन्यथाह्यशुचिर्भवेत् । तीर्थंशौचस्थानम् । यस्मिन्स्थानेकृतंशौचंवारिणातद्वि शोधयेदिति**ऋष्यशृंगोक्तेः** । **पराशरः**—धर्मविद्दक्षिणंहस्तमधःशौचेनयोजयेत् । तथाचवामहस्तेननाभेरूर्ध्वंनशोधयेत् । **देवलः**— प्रकृतिस्थितिरेषाहिकारणादुभयक्रिया । कारणाद्धस्तरोगादेः । उभयक्रियावामेनाप्यूर्ध्वंदक्षिणेनाप्यधइत्यर्थः । **स्मृतिसंग्रहे**—करस्थमुद

पात्रंचेत्कुर्यान्मूत्रपुरीषयोः । तज्जलंमूत्रसदृशंसुरापानेनतत्समम् । एतदपवादमाहवृद्धपराशरः—अरण्येनिर्जलेरात्रौचौरव्यालाकुलेपथि । कुर्वन्मूत्रपुरीषेतुद्रव्यहस्तोनदुष्यति । मृदादिहस्तेधृत्वानदुष्यतीत्यर्थः । **स्मृतिदीपिकायामाचारादर्शेचदेवलः**—प्रथमंप्राङ्मुखः स्थित्वापादौप्रक्षालयेच्छनैः । उदङ्मुखोवादैवत्येपैतृकेदक्षिणामुखः । इत्येवंमृद्भिराजानुप्रक्षाल्यचरणौपृथक् । हस्तौवामणिबंधाच्चकुर्यादाच मनततः । **यत्त्वापस्तंब**आह प्रत्यक्पादावसेचनमिति तत्केवलपादक्षालनपर**मित्याचारादर्शः** । **कृष्णभट्टीये**—स्वयंप्रक्षालयेत्पादौशू द्रादिर्वाकथंचन । शौचाद्दतेवामपादंपश्चाद्दक्षिणमेवच । शौचेप्रथमदक्षिण अन्यत्रवामम् । अत्रदक्षिणंपादमवनेनिजे सव्यंपादमित्या दिलिंगात्पादप्रक्षालनक्रमोज्ञेयः । क्षत्रियवैश्ययोःक्षालयितृसत्वेसव्यंवापूर्वंदक्षिणंवेत्यनियमइति**नारायणवृत्तिः** । दक्षिणोपक्रमंपादौ क्षालयेदिति**कात्यायनभाष्या**च्चशौचाद्दतेवामपादमितिनिर्मूलम् ॥ ॥ निवीतंपृष्ठलवितकर्णस्थंवाआहस्तशौचात् । तावत्तयोरपवित्रत्वेनो पवीतसंबंधायोग्यत्वात् । अपवित्रत्वंचशौचाम्नानात् । उपवीतस्यकर्मांगत्वेनविधानान्निवीतादिनाचमनासंभवाच्च । अतएव**वृद्धपरा शरः**—कृत्वातुशौचंप्रक्षाल्यपादौहस्तौचमृज्जलैः । निबद्धशिखकच्छस्तुद्विजआचमनंचरेत् । कृत्वोपवीतंसव्येसेवाग्यतःकायसंयतम्[1] । शिख कच्छइत्यत्रव्युत्क्रमोबोध्यः । कच्छबंधोक्तेःपूर्वंशौचान्मुक्तकच्छत्वम् । शिखाबंधश्चदैवान्मुक्तशिखस्यशिखाबंधार्थंनतुमूत्रपुरीषोत्सर्गकालेशिखा मोचनार्थम् । **आश्वलायनः**—कुर्याद्द्वादशगंडूषान्पुरीषोत्सर्जनेबुधः । मूत्रोत्सर्गेतुचतुरोभोजनांतेतुषोडश । भक्ष्यभोज्यावसानेचगंडूषाष्ट कमाचरेत् । **स्मृतिरत्नावल्याम्**—पुरतःसर्वदेवाश्चदक्षिणेपितरस्तथा । ऋषयःपृष्ठतःसर्वेवामेगंडूषमुत्सृजेत् । **स्मृतिरत्नावल्यांकृ ष्णभट्टीयेच**—चतुरष्टद्विषट्संख्यष्टगंडूषैःशुद्ध्यतेक्रमात् । मूत्रेपुरीषेभुज्यतेरेतःसस्रवणेपिच । **स्मृतिसंग्रहे**—सकर्दमेतुवर्षासुप्रविश्यग्राम

१ कायसयुत इतिपाठ ।

संकटम्। जंघयोर्मृत्तिकास्तिस्रःपादयोर्द्विगुणंभवेत्। **विष्णुः**—नाभेरधस्तात्कायिकैर्मलैःसुराभिर्वोपहतौमृत्तोयैस्तदंगंप्रक्षाल्याचांतःशुद्ध्येत्। अन्यत्रोपहतौमृत्तोयैस्तदंगंप्रक्षाल्यस्नात्वेन्द्रियोपहतस्तूपोष्यपंचगव्येनदशनच्छदोपहतश्चेति। **मनुः**—वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्णखाः। श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः। दूषिकानेत्रमलः॥ ॥ **अत्रशौचमाहबौधायनः**—आददीतमृदोयश्चषट्सुपूर्वेषुशुद्धये। उत्तरेषुतुषट्स्वद्भिःकेवलाभिर्विशुद्ध्यति। **मनुस्तुद्वादशस्वपिमृज्जलाभ्यांशुद्धिमाह**—विण्मूत्रोत्सर्गशुद्ध्यर्थंमृद्वार्यादेयमर्थवत्। दैहिकानांमलानांचशुद्धिषुद्वादशस्वपीति। **कृत्यरत्नेयमः**—मूत्रादौपादयोस्तिस्रोहस्तयोस्तिस्रएवच। मृदःपंचदशामेध्येहस्तादीनांविशेषतः। एतदात्मीयमूत्रादिस्पर्शे। परस्यशोणितस्पर्शेरेतोविण्मूत्रजेतथा। चतुर्णामपिवर्णानांद्वात्रिंशन्मृत्तिकाःस्मृताः। **शूलपाणौदेवलस्तु**—मानुषास्थिवसांविष्ठामार्तवंमूत्ररेतसी। मज्जानंशोणितंवापिपरस्ययदिसंस्पृशेत्। स्नात्वासंमृज्यलेपादीनाचम्यसशुचिर्भवेत्। तान्येवस्वानिसंस्पृश्यपूतःस्यात्परिमार्जनात्। मार्जनोत्तरमाचमनंच। **शंखः**—तिस्रस्तुमृत्तिकादेयाःकृत्वाचनखशोधनम्। नखशोधनंनखांतर्गतमलशोधनम्। एवंपादयोः। **मनुः**—अज्ञानात्प्राश्यविण्मूत्रंसुरासंस्पृष्टमेवच। पुनःसंस्कारमर्हतित्रयोवर्णाद्विजातयः। रेतःप्राशनेप्येवम्। **विज्ञानेश्वरीयेप्रचेताः**—नखकेशमृल्लोष्ठभक्षणेअहोरात्रमभोजनाच्छुद्धिरिति। **संवर्तः**—कृत्वामूत्रंपुरीषंवायदानैवोदकंभवेत्। स्नात्वालब्धोदकःपश्चात्सचैलस्तुविशुद्ध्यति॥ ॥ **शौचोक्तेनियमातिक्रमेप्रायश्चित्तंस्मृतिरत्नावल्याम्**—गायत्र्यष्टशतंचैवप्राणायामत्रयंतथा। प्रायश्चित्तमिदंप्रोक्तंनियमातिक्रमेसति॥ इतिश्रीमन्नारायणभट्टात्मजं०लक्ष्मणभट्टकृताचाररत्नेशौचविधिः॥

अथाचमनम्। शौचोत्तरमाचामेत्—एवंशौचंतुनिर्वर्त्यपश्चादाचमनंचरेदितिवृ**हन्नारदीयात्**। पूर्वोक्तवृ**द्धपराशरोक्तेश्च**। **याज्ञवल्क्यः**—अंतर्जानुशुचौदेशेउपविष्टउदङ्मुखः। प्राग्वाब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेत्। उपस्पृशेदाचामेत्। अत्र**विज्ञानेश्वरेण**द्विजोनशूद्रा

दिरित्युक्तेःशूद्राचमनेउपवेशनादिनियमोनेतिकेचित् । युक्तंतुब्राह्मतीर्थस्यैवद्विजेनियमः । उपवेशनादिसर्वसाधारणम् । स्थितस्याचमननिषेधात् । **हारीतः**—ऐशान्यभिमुखोभूत्वोपस्पृशेत्तुयथाविधि । **हेमाद्रौदेवलः**—उदङ्मुखोवादेवत्येपैतृकेदक्षिणामुखः । **स्मृतिरत्नावल्याम्**—याम्यप्रत्यङ्मुखत्वेनकृतमाचमनंयदि । प्रायश्चित्ततदाकुर्यात्स्नानमाचमनक्रमात् ॥ ॥ **तीर्थान्याहयाज्ञवल्क्यः**—कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रकरस्यच । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् । **वसिष्ठः**—अंगुल्यग्रेपुमानुपंपाणिमध्येआग्नेयतीर्थमार्षकनिष्ठिकामूलइतितीर्थानि । ब्राह्मणस्यदक्षिणहस्तेपंचतीर्थानीतिप्रचेतःस्मृतेः । दक्षिणेत्युपलक्षणम् । अजलितर्पणेदक्षिणहस्ताभावेचवामहस्तेपितदपेक्षणात् । ब्राह्मणपदंक्षत्रियाद्युपलक्षणम् । ब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेदितियाज्ञवल्क्येनद्विजपदोक्तेः । **हेमाद्रौचंद्रिकायामप्येवम्**—कायंकनिष्ठिकामूलेतीर्थमुक्तद्विजस्यत्वितिवर्धमानपरिभाषायांशंखोक्तेश्च । शूद्रस्यतर्पणादौपित्रादितीर्थाक्षेपाच्च । अतएव—ब्राह्मेणविप्रस्तीर्थेनेतिमनूक्तौविप्रपदमाचमनकर्तृमात्रोपलक्षणमित्याचारादर्शः । अत्रविकल्पिततीर्थस्वीकरणमाचमनाद्यप्रयोगेवेद्यनप्रतिप्रयोगमितिचंद्रिका । वस्तुतस्तुएकाचमनांतर्गतत्रिःप्राशनेप्येकमेवतीर्थम् । ब्राह्मेणनित्यमुपस्पृशेदितियाज्ञवल्क्योक्तेर्ब्राह्ममुख्यम् । **यत्तुहेमाद्रौशंखः**—प्राजापत्येनतीर्थेनत्रिःप्राश्नीयाज्जलंशुचिरिति । **यच्चमनुः**—कायत्रैदशिकाभ्यांवानपित्र्येणकदाचनेति । तद्ब्राह्मतीर्थस्यक्षताद्यवरोधेज्ञेयमितिपृथ्वीचंद्रः । **हारीतः**—वामहस्तेकुशान्कृत्वासमाचामतियोद्विजः । उपस्पृष्टंभवेत्तेनरुधिरेणमलेनच । वामहस्तेकेवले । उभयत्रस्थितैर्दर्भैःसमाचामतियोद्विजः । सोमपानफलंतस्यभोक्तायज्ञफलंलभेदितिगोभिलोक्तेः । **श्राद्धहेमाद्रौगौतमः**—वामहस्तेस्थितेदर्भेदक्षिणेनपिवेन्नतु । वस्त्राजिनोपग्रहणेनदोषःपिवतोभवेत् । **चंद्रोदयेयमः**—तावन्नोपस्पृशेद्विद्वान्यावद्वामेननस्पृशेत् । दक्षिणकरमितिशेषइतिपृथ्वीचंद्रः । जलमितिचंद्रिकापरार्कौ । हस्तस्थंजलमित्याचारादर्शः । **आचारप्रदीपे**—दक्षिणेसस्थिततोयतर्जन्यासव्यपाणिना । तत्तोयंस्पृशतेयस्तुसोमपानफलंलभेत् ।

आचारचंद्रोदयेप्येवम्। आश्वलायनः—ग्रंथीकृतपवित्रेणनभुंजीयान्नचाचमेत्। ग्रंथिर्ब्रह्मग्रंथिः। नब्रह्मग्रंथिनाचामेन्नदूर्वाभिःकदा चनेतिचंद्रोदयेस्मृतिसारात्। कौशिकः—अपवित्रकरःकश्चिद्ब्राह्मणोयद्युपस्पृशेत्। अकृतंतस्यतत्सर्वंभवत्याचमनतथा। याज्ञव ल्क्यः—अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः। हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजातयः। शुद्ध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततः। प्र कृतिस्थाभिरफेनाभिः। अंततस्तालुनेतिविज्ञानेश्वरः। तत्समीपवर्तिनादंतेनेतिहेमाद्रिः। ओष्ठप्रांतेनेत्याचारादर्शः। मापमज्जनमात्रा हृदयंगमाभवंतीत्युद्यानःस्मरणादेकैकपादहान्याकंठतालुतदंतर्गतत्वमितिहेमाद्रिः। द्विजपदादनुपनीतानामपितेषामुपनीतवदाचमनमित्या चारचंद्रोदयः। तन्न। नह्यस्मिन्युज्यतेकर्मकिंचिदामौंजिबंधनात्। शूद्रेणहिसमस्तावद्यावद्वेदेनयुज्यतइतिमनूक्तेः। उपनयनात्पूर्वंशूद्र समत्वोक्तेःशूद्रवदाचमनमितियुक्तम्। बौधायनस्तुशूद्राणामार्कच्छिष्ठि(?)तानामार्यवदाचमनंवैश्यवच्छौचमिति। हारीतः—विवर्णगंधव त्तोयंफेनिलंचविवर्जयेत्। प्रकृतिस्थाभिरित्युक्तेयत्स्वभावतएवगंधादिमत्तन्ननिषिद्धम्। माधव्यांप्रचेताः—अनुष्णाभिरफेनाभिःपूताभिर्वस्त्रच क्षुषा। हेमाद्रौबौधायनः—शब्दमकुर्वन्निरपोहृदयंगमाःपिबेदितिटोडरानंदेगोभिलः। हृदयस्पृशएवापउपस्पृशेदुच्छिष्टोहैवातोन्य थाभवतीति। दक्षः—प्रक्षाल्यपादौहस्तौचत्रिःपिबेदंबुवीक्षितम्। यमः—रात्राववीक्षितेनापिशुद्धिरुक्तामनीषिभिः। उदकेनातुराणांतुयथो ष्णेनोष्णपायिनाम्। मार्कंडेयगारुडयोः—अंतर्जानुतथाचामेत्रिश्चतुर्वापिबेदपः। अत्रचतुष्ट्वस्यत्रित्वेनैच्छिकोविकल्पइतिमाधव्यांहे माद्रौच। दैवपितृकर्मविषयत्वेनव्यवस्थेत्यन्ये। त्रित्वेनचतुष्ट्याभावेइतिमदनपारिजातः। मैथिलाश्च—त्रिरित्यर्वाङ्निषेधपरमितिम दनपारिजातः। यत्रमंत्रवदाचमनंअग्निश्चमेत्यादि तेनसहचतुष्ट्वमन्यत्रत्रिरितिहरदत्तः। हेमाद्रौदेवलः—अथापःप्रथमात्तीर्थाद्दक्षिणा त्रिःपिबेत्समम्। प्रथमाद्ब्राह्मात्। सममव्यवधानेनेत्यर्थइत्युक्तं। तत्रैव भरद्वाजः—आयतंपूर्वतःकृत्वागोकर्णाकृतिवत्करम्। संहतांगुलि

नातोयंगृहीत्वापाणिनाद्विजः । मुक्तांगुष्ठकनिष्ठाभ्यांशेषेणाचमनचरेत् । माषमज्जनमात्रास्तुसंगृह्यत्रिःपिबेदपः । माषमज्जनमात्रपानब्राह्मणमात्र
परम् । क्षत्रियादेस्तुन्यूनम् । स्मृत्यर्थसारे—पीतावशिष्टांबुपानेवामहस्तेनपानेपराकार्थमिति । भविष्ये—दक्षिणतुकरंकृत्वागोकर्णाकृति
वत्पुन । त्रिःपिबेद्दक्षिणेनांबुद्विरास्यपरिमार्जयेत् । पुनर्ग्रहणात्पूर्वंगोकर्णाकृतिनाहस्तेनोदकंगृहीत्वांगुष्ठकनिष्ठिकेव्रहि:कृत्यपुनर्गोकर्णाकृतिंकुर्या
दितिहेमाद्रिः। बह्वृचपरिशिष्टे—पाणिपादमुखप्रक्षाल्यशुचौदेशेभूमिष्ठपादःकनिष्ठांगुष्ठौविश्लिष्टौवितत्यतिस्रोंतरांगुलीःसहतोर्ध्वाःकृत्वात्रिः
पिबेत् सहतमध्यमांगुलिभि:पाणिप्रक्षाल्यसव्यपाणिपादौशिरश्चाभ्युक्ष्येति । आचारादर्शेभविष्ये—समौचचरणौकृत्वातथाबद्धशिखो
नृप । घनांगुलिकरंकृत्वाएकाग्रःसुमनाद्विजः । आचामेदितिशेषः । याज्ञवल्क्यः—त्रिःप्राश्यापोद्विरुन्मृज्यखान्यद्भिःसमुपस्पृशेत् ।
प्रतिखमुदकग्राह्यम् । अतरापाणिमाप्लाव्यवारिणेतिशिवधर्मोत्तरात् । शौनकः—ताम्रपात्रस्थितैर्वापितथातोयाशयस्थितैः । कुर्वन्नाच
मनंविप्रोनित्यंखानिसमालभेत् । तदभावेतुकुर्वीतपात्रधारोदकेनच । खानि शीर्षण्यानि । खानिचोपस्पृशेच्छीर्षण्यानीतिगौतमोक्तेः । शी
र्षण्यानिततःखानिमूर्धानचनृपालभेदितिविष्णुपुराणाच्चेतिहेमाद्रिः । नाभेरूर्ध्वानीतिमिताक्षरायाम् । चंद्रोदयेहारीतः—वाम
हस्तेत्वप:कृत्वायःखानिसमुपस्पृशेत् । वृथैवाचमनंतस्यप्रायश्चित्तीयतेहिस. । दक्षः—समृज्यांगुष्ठमूलेनद्विरुन्मृज्यात्ततोमुखम् । सहतांगुलि
भिःपूर्वमास्यमेतदुपस्पृशेत् । अगुष्ठेनप्रदेशिन्याघ्राणचसमुपस्पृशेत् । अगुष्ठानामिकाभ्यांतुचक्षुःश्रोत्रेतत.परम् । अगुष्ठमध्यमाभ्यांचक्षुषी । अंगु
ष्ठानामिकाभ्यांश्रोत्रे । कनिष्ठांगुष्ठाभ्यांनाभिंहृदयंतुतलेनवै । सर्वाभिश्चशिरःपश्चाद्बाहूचाग्रेणसंस्पृशेत् । अंगुलिभिस्तिसृभिर्मध्यमाभिः । मध्य
माभिर्मुखपूर्वंतिसृभिःसमुपस्पृशेदितिचंद्रिकायांयोगयाज्ञवल्क्योक्तेः । पाठादेवक्रमेसिद्धेपश्चादितिवचनबाह्वनंतरशिरःस्पर्शार्थम् । शां
खस्तु—तर्जन्यगुष्ठयोगेनस्पृशेन्नासापुटद्वयम् । अगुष्ठस्यानामिकयायोगेनश्रवणेस्पृशेत् । मध्यमागुष्ठयोगेनस्पृशेन्नेत्रद्वयततः । कनिष्ठागुष्ठ

योगेनस्पृशेत्स्कंधद्वयंततः । नाभिंचहृदयंतद्वत्स्पृशेत्पाणितलेनतु । संस्पृशेच्चतथाशीर्षमयमाचमनेविधिः । **चंद्रोदयेपैठीनसिः**—अग्निरंगुष्ठस्तस्मात्तेनैवसर्वाणिस्पृशेदिति । **आश्वलायनः**—पाणिनापोऽग्निमंत्रेणअवमृज्याथसंस्पृशेत् । विप्रस्यनेतराणांतुतन्मुखालंभनंस्मृतम् । सूर्यायदक्षिणेनेत्रेवामेसोमायवायवे । नसोर्दिग्भ्यःश्रवणयोर्बाह्वोरिंद्रायसंस्पृशेत् । पृथिव्यैपादयोर्जान्वोरंतरिक्षायगुह्यके । दिवेनाभौब्रह्मणेचविष्णवेहृदयेतथा । शिवायेतिशिरस्यंतेहस्तप्रक्षालयेत्ततः । अंगुष्ठतर्जन्यग्राभ्यांनेत्रयोराचमंस्पृशेत् । अंगुष्ठमध्यमाभ्यांचनासाश्रवणयोस्ततः । अंगुष्ठानामिकाभ्यांचकनिष्ठाभ्यांचबाहुके । सांगुष्ठैरखिलैरेवस्थानेष्वन्येषुसंस्पृशेत् । **व्याघ्रपादः**—केशवादित्रिभिःपीत्वाचतुर्थेनमृजेत्करम् । पंचमेनचषष्ठेनद्विरोष्ठावुन्मृजेत्क्रमात् । तौसप्तमेनावमृजेदेकवारंतुमंत्रवित् । अष्टमेनतुमंत्रेणत्वभिमंत्र्यजलंशुचि । वामंसंप्रोक्षयेत्पाणिमन्यंचनवमेनच । दक्षिणंदशमेनांघ्रिवाममेकादशेनवै । मूर्धानंद्वादशेनाथस्पृशेदूर्ध्वोष्ठपृष्ठकम् । संकर्पणायनमइत्यनेनांगुलिमूर्धनि । अंगुष्ठतर्जन्यग्राभ्यांसंस्पृष्टाभ्यांजलैःसह। नासारंध्रेवासुदेवंप्रद्युम्नाभ्यामुभेस्पृशेत्। अंगुष्ठानामिकाभ्यांचसंश्लिष्टाभ्यांजलैःसह। अनिरुद्धायनमइतिसंस्पृशेद्दक्षिणेक्षणम् । पुरुषोत्तममंत्रेणताभ्यांवामांस्पृशेद्दृशम् । तथांगुष्ठकनिष्ठाभ्यांसंश्लिष्टाभ्यांजलैःसह। अधोक्षजनृसिंहाभ्यांश्रोत्रेद्वेसंस्पृशेत्क्रमात् । नाभिमच्युतमंत्रेणताभ्यामेवस्पृशेद्बुधः । श्रीजनार्दनमंत्रेणतलेनहृदयंस्पृशेत् । उपेंद्रायेतिमूर्धानंस्पृशेत्सजलपाणिना । सर्वांगुल्यग्रभागैस्तुसमाश्लिष्टैर्जलैःसह । भुजौतुहरिकृष्णाभ्यांसंस्पृशेद्दक्षिणोत्तरौ । **प्रयोगपारिजातेभरद्वाजः**—देव्याःपादैस्त्रिभिःपीत्वाअब्लिंगैर्नवधास्पृशेत् । पुनर्व्याहृतिगायत्र्याशिरोमंत्रैर्द्विधास्पृशेत् । **स्मृत्यर्थसारे**—तदोंकारेणाचमनंयद्वाव्याहृतिभिर्भवेत् । सावित्र्याचापिकर्तव्यंयद्वाकार्यममंत्रकम् । **तैत्तिरीयश्रुतौ**—त्रिराचामेद्द्विःपरिमृज्यसकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभतइति तदेतद्ब्रह्मयज्ञप्रकरणपाठात्तदंगमेवेति नपुरुषार्थाचमनेकर्मांगाचमनेवाप्रवर्तते । **हेमाद्रौबौधायनः**—त्रिःपरिमृजेद्द्विरित्येकइति । **तत्रैवकण्वः**—अथर्ववेदेतिहासपुराणानिध्यायन्ब्राह्मणतीर्थेनोष्ठयोः

सलोमदेशमुन्मृज्यादिति । **हेमाद्रौदक्षः**—नाग्रांगुल्यानपृष्ठैर्वापरिमृज्यात्कथंचन शिरश्चेंद्रियाण्युपस्पृशेत् । चक्षुषीनासिकांश्रोत्रे¹चेत्यथापउपस्पृशेदितिव्यासः । **आपस्तंबः**—दक्षिणेनपाणिनासव्यंप्रोक्ष्यपादौ देशंपुनरापश्चसंस्पृशेत् । **बौधायनः**—खान्यद्भिःसंस्पृश्यपादौनाभिशिरःसव्यंपाणिमंततःप्रोक्षेदिति । अक्षिणीनासिकेकर्णावोष्ठौचतदनंतरम् । ततःस्पृशेन्नाभि षाअपोनिनयेदिति । अत्रदेशाचारतोव्यवस्थेतिपृथ्वीचंद्रः । चंद्रिकायांतुयथाशाखंव्यवस्थेत्युक्तम् । **पैठीनसिः**—पादौप्रोक्ष्यसव्येपाणौशे पादप्रक्षालनमेवैकइति । **ब्राह्मे**—स्त्रीशूद्रयोरनित्यांभःक्षालनाच्चकरौष्ठयोः । **शूद्राधिकारेगौतमः**—आचमनार्थे मित्तानि । **यमः**—उत्तीर्योदकमाचामेदवतीर्यतथैवच । आचमनक्रियेतिशेषइतिपृथ्वीचंद्रः ॥ ॥ **अथाचमननि** थापादावसेचने । उच्छिष्टस्यचसंभाषादशुच्यप्रयतस्यच । **ब्रह्मांडे**—निष्ठीवितेतथाभ्यंगेभुक्त्वाचपरिधायच । उच्छिष्टानांचसंस्पर्शेत ह्याचैवसंस्पृश्यदंतासक्तंतथैवच । संदेहेषुचसर्वेषुशिखांमुक्त्वातथैवच । विनायज्ञोपवीतेननित्यंचसमुपस्पृशेत् । जि शेनेदेवतामभिगंतुमाचामेदिति । **देवलः**—भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत् । **हारीतः**—स्त्रीशूद्रोच्छिष्टाभिभाषणेमूत्रपुरीपोत्सर्गंद सन् । जपादौस्त्रीशूद्रभाषणेइत्युक्तं**माधवीयेस्मृत्यर्थसारेचप्रजापतिः**—उपक्रमेविशिष्टस्यकर्मणःप्रयतोपि भेलोहितस्यकेशस्यवसानामग्नेर्गवांब्राह्मणस्यस्त्रियाश्चालंभेनीवीपरिधायउपस्पृशेदिति । **आपस्तंबः**—स्वप्नेक्षवथौसिघाणिकालं **प्रयोगपारिजातः** । कृत्वाचपितृकर्माणिसकृदाचम्यशुद्ध्यति । **चंद्रिकायांहारीतः**—सुषुप्सुराचामेदिति । सिघाणिकानासामलः । केशस्यभूमिगतशिरोगतस्यचेति मनमग्निगोस्पर्शवत्प्रायश्चित्तत्वेनविहितेइति**मदनरत्ने** । च्युतकेशनखस्पर्शेइति**स्मृत्यर्थसारे** । अग्न्यादिस्पर्शेआचमनंनिमित्तविनास्पर्शेइतिपृथ्वीचंद्रः । ब्राह्मणस्योच्छिष्टस्येति**प्रयोगपारिजातः** । ब्राह्मणस्पर्शेआच नीवीअधोवासोग्रंथिरितिचंद्रिका ।

१ चक्षुषीनासिकाश्रोत्रेचोष्ठौचेतिपाठः ।

मार्कंडेयपुराणे—देवार्चनादिकार्याणितथागुर्वभिवादनम् । कुर्वीतसम्यगाचम्यतद्वदेवभुजिक्रियाम् । **बृहस्पतिस्मृतौकर्मप्रदीपेच**—पितृमंत्रानुचरणेआत्मालंभेक्षणे तथा । अधोवायुसमुत्सर्गेआक्रंदेक्रोधसंभवे । मार्जारमूषिकास्पर्शेप्रहासेनृतभाषणे । निमित्तेष्वेषुसर्वेषुकर्मकुर्वन्नपः स्पृशेत् । आलंभेविहितेहृदयस्पर्शइति**कल्पतरुः** । आत्मस्तुतावितिवर्**धमानः** । स्पृशेदितिस्पर्शमात्रमिति**स्मृतिरत्नावलिः** । आचामेदिति**वर्धमानः** । मार्जारकर्तृकेस्पर्शेआचमनंस्वयंकृतेस्नानमित्या**चारचंद्रोदयः** । वनमार्जारस्पर्शेस्नानम् । अभोज्यसूतिकाषंढमार्जाराखूंश्च कुक्कुटान् । संस्पृश्यशुद्ध्यतिस्नानादुदक्याग्रामसूकरावितिवचनादिति**शूलपाणिः** । केचित्तुमार्जारस्पर्शःपुच्छान्यदेशपरः । कर्मकालेअबुद्धिपूर्वस्पर्शविषयोवा । पुच्छेविडालकंस्पृष्ट्वास्नात्वाविप्रोविशुद्ध्यति । भोजनेकर्मकालेचविधिरेपउदाहृतइतितत्रैवबुद्धिपूर्वेस्नानविधानादन्यदाशुचिरेव । मार्जारश्चैवदर्वीचमारुतश्चसदाशुचिरितिमनूक्तेरित्याहुः । **याज्ञवल्क्यः**—रौद्रपित्र्यासुरान्मन्त्रांस्तथाचैवाभिचारकान् । व्याहृत्यालभ्यचात्मानमपःस्पृष्ट्वान्यदाचरेत् । अपःस्पृष्ट्वान्यदाचरेदित्युक्तेर्यत्ररौद्रादिपाठोत्तरंकर्मनोक्तंतत्रनोदकस्पर्शः । **संग्रहे**—श्राद्धारंभेऽवसानेचचपादशौचार्चनांतयोः । विकिरेपिंडदानेचकुर्यादाचमनंकृती । तत्रप्रथममेवद्विःशेषाणितुसकृत्सकृत् । **चंद्रिकायांकौर्मे**—उच्छिष्टंपुरुषंदृष्ट्वाऽभोज्यंचापितथाविधम् । आचामेदश्रुपातेचलोहितस्यतथैवच । **शातातपः**—आचामेच्चर्वणेनित्यंमुक्त्वातांबूलचर्वणम् । ओष्ठौविलोमकौस्पृष्ट्वावासोविपरिधायच । चर्वणेआदावंतेच । अनाचम्यभक्षणेऽष्टशतजपोभोजनेतूपवासइतिस्मृत्यर्थसारात् । **अपरार्के**—प्राणस्यायमनकृत्वाआचामेत्प्रयतोपिसन् । **मनुः**—वेदमध्येष्यमाणश्चाप्यन्नमश्नंश्चसर्वदा । आचामेदितिसंबंधः । **विष्णुः**—पंचनखास्थिनिःस्नेहंस्पृष्ट्वाचामेचंडालम्लेच्छसंभाषेचेति । **पाराशरे**—श्वपाकंवापिचंडालंविप्रःसंभाषतेयदि । द्विजसंभाषणंकुर्यात्सावित्रींतुसकृज्जपेत् । उच्छिष्टैःसहसंभाषेत्रिरात्रेणविशुद्ध्यपि । द्विजोनूचानइति**माधवः** । **चंद्रिकायांपाद्मे**—चंडालादीन्जपेहामेदृष्ट्वाचामेद्द्विजोत्तमः ।

यत्तुस्मृत्यर्थसारे—अंत्यसभाषणेकर्मकुर्वन्नाचामेदित्युक्तंतच्चिंत्यम्।—तूष्णीमासीतचजपंश्चंडालपतितादिकान्। दृष्ट्वातान्वार्युपस्पृश्याभाष्यस्ना त्वाविशुद्ध्यतीतिचंद्रोदयेवर्धमानपरिभाषायां **योगयाज्ञवल्क्योक्तेः**।—चंडालपतितौदृष्ट्वानरःपश्येतभास्करम्। स्नातस्त्वेतौसमा लोक्यसचैलस्नानमाचरेदितिचंद्रिकायांव्यासोक्तेश्च। **माधवीये**—चंडालैकपथगत्वागायत्रीस्मरणाच्छुचिः। **यत्तुव्याघ्रपादः**— चंडालपतितचैवदूरतःपरिवर्जयेत्। गोवालव्यजनादर्वाक्सवासाजलमाविशेदिति। तत्सकटपरम्। अतएव**बृहस्पतिः**—युगंचद्वियुगचैव त्रियुगचचतुर्युगम्। चंडालसूतिकोदक्यापतितानामधःक्रमात्। **अंगिराः**—श्वादीन्स्पृष्ट्वापिवाचामेत्कर्णवादक्षिणंस्पृशेत्। नाभेरधःस्पर्शए तत्।—नाभेरूर्ध्वंकरौमुक्त्वाशुनायद्युपहन्यते। तत्रस्नानमधस्ताच्चेत्प्रक्षाल्याचम्यशुद्ध्यतीतितेनैवोक्तेः। **चंद्रिकायांशातातपः**—चर्म कारजकाश्चैवव्याधव्यालोपजीविनौ। निर्णेजकःसौनिकश्चनटःशैलूषकस्तथा। मुखेभगस्तथाश्वाचवनिताःसर्ववर्णगाः। चक्रीध्वजीवध्यजीवीग्रा म्यकुक्कुटसूकरौ। एतैर्यदंगस्पृष्टस्याच्छिरोवर्जद्विजातिषु। तोयेनक्षालनंकृत्वाआचांतःप्रयतोमतः। रजकोवस्त्रादिरागकर्ता। **आचारादर्शेसं वर्तः**—चर्मारंरजकंवैणधीवरनटमेवच। एतान्स्पृष्ट्वानरोमोहादाचामेत्प्रयतोपिसन्। इदंशिरोहीनांगस्पर्शे। शिरःस्पर्शेस्नानंवक्ष्यते। **शांखा यनः**—क्षुतेनिष्ठीवितेचैवदतोच्छिष्टेतथानृते। पतितानांचसभाषेदक्षिणंश्रवणस्पृशेत्। आदित्यावसवोरुद्रावायुरग्निश्चधर्मराट्। विप्रस्यदक्षि णेकर्णेसर्वेतिष्ठंतिसर्वदा। विप्रोक्तेःक्षत्रियादीनांदक्षिणकर्णस्पर्शोन। विप्रपदमाचमनकर्तृमात्रोपलक्षणमित्या**चारचंद्रोदयः**। तन्न। उप लक्षणत्वेमानाभावात्। इदंचाचमनासंभवे। तथाच**हरनाथीयेमार्कंडेये**—कुर्यादाचमनस्पर्शगोपृष्ठस्यार्कदर्शनम्। कुर्वीतालंभनंवापि

१ रजकश्चर्मकश्चैवेतिपाठ।

दक्षिणश्रवणस्यच । यथाविभवतोह्येतत्पूर्वाभावेपरंपरम् । **विज्ञानेश्वरादावप्येवम्** । **टोडरानंदेपराशरः**—गंगाचदक्षिणेश्रोत्रेऽनामिकायांहुताशनः । उभयोःस्पर्शनेचैवतत्क्षणादेवशुद्ध्यतीति । **बौधानयः**—नीवीविस्रंस्यपरिधायापउपस्पृशेदार्द्रतृणगोमयभूमिगामोपधीवेति ॥ ॥ **अथद्विराचमननिमित्तानि** । **याज्ञवल्क्यः**—स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्पणे । आचांतःपुनराचामेद्वासोविपरिधायच । वस्त्रपरिधानेसकृद्द्विराचमनयोर्विकल्पइतिकेचित् । पूर्ववासःपरित्यज्यान्यवासःपरिधानेद्विराचमनम् । तस्यैवान्यथापरिधानेसकृदाचमनमितिटोडरानंदः । कर्माधिकारार्थद्विरन्यत्रसकृदित्यन्ये । **कौर्मे**—रेतोमूत्रपुरीषाणामुत्सर्गेऽशुचिभाषणे । संध्ययोरुभयोस्तद्वदाचांतोप्याचमेत्पुनः । मूत्रपुरीपयोर्द्विराचमनंकर्माधिकारार्थ । **हारीतेन**तत्रसकृदाचमनविधेर्व्यवस्थासंभवेऽष्टदोपदुष्टविकल्पयोगात् । **ब्राह्मे**—होमेभोजनकालेचसंध्ययोरुभयोरपि । आचांतःपुनराचामेज्जपहोमार्चनेषुच । उभयोरित्युपलक्षणम् । संध्यात्रयांबुपानेपुपूर्वपश्चाद्विराचमेदितिस्मृत्यर्थसारात् । संध्यात्रयेंऽबुपानेचेत्यर्थः । **सायणीयेनंदसूरिः**—भूम्युपवीतविन्यासेसस्नेहौषधभक्षणे । पैतृकेकर्मणिस्नेहभक्षणेंताद्ययोःसकृत् । **बौधायनः**—हविर्भक्षणकालेचतद्विराचमनंस्मृतम् । **कौर्मे**—प्रक्षाल्यपाणिपादौचभुंजानोद्विरुपस्पृशेत् । ष्ठीवित्वांदावनारंभेकासश्वासागमेतथा । चत्वरंवाश्मशानंवासमागम्यद्विजोत्तमः । **स्मृत्यर्थसारे**—रोदनेपीत्वावलीढेभुक्त्वाचाभ्यंगेद्विराचामेदिति । द्विराचमनेंऽगभूतंपाणिपादक्षालनंसकृत् । दृष्टोपकारस्यैकत्वात् । आस्यस्पर्शादित्वदृष्टभेदादावर्तते । तत्रत्रिराचम्यांगान्युपस्पृश्यपुनःसांगाचमनक्रियेत्येवं दाक्षायणयज्ञेदर्शपूर्णमासावृत्तिवदित्याचारादर्शः ॥ ॥ **अथाचमनापवादःकालतः** । **हेमाद्रौपैठीनसिः**—अपेयहिसदातोयंरात्रौमध्यमयामयोः । स्नानचैवनकर्तव्यंतथैवाचमनक्रिया । तत्रैव**विश्वामित्रः**—महानिशातुविज्ञेयामध्यस्थंप्रहरद्वयम् ।

१ विसृज्येतिपाठ । २ त्वाभ्यग्रनारभेइतिपाठ ।

तस्यांस्नानंनकुर्वीतकाम्यमाचमनंतथा । तत्रैवषट्त्रिंशन्मते—मूत्रोच्चारेमहारात्रौकुर्यान्नाचमनंतुयः । प्रायश्चित्तीयतेविप्रःप्राजापत्यार्धमर्हति ॥ ॥ महानिशाद्वेधा । तत्राद्यामाहमार्कंडेयः—महानिशाद्वेघटिकेरात्रौमध्यमयामयोः । द्वितीयस्यांत्यातृतीयस्याद्येत्यर्थः । द्वितीयातुविश्वामित्रोक्ता । द्रव्यतःस्मृत्यर्थसारे–अस्निग्धऔषधेजग्धेस्निग्धेबुद्धेसलेपने । नाचामेद्भोजनेवृत्तेशुद्ध्यर्थंक्रमुकादिषु । अन्येषुचामभक्ष्येषुसंसारेषुसुगंधिषु । तांबूलेक्रमुकेहोमेभुक्तस्नेहानुलेपने । इक्षुदंडेतिलेमूलपत्रपुष्पफलेपुच । तथात्वक्तृणकाष्ठेपुनाचामेदामभक्षणे । मधुपर्केचसोमेचप्राणाहुतिषुचाप्सुच । आस्यहोमेषुसर्वेषुनोच्छिष्टोभवतिद्विजः । क्रमुकादिष्वित्यत्रादिशब्दात्तांबूलादीनि । पुनरग्रेतांबूलक्रमुकयोर्ग्रहणादत्रपूर्वाचमननिषेधः । अतएवशुद्ध्यर्थमित्युक्तम् । प्राणाहुतिष्वितितासांमंत्रसाध्यत्वादुच्छिष्टस्यचमंत्रपाठासंभवादाचमनेप्राप्तेतन्निषेधः । तेनविषयसप्तमीयम् । तेनभोजनेअमृतोपस्तरणमसीत्येतदुत्तरंनाचमनम् । अतएवाप्स्वितिप्राणाहुतिसाहचर्यादमृतापिधानमसीतिपीतात्परं । अन्यथोच्छिष्टस्यमंत्रपाठासंभवात् । तेनतस्मिन्नप्पानेकर्तव्येनोच्छिष्टत्वमित्युक्तंश्राद्धहेमाद्रौ । नचैवंपुरीषाद्युत्सर्गोत्तरमाचमनेकर्तव्येतत्राधिकारसिद्ध्यर्थमाचमनांतरापत्तिः । आरभणीयान्यायेनोपपत्तेः । यथादर्शपूर्णमासांगारभणीयातिदेशादारभणीयायांप्राप्तानवस्थाप्रसंगात्स्वात्मनिस्वातिदेशासंभवाच्चनतथेहापि । नचैवमाचमनेसकृज्जलपानोत्तरमाचमनापत्तिः । पुनर्जलपानस्यगायत्र्यादिमंत्रसाध्यत्वादुच्छिष्टस्यतदसंभवादितियुक्तम् । अनवस्थापत्तेर्दत्तोत्तरत्वात् । हेमाद्रावेवसममव्यवधानेनेत्युक्तेश्च । कृष्णभट्टीये—अनाचांतःपिबेद्यस्तुपीत्वानाचामयेद्यदि । गायत्र्यष्टशतंजप्त्वाप्राणायामेनशुद्ध्यति ॥ ॥ आचमनापवादआचारसारे—अपोजग्ध्वौषधंजग्ध्वाकृत्वातांबूलचर्वणम् । सौगंधिकानिसर्वाणिनाचमेतविचक्षणः । अपोजग्ध्वेत्यमृतापिधानमसीतिमंत्रैः । पीत्वायोध्येष्यमाणश्चआचामेत्प्रयतोपिसन्निति स्मृत्युक्तेरिति

---

१ समारभेषुसर्वेष्वितिपाठ । २ पीतात्परमितिपाठ ।

कल्पतरुः । अप्सूच्छिष्टतानिषेधात्पीत्वापइतिनैमित्तिकमाचमनमित्याचारादर्शः । **विश्वादर्शेआपस्तंबः**—संध्यार्थेभोजनार्थेवापितृदे वत्रयोजने । शूद्राहृतेननाचामेज्जपादिहवनेषुच । **संवर्तः**—शूद्राशुच्येकहस्तैश्चदत्ताभिर्नकदाचन । शूद्राहृतजलनिषेधःसर्वकर्मसुज्ञेयः । **स्मृत्यर्थसारे**—नपादप्रक्षालनशेषेणनाचमनशेषेणनाम्युदकशेषेणकर्माणिकुर्यात् । यदिकुर्याद्भूमौजलंस्रावयित्वातत्रांबुपात्रंस्थापयित्वोद्धृत्यकुर्यादिति । **आपस्तंबः**—नवर्षधारयाचामेन्नप्रदरोदकेनाकारणादिति । प्रदरःस्वयंभिन्नोभूभागः । **वसिष्ठः**—प्रदरादपिगोतृप्तेराचामेतेति । नेदंकलौ । गोतृप्तिशिष्टेपयसिशिष्टैराचमनक्रियेतिमाधवीयेकलिवर्ज्येषुपाठात् । **स्मृतिसारे**—एलालवंगकर्पूरगंधाद्यैर्वासितैर्जलैः । नाचामेदद्भिरुष्णाभिस्तथाशौचावशेषितैः । **चंद्रोदयेसंग्रहे**—पात्रावशिष्टंयच्छौचेपाणिपादावनेजने । भूमौतदबुनिःस्राव्यशेषेणाचमनंचरेत् । **चंद्रिकायांविष्णुस्मृतावप्येवम्** । **देवजानीये**—शौचशेषपादशेषंपीतशेषंतथैवच । अपेयंतद्विजानीयात्पर्युक्षणकृतिंविना । **स्मृत्यर्थसारे**—पादशौचशिखाकच्छवंधधौतोपवीतकम् । विनाचांतोऽशुचिर्नित्यंबद्धेकंठेशिरस्यपि । **प्रयोगपारिजातेभृगुः**—आच्छन्नदक्षिणांसस्तुनाचामेद्विकदाचन । अकृत्वापादशौचंचतिष्ठन्मुक्तशिखोपिवा । विनायज्ञोपवीतेनआचांतोप्यशुचिर्भवेत् । तिष्ठन्नितिजलस्थेतरपरम् । जानोरूर्ध्वजले तिष्ठन्नाचांतःशुचितामियात् । अधस्ताच्छतकृत्वोपिसमाचांतोनशुद्ध्यतीतिविष्णूक्तेः । अधस्ताज्जान्वोः । **चंद्रिकायांविष्णुः**—नस्पृशन्नहसन्जल्पन्नश्वचांडालदर्शने । आचामेदितिशेषः । तत्रैवप्रचेताः—नासमपादआचामेदिति । **स्मृत्यर्थसारे**—उपविष्टःसमाचामेज्जानुमात्रादधोजले । तथा—सोपानत्कोधृतोष्णीषःपर्यंकासनयानगः । दुर्देशेप्रपदश्चैवनाचामन्शुद्धिमाप्नुयात् । आचांतःकर्मशुद्धःस्यात्तांबूलौषधिजग्धिकृत् । **नागदेवाह्निकेयमः**—मधुपर्केभोजनांतेसंध्यादौनित्यकर्मणि । आसनस्थोपिचाचामेदन्यत्रकुक्कुटासनः । **स्मृत्यर्थसारे**—नयज्ञोपवीतमुत्तरीयंचान्यथाकृत्वाचामेत् सम्यग्धृत्वापुनराचामेत् ॥ ॥ यज्ञोपवीतेनष्टेअन्यत्सूत्रंवस्त्रंचोपवीयाचामेत् । **हारीतः**—नजले

शुष्कवस्त्रेणस्थलेचैवार्द्रवाससा । तर्पणाचमनंजप्यमार्जनादिकमाचरेत् । **पैठीनसिः**—अंतरेकंवहिरेकंकृत्वापादमाचमेदिति । **व्यासः**—शिरःप्रावृत्यकठंचमुक्तकच्छशिखोपिवा । अकृत्वापादयोःशौचमाचांतोप्यशुचिर्भवेत् । **गौतमः**—नमुख्याविप्रुषउच्छिष्टंकुर्वंतिनचेदंगेनिपतंतीति । अंगस्पर्शे**आपस्तंवः**—यआस्याद्बिंदवःपतंतउपलभ्यतेतेष्वाचामेत् । **गौतमः**—मंत्रब्राह्मणमुच्चारयतोविंदवःशरीरउपलभ्यंतेनतेष्वाचमनमिति । **मनुः**—स्पृशंतिविंदवःपादौयस्याचामयतःपरान् । तेपार्थिवैःसमाज्ञेयानतैरप्रयतोभवेत् । अत्रपादग्रहणाज्जंघादिस्पर्शेदोपइतिमे**धातिथिः** । तन्न । प्रयांत्याचमतोयाश्चशरीरेविप्रुषोनृणाम् । उच्छिष्टदोषोनास्त्यत्रभूमितुल्यास्तुतेस्मृताइति**माधवीयेयमोक्तौ** शरीरग्रहणात् । अतःपादावितिप्रायिकम् । तेनांगांतरस्पर्शेपिनदोषइति**सर्वज्ञनारायणः** । **माधवीयेप्येवं** । **आपस्तंवः**—नश्मश्रुभिरुच्छिष्टोभवतियावन्नहस्तेनोपस्पृशतीति । मुखगतैरित्यर्थः । **याज्ञवल्क्यः**—मुखजाविप्रुषोमेध्यास्तथाचमनविंदवः इति । **शंखः**—दंतवद्दंतलग्नेपुरसवर्जमन्यत्रजिह्वाभिमर्शनादिति । **गौतमस्तु**प्राक्च्युतेरेकेइत्याह । च्युतेतु**शंखः**—च्युतेष्वास्रावविद्याल्लिगिरन्नेवतच्छुचिः । मुखोदकमास्रावः । **शातातपः**—दंतलग्नेमूलफलेभुक्तस्नेहेतथैवच । तांबूलेचेक्षुदंडेचनोच्छिष्टोभवतिद्विजः । **स्मृत्यंतरे**—अलावुताम्रपात्रस्थकरकस्थचयत्पयः । आचम्यस्वयमादायशुद्धोभवतिनान्यथा । स्वयगृहीत्वाचाचामेन्नपरःप्रयच्छेदित्यर्थः । अलाव्वादिपात्रंयतिपरम् । यतिपात्राणिमृद्वेणुदार्वलावुमयानिचेति**याज्ञवल्क्योक्तेः** । अतैजसानिपात्राणितस्यस्युर्निर्व्रणानिचेति**मनूक्तेश्च** । अलावुदारुजंवापिवैणवंमृन्मयतथा । एतानियतिपात्राणिगृहस्थोनसमाचरेदितिपं**चायतनसारेव्यासोक्तेश्च** । तत्रैव**संवर्तः**—सौवर्णराजतंताम्रमुख्यंपात्रंप्रकीर्तितम् । तदभावेस्मृतंपात्रंस्ववतेयन्नधारितम् । **कृष्णभट्टीयेमरीचिः**—कांस्येनायसपात्रेणत्रपुसीसकपित्तलैः । आचांतःशतकृत्वोपिनकदाचनशुद्ध्यति । **यत्तुस्मृत्यर्थसारे**—सौवर्णरौप्यपात्रैश्चवेणुविल्वाश्मचर्मभिः । अलावुदारुपात्रैश्चनारिकेलैःकपित्थकैः । तृ

णैःकाष्ठैर्जलाधारैरन्यांतरितमृन्मयैः । वामेनोद्धृत्यवाचामेदन्यदातुरसंभवेइति । तन्मृन्मयमात्रपरम् । तस्यैवसंनिहितत्वात् । तत्राप्यन्यदातुर संभवेवामेनसदंशादिनोद्धृतैर्मृन्मयैरित्यर्थः । अतएवाग्रेस्मृत्यर्थसारे—तत्रमृन्मयपात्रस्थंजलंनैवोपहन्यतइत्युक्तमितिकेचित् । अन्येतुवामेनपात्रमुद्धृत्यनपिबेद्दक्षिणेनत्वित्युपक्रम्य सौवर्णरौप्यपात्रैश्चेत्याद्युक्तेर्यदिस्वहस्तेनाचामेत्तदैतैरेवेतिपरिगणनबलान्नियमेननान्यैरित्यर्थातिपित्तलकांस्यादिभिर्वामोद्धृतैर्नाचामेदित्याहुः । प्रयोगपारिजातेसंग्रहे—करकालाबुपात्रेणताम्रचर्मपुटेनच । गृहीत्वास्वयमाचामेद्भूमिलग्नेननान्यथा । अत्रभूमिलग्नत्वेमूलंचिंत्यम् । वामेनोद्धृत्येतिस्मृत्यर्थसारविरोधात् । माधवीयेस्मृत्यंतरे—करपत्रेषुयत्तोयंयत्तोयंताम्रभाजने । सौवर्णेराजतेचैवनैवाशुद्धंतुतत्स्मृतम् । अपरार्केस्मृत्यंतरे—ताम्राश्मनालिकेराब्जवेणुकालाबुचर्मभिः । स्वहस्तेनापिचाचामेत्सर्वदाशुचिरेवसः । नकेवलमन्यदत्तेनेतितत्रैव ॥ इतिश्रीमन्नारायण०लक्ष्मणभट्टकृतावाचाररत्नेआचमनम् ॥

अथदंतधावनम् ॥ **अत्रिः**—मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः । अथार्द्रंकाष्ठंशुष्कंवाभक्षयेद्दंतधावनम् । तस्याद्यतयोराचामेत् । **आग्नेये**—शौचंकृत्वामृदाचम्यभक्षयेद्दंतधावनमित्युक्तेः । प्रक्षाल्यभंक्त्वातुशुचौदेशेत्यक्त्वातदाचमेदितिगारुडाच्च । **आचारादर्शे विष्णुः**—प्रातर्भुक्त्वाचयतवाग्भक्षयेद्दंतधावनम् । भुक्त्वेतियतिपरमितिहलायुधः । **विष्णुः**—कंटकिक्षीरिवृक्षोत्थंद्वादशांगुलमव्रणम् । कनिष्ठांगुलिवत्स्थूलंपर्वार्धकृतकूर्चकम् । दतधावनमुद्दिष्टंजिह्वोल्लेखनिकातथा । द्वादशांगुलकंविप्रेकाष्ठमाहुर्मनीषिणः । क्षत्रविट्शूद्रजातीनां नवषट्चतुरंगुलम् । **स्मृत्यर्थसारेतु**—तिक्तकषायकटुसुगंधिकंटकिक्षीर्यव्रणमृजुकीटाद्यदूषितंद्वादशांगुलंविप्रे क्षत्रादिष्वंगुलिह्रासइत्युक्तम् । **शंखः**—कुमाराणांचनारीणांकर्तव्यंचतुरंगुलम् । **अथतत्काष्ठानि मदीयाःश्लोकाः**—आम्राम्रातकसर्जवेणुबृहतीश्रीपर्णिपुन्नागकान् चंपावैकदरंशिरीषखदिरापामार्गनिंबार्जुनान् । नारिंगंवदरीप्रियंगुकुटजान्धात्रीतमालंतथाकंकोलंत्वरिमर्दलोध्रमधुकान्राजादनपर्णकम् । जात्याट

रूषावतिमुक्तजंबूप्लक्षान्कपायंकटुकंटकंच । गृह्णीतशुद्धैर्दंतानामन्यांस्तत्रविवर्जयेत् । आम्रातकआंबाडाइतिप्रसिद्धः । सर्जोरालइतिप्र सिद्धः । राजादनंचारोली । कदरःश्वेतसारःखदिरः । खदिरोरक्तसारः । अतिमुक्तजंमोगरावेलीइतिमध्यदेशे । मधूकोज्येष्ठीमधुः । **संग्रहे**—अपामार्गेधृतिर्मेधाप्रज्ञाशक्तिर्वपुःशुचिः । **अंगिराः**—प्रक्षाल्यभक्त्वातज्जह्यान्छुचौदेशेसमाहितः । **जातूकर्ण्यः**—ईशान्य भिमुखःकुर्याद्वाग्यतोदंतधावनम् । **कृत्यरत्नेगर्गः**—प्राङ्मुखस्यधृतिःसौख्यशरीरारोग्यमेवच । दक्षिणेनतथाकार्यपश्चिमेनपराजयः । उत्तरेणगवांनाशःस्त्रीणांप्रेष्यजनस्यच ॥ ॥ **अथनिषिद्धानि । मदीयाःश्लोकाः**—श्लेष्मातकःपिप्पलितिंदुकौपारिजातरिष्टाक्रमुकेंगु दीच । कार्पासभव्यौशणपारिभद्रौकुशेष्टकेवैवकुलश्वशुष्कम् । शाल्मल्यक्षौशिग्रुमोचानखानिकाशोलोष्ठसैंधवचांगुलिश्च । मुक्त्वांगुष्ठानामिके शिंशपायामृत्स्नापर्णागारपापाणतार्णम् । कुंभोविभीतकधवौसिकताश्मल्योनिर्गुंडिगुग्गुलपटौकनकश्चकन्छ्ः । नदास्वष्टमिरश्रयोर्व्रतदिनेदर्शेर वौभूमिजेश्राद्धेजन्मदिनेचतुर्दशियुगेक्रांतौव्यतीपातके । द्वादश्यांनिजजन्मभेपरतरेतत्पूर्वभेपौर्णमास्यांमांगल्यदिनोपवासदिनयोश्छायासुतेवा भृगौ । प्रतीचीमुखोदक्षिणाशामुखोवाद्विजानांविशुद्धिनकुर्यादमीभिः । अत्रमूल**पृथ्वीचंद्रादि**घुस्पष्टम् । पारिभद्रोनिंबतरुरित्यमरः । रक्त मंदारइति**हिमाद्रिः । यत्तुश्राद्धकाशिकायांस्मृतिः**—शणशाकंमृतंमांसकरेणमथितंदधि । अंगुल्यादंतसघर्षस्तुल्यगोमांसभक्षणैर्गिति तदंगुष्ठानामिकान्यपरम् । इष्टकालोष्ठपाषाणैरितरांगुलिभिस्तथा । मुक्त्वात्वनामिकांगुष्ठौनकुर्याद्दंतधावनमिति**चंद्रिकायांवृद्धयाज्ञव ल्क्योक्तेः । वाराहे**—अज्ञातपूर्वाणिनदंतकाष्ठान्यधान्नपत्रैश्वसमन्वितानि । नयुग्मपत्राणिनपाटितानिनचार्द्रशुष्काणिविनात्वचाच । **आ श्वलायनः**—दीक्षितोब्रह्मचारीचयतिश्वविधवांगना । नित्यमद्याद्दंतकाष्ठममायांतुविवर्जयेत् ॥ ॥ **ब्रह्मचारिणंप्रकृत्यकौर्मे**—नाद शंचैववीक्षेतनाचरेद्दंतधावनम् । अतोब्रह्मचारिणोविकल्पइतिकेचित् । वस्तुतस्तुपूर्ववाक्येब्रह्मचारिपदनैष्ठिकपरं यतिसाहचर्यादितियुक्तम् ।

स्मृतिमंजर्यां—रजस्वलाचतुर्थेह्निसूतिकादशमेहनि । स्नानात्पूर्वंबंधमोक्षेनिंद्येष्वपिचरेदिति । बंधोनिगडः ॥ ॥ **अथविहितनिषिद्धानि**—खर्जूरपीलुवटबिल्वकदंबवंधूकाश्वत्थकिंशुकमधूकशमीचजातिम् । अर्ककरंजकुटजावथर्तितिणींचनिर्गुंड्युदुंबरविशोककको विदारान् । विद्वानेतान्सदानिंद्यात्प्रतिषिद्धविधित्सितान् । अत्रदंतधावनकरणत्वेनसामान्यप्राप्तौविशेषविधिनाशेषनिषेधेसतिपुनर्निषेधःप्रतिनिधित्वेनग्रहणं नेत्यर्थकोमाषनिषेधवदित्या**चारचंद्रोदयः** । विहितनिषिद्धेषुविकल्पइतिकश्चित् । तन्न । व्यवस्थासंभवेविकल्पायोगात् । वयंतुविहितग्रहणेन तदन्यनिषेधेसिद्धेपुनस्तद्ग्रहणंविहितालाभेनिषिद्धान्यग्रहार्थंविहितनिषिद्धान्यालाभेविहितनिषिद्धग्रहार्थंतद्गणनमितिब्रूमः । **नारदः**—आसनेशयनेयानेपादुकादंतधावने । पलाशाश्वत्थकौवर्ज्यौसर्वकुत्सितकर्मसु । **धर्मसारे**—स्त्रीसंगंखादनंपानंस्वाध्यायंक्षुरकर्मच । नकुर्याद्दंतसंघर्षंतैलेशिरसिसंस्थिते । **यमः**—चतुर्दश्यष्टमीदर्शपूर्णिमासंक्रमेरवौ । एपुस्त्रीतैलमांसानिदंतकाष्ठंचवर्जयेत् । **भविष्ये**—दशम्यांदंतकाष्ठेनजिह्वांलेखयतेयदा । एकादशीविधानायनिराशःस्याद्यमस्तदा । **वृद्धमनुः**—गतेदेशांतरेपत्यौगंधमाल्यांजनादिच । दंतकाष्ठंचतांबूलंवर्जयेद्वनितासती । **प्रयोगपारिजातेदक्षः**—अंजनाभ्यंजनेस्नानप्रवासंदंतधावनम् । नकुर्यात्सार्तवानारीग्रहाणामीक्षणंतथा । **संवर्तः**—रवौविवाहआशौचेवर्जयेद्दंतधावनम् । **मरीचिः**—नाद्यादजीर्णवमथुश्वासकासज्वरार्दितः । **गोभिलः**—श्राद्धेयज्ञेथनियमेनभक्ष्यंप्रोदितेरवौ । **यमः**—मध्याह्नस्नानवेलायांयोभक्षेद्दंतधावनम् । निराशास्तस्यगच्छंतिदेवताःपितरस्तथा । अत्रप्रोदितेइतिमध्याह्नेपितन्निषेधेसिद्धेमध्याह्ननिषेधोदोपाधिक्यार्थइतिकेचित् । वस्तुतस्तुमध्याह्नेतन्निषेधस्तत्पूर्वप्रोदितेपितत्प्राप्त्यर्थः । अन्यथानिषेधवैयर्थ्यादितियुक्तम् । श्राद्धेदंतधावननिषेधस्तुकर्तुरेव । श्राद्धभुक्प्रातरुत्थायप्रकुर्याद्दंतधावनम् । श्राद्धकर्तानकुर्वीतदंतानांधावनंबुधइति**प्रचेतोवचनात्** । अविभक्तानांज्येष्ठस्यकर्तृत्वेपिफलभाक्त्वात्फलिसंस्काराद्दंतधावनवर्जनादयःसर्वेषाम् । एवंप्रतिनिधेरपि ।—श्राद्धंशिष्येणपुत्रेणतदन्येनापिकारयेत् । नियमानाचरेत्सो

पिनियतांश्चवसुंधरेइतिहे**माद्रौवाराहाच** । **विष्णुरहस्ये**—उपवासेतथाश्राद्धेखादित्वादंतधावनम् । गायत्र्याशतसंपूतमंबुप्राश्यविशुद्ध्यति । **काशीखंडे**—अलाभेदंतकाष्ठानांनिषिद्धेवाथवासरे । गंडूपाद्वादशग्राह्यामुखस्यपरिशुद्धये । **स्कांदेप्रभासखंडे**—वर्जितेदिवसेदेविगडूपांश्चैवषोडश । तत्तत्पत्रैःसुगधैर्वाकारयेद्दंतधावनम् । **यत्तु**—उपवासेपिनोदुष्येद्दंतधावनमजनम् । एकादश्यांतृणैःपर्णैर्नकुर्याद्दंतधावनमितिकृ**ष्णभट्टीयेस्कांदं** तत्सभर्तृकोपवासपरम् । अंजनसाहचर्यात् । **हेमाद्रावप्येवम्** । दंतधावननिषेधेऽपिजिह्नोल्लेखोभवति—प्रतिपत्पर्वषष्ठीषुनवम्यांदंतधावनम् । पर्णैरन्यत्रकाष्ठैस्तुजिह्नोल्लेखःसदैवहीति**व्यासोक्तेः** । **स्कांदे**—दतधावनकाष्ठेननजिह्नांपरिमार्जयेत् । आयुर्बलंयशोवर्चःप्रजापशुवसूनिच । ब्रह्मप्रज्ञांचमेधांचत्वनोवेहिवनस्पते । मंत्रेणानेनमतिमान्भक्षयेद्दंतधावनमिति**काशीखंडा**न्मत्रोभक्षणे इति**पृथ्वीचंद्रमदनपारिजातौ** । **छंदोगपरिशिष्टे**प्येवम् । अभिमन्त्र्याहृताशाखामत्रेणानेनवैद्विजाः । ततऊर्ध्वक्रमेणैवधावयेच्छाखया तयेत्यं**गिरःस्मृतेः** । शाखाभिमंत्रणइति**स्मृतिरत्नावली** । वचनद्वयादुभयत्रेतितुयुक्तम् । **सएव**—पतितांत्यजपांखडिदेवाजीवरजस्वलाः । भिषक्पातकिचंडालानपेक्ष्यादंतधावने । शुनकविड्वराहचगर्दभताम्रचूडकम् । अन्यान्नैवेदशान्पश्येद्द्विजशुद्धौविचक्षणः । देवाजीवोदेवलकः । **यत्तुकल्पतरौ**—ऊर्ध्वेनिपतितेसिद्धिस्तथाचाभिमुखेस्थिते । अतोन्यथानिपतितेआनीयपुनरुत्सृजेदिति तत्सिद्ध्यर्थकादिसप्तमीव्रतप्रकरणानभिज्ञत्वाद्यात्किंचिदेव ॥ ॥ **उषःपानम्** । **वृहदात्रेयसंहितायाम्**—पिवतिपर्युषितंजलमन्वहंतिमिरवांश्चरमप्रहरेनिशः । यदितदा लभतेसतुगारुडीदृशमपास्तसमस्तगदोनरः । **आयुर्वेदेभोजोपि**—अंभसःप्रसृतीरष्टौरवावनुदितेपिबेत् । नवनागवलंप्राप्यजीवेद्वर्षशतंनरः । **शौनकः**—पश्चाद्द्वादशगडूषैःशुद्धिंकृत्वाद्विराचमेत् । ललाटेहृदिबाह्वोश्चऊर्ध्वपुंड्राणिधारयेत् । चतुर्भिःसंकर्षणादिनामभिश्चदनादिभिः । **विष्णुपुराणे**—स्वाचांतस्तुपुनःकुर्यात्पुमान्केशप्रसाधनम् । आदर्शांजनमांगल्यदूर्वाद्यालंभनानिच । **मार्कंडेयपुराणे**—दक्षिणाभिमुखो

यस्तुविदिक्संमुखएवच । केशान्संस्कुरुतेमर्त्योधननाशंसविंदति ॥ इतिश्रीमन्नारायण०लक्ष्मणभट्टकृताचाररत्नेदंतधावनम् ॥

अथाज्यावलोकनम् ॥ **मदनपारिजातेब्राह्मविष्णुपुराणयोः**—स्वमात्मानंघृतेपश्येद्यदीच्छेच्चिरजीवितम् । **स्कांदे**—आदौविप्रस्यवरणंकुर्याद्वस्त्रानुलेपनैः । ततःप्रतिष्ठयेत्पात्रंस्वैर्मंत्रैश्चप्रपूजयेत् । पश्चाद्विप्रायदातव्यंस्वर्णेकेनसमन्वितम् । प्रातराज्यपात्रदानमंत्रो **हेमाद्रौगोपथब्राह्मणे**—आज्यंतेजःसमुद्भूतमाज्यंपापहरंपरम् । आज्येनदेवास्तृप्यंतिआज्येलोकाःप्रतिष्ठिताः । भौमांतरिक्षदिव्यादियन्मेकल्मषमागतम् । सर्वंतदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु । **अन्यच्च**—याऽलक्ष्मीर्यच्चदौःस्थ्यंमेसर्वगात्रेष्ववस्थितम् । तत्सर्वंशमयाज्यत्वंलक्ष्मीपुष्टिंचवर्धय । इति ॥ ॥ **अथकुशाः** । **चंद्रोदयेऽत्रिः**—उभयानामिकाभ्यांतुधार्येदर्भपवित्रके । **पवित्रमाहमार्कंडेयः**—चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकम् । एकैकन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमम् । **यत्तुकात्यायनः**—अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच । प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचिदितितद्वैश्यपरंपूर्ववचनादितिपृथ्वीचंद्रः। **स्मृत्यर्थसारेतु**—सर्वेषांवाभवेद्वाभ्यांपवित्रयत्रकुत्रचिदित्युक्तम् । **चंद्रिकायांतु**—सप्तभिर्दर्भपिंजूलैःकुर्याद्ब्राह्मपवित्रकम् । पंचभिःक्षत्रियस्यैवचतुर्भिश्चतथाविशः । द्वाभ्यांशूद्रस्यविहितमितरेषांतथैवचेति । तथाऽनंतर्गर्भिणमित्यादितुस्थालीपाकपरमित्युक्तम् ॥ ॥ **रत्नावल्याम्**—प्रथमंलंघयेत्पर्वद्वितीयंतुनलंघयेत् । अग्रपर्वस्थितोदर्भस्तपोवृद्धिकरोहिसः । मध्येचैवप्रजाकामोमूलेसर्वार्थसाधकः । **चंद्रिकायाम्**—अंगुलीमूलदेशेतुपवित्रंधारयेद्द्विजः । राज्ञांद्विपर्वकेचैवविशामग्रेकरस्यतु । **रत्नावल्याम्**—यज्ञोपवीतेमौंज्यांचतथाकुशपवित्रके । ब्रह्मग्रंथिविजानीयादन्यथातुयथारुचि । **पवित्रप्रकारस्तत्रैव**—अंगुष्ठंघर्षयेद्द्विद्वान्तर्जन्यापिपुनःपुनः । ज्ञानमुद्रामधःकुर्यात्पूर्ववद्ग्रंथिबंधनम् । **आश्वलायनः**—तारेणकुर्याद्ग्रंथितुपवित्रस्यद्विजोत्तमः । ग्रंथेरेकांगुलस्तद्वत्तदूर्ध्वद्व्यंगुलंमतम् । तारः प्रणवः । **भरद्वाजः**—अत्रोक्तसंख्यापिंजूलानेकीकृत्यसमंयथा । मूलानिदक्षिणेहस्तेधृत्वाग्राण्यन्यपाणिना । दक्ष

हस्तेनतद्वाममनुवर्त्यप्रदक्षिणम् । तथैवाग्रेणचावेष्ट्यकुर्याद्ग्रंथिंयथादृढाम् । **वृत्तग्रंथिलक्षणंहेमाद्रौगारुडे**—अर्धप्रदक्षिणीकृत्यशिखांपा शंप्रवेशयेत् । वैष्णवेनैवमार्गेणवृत्तग्रंथौपवित्रके । वैष्णवोमार्गः पश्चाद्भागः । **ब्रह्मग्रंथिरपितत्रैव**—संत्यज्यवैष्णवंमार्गंब्राह्ममार्गविमिश्रि तम् । सकृत्प्रदक्षिणीकृत्यब्रह्मग्रंथिःसउच्यते । कर्तुरभिमुखप्रदेशोब्रह्ममार्गः । **क्षेमप्रकाशेशंखःप्रकारांतरमाह**—त्रिगुणीकृतरज्जुस्तु त्रिवृत्यासंनियोजयेत् । ब्रह्मग्रंथिःसविज्ञेयःसदामौंजादिषुद्विजैः । **चंद्रोदयेव्यासः**—करेकंठेशिखायांचकर्णयोरुभयोरपि । पवित्रधारकोय श्नसपापेनलिप्यते । **कात्यायनः**—सपवित्रःसदर्भोवाकर्मांगेपितृकर्मणि । अशून्यतुकरंकृत्वासर्वत्राचमनंचरेत् । नोत्सृज्यतत्पवित्रंतुभु क्त्वोच्छिष्टंतुवर्जयेत् । **ब्राह्मे**—मंत्रंविनाधृतंयत्तत्पवित्रमफलंभवेत् । तस्मात्पवित्रेमत्राभ्यांधारयेदभिमंत्र्यच । पवित्रंतेतुइत्यादिमंत्रद्वितयम स्यतु । प्रणवस्त्वस्यमंत्रःस्यात्समस्ताव्याहृतिस्तुवा । **पृथ्वीचंद्रोदये**—धृतपवित्रकर्मांतेग्रंथिमुक्त्वातुतत्त्यजेत् । विस्मृत्ययदिपात्रेषुपवित्रवि सृजेत्तथा । प्राजापत्यंचरेत्कृच्छ्रंतत्किल्बिषविशुद्धये । **आश्वलायनः**—तस्मिन्क्षीणेक्षिपेत्तोयेवह्नौवायज्ञसूत्रवत् । भूमिंज्ञात्वातथाशुद्धांसृ द्विस्तारेणपूरयेत् । **भरद्वाजः**—कर्मांतेपुनरादायपवित्रद्वितयंद्विजः । शुचौदेशेविनिक्षिप्यदध्यादेतत्पुनःपुनः । यद्युच्छिष्टाद्युपहतंपवित्रंवि हतंभवेत् । तदैवग्रंथिमुत्सृज्यत्यजेदितरथानहि । **मदनपारिजातेकौशिकः**—पवित्रस्यतुनाशौचमाचांतेतुकदाचन । पितृणांतर्पणेत्या ज्यमुच्चारेपूजनेतथा । **दर्भेषुतुहेमाद्रौस्कांदे**—अनामिकाधृतादर्भाह्येकानामिकयापिवा । द्वाभ्यामनामिकाभ्यांतुधार्येदर्भपवित्रके । **आ श्वलायनः**—अथवानामिकाभ्यांतुग्रंथिहीनंकुशादिकम् । हेमादीन्वाथबिभृयात्सर्वकर्मस्वपिद्विजः । **गौडास्तु**—मध्यमानामिकाभ्यांतुधा रयेद्विदलकुशम् । सध्यादिकर्मजाप्येषुस्वाध्यायेपितृतर्पणे । केवलानामिकायांतुअज्ञानाद्धारयेत्कुशम् । श्वानमूत्रसमतोयंपीत्वाचांद्रायणचरे

---

[1] मनुनातु—मेरालामजिनदडमुपवीतकमण्डलुम् । अप्सुप्रास्यविनष्टानिगृह्णीतान्यानिमंत्रवत् । (मनु अ २ श्लो ६४) इत्युक्तेरत्रत्योवह्निनिक्षेपोविचारणीय ।

दितिहारीतोक्तेः कुशधारणंमध्यमानामिकयोरित्याहुः । तन्न । वचनस्यमहानिबंधेषुक्काप्यनुपलंभात् । सर्ववचनेषुकुशहेमरूप्यपवित्राणाम विशेषोक्तेश्च । कुशानूर्ध्वाग्रान्विभृयात् । वज्रंयथासुरेंद्रस्यशूलंहस्तेहरस्यच । चक्रायुधंयथाविष्णोरेवंविप्रकरेकुशइतिचंद्रिकायांगोभिलोक्तौ संदिग्धेषुवाक्यशेषादितिन्यायेनशूलसाम्योक्त्यानिर्णयाच्छूलदृष्टान्तएवमुख्यः । अतएवतत्रैवहस्तग्रहणंत्रिशाखत्वादिनात्रिशूलसाम्याच्च । दर्भसंख्यामाह—समूलाग्रौविगर्भौतुकुशौद्वौदक्षिणेकरे । सव्येचैवतथात्रीन्वैबिभृयात्सर्वकर्मसु । छंदोगपरिशिष्टे—द्वौदर्भौदक्षिणेहस्तेसव्येत्रीनासनेसकृत् । उपवीतेशिखायांचपादमूलेसकृत्सकृत् । अत्रचत्वारःपक्षाः । हस्तद्वयेदर्भधारणम् हस्तद्वयेपवित्रधारणम् दक्षिणेपवित्रंवामेकुशाः दक्षिणएवोभयमिति । तृतीयःकातीयपरः—सव्यःसोपग्रहःकार्योदक्षिणःसपवित्रकइतिकात्यायनोक्तेः । लघुहारीतः—जपेहोमेतथादानेस्वाध्यायेपितृतर्पणे । अशून्यंतुकरंकुर्यात्सुवर्णरजतैःकुशैः । सुवर्णरजतैरितिवहुत्वमेकसुवर्णाद्यवयवविधारणेपियुक्तम् । सुवर्णत्वादेरवयवावयविवृत्तित्वात्सुवर्णादीनांसमुच्चयः । अनामिकायांतद्धेमधारयेद्दक्षिणेकरेइतिदेवीपुराणे—अनामिकायांहेमधारणोक्तेस्तत्समभिव्याहृतंरजतमपितत्रैवधार्यम् । तर्जन्यांरजतंधार्यमितिवचनंतुनिर्मूलम् । कल्पतर्वादिभिरनादरादितिवर्धमानः । तन्न । अनामिकाधृतंहेमतर्जन्यांरूप्यमेवच । कनिष्ठिकाधृतंखड्गंतेनपूतोभवेन्नरइतिश्राद्धहेमाद्रौचंद्रिकायांचयोगयाज्ञवल्क्यविरोधात् तर्जन्यांरूप्यंजीवत्पितृकान्यपरम्—उत्तरीयंयोगपट्टंतर्जन्यांरजतंतथा । नजीवत्पितृकैर्धार्यंज्येष्ठोवाविद्यतेयदीतिचंद्रोदयेसंग्रहात् । आश्वलायनः—अन्यैर्धृतंनगृह्णीयात्पवित्रंतृणसंभवम् । हेमादयस्तुसंग्राह्याःसम्यङ्निष्टप्यवह्निना । सएव—पवित्रेपतितेज्ञातेतथाजपगणेभुवि । प्राणायामत्रयंकुर्यात्स्नात्वाविप्रोऽघमर्षणम् । जपगणो माला—हेम्नैवसर्वदासर्वंकुर्यादेवाविचारयन् । रौप्यंदक्षप्रदेशिन्यांविभृयाद्दीक्षितोद्विजः । अग्रंथिकंचहेमंचतथालोहत्रयोद्भवम् । गायत्र्यक्षरवर्गेणगृह्णीयात्ताम्रमुत्तमम् । अनुष्टुभस्तथारूप्यंत्रिष्टुभःकनकोत्तमम् । गायत्रीचतुर्विंशत्यक्षरा तावदशंताम्रम् ।

एवमग्रेपि। द्वात्रिंशदक्षरानुष्टुंप्। चतुश्चत्वारिंशदक्षरात्रिष्टुप्—शलाकाः कारयित्वातोऽभिमृजेदंगुलीयकम्। शुद्धोधार्यंदिवारात्रत्रयंममथापिवा। आगमेत्वन्यथोक्तम्—सोमसूर्याग्निरूपाःस्युर्वर्णालोहत्रयतथा। रौप्यमिंदुःस्मृतोहेमसूर्यस्ताम्रहुताशन.। लोहभागा.समुद्दिष्टाःस्वराद्यक्षरसंख्य या। तैर्लोहैःकारयेन्मुद्रामसकलितसगताम्। अकारादय.षोडश१६स्वरास्तावतोभागारौप्यस्य। कादयामांता.पंचविंशतिः२५हेम्न.। यादयःक्षांता दश१०ताम्रस्य। साग्रसहस्रंसजप्यस्पृष्ट्वातांजुहुयात्ततः। तस्यांसपातयेन्मंत्रीसर्पिषापूर्वसंख्यया। जप.पूर्वोक्तमातृकामत्रस्य कं खं गं इत्यादिः। निक्षिप्यकुंभेतांमुद्रामभिषेकोक्तवर्त्मना। आवाह्यपूजयेद्देवीमुपचारैःसमाहितः। अभिषिच्यविनीतायदद्यात्तांमुद्रिकांगुरुः। इयरक्षाक्षुद्ररोग विषज्वरविनाशिनी। **शारदातिलके**तु—तारताम्रसुवर्णानामर्कषोडशखेंदुभिरित्युक्तम्। खेदवोदश। **वोपदेवः**—र्हिंशुमुचग्रमगोरानीश वेकेपुगुवुगो। प्राच्याद्रत्नानिखेटाश्रमध्येमाणिक्यमुष्णगोः। उष्णगुः सूर्यः। हिंशुमित्याद्यक्षरद्वंद्वानिहीरकशुक्रादिग्रहबोधकानि। **मंत्र शास्त्रे**—अर्केंदुरक्तज्ञगुरुभृगुमदाहिकेतवः। माणिक्यमौक्तिकचारुविद्रुमगारुडंपुनः। पुष्परागलसद्वज्रनीलगोमेदकंशुभम्। वैडूर्यनवरत्ना निमुद्रांतैःकल्पयेच्छुभाम्। जपहोमादिकसर्वकुर्यात्पूर्वोक्तवर्त्मना। योमुद्रांधारयेदेनांतस्यस्युर्वशगाग्रहाः। विन्यासेविशेषोज्योतिषे— माणिक्यमंतस्तरणेर्निधेयवज्रसुमुक्ताविलसत्प्रवालम्। गोमेदकंनिर्मलमिंद्रनीलवैडूर्यकंपुष्पमतस्तुपाच्चिः। पूर्वादितःशुक्रशशांकभौमराहुकिंके त्विज्यशशांकजानाम्। रत्नानियत्नेनचमुद्रिकायांन्यस्यानिखेटेपुनिजोच्चगेषु॥ इतिलक्ष्मणभट्टकृताचाररत्नेंगुलीयकप्रकरणम्॥

अथकुशग्रहणम्। कुशाःकतिविधाःकदाकथंकैर्ग्राह्याःकेऽधिकारिणोगृहीतानामहर्मर्यादांचाह **स्मृतिचिंतामणौ**—अहन्यहनि कर्मार्थंकुशोद्धारःप्रशस्यते। तत्रैव—मासिमास्युद्धृतादर्भामासिमास्येवचोदिताः। उत्तरोत्तरमासेषुधर्मविद्भिरसमताः। **षट्त्रिंशन्मते**— मासेनस्यादमावास्यादर्भोग्राह्योनवःस्मृतः। **मदनरत्नेशंखमरीची**—मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः। अयातयामास्तेदर्भानियो

ज्याश्चपुनःपुनः । आर्द्रान्लुँनीयाद्रात्रौनलुनीयाद्वापिसंध्ययोः । मासःशुक्लादिरितिवर्धमानः । हेमाद्रौहारीतः—मासेनभस्यमावास्यातस्यां दर्भोच्चयोमतः । यत्तुशंखः—अमायांचैवनच्छिद्यात्कुशांश्चसमिधस्तथेति तत्तत्कालकर्मपर्याप्तव्यतिरिक्तविषयम् । कुशाःकाशाश्चदूर्वाद्याग वार्थचतृणादिकम् । निषिद्धेवापिगृह्णीयादमावास्याहनिद्विजइतिजाबाल्युक्तेरितिपृथ्वीचंद्रः । वनस्पतिगतसोममुहूर्तपरोनिषेधः । त्रिमु हूर्तवसेदर्केत्रिमुहूर्तजलेवसेत् । त्रिमुहूर्तवसेद्गोषुत्रिमुहूर्तवनस्पतौ । वनस्पतिगतेसोमेयस्तुहिंस्याद्वनस्पतीन् । घोरायांभ्रूणहत्यायांपच्यतेनात्र संशयइतिसौपर्णोक्तेरितिमदनपारिजातः । रागप्राप्तस्यायंनिषेधः वैधतन्निषेधेविकल्पापत्तेरितिचंद्रिका । तत्रैवयमः—समूलस्तुभ वेद्दर्भःपितृणांश्राद्धकर्मणि । श्राद्धमेकोद्दिष्टम् । एकोद्दिष्टेकुशाःकार्याःसमूलायज्ञकर्मणि । बहिर्लूनाःसकृल्लूनाःसर्वत्रपितृकर्मस्वितितेनैवोक्तेः । बहिर्लूनाःउपमूलंलूनाः । तेचैकोद्दिष्टेतरश्राद्धपराइतिचंद्रिका । तत्रैवपुराणे—पित्र्यंमूलेनमध्येननारंदानचयत्नतः । दैवंकर्मकुशाग्रेणक र्तव्यंभूतिमिच्छता । तत्रैवसंग्रहे—होमेतर्पणकालेचविवाहेयज्ञकर्मणि । अगर्भिणस्तुयेदर्भाःपुत्रदारधनप्रदाः । तत्रैवहारीतः—पितृदे वद्विजार्थेषुसमूलानाहरेद्विजः । स्मृतिचिंतामणौ—सप्तरात्रंशुभादर्भास्तिलक्षेत्रसमुद्भवाः । भरद्वाजः—पलाशाश्वत्थखदिरवटप्लक्षस मीपगाः । विल्ववैकंकतांतस्थास्तच्छायास्थाःकुशाःशुभाः । गृह्यपरिशिष्टे—दर्भाःकृष्णाजिनंमंत्राब्राह्मणाहविरग्नयः । अयातयामान्येतानि नियोज्यानिपुनःपुनः । इदंनभस्यदर्शच्छिन्नदर्भविषयमितिवर्धमानः । एतदपवादस्तत्रैव—येचपिंडाश्रितादर्भायैःकृतंपितृतर्पणम् । अमेध्या ऽशुचिलिप्तायेतेषांत्यागोविधीयते । हारीतः—पथिदर्भाश्चितौदर्भायेदर्भायज्ञभूमिषु । स्तरणासनपिंडेषुषट्कुशान्परिवर्जयेत् । अत्रषट्त्व मविवक्षितम् । ब्रह्मयज्ञेचयेदर्भायेदर्भाःपितृतर्पणे । हतामूत्रपुरीषाभ्यांतेषांत्यागोविधीयते । मूत्रोच्छिष्टधृतायेचेतिवर्धमानधृतःपाठः । येत्वन्तर्गर्भितादर्भायेचच्छिन्नानखैस्तथा । क्वथिताश्चाग्निनादर्भास्तान्दर्भान्परिवर्जयेदितिवृद्धहारीतोक्तेः । शंखः—नीवीमध्येस्थिताद

र्भाब्रह्मसूत्रेचयेधृताः । पवित्रांस्तान्विजानीयाद्येतुकर्णेचदक्षिणे । नीवीपरिधानंवस्त्रग्रंथिरितिकल्पतरुः । **चंद्रोदयेसंग्रहे**—अग्निकार्ये चयागेचसमूलान्परिवर्जयेत् । **संग्रहे**—आचांतःप्राक्कुशांस्त्यक्त्वापाणावन्यांश्चधारयेत् । श्राद्धारंभेतुयेदर्भाःपादशौचेविसर्जयेत् । अर्च-नादौतुयेदर्भाउच्छिष्टांतेविसर्जयेत् । पार्वणादौतुयेदर्भाआघ्राणांतेविसर्जयेत् । मार्जनादौतुयेदर्भाःपिंडोत्थानेविसर्जयेत् । उत्तानादौतुयेदर्भा दक्षिणांतेविसर्जयेत् । प्रार्थनादौतुयेदर्भानमस्कारेविसर्जयेत् । विकिरेपिंडदानेचतर्पणेस्नानकर्मणि । आचांतश्चप्रकुर्वीतदर्भसंत्यजनंबुधः । **कात्यायनः**—समूलाःपितृदैवत्याःकल्माषावैश्वदेविकाः । ह्रस्वाःप्रवरणीयाःस्युःकुशादीर्घास्तुबर्हिषः । प्रवरणीयाः स्नानाद्यर्हाः । **दर्भ ग्रहणमंत्रमाहशंखः**—विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज । नुदसर्वाणिपापानिदर्भस्वस्तिकरोभव । **स्मृत्यर्थसारे**—हुंफट्कारेणमं त्रेणसकृच्छित्त्वासमुद्धरेत् । **हेमाद्रौकार्ष्णाजिनिः**—पूर्वंतुशिथिलीकृत्यखनित्रेणविचक्षणः । आदद्यात्पितृतीर्थेनहुंफद्हुफट्सकृत्सकृत् । **भरद्वाजः**—शुनाशुद्भवराहेणमार्जारेणैकचक्षुषा । खरेणकुक्कुटेनैवस्पृष्टःकर्मरिपुःकुशः । कपिनाकृकलासेनपतितेनांत्यजातिना । भिषजा रोगिणास्पृष्टःकुशःकर्मस्वशोभनः । देवलेनचषंढेनव्रात्येनाज्ञातजन्मना । वर्ज्यःसूतकिनास्पृष्टःकुशोऽनुष्ठेयकर्मसु । रक्तश्लेष्माश्रुभिःस्पृष्टःक्रि यायुक्तःपुराधृतः । उच्छिष्टजनसंस्पृष्टःकुशःकर्मविनाशकः । सूतिकात्रेयिकावेश्याज्ञातपूर्वाभिसारिकाः । अन्याःसदोषायास्ताभिःकुशःस्पृष्टः क्रियारिपुः । आत्रेयिका गर्भिणी । **अपरार्के**—कुशाःकाशायवादूर्वागोधूमाश्चाथकुंदुराः । उशीराव्रीहयोमुजादशदर्भाःसबल्वजाः । बल्व जादक्षिणदेशेमोळइतिप्रसिद्धाइतिहेमाद्रिः । दर्भत्वोक्तिःकाशादिस्तुत्यर्था । दर्भाभावेद्विजःकर्मकाशैःकुर्वीतसंयतइति**शंखोक्तेः** । **नागदे वाह्निकेसुमंतुः**—कुशःकाशःशरोगुंद्रोयवादूर्वाश्चबल्वजाः । गोकेशकंदौमुंजश्चपूर्वाभावेपरःपरः । **वृद्धपराशरः**—दर्भैर्लोहितदर्भैश्चका

१ ममस्वस्तिकरोभवइतिपाठ । २ कुशाभावेइतिपाठ ।

शवीरणवल्वजैः । शूकधान्यतृणैर्वापिदर्भकार्यंचरेद्द्विजः । सएव—काशहस्तस्तुनाचामेन्नदूर्वाभिःकदाचन । **बौधायनः**—हस्तयोरुभयो द्वौद्वावासनेपितथैवच । लेखनेचतथाद्वौद्वौस्तरणेषोडशस्मृताः । **कौशिकः**—गवांवालपवित्रेणसंध्योपास्तिकरोतियः । सवैद्वादशवर्षाणिकृत संध्योभवेन्नरः । **भरद्वाजः**—रोम्णांपवित्रकरणेनियमोनकुशेष्विव । **पाद्मे**—नदर्भांनुद्धरेच्छूद्रोनपिबेत्कापिलंपयः । नोच्चरेत्प्रणवंमंत्रंपुरो डाशंनभक्षयेत् ॥ इतिश्रीमन्नारायणभट्टात्मज०लक्ष्मणभट्टकृतावाचाररत्नेकुशप्रकरणम् ॥

अथप्रातःस्नानम् । **शंखलिखितौ**—अनश्नन्स्नायादिति । अनश्नन्तांबूलाद्यभक्षयन्निति**कल्पतरुः** । **हेमाद्रौकौर्मे**—नित्यमभ्यु दयात्पूर्वंस्नातव्यंशुद्धिमिच्छता । एषसाधारणोधर्मश्चतुर्वर्णस्यनित्यशः । स्त्रीभिःशूद्रैश्चकर्तव्यंमंत्रवर्ज्यंविगाहनम् ॥ ॥ **भारते**—ब्रह्मक्ष त्रविशांचैवमंत्रवत्स्नानमिष्यते । तूष्णीमेवतुशूद्रस्यसनमस्कारकंस्मृतम् । तूष्णीमितिश्रौतस्मार्तमंत्रनिषेधेप्राप्तेनमइतिनमस्कारमंत्रोविधीयते । सएवमृद्गोमयस्नानेपिविज्ञेयः । तेनाश्वक्रांतेइत्यादिमंत्रोनेति**मदनपालः** । **श्रीदत्ताह्निके**तु तूष्णीमितिवैदिकमंत्रनिषेधोनपौराणानामित्यु क्तम् । **टोडरानंदे**प्येवम् । **कल्पतरुस्तु**—कर्मांगमंत्रपाठःशूद्रस्येत्याह । वस्तुतस्तुपौराणोऽपिब्राह्मणैरेवपठनीयः । शूद्रोनमइत्येवोच्चार येदिति । **शूद्रशिरोमणा**वप्येवम् ॥ ॥ सभर्तृकाणांस्त्रीणांनित्यस्नानमशिरस्कम् । सचैलस्नाननिमित्तेप्यशिरस्कत्वविधानात् । व्रतांगे सशिरस्कताविधानाच्च । **जाबालिः**—सततंप्रातरुत्थायदंतधावनपूर्वकम् । आचरेदुषसिस्नानंतर्पयेद्देवमानुषान् । **श्राद्धचंद्रिकायां पुराणे**—चतस्रोघटिकाःप्रातररुणोदयउच्यते । यतीनांस्नानकालस्तुगंगांभःसदृशःस्मृतः । यतयो नियताः । अरुणोदयःसंध्यापूर्वकालः । संध्यायांनिषेधादितिह**हरिहरः** । तन्न । संध्यापूर्वकालेऽपिरात्रित्वेननिषेधादित्या**चारादर्शः** । तदपिन । वक्ष्यमाण**पराशरवाक्ये**नापर रात्रेस्नानोक्तेः । **वृद्धपराशरः**—उषस्युषसियत्स्नानंक्रियतेऽनुदितेरवौ । प्राजापत्येनतत्तुल्यंमहापातकनाशनम् । उषःकालस्तुलोहितदिगु

पलक्षितकालात्प्राक्कालइतिकल्पतरुः । **नागदेवाह्निकेक्षेमप्रकाशेचविष्णुः**—नाडिकापट्कंपंचाशत्प्रातस्त्वेकाधिकोरुणः । उपःका लोऽष्टपंचाशन्छेपःसूर्योदयःस्मृतः। **यच्चुमार्कंडेयः**—सूर्योदयंविनानैवस्नानदानादिकःक्रमः। अग्नेर्विहरणंचैवकत्वभावश्चलक्ष्यते । इतितदुपः कालासंभवेइतिकेचित् । उदयपदेनोपःकालोलक्ष्यतइतिवर्धमानःपृथ्वीचंद्रश्च । तेनरात्रौनकुर्यादित्यर्थः । अविहितविशेपविपयमिति **टोडरानंदः** । इदं नित्यंकाम्यंच । सप्ताहंप्रातरस्नायीद्विजःशूद्रत्वमाप्नुयादितिव**सिष्ठोक्तेः** । उपस्युपसीतिवीप्साश्रुतेश्च । प्रातःस्नानंह रेत्पापमलक्ष्मींग्लानिमेवच । अशुचित्वचदुःस्वप्नतुष्टिंपुष्टिंचयन्छतीति**काशीखंडाच** । प्रातःस्नायीभवेन्नित्यमध्यस्नायीसदाभवेदितिव्या घ्रपादोक्तेर्मध्याह्नस्नानमपिनित्यमितिहेमाद्र्यादयः । नित्यमेवतुमध्याह्नेप्रातश्चकचकस्यचिदितिस्मृ**त्यर्थसारान्**मध्याह्नेएवनित्यमित्या **चारादर्शः** । **कामधेनावप्येवम्** । **दक्षस्मृतिगारुडयोः**—प्रातर्मध्याह्नयोःस्नानवानप्रस्थगृहस्थयोः । यतेस्त्रिपवणंस्नानसकृत्तु ब्रह्मचारिण । सकृदित्यशक्तपरम् । स्नायात्प्रातश्चमध्याह्नेब्रह्मचारीगृहीतथेतिचं**द्रोदयेसंग्रहोक्तेः** । **बह्वृचपरिशिष्टे**—स्नानप्रक्र म्य तत्प्रातर्मध्याह्नेचगृहस्थःकुर्यादेकतरत्रवेति । **कात्यायनः**—यथाहनितथाप्रातर्नित्यस्नायादनातुरः । दंतान्प्रक्षाल्यनद्यादौगेहेचतद मन्त्रवत् । अह्नि मध्याह्ने । आतुरस्यमंत्रस्नानादिवेतिपृथ्वीचंद्रः । अमन्त्रवदल्पमत्रम् । गृहेपिहिद्विजातीनांमन्त्रवत्स्नानमिष्यतेइतिहे **माद्रौजैमिनिस्मृतेः** । साग्नेर्नद्यादावप्येवम् । अल्पत्वाद्धोमकालस्यबहुत्वात्स्नानकर्मणः । प्रातःसक्षेपतःस्नानंहोमलोपोविगर्हितइति **कात्यायनोक्तेः** । **चतुर्विंशतिमते**—प्रातर्मध्याह्नयोःस्नानगृहस्थस्यविधीयते । शक्तश्चेदुभयंकुर्यादशक्तस्त्वापराह्निकम् । तत्सशि रस्कम् । **जावालिः**—अशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणाम् । **स्मृत्यर्थसारे**—चक्षूरोगीकर्णरोगीशिरोरोगीकफाधिकः । कंठस्ना नंप्रकुर्वीतशिरःस्नानसमंहितत् । मुखवक्रत्वापादकोरोगः । **आयुर्वेदेपि**—स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु । आध्मानपीनसाजीर्ण

भुक्तवस्तुचगर्हितम् । **हेमाद्रौवाराहे**—त्रिभिःसारस्वतंतोयंपंचाहेनतुयामुनम् । सद्यःपुनातिगांगेयंदर्शनादेवनार्मदम् । समुद्रगानां सरितामन्यासामपियत्पयः । पावनंस्नानदानेषुप्राजापत्यसमंस्मृतम् । **रूपनारायणीयेब्राह्मे**—नद्यांप्रत्येकशःस्नानेभवेद्गोदानजंफलम् । गोप्रदानैश्चदशभिःस्नानेपुण्यंतुसंगमे । **अग्निपुराणे**—भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रवणोदकम् । ततोपिसारसंपुण्यंतस्मान्नादेयमुच्यते । तीर्थतोयंततःपुण्यंगांगंपुण्यंतुसर्वतः । **चंद्रिकायांयोगयाज्ञवल्क्यः**—त्रिरात्रफलदानद्योयाःकाश्चिदसमुद्रगाः । समुद्रगास्तुपक्ष स्यमासस्यसरितांपतिः । त्रिरात्रफलदाः नदीभिन्नजलाधिकरणकत्रिरात्रस्नानफलदाः । पक्षादावप्येवमितिरूपनारायणः । त्रिरात्रोपवासफल दाइतिहेमाद्रिः । **वृद्धयाज्ञवल्क्यः**—नदीस्नानानिपुण्यानितडागेमध्यमानिच । वापीकूपेजघन्यानिगृहेष्वत्यवराणिच । **गारुडे**— नित्यंनैमित्तिकंकाम्यंक्रियांगंमलकर्षणम् । तीर्थाभावेतुकर्तव्यमुष्णोदकपरोदकैः । **माधवीयेगार्ग्यः**—कुर्यान्नैमित्तिकंस्नानंशीताद्भिःकाम्य मेवच । नित्यंयादृच्छिकंचैवयथारुचिसमाचरेत् । **हेमाद्रावप्येवम्** । असमुद्रगताश्चापियाःकाश्चिद्विपुलोदकाः । अशोष्याग्रीष्मकालेऽपि तासुस्नानंसमाचरेत् । शुष्यंतियाःकुसरितोग्रीष्मेसूर्यांशुतापिताः । तासुस्नानंनकर्तव्यंदृष्टतोयास्वपिक्वचित् । इदंकाम्यपरम् । **रूपनाराय णीयेभविष्ये**—शिवलिंगसमीपस्थंयत्तोयंपुरतःस्थितम् । शिवगंगेतितज्ज्ञेयंतत्रस्नानाद्दिवंव्रजेत् । **तत्रैव**—देवार्चादृष्टिपूतेतुस्नानंकृत्वाज लाशये । सर्वपापविनिर्मुक्तःक्षणाद्भवतिनिर्मलः । **चंद्रोदयेवृद्धपराशरः**—कूपेपूद्धृततोयेनस्नानंकुर्वीतवाभुवि । **योगयाज्ञवल्क्यः**— अलाभेदेवखातानांसरितांसरसांतथा । उद्धृत्यचतुरःपिंडान्पारक्येस्नानमाचरेत् । सरउत्सृष्टम् । **पराशरः**—कदाचिद्विदुषामत्यानस्नात व्यंपरांभसा । पंचवाससवापिडान्स्नायादुद्धृत्यतत्रतु । **शौनकः**—उद्धृत्यमृत्तिकापिंडान्दशपंचतथाक्षिपेत् । **पैठीनसिः**—त्रीन्पिंडा नुद्धृत्यस्नायादिति । **बौधायनः** । निरुद्धासुतुमृत्पिंडान्कूपाच्चत्रीन्घटांस्तथा । अत्राप्रतिष्ठितमात्रेपिंडोद्धारइतिप्रांचः । तन्न । अप्रतिष्ठित

जलत्वेनतत्रस्नानाभावात्परस्वोपयोगेचौर्यापत्तेश्चेतिहरिहरादयः । अतःपिंडत्रयोद्धारःसेतुपरः । पंचपिंडोद्धारस्तदन्यपरः । सप्तादिपिंडोद्धार स्तर्पणाद्यर्थमितिपृथ्वीचंद्रः । यथासामर्थ्यव्यवस्थेतिचंद्रिका । सर्वमेतदनुत्सृष्टविषयम् । अनुत्सृष्टेपुनस्नायात्तथैवासंस्कृतेपुचेतिमरीच्युक्तेः । पराशरः—नतीर्थेस्याकुलेस्नायान्नासज्जनसमावृते । दर्भहीनोऽन्यचित्तश्चननग्नोनशिरोविना । बौधायनः—शाल्मलीतितिणीचैवकरजश्चहरीतकी । कोविदारकबिल्वार्कावदरीचबिभीतकः । शेलुश्चखादकश्चैपांछायास्नानंविवर्जयेत् । माधवीयेआपस्तंबः—अंत्यजैःखानिताःकूपास्तडागोवाप्यएवच । एषुस्नात्वाचपीत्वाचप्राजापत्येनशुद्ध्यति । खानितग्रहणादखानितेनदोषः । तत्रैवविष्णुः—जलाशयेष्वथाल्पेषुस्थावरेषुमहीतले । कूपवत्कथिताशुद्धिर्महत्सुनतुदूषणम् । चंद्रिकायांबौधायनः—अधोवर्णोदकेस्नानंवर्ज्यंनद्यांद्विजातिभिः । तस्यांरजकतीर्थंतुदशहस्तेनवर्जयेत् । तत्रैवपुराणे—स्रवन्नदीपुनस्नायात्प्रविश्यांतःस्थितोद्विजः । मरीचिः—नद्यायच्चपरिभ्रष्टनद्यायच्चविवर्जितम् । गतप्रत्यागतंयच्चतत्तोयंपरिवर्जयेत् । स्नानादावितिशेषः । परिभ्रष्टं विच्छिन्नम् । विवर्जितं नदीतोनिःसृतम् । गतप्रत्यागतमविच्छिन्नमावर्ततइतिचंद्रिका । व्याघ्रपादः—सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः । तासुस्नाननकुर्वीतवर्जयित्वासमुद्रगाः । स्नानंतर्पणादेरुपलक्षणम् । नस्नानादीनिकर्माणितासुकुर्वीतमानवइत्यत्रिस्मृतेः तीरवासिनांननिषेधः । नतुतत्तीरवासिनामिति त्रिस्थलीसेतौनिगमात् । समुद्रगानांतुहेमाद्रौदेवीपुराणे—समुद्रगामिनीनांतुषड्रात्ररजइष्यते ॥ ॥ नदीराहकात्यायनः—धनुःसहस्राण्यष्टौतुगतिर्यासांनविद्यते । नतानदीशब्दवहागर्तास्तेपरिकीर्तिताः । धनुश्चतुर्हस्तमितिवाचस्पतिः । भविष्योत्तरे—आदौकर्कटकेदेविमहानद्योरजस्वलाः । त्रिदिनंतुचतुर्थेह्निशुद्धाःस्युर्जाह्नवीयथा ॥ ॥ महानद्यश्चोक्ताब्राह्मे—गोदावरीभीमरथीतुंगभद्रा

१ महीपतेइतिपाठ ।

चवेणिका । तापीपयोष्णीविंध्यस्यदक्षिणेतुप्रकीर्तिताः । भागीरथीनर्मदाचयमुनाचसरस्वती । विशोकाचवितस्ताचविंध्यस्योत्तरतःस्थिताः । **चंद्रिकायांवामनपुराणे**—गोदावरीभीमरथीकृष्णावेणीसरस्वती । तुंगभद्रासुप्रयोगासत्याकावेरिरेवच । दुग्धोदानलिनीरेवावारिसीता कलस्वना । एताअपिमहानद्यःसह्यमूलाद्विनिर्गताः । **अपरार्केमरीचिः**—तपनस्यसुतागंगागौतमीचसरस्वती । रजसानाभिभूयंतेवेणाचन दसंज्ञिताः । **देवलः**—शोणसिंधुहिरण्याख्याःकोकलोहितघर्घराः । शतद्रूश्चनदाःसप्तपावनाःपरिकीर्तिताः । **हेमाद्रौवामनपुराणे**—सर स्वतीनदीपुण्यातथावैतरणीनदी । आपगानर्मदाचैवगंगामंदाकिनीनदी । मधुस्रवाअंशुमतीकौशिकीयमुनातथा । दृषद्वतीमहापुण्यातथाहैरण्व तीनदी । रजस्वलात्वमेतासांविद्यतेनकदाचन । इदंत्रिदिनाधिकरजोनिषेधपरम् । पूर्वोक्तभविष्यविरोधादितिहेमाद्रिः । प्रथमंकर्कटेदेवित्र्य हंगंगारजस्वलेत्यंतर्गतरजोविषयम् । गंगाधर्मद्रवःपुण्योयमुनाचसरस्वती । अंतर्गतरजोदोषाःसर्वावस्थासुचामलाइतिनिगमादितिभट्टाः ॥ ॥

रजोयुक्तनदीस्नानेप्रायश्चित्तमुक्तं**त्रिस्थलीसेतौसंग्रहे**—कालेनभस्यशुद्धंस्यात्त्रिरात्रंतुनवोदकम् । अकालेतुदशाहंस्यात्स्नात्वानाद्यादहर्नि शम् । **कात्यायनः**—उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच । चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यते । प्रेतपदेप्रातःपदमित्या**चारादर्शेटोडरा नंदे**चपाठः । **वृद्धयाज्ञवल्क्यः**—प्रभूतेविद्यमानेपिउदकेसुमनोहरे । नाल्पोदकेद्विजःस्नायान्नदीचोत्सृज्यकृत्रिमे । **वृद्धपराशरः**— नस्नायाच्छूद्रहस्तेननैकहस्तेनवातथा । उद्धृताभिरपिस्नायादाहृताभिर्द्विजातिभिः । **आपस्तंबः**—सशिरोमज्जनमप्सुवर्जयेदस्तमितेचस्नान मिति । अशिरोमज्जनमितिपाठेमज्जनयोग्यजलेगात्रक्षालनंनकार्यमित्यर्थइति**हरिहरः** । **व्यासः**—नद्यांचास्तमितेसूर्येवर्जनीयंसदाबुधैः । न स्नानमाचरेद्भुक्त्वानातुरोनमहानिशि । नवासोभिःसहाजस्रंनाविज्ञातेजलाशये । अत्रास्तमितशब्देनाद्ययामोनिषिद्धोमहानिशाशब्देनमध्य यामः । **आचारादर्शे**तुअस्तमितपदेनसर्वरात्रिनिषेधः । महानिशानिषेधोदोषाधिक्यार्थइत्युक्तम् । नैमित्तिकंतुस्नानंरात्र्यादावपिकार्यम् ।

नैमित्तिकंतुकर्तव्यंस्नानंदानंचरात्रिष्वितिवचनात् । हेमाद्रौभविष्ये—नस्नायादुत्सवेऽतीतेमंगलंविनिवर्त्य च । अनुव्रज्यसुहृद्बंधूनर्चयित्वेष्टदेवताः । अत्रशीतलजलस्नानमेवनिषिद्धमितिशिष्टाः । स्नानमात्रमितितुयुक्तम् । तत्रैव—ग्रहणेविष्यतेस्नानंगृहीतापर्वस्वितेषुन । सेव मंत्रसमायुक्तमध्याहात्रौविशेषतः । जयपूर्वोक्तप्रतिप्रसवइतिहेमाद्रिः । [1]पूर्वस्नानविधिर्गेनेनियुक्तपतीमः । योगयाज्ञवल्क्यः—दर्शे स्नानंनकुर्वीतमातापित्रोस्तुजीवतोः । स्नानकुर्वन्निरात्मष्टेपिनोरुत्तनिजीनिते । मातापित्रोरितिमाहिल्यनिलक्षितमितिपृथ्वीचंद्रः । दर्शेगंगाग्राम स्नानपरमितिपारिजातः । दर्शपयुक्तस्नानपरमितिटोडरानंदः । यत्तुगर्गः—त्रयोदश्यातृतीयायांदशम्यानैवसर्वदा । शूद्रविट्क्षत्रियाः स्नानंनाचरेयुःकथचनेति तन्नित्यनैमित्तिकान्यपरम् । यादृच्छिकंतुयत्स्नानभोगार्थंक्रियतेद्विजै । तन्निषिद्धदशम्यादौनित्यनैमित्तिकंनत्वित्या पस्तंबोक्तेरितिमदनपारिजातः—अभोवगाहनस्नानविहितंसार्ववर्णिकमितिवचनोक्तस्नाननिषेधइतिकल्पतरुः । गंगाग्रामस्नाननिषेधो वैधनिषेधेविकल्पापत्तेरितिटोडरानंदः । गर्गपैठीनसिवसिष्ठाः—पुत्रजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा । नित्यस्नानंचकर्तव्येतिथि दोषोनविद्यते । अपरार्केत्रात्रे—स्नानमकमणंस्त्रप्रदिग्वासमानमसमाचरेत् । व्यासः—नादशाकेनवस्त्रेणस्नायात्कौपीनकादने । नान्यदी येननाद्रेंणनसून्याग्रथितेनच । अत्रेतरकर्मवद्धवद्वयधारणनियमितमितिकल्पतरुः । मेधातिथिस्तु—एकेनवाससास्नायाद्वाससोनियमः स्मृतः । बहुभिःप्रतिषेधस्तुस्नानेफलमभीप्सितमित्याह । अपरार्कस्तु—अस्पृश्यस्पर्शनेचैववार्तायांपुत्रजन्मनि । तीर्थेद्विवासस्नानमन्यत्रै केनवाससेत्याह । वार्ता मरणवार्ता । सदोपवीतिनाभाव्यसदाबद्धशिखेनचेतिवाक्येनबद्धशिखत्वयज्ञोपवीतित्वयोःसर्वदाप्राप्तौपुनःस्नानप्रकर णेबद्धशिखियज्ञोपवीतीतिकात्यायनोक्तिःशिखाभिन्नकेशवधोत्तरीयनिवृत्त्यर्थेतिहरिहरः । तत्र । अनेनैवसिद्धावेकवस्त्रा प्राचीनावीतिनि

---

1 एतच्चिन्नात्मादतिपाठ ।

इतिकात्यायनोक्तिवैयर्थ्यापत्तेः । यत्त्वेतन्नैमित्तिकस्नानांतरेद्विवस्त्रताज्ञापकमितिनैतज्ज्ञापकायत्तंकिंतुवाचनिकं वांतरादनादावपितथापत्तेः । मुक्तकेशैर्नकर्तव्यंप्रेतस्नानंविनाक्वचिदितिवृद्धवसिष्ठोक्तेश्च । अतएवाचारादर्शेऽस्यानुवादत्वान्नोत्तरीयादिनिवृत्तिरित्युक्तम् । ब्रह्मदत्ताचार्योऽपिसवस्त्रोऽहरहराप्लुत्येतिशांखायनसूत्रेसवस्त्रग्रहणंद्वितीयवस्त्रप्राप्त्यर्थमित्याह । हेमाद्रौशौनकः—तथाभ्युक्षणमाहर्तुंपात्रमौदुंवरंदृढम् । जपार्थमक्षमालांचरुद्राक्षादिविनिर्मिताम् । एवंसभृतसंभारःस्नानकर्मसमाचरेत् । अभ्युक्षणं जलम् । औदुंबरं ताम्रमयम् । याज्ञवल्क्यः—मृद्गोमयतिलान्दर्भान्पुष्पाणिसुरभीणिच । आहरेत्स्नानकालेतुस्नानार्थंप्रयतःशुचिः । इदंकातीयानांप्रातर्मध्याह्नयोः । आश्वलायनानांतुबह्वृचपरिशिष्टे—प्रातर्गोमयेनकुर्यान्मृदामध्यंदिनेशुद्धाभिरद्भिःसायमिति । स्मृतिसारे—जलांतेतिलदर्भास्तुयोऽनुष्ठानाययाचते । नानुष्ठानफलंतस्यदातुरेवहितत्फलम् । वामने—निषिच्यतीरेकुशपिंजुलानिपूर्वोत्तराग्राणिमृदंन्यसेच्च । प्रक्षाल्यपादौचमुखंचकंठेयज्ञोपवीतंचजलंपिवेत्रिः । यज्ञोपवीतंकंठेकृत्वात्रिःप्रक्षाल्येत्यन्वयः । पादप्रक्षालनमलस्नानंवहिःकार्यं । जलंदेवगृहंचैवशयनंचद्विजालयम् । निर्णिक्तपादःप्रविशेन्नानिर्णिक्तःकथंचनेतिव्यासोक्तेः ।—मलस्नानंवहिःकृत्वाआचम्यप्राङ्मुखःस्थितः । प्राणायामांस्ततःकुर्यात्ततोध्यात्वादिवाकरमितिचंद्रिकायांयमोक्तेश्च । वामने—कराभ्यांधारयेद्दर्भान्शिखावंधंविधायच । प्राणायामंतथाकुर्यादितिव्यासः । स्मृत्वोंकारंतुगायत्र्यानिवध्नीयाच्छिखांततः । षट्त्रिंशन्मते—शिखावंधस्तुगायत्र्यानैर्ऋत्यात्रह्मरंध्रतः । विष्णुः—संकल्पपूर्वकंस्नानंकुर्याद्विप्रः समाहितः । मनुः—तिथिवारादिकंज्ञात्वासुसंकल्प्ययथाविधि । स्नायादितिशेषः । व्यासः—स्रोतसोऽभिमुखःस्नायान्मार्जनंचाघमर्षणम् । अन्यत्रार्कमुखोरात्रौप्राङ्मुखोऽग्निमुखोऽपिवा । संध्यामुखस्तुसंध्यायांतथाचाद्यंतयामयोः । स्रोतोभिमुखत्वंबह्वृचपरम् । स्रोतसोभिमुखःसरित्सुस्नायादन्यत्रादित्याभिमुखइतिबह्वृचपरिशिष्टात् । कातीयतैत्तिरीयादीनांसर्वत्रार्काभिमुखंस्नानम् । आचारदर्पणेप्येवम् । तेषामपि

रात्रौप्रवाहाभिमुखंस्नानंनद्यादावित्युपक्रम्य सूर्याभिमुखोमज्जेदितिसामान्येन**कात्यायनोक्ते**रिति**हरिहरः** । अघमर्षणादिसर्वेपांस्रोतोभिमुखम् । ततोंगुष्ठांगुलीभिस्तुश्रोत्रदृङ्नासिकामुखम् । पिधायांतःप्रतिस्रोतस्त्रिर्जपेदघमर्पणमिति**व्यासस्मृतेः**। **आश्वलायनः**—गृहेगृहमुखंविद्यादन्यत्रापिमुखंरवेः । एतद्बह्वृचपरम् । अन्येषांतु**वृद्धयाज्ञवल्क्यः**—स्थावरेपुगृहेचैवसूर्यसंमुखमाप्लवेत् । **जीवत्पितृकनिर्णये**—नाभिमात्रजलेगत्वाकृत्वाकेशान्द्विधाद्विजः । जीवत्पितानकुर्वीतदक्षिणेकेशसंचयम् । **वृद्धपराशरः**—निरुध्यकर्णौनासांचत्रिःकृत्वोन्मज्जनंततः । **कृष्णभट्टीयेविश्वामित्रः**—नाभिमात्रेजलेतिष्ठन्ससद्वादशपंचवा । त्रिवारवापिचाप्लुत्यस्नानमेवविधीयते । **हेमाद्रौसंग्रहे**—गंगांगयांकुरुक्षेत्रंप्रयागोदधिसंगमम् । तीर्थान्येतानिसस्मृत्यततोमज्जेज्जलाशये । **तत्रैवव्यासः**—कुरुक्षेत्रंगयांगंगांप्रभासंनैमिषंतथा । तीर्थान्येतानिसर्वाणिस्नानकालेभवंतुमे । **तत्रैवगंगावाक्यम्**—नंदिनीनलिनीसीतामालतीचमलापहा । विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी । भागीरथीभोगवतीजाह्नवीत्रिदशेश्वरी । द्वादशैतानिनामानियत्रयत्रजलाशये । स्नानोद्यतःस्मरेन्नित्यतस्यतत्रभवाम्यहम् । तीर्थस्मृति कृत्रिमे । ननदीषुनदींब्रूयात्पर्वतेषुनपर्वतम् । नान्यांप्रशंसेत्तत्रस्थस्तीर्थेष्वायतनेषुचेति**चंद्रोदयेदेवलोक्तेः** । गंगादिपुण्यतीर्थानिकृत्रिमादिषुसस्मरेदिति**पराशरोक्तेश्च** गयादिस्मृतिःसंनिहिततीर्थाभावे । गंगायास्तुसर्वत्र । यत्रस्थानेतुयत्तीर्थंनदीपुण्यतमाचया । तांध्यायन्मनसास्नायादन्यत्रेष्टविचिंतनमिति**हेमाद्रौभृगूक्तेः** । अन्यत्रउद्धृतजलेइति**टोडरानंदः** । स्नानकालेन्यतीर्थेषुजप्यतेजाह्नवीजनैः । विनाविष्णुपदींकान्यत्समर्थाह्यघशोधनइति**निर्णयामृतेस्कांदाच** । **प्रतापमार्तंडेप्येवम्** ॥ ॥

अथपरिशिष्टोक्तःस्नानविधिः । गोमयंत्वंतरिक्षस्थंसंगृह्य भूमिष्ठचोपर्यधश्चसंत्यज्य धौतपादपाणिमुखआचम्य संध्योक्तवदात्माभ्यु

१ स्थावरेपुतडागादिषु । २ स्नानयुक्त स्मरेन्नित्यंतत्रतत्रवसेद्धिसाइतिपाठ ।

क्षणादिकृत्वा द्विराचम्यसंयतप्राणःकर्मसंकल्प्य गोमयंवीक्षितमादाय सव्येपाणौकृत्वा व्याहृतिभिस्त्रिधाविभज्य दक्षिणंभागंप्रणवेनदिक्षुविक्षिप्योत्तरंतीर्थेक्षिप्त्वा मध्यमंमानस्तोकइत्यृचाभिमंत्र्य गंधद्वारामित्यृचामूर्धादिसर्वांगमालिप्यप्रांजलिर्वरुणमवतेहेळइतिद्वाभ्यां प्रसंम्राजेबृहदर्चेति सूक्तेन हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचतः । यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः । यन्मेमनसावाचाकर्मणावादुष्कृतंकृतम् । तन्नइंद्रो वरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनरितिद्वाभ्यांचप्रार्थ्य । याःप्रवतइतितीर्थमभिमृश्यावगाह्यस्नातोद्विराचम्य मार्जयेदंवयोयंत्यध्वभिरित्यष्टाभिरापोहिष्ठेतिनवभिरथतीर्थमंगुष्ठेनेमंमेगंगइतित्रिःप्रदक्षिणमालोड्यप्रकाशपृष्ठमग्नोऽघमर्षणंत्रिरावर्त्यनिमज्ज्योन्मज्ज्यादित्यमालोक्य द्वादशकृत्वआप्लुत्यशंखमुद्रयायोनिमुद्रयोदकमादाय मूर्ध्निमुखेबाह्वोरुरसिचात्मानंगायत्र्याभिषिच्य त्वंनोअग्नेवरुणस्येतिद्वाभ्यां तरत्समंदीधावतीतिसूक्तेन पुनःस्नायान्मूर्ध्निचाभिषिंचेत्तद्विष्णोरक्षाणोअग्नेयत्किंचेदमित्येताजपेत् ।साक्षताभिरद्भिःप्राङ्मुखउपवीतीदेवतीर्थेनव्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मादिदेवान्सकृत्सकृत्तर्पयित्वोदङ्मुखोनिवीतीसयवाभिरद्भिःप्राजापत्येनतीर्थेनऋषीन्व्याहृतिभिर्द्विर्द्विस्तर्पयित्वा दक्षिणामुखःप्राचीनावीतीपितृतीर्थेनसतिलाभिरद्भिर्व्याहृतिभिर्भूरित्यादित्रिस्त्रिस्तर्पयेदथतीरमेत्यदक्षिणामुखःप्राचीनावीतीयेकेचास्मदितिवस्त्रंनिष्पीड्योपवीत्यपउपस्पृश्य परिधानीयमभ्युक्ष्यपरिधाय द्वितीयंप्रोक्षितंप्रावृत्याचामेदथसंध्यामुपासीतेति ॥ ॥ **शंखमुद्रालक्षणमागमे**—वामांगुष्ठंतुसंगृह्यदक्षिणेनतुमुष्टिना । कृत्वोत्तानंततोमुष्टिमंगुष्ठंतुप्रसारयेत् । वामांगुल्यस्तथाश्लिष्टाःसंयुक्ताःसुप्रसारिताः । दक्षिणांगुष्ठसस्पृष्टाःशंखमुद्रेयमीरिता । **योनिमुद्रापितत्रैव**—मिथःकनिष्ठिकेबध्वातर्जनीभ्यामनामिके । अनामिकोर्ध्वसंश्लिष्टेदीर्घमध्यमयोरधः । अंगुष्ठाग्रद्वयंन्यस्येद्योनिमुद्रेयमीरिता । अयंप्रातःस्नानविधिर्बह्वृचानाम् । कातीयानांतुमध्याह्नस्नानविधिरेव ॥ ॥ प्रातःस्नानेयोगयाज्ञवल्क्यः—यएषविस्तरेणोक्तःस्नानस्यविधिरुत्तमः । असामर्थ्यान्नकुर्याच्चेत्तत्रायंविधिरुच्यते । स्नानमंतर्जलेचैवमार्जनाचमनेतथा । जलाभिमंत्रणंचैवतीर्थस्यपरिकल्पनम् ।

अघमर्षणसूक्तेनत्रिरावृत्तेननित्यशः । स्नानाचरणमित्येतदुपदिष्टंमहात्मभिः । अन्यांश्चवारुणान्मंत्रान्कामतःसंप्रयोजयेत् । अयंचांगसंकोचोमध्याह्नस्नानेपि । **मार्कंडेये**—मातरंपितरंजायांभ्रातरंसुहृदंगुरुम् । यमुद्दिश्यनिमज्जेतअष्टमांशंलभेतसः । **चंद्रिकायांवृद्धवसिष्ठोक्तौतु**—निमज्जयेत्तुयमुद्दिश्यद्वादशांशंलभेतसइत्युक्तम् । **पैठीनसिः**—प्रतिकृतिंकुशमयींतीर्थवारिणिमज्जयेत् । कुशोसिकुशपुत्रोसिब्रह्मणानिर्मितःपुरा । त्वयिस्नातेपिसस्नातोयस्येदंग्रथिबंधनम् । अत्रपूर्ववाक्येनिमज्जेतेतिश्रुतेर्मज्जनरूपंस्नानंजीवत्प्रतिनिधित्वेनस्नाने । प्रतिकृतिमज्जनंतुमृतप्रतिनिधित्वेनस्नानेइतिप्रयोगपारिजातः । स्नानोत्तरंतदंगतर्पणंकुर्यात् । स्नानादनंतरतावत्तर्पयेत्पितृदेवताः । उत्तीर्यपीडयेद्वस्त्रंसंध्याकर्मततःपरमितिचतुर्विंशतिमतात् । स्नानेषुचैवसर्वेषुतर्पयेत्पितृदेवताः । काम्येनित्येविशेषेणतत्प्रकुर्यात्प्रयत्नतइतिचंद्रिकायांव्याघ्रोक्तेश्च । **चंद्रोदयेब्रह्मांडे**—नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते । तर्पणंतुभवेत्तस्यतदंगत्वेनकीर्तितम् । **अस्पृश्यस्पर्शादिनिमित्तस्नानेतु**—अस्पृश्यस्पर्शनेवांतेअश्रुपातेक्षुरेभगे । स्नानंनैमित्तिकंज्ञेयंदैवपित्र्यविवर्जितमितिपराशरोक्तेर्नतर्पणमित्युक्तं **गयादासनिबंधेआचारचिंतामणौचवाचस्पतिमिश्रैः** । स्नानांगतर्पणंविद्वान्कदाचिन्नैवहापयेदितिहेमाद्रौब्रह्मवैवर्तांच्च आशौचेपितद्भवति । **स्मृत्यर्थसारेप्येवम्** । **माधवीयेयमः**—द्वौहस्तौयुग्मतःकृत्वापूरयेदुदकांजलिम् । गोशृंगमात्रमुद्धृत्यजलमध्येजलंक्षिपेत् । **चंद्रोदयेदक्षः**—प्रादेशमात्रमुद्धृत्यसलिलंप्राङ्मुखःसुरान् । उदङ्मनुष्यांस्तर्पेतपितॄन्दक्षिणतस्तथा । **बौधायनः**—अनुत्तीर्यमपउपसिचतीत्यनुत्तीर्यैवेदम् । तत्प्रकारःपृथ्वीचंद्रोदये—भूर्देवांस्तर्पयामि । भुवर्देवांस्तर्पयामि । स्वर्देवांस्तर्पयामि । भूर्भुवःस्वर्देवांस्तर्पयामि । एवंऋ

---

१ आश्वलायनानासूत्रेस्यस्तुल्यभावादंजलिनैवदान । सूत्रोक्तब्रह्मयज्ञांगस्वपितृतर्पणतद्दक्षिणेनैवकार्य । सूत्रेअंजलिचोदनाभावात् । अनादेशेदक्षिणप्रतीयादितिसूत्रकारोक्तेरितिकमलाकरीये ।

ष्यादीन्। अथवा भूर्देवगणंतर्पयामि। भुवर्ऋषिगणंतर्पयामि। स्वर्मनुष्यगणंतर्पयामि। भूर्भुवःस्वःपितृगणंतर्पयामि। **कृष्णभट्टीये**—उपवीती ब्रह्मादयोयेदेवास्तान्देवांस्तर्पयापि। भूर्देवानित्यादि। निवीतीकृष्णद्वैपायनादयोयऋषयस्तानृषींस्तर्पयामि भूर्ऋषीनित्यादि। प्राचीनावीतीसोमः पितृमान्यमोंगिरस्वानग्निष्वात्ताःकव्यवाहनादयोयेपितरस्तान्पितॄंस्तर्पयामि भूःपितॄनित्यादि। सनकादयोयेमनुष्यास्तान्मनुष्यांस्तर्पयामिभूर्मनु ष्यानित्युक्तंजयंतवृत्तौ। **स्मृत्यर्थसारे**चैवम्। अत्रदेवपितॄणामेवेज्यत्वात्सांगस्यचानुष्ठेयत्वाज्जीवत्पितृकस्याप्यधिकारः। प्राचीनावीति त्वंत्वाप्रकोष्ठादित्युक्तंजीवत्पितृकनिर्णयेगुरुभिः॥ ॥ **संक्षेपातिशयमाहशंखः**—आब्रह्मस्तंबपर्यंतंजगत्तृप्यत्वितिक्रमात्। जलांजलि त्रयंदद्यादेतत्संक्षेपतर्पणम्। **आचारदर्पणेस्मृतिः**—प्रातःस्नानेनकर्तव्यंकदाचित्तिलतर्पणम्। इदंचनैमित्तिकविषयमितितत्रैवोक्तम्। अन्ये तुप्रातःस्नानांगभूतेतर्पणेसर्वदातिलनिषेधः। प्रातःस्नानेविशेषोयंतद्धिनैवतिलैर्युतम्। नैमित्तिकंचनित्यंचतिलैरेवविधीयते इति**स्मृतिरत्नावल्यां** **कौशिकोक्तेरित्याहुः**॥ ॥ अत्रविशेषो**हेमाद्रौपाद्मे**—प्राचीनावीतसंयुक्तःकुशपाणिस्तिलैःसह। असंस्कृतप्रमीतानांस्थलेदद्याज्जलांज लिम्। प्रेक्षमाणोदिशंयाम्यांमंत्रेणानेनयत्नतः। असंस्कृतप्रमीतायेगोत्रजादुर्गतिगताः। तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकम्। **तत्रैवव्या सः**—अनग्निदग्धायेजीवायेप्यदग्धाःकुलेमम। भूमौदत्तेनतोयेनतृप्तायांतुपरांगतिमिति। इदंजलस्थेनैवकार्यम्। जलार्द्रवासाःस्थलगोयःप्रद द्याज्जलांजलिम्। वस्त्रनिश्च्योतनंप्रेताअपवार्यपिबंतितेइति**सुमंतूक्तेः**। अपवार्यांजलिंत्यक्त्वेतिहेमाद्रिः। **शौनकः**—स्नानांगंतर्पणंकृत्वा यक्ष्मणेजलमाहरेत्। अन्यथाकुरुतेयस्तुस्नानंतस्याफलंभवेत्। **तत्रमंत्रः**—यन्मयादूषितंतोयं[1]शारीरमलसंभवैः। तद्दोषपरिहारार्थंयक्ष्माणंत र्पयाम्यहम्। **आश्वलायनः**—येकेचास्मत्कुलइतिवस्त्रनिष्पीडनंस्थले। **वृद्धमनुः**—निष्पीड्यस्नानवस्त्रंतुपश्चात्संध्यांसमाचरेत्। अन्यथाकुरु

१ मलै शारीरसभवै इतिपाठ।

तेयस्तुस्नानंतस्याफलंभवेत्। **स्नायणीये**—मनुष्यतर्पणेचैवस्नानवस्त्रनिपीडने। निवीतीतुभवेद्विप्रस्तथामूत्रपुरीषयोः । **आशार्केतु**—वस्त्रनिष्पीडनंचैवकुशानांचविसर्जनम्। अपसव्येनकर्तव्यंहस्तप्रक्षालनंतथेत्युक्तम्। अतोविकल्पः। बह्वृचानांतुप्राचीनावीती । **बह्वृचपरिशिष्टे**—प्राचीनावीतीवस्त्रंनिष्पीडयेदित्युक्तेः । इदंचजीवत्पितृकोनकुर्यात् । नजीवत्पितृकःकुर्याद्वस्त्रनिष्पीडनंबुधइतिजीवत्पितृ**कनिर्णयेपुराणात्** । **यत्तुपराशरः**—निराशाःपितरोयांतिवस्त्रनिष्पीडनेकृते । तस्मान्नपीडयेद्वस्त्रमकृत्वापितृतर्पणमिति तद्रागप्राप्तवस्त्रनिष्पीडनपरम् । अतएवमध्याह्नस्नाने**हेमाद्रौब्रह्मांडे**—ततःस्नात्वाविधानेनसंतर्प्यपितृदेवताः । जलाशयाद्विनिर्गत्यद्विराचामेत्समाहितः । स्नानवस्त्रमनिष्पीड्यस्थाप्यमास्थलतर्पणात् । स्थलेपितर्पणकृत्वाततोवस्त्रनिपीडयेत् । एवंवस्त्रंनिष्पीड्यैकंपादंजलेऽन्यंस्थलेकृत्वाआचामेत् । उदकेचोदकस्थस्तुस्थलस्थस्तुस्थलेशुचिः। स्नात्वाचामेत्तदाविप्रःपादौकृत्वास्थलेजलेइति**दक्षोक्तेः**॥ ॥**तर्पणोत्तरंदर्भत्यागउक्तःस्मृतिरत्नावल्याम्**—विकिरेपिंडदानेचतर्पणेश्राद्धकर्मणि। आचांतस्तुप्रकुर्वीतदर्भसत्यजनबुधः। दर्भत्यागेप्राचीनावीतित्वमुक्तंप्राक् ॥ ॥ **नदीस्नानेतत्प्रार्थनोक्ताकौर्मे**—ज्ञानतोज्ञानतोवापियन्मेदुश्चरितकृतम् । तत्क्षमस्वाखिलंदेविजगन्मातर्नमोस्तुते । स्नानाकरणेप्रायश्चित्तमुक्तं**ऋग्विधाने**—त्रिष्व(श्व)प्रसुवसूक्तंचस्नानलोपोभवेद्यदि । **स्मृतिरत्नावल्यांतु**—स्नानलोपेगायत्र्यष्टसहस्रजपउक्तः । स्नानमकृत्वाभोजनेउपवासंत्रिरात्रकुर्यादितिस्मृ**त्यर्थसारे** ॥ इतिश्रीमन्नारायणभट्टा०लक्ष्मणभट्टकृताचाररत्नेप्रातःस्नानम् ॥ ॥

अथस्नानोत्तरकृत्यम्। **हारीतः**—स्नात्वागात्रमवमृज्यान्नशिरोविधुनुयान्नोत्तरीयविपर्यासंकुर्यादिति । **त्रिकांडमंडनः**—दीपंशूर्पतथाशय्यांपादत्राणंचमार्जनीम् । स्नानांतेसंस्पृशेद्यस्तुपुनःस्नानेनशुद्ध्यति । **विष्णुः**—नतैलवसेस्पृशेन्नपूर्वधृतमक्षालितंवासोबिभृयत्

१ परिवर्जनइतिपाठ ।

स्नातएवसोष्णीषेधौतवाससीबिभृयात् म्लेच्छांत्यजपतितैर्नसंभाषेतइति । उष्णीषंकेशजलापकर्षणार्थवस्त्रमितिपृथ्वीचंद्रः । अतएव हारीतोक्तौगात्रग्रहणम् । केचित्तुसोष्णीषवासोधारणानुवादेनधौतत्वविधानात्कर्मकालंविनास्नानोत्तरमपिधौतप्रसिद्धोष्णीषधारणम् । वृद्ध पराशरेण—यच्चश्मश्रुषुकेशेषुयज्जलंदेहलोमसु । हस्ताभ्यांतन्नवस्त्रेणजलंविद्वान्विमार्जयेदिति शिरोमार्जनवस्त्रनिषेधादित्याहुः । वस्तुतस्तु— मार्जयेद्वस्त्रशेषेणनोत्तरीयेणचाशिरइतिव्यासवचनैकवाक्यतयास्नानवस्त्रद्वयस्यैवनिषेधः । अतएवस्नातोनांगानिमृज्याच्चस्नानशाट्यानपाणिने तिविष्णुपुराणात् । मार्जननिषेधएतत्परइतिपारिजातस्मृत्यर्थसाराचारादर्शाः । नांगेभ्यस्तोयमुद्धरेदितिवस्त्रनिषेधेसिद्धेस्नानशा टीनिषेधोदोषाधिक्यार्थइतिटोडरानंदः । समर्थस्यमार्जनाभावोऽसमर्थस्यपाणिशाटीमार्जनाभावइतिहरिहरः । चंद्रोदयेसंग्रहे— स्नात्वादूरतटेतिष्ठेत्प्राचीनावितिनाद्विजः । यावत्स्रवतिदेहांबुतूष्णीभूतादितृप्तये । सुराबिंदुसमाज्ञेयाःपृष्ठतःकेशबिंदवः । तएवपुरतोज्ञेयाः सर्वतीर्थोपमाबुधैः । तिस्रःकोट्योर्धकोटीचयानिरोमाणिमानवे । स्रवतिसर्वतीर्थानितस्मान्नपरिमार्जयेत् । देवलः—देवाःपिबंतिशिरसोमुख स्याप्सरसस्तथा । वक्षसोपिचगंधर्वाअधस्तात्सर्वजंतवः । अंगानिशक्तौवस्त्रेणपाणिनाचनमार्जयेत् । धौतांबरेणवाप्रोंच्छ्यबिभृयाच्छुष्कवाससी । अमार्जनपक्षेगोदोहनकालपर्यंतंतथैवतिष्ठेदित्याचारदर्पणः । हेमाद्रौभरद्वाजः—वस्त्रोदकमपेक्षंतेयेमृतादासवर्गिणः । कंचित्कालंस्थित स्तस्माज्जलंभूमौनिपातयेत् । तदुत्तरमपिमार्जनंकार्यशक्तेन । आर्द्रएवतुवासांसिस्नात्वासेवेतमानवइतिविष्णूक्तेः । कृष्णभट्टीयेस्कांदे— ततस्त्वाचमनंकृत्वाप्रोक्षितंवस्त्रमावहेत् । योगयाज्ञवल्क्यः—स्नात्वैवंवाससीधौतेअक्लिन्नेपरिधायच । प्रक्षाल्योरूमृदाद्भिश्चहस्तौप्रक्षाल येत्तथा । जाबालिः—स्नात्वानिवस्यवसनंजंघेशोध्येमृदंभसा । अपवित्रीकृतेतेहिकौपीनस्नानवारिणा । कौपीनपदोपादानाद्यतिपरमिदमि तिकेचित् । प्रयोगपारिजातेभरद्वाजः—शुचीवोहव्यामरुतइत्युक्त्वाशुद्धमंबरम् । संप्रोक्ष्यदेवस्यत्वेतिव्याहृत्यादायभास्करम् । उदु

त्संजातवेदसमित्युक्त्वालोकयेत्ततः । आवहंतीत्युदाहृत्यपरिधायद्विराचमेत् । **भृगुः**—ब्राह्मणस्यसितंवस्त्रंनृपस्यरक्तमुल्बणम् । पीतंवैश्यस्य शूद्रस्यनीलंमलवदिष्यते । उल्बणरक्तम् । मलवत्कृष्णमितिपृथ्वीचंद्रः । **यच्चुनारसिंहे**—नरक्तमुल्बणंवासोननीलंचप्रशस्यते । मलाक्तं चदशाहीनंवर्जयेदंबरंबुधइतिरक्तनीलवस्त्रयोर्निषेधः सपूर्ववाक्यात्क्षत्रियशूद्रभिन्नविषयः । **व्यासः**—नाग्निदीप्तेननार्द्रेणनसूच्याग्रथितेनच । कौपीनशठितंभिन्नमलिनकेशदूषितम् । छिन्नाग्रंचोपवस्त्रंचकुत्सितधर्मतोविदुः । **भारते**—वस्त्र नान्यावृतंग्राह्यंनचातिविकृतंतथा । **योग याज्ञवल्क्यः**—दग्धंजीर्णंचमलिनमूषकोपहततथा । खादितगोमहिष्याद्यैस्तत्त्याज्यंसर्वथाद्विजैः । **प्रयोगपारिजातेसंग्रहे**—स्नानं कृत्वार्द्रवस्त्रंतुऊर्ध्वमुत्तारयेद्बुधः । आर्द्रवस्त्रमधस्ताच्चेत्पुनःस्नानेनशुद्ध्यति । **तत्रैवोशना**—स्नात्वानुपहतवस्त्रंपरिदध्याद्यथाविधि । अभावे पूर्ववस्त्रवासंप्रोक्ष्यप्रणवेनतु । अनुपहतअपरिहितम् । **जाबालिः**—नार्द्रमेकचवस्त्रमनपरिदध्यात्कथचन । **स्मृतिरत्नावल्यांअंगिराः**— आर्द्रवासास्तुयत्कुर्याज्जपहोमव्रतादिकम् । सर्वंतद्राक्षसंविंद्याद्बहिर्जानुचयत्कृतम् । सप्तवाताहतवस्त्रंशुष्कवत्प्रतिपादितम् । आर्द्रवापिद्विजा तीनामाहतंगौतमादिभिः । **कृष्णभट्टीये**—ईषद्धौतस्त्रियाधौतशूद्रधौतंतथैवच । अधौतंतच्चविज्ञेयशुष्कदक्षिणपल्लवैः । **देवलः**—स्वयधौ तेनकर्तव्याःक्रियाधर्म्याविपश्चिता । नतुनेजकधौतेननाहतेनाचकुत्रचित् । नाहतेनेत्येकंपदम् । स्वयग्रहणादेवनेजकनिवृत्तेस्तन्निषेधोऽन्येनापि ब्राह्मणादिनाधौतेनक्रियाकार्येत्येतदर्थम् । **अहतलक्षणमाहपुलस्त्यः**—ईषद्धौतंनवश्वेतंसदशयन्नधारितम् । अहततद्विजानीयात्सर्वकर्म सुपावनम् । **ब्राह्मे**—अच्छिन्नाग्रचयद्वस्त्रंमृदाप्रक्षालितचयत् । अहतधातुरक्तवातत्पवित्रमितिस्थितिः । **माधवीयेप्रजापतिः**—क्षौमं

---

१ स्नानकृत्वाचार्द्रवस्त्रलजेनयामभोद्विज । गृहेनानमथोकुर्यान्निमृजेगत्रं नैत । मस्कार्यपरिधायार्द्रंस्नंनयाभगत्रा क्षिपेत् । इहेत् वैमास्पर्शिनिकृष्णभट्टीयेस्म लाकरीयेच ।

वासःप्रशंसंतितर्पणेसदशंतथा । काषायंधातुरक्तंवानोल्बणंतत्तुकर्हिचित् । **भृगुः**—दिवाकीर्तिकृतंवासःसर्वदापरिवर्जयेत् । **काशीखंडे**—नीलीरक्तंतुयद्वस्त्रंदूरतस्तद्विवर्जयेत् । स्त्रीणांक्रीडार्थसंयोगेशयनीयेनदुष्यति । **अंगिराः**—मृतेभर्तरियानारीनीलीवस्त्रंप्रधारयेत् । भर्तातुनरकंयातिसानारीतदनंतरम् । **चंद्रोदयेस्कांदे**—स्नानंदानंजपोहोमःस्वाध्यायःपितृतर्पणम् । वृथातस्यमहायज्ञानीलीवासोबिभर्तियः । **टोडरानंदेभविष्ये**—नीलीरक्तंयदावस्त्रंविप्रस्त्वंगेषुधारयेत् । अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यति । **मिताक्षरायांमार्कंडेयः**—रोमकूपैर्यदागच्छेद्रजोनील्यास्तुकस्यचित् । त्रिवर्णेषुचसामान्यात्तप्तकृच्छ्रंविशोधनम् । नीलीदोषःकार्पासेएव । ऊर्णायांपट्टवस्त्रेवानीलीरागोनदुष्यतीतितत्रैवोक्तेः । **नारायणदासनिबंधेभृगुः**—स्त्रीधृताशयनेनीलीब्राह्मणस्यनदुष्यति । नृपस्यवृद्धौवैश्यस्यपर्वण्येवविधारणमिति । **शातातपः**—प्रागग्रमुदगग्रंवाधौतंवस्त्रंप्रसारयेत् । पश्चिमाग्रंदक्षिणाग्रंपुनःप्रक्षालनाच्छुचि । **योगयाज्ञवल्क्यः**—अभावेधौतवस्त्रस्यशाणक्षौमाजिनानिच । कुतपंयोगपट्टंवाद्विवासायेनवाभवेत् । क्षौममतसीसूत्रकृतम् । कुतपोनेपालकंबलः । धौतेतिविशेषणपदाच्छाणादीनिप्रक्षालितान्यपिगृह्णीयात् । द्विवासेतिपदोपादानाच्चोत्तरीयत्वेनैवशाणादीनांग्रहणं नतुपरिधानीयत्वेनेत्युक्तमपरार्के । **अन्येतु**—परिधेयंसदावासःकार्पासंसदशंसितम् । क्षौमंवाकुतपंवापिनकौशेयंकदाचनेतिजातूकर्ण्योक्तेःक्षौमाजिनयोःपरिधानीयत्वमप्याहुः । **यत्तुश्राद्धहेमाद्रौबौधायनः**—क्षौमाणिवासांसितेषामलाभेकार्पासिकान्यौर्णकानिभवंतीति तच्छ्राद्धेदेयवस्त्रपरम् । **स्मृत्यर्थसारे**—केशनिर्मितवस्त्रधरणेउपवासइति । **व्यासः**—नोत्तरीयमधःकुर्यान्नोर्ध्वनाधस्तनांबरम् । नांतर्वासोविधायान्यद्वसीतवसनंबुध ॥ ॥ **उत्तरीयमाहजातूकर्ण्यः**—सग्रंथिपरिमंडलमुत्तरीयंकुर्याद्वस्त्रोत्तरीयात्वेकांगुलंद्व्यंगुलंत्र्यंगुलंचतुरंगुलंवासूत्रैरेवकृतंपरिमंडलमुत्तरीयंकुर्यादिति । **अंतर्वासउक्तंप्रयोगपारिजातेसंग्रहे**—षोडशद्वादशाष्टाभिरंगुलैर्विस्तृतंचयत् । आयतंव्याममात्रंचतदंतर्वासईरितम् । उत्तरीयांतर्वाससोरभेदइति

केचित् । भेदइत्यन्ये । उत्तरीयार्थेयज्ञोपवीतंवेत्युक्तम्[1] । परिहितवस्त्रस्यचोर्ध्वभागमुत्तरीयंकुर्यात् । एकंचेत्तस्योत्तरवर्गेणप्रच्छादयीतेतिपा**रस्करोक्तेः** । उत्तरीयंचपुरोदेशावस्थितदर्शनधारयेत् । प्रागग्रंचोत्तरीयंतुकर्मकालेनधारयेदितिपृ**थ्वीचंद्रोक्तेः** । उत्तरीयस्थानीयंतृतीयोपवीतजीवत्पितृकोनधारयेत् ।—उत्तरीयंयोगपट्टंतर्जन्यांरजतंतथा । नजीवत्पितृकैर्धार्यज्येष्ठोवाविद्यतेयदीति**चंद्रोदयेसंग्रहात्** । उत्तरीयंचनोपरिवासोमात्रं कितुसग्रंथिपरिमंडलमित्यादि**जातूकर्ण्योक्तं** । उक्तपरिवासस्तुतस्यापिभवत्येव[2] ।—एकवस्त्रोनभुंजीयान्नकुर्याद्देवतार्चनम् । नचार्चयेद्द्विजान्नान्यत्कुर्यादेवंविधोनरइति**गोभिलेन**निषेधात् । नन्वेकवस्त्रइत्यस्यसामान्यरूपत्वाज्जीवत्पितृकस्यसर्वोत्तरीयबाधइति चेत् । न । उत्तरीयशब्दस्ययौगिकत्वेपि**जातूकर्ण्योक्तो**त्तरीयेरूढेरिति**पितृचरणाः । वर्धमानपरिभाषायांशातातपः**—सव्यादसात्परिभ्रष्टकटिदेशधृतांबरम् । एकवस्त्रंविजानीयाद्दैवेपित्र्येचकर्मणि । **बौधायनः**—अकच्छ.पुच्छकच्छोवाविकच्छः[3]कटिवेष्टितः । यावदास्ते द्विजस्तावच्छूद्रएवनसंशयः । पुच्छकच्छःपुच्छाकारकच्छः । सचाग्रद्वयस्यमेलनेनैकस्यैवाग्रस्यकच्छत्वेनभवतीतिद्वयमपिनिषिद्धम् । अत्रद्विजस्योद्देश्यत्वावच्छेदकत्वेसर्वस्यापितत्त्वापत्तेः । अकच्छत्वादिविशिष्टस्यतत्त्वेवैपरीत्येवागारवैम् । अतोऽकच्छत्वादेवोद्देश्यत्वात्स्त्रीशूद्रादेरपिकच्छआवश्यकः । नचद्विजपदश्रुतेःशूद्रस्यशूद्रतुल्यत्वानुपपत्तेःकच्छइतियुक्तम् । द्विजत्वस्याविवक्षितत्वात् । तद्ग्रहणतुकैमुतिकन्यायार्थम् । अतएवशूद्रपदं अकच्छस्यनग्नत्वोक्तिश्च । **श्राद्धहेमाद्रौ**—नग्नःस्यान्मलवद्वासानग्नःकौशेयकेवलः । नग्नोद्विगुणवस्त्रःस्यान्नग्नोदग्धपटस्तथा । नग्नश्चस्यूतवासाःस्यान्नग्नःकौपीनकेवलः । नग्नःकाषायवस्त्रःस्यान्नग्नश्चार्धपटावृत । विकच्छोऽनुत्तरीयश्चद्विकच्छोऽवस्त्रएवच । अधौतवस्त्रोमलवद्वस्त्रःरजकादिधौतवस्त्रोवा । एकस्यपटस्यार्धप्रावृण्वानोऽर्धपटावृतः खंडपटंवसानोवा । परिहितवस्त्रोपरितदुत्तरार्धेनवस्त्रांतरेणवाकटिबंधनं

---

१ उपवीतंवायुक्तमितिपाठ २ वासस्यापिभवत्येवेतिपाठ । ३ विकच्छोविपरीतकच्छ ।

द्वितीयकच्छः । अत्रमलवन्निषेधःसमर्थपरः । नजीर्णमलवद्वासाभवेच्चविभवेसतीतियाज्ञवल्क्योक्तेः । वस्तुतस्तुनग्नःस्यान्मलवद्वासाइत्यादौ निषेधश्रुतेः ननग्नःकर्मकुर्वीतेत्यनेनैकवाक्यत्वाच्चानग्नेननग्नत्वोक्तेःकर्मकालपरत्वादस्यपुरुषार्थत्वाद्भिन्नवाक्यमेवयुक्तमितिहेमाद्रिः । कौशेय केवलस्यनग्नत्वोक्तेः वासःसहितकौशेयत्वेनननग्नत्वम् । **भृगुः**—नग्नोमलिनवस्त्रःस्यान्नग्नश्चार्द्रपटावृतः । नग्नोरक्तपटस्तथेतिचंद्रिकायांद्विती यपादेपाठः । सर्वकर्मस्वासुरकच्छानिषेधमाहयाज्ञवल्क्यः—जपेहोमेतथादानेदैवेपित्र्येचकर्मणि । बध्नीयान्नासुरीकच्छांशेषेकर्मणिवेच्छया । तल्लक्षणमाहसएव—परिधानाद्बहिःकच्छानिबद्धाह्यासुरीमता । बहिःकच्छातुसंवृतपरिधानवस्त्रांतइतिवर्धमानः । **स्मृत्यंतरे**—संयोजित दशंवापिद्दिर्वच्छिन्नदशंतथा । नित्येनैमित्तिकेवापिप्रयत्नेनविवर्जयेत् । अकृत्रिमदशंवस्त्रंप्रशस्तंसर्वकर्मसु । **कृष्णभट्टीयेयोगयाज्ञ वल्क्यः**—जानुमूलंतुवस्त्रंस्यात्त्रिकच्छंधारयेद्बुधः । **मनुः**—नाभौचवामकुक्षौचपृष्ठेचैवयथाक्रमम् । वस्त्रप्रावरणंयत्स्यात्तत्रिकच्छमुदाहृतम् । **भारते**—अन्यदेवभवेद्वासःशयनीयेनराधिप । अन्यद्रथ्यासुदेवानामर्चायामन्यदेवहि । अन्यच्चलोकयात्रायामन्यदीश्वरदर्शने । **सुमंतुः**— अन्यत्स्नानेतथापानेभोजनेचान्यदेवहि । इतिश्रीमन्नारायणभट्टा०लक्ष्मणभट्टकृतावाचाररत्नेस्नानोत्तरकृत्यम् ॥

अथतिलकविचारः । विष्णुस्मृतौबृहन्नारदीयेच—यागोदानंजपोहोमःस्वाध्यायःपितृतर्पणम् । भस्मीभवतितत्सर्वमूर्ध्वपुंड्रं विनाकृतम् । **पाद्मेकार्तिकमाहात्म्येप्येवम्** । इदंयागादिसर्वकर्मोपलक्षणार्थनपरिसंख्यार्थम् । उत्तरार्धेसर्वपदश्रुतेः । अपवित्रेणयज्ञस्नम स्नातेनचयद्धुतम् । यच्चशून्यललाटेनतदत्यल्पफलंभवेदित्याश्वलायनोक्तेः । यद्यपिसत्यंशौचमित्यादित्रिपुंड्रेपिवाक्यंतथापितत्क्षत्रियादिप रम् । ऊर्ध्वपुंड्रंद्विजःकुर्यात्क्षत्रियस्तुत्रिपुंड्रकमितिमाधवीयेविष्णुधर्मोत्तरात् । **माधवचंद्रिकास्मृत्यर्थसारादिभिस्त्रिपुंड्रालिख**

१ तथापात्रेइतिपाठ ।

नाच्च । **काशीखंडेसप्तर्षिवर्णने**ऊर्ध्वपुंड्रांकितालिकाइत्युक्तेश्च । नचकालाग्निरुद्रोपनिषद्युक्तत्वाद्दलवत्त्रिपुंड्रत्वम् । श्रुतौहिभस्मधारणमात्र
माम्नातंनतुपुंड्रत्वेनकर्मांगत्वेनवा । तच्चस्नानत्वेनाप्युपपन्नम् । यद्यपिकर्मांगंतथापिशैवकर्मेपरम् ।—**विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया** ।
पूजितोपिमहादेवोनस्यात्तस्यफलप्रदइतितिथितत्त्वे**लैंगात्** । सितेनभस्मनातिर्यक्त्रिपुंड्रस्यतुधारणम् । शैवागमेषु निष्ठानांतत्तन्मंत्रेण शस्य
तेइतिस्मृ**तिरत्नावल्यां**वचनाच्च । साग्निकपरवातत् ।—स्नात्वापुंड्रमृदाकुर्याद्धुत्वाचैवतुभस्मनेत्या**श्वलायनोक्तेः** । तयोरप्यूर्ध्वपुंड्रोपर्ये
वकुर्यात् । तयोराहितानाहितानाम्न्योः । ऊर्ध्वपुंड्रंविनामोहाद्यदिकुर्यात्त्रिपुंड्रकम् । नतस्यफलमाप्नोतिदानस्याश्रोत्रियेयथेतिस्मृ**तिरत्नावल्यां**व
चनात् । **यत्तुपाद्मेकार्तिकमाहात्म्ये**—ऊर्ध्वपुंड्रेत्रिपुंड्रयःकरोतिसनराधमः । मुक्त्वाविष्णुगृहंपुण्यसयातिनरकंध्रुवमितितद्वस्मान्यपरम् ।
तद्धारणविधिवैयर्थ्यापत्तेः । यद्वाशुद्धतांत्रिकपरम् । नचश्राद्धेत्रिपुंड्रनिषेधानुपपत्तेस्तत्प्राप्तिः । तदधिकारिणिक्षत्रियेतन्निषेधचारितार्थ्यात् ।
रागप्राप्तनिषेधोपपत्तेश्च । **माधवीयेब्राह्मे**—पर्वताग्रेनदीतीरेममक्षेत्रेविशेषतः । सिंधुतीरेचवल्मीकेतुलसीमूलसंस्थिताः । मृदएतास्तुसंग्रा
ह्यावर्जयेदन्यमृत्तिकाः । **चंद्रोदयेगोभिलः**—गोरोचनंपंचगव्यंपंचांगंबिल्ववृक्षतः । कालीयकंचंदनंचपद्मकंरक्तचंदनम् । गोमयंहो
लिकाभस्मश्वेतापीतारुणाचमृत् । पुण्यक्षेत्रोद्भवाग्राह्यानदनद्योस्तुशर्कराः । पंचांगंमूलत्वक्पत्रपुष्पफलानि । कालीयकंपीतचंदनम् ।
व्यासः—जाह्नवीतीरसंभूतांमृदंमूर्ध्नाबिभर्तियः । बिभर्तिरूपंसोऽर्कस्यतमोनाशायकेवलम् । **सत्यतपाः**—गोमतीतीरसंभूतांगोपीवापी
समुद्भवाम् । मृदंमूर्ध्नावहेद्यस्तुसर्वपापैःप्रमुच्यते । **माधवीये**—द्वारवत्युद्भवाद्गोपीचंदनादूर्ध्वपुंड्रकम् । धारयेन्नित्यमेवहिपापहंतिदिनेदिने ।
पाद्मे—मृत्तिकाचंदनभस्मतोयंचैवचतुर्थकम् । एभिर्द्रव्यैर्यथाकालमूर्ध्वपुंड्रंभवेत्सदा । **चंद्रोदयेब्रह्मांडे**—जलेनतिलकंकुर्याज्जलांतःकर्म
सिद्धये । तोयेनतिलकंस्नानोत्तरमावस्त्रपरिधानादितिपंचायतनसारः । वस्त्रपरिधानोत्तरमपिद्रव्यांतराभावइतिचंद्रोदयः । **आश्वला**

यनः—स्नात्वापुंड्रंमृदाकुर्याद्धुत्वाचैवतुभस्मना । देवानभ्यर्च्यगंधेनसर्वपापापनुत्तये । तत्रविशेषमाह**व्यासः**—ऊर्ध्वपुंड्रंमृदाकुर्यात्त्रिपुंड्रं भस्मनातथा । चंदनेनोभयंकुर्यान्नतिर्यग्गोपिचंदनम् । **चतुर्विंशतिमते**—येषुदेशेषुयेविप्रादेवास्तीर्थानिमृत्तिकाः । तत्रतान्नावमन्येतध र्माचाराश्चतत्रये । **तिलककरणेविशेषोब्रह्मांडे**—अंगुष्ठःपुष्टिदःप्रोक्तोमध्यमायुष्करीभवेत् । अनामिकान्नदानित्यंमुक्तिदाचप्रदेशिनी । एतैरंगुलिभेदैस्तुकारयन्ननखैःस्पृशेत् । **तिलकप्रमाणंब्रह्मांडेसत्यव्रतस्मृतौच**—दशांगुलप्रमाणंतुउत्तमोत्तममुच्यते । नवांगुलंमध्य मंस्यादष्टांगुलमतःपरम् । सप्तषट्पंचभिःपुंड्रंमध्यमत्रिविधंस्मृतम् । चतुस्त्रिद्व्यंगुलैःपुड्रंकनिष्ठंत्रिविधंभवेत् । **तिलकाकृतिविशेषोपित त्रैव**—वर्तिदीपाकृतिवापिवेणुपत्राकृतिंतथा । पद्मस्यमुकुलाकारंतथैवकुमुदस्यच । मत्स्यकूर्माकृतिंवापिशंखाकारमथापिवा । **प्रयोगपारि जाते**—निटिलेचैवबाह्वोश्चदंडवत्कर्णपल्लवे । हृदयेकमलाकारमुदरेदीपवल्लिखेत् । वेणुपत्रसमाकारंबाह्वोर्मध्येलिखेत्सुधीः । अधःपृष्ठेस्कंधदे शेलिखेज्जंबूपलाशवत् । निटिलेललाटे । **यत्तुपंचायतनसारेपाद्मे**—नासामूलंसमारभ्यललाटांतंलिखेन्मृदा । मध्येछिद्रंप्रकर्तव्यंतच्छिद्रं हरिमंदिरमिति । तत्रमूलंमृग्यम् । अत्रकश्चित्—वीक्ष्यादर्शेजलेवापियोविदध्यात्प्रयत्नतः । ऊर्ध्वपुंड्रंमहाभागसयातिपरमांगतिमिति **ब्रह्मां डोक्तेर्**जलेप्रतिबिंबंदृष्ट्वोर्ध्वपुंड्रंकुर्यादित्याह । तन्मंदम् । नपादुकास्थोनादर्शेनजलेत्ववलोकयन्निति**कृष्णभट्टीये**—तिलकप्रकरणेस्मृत्यत रात् । मयिनेजइतिच्छायास्वांदृष्ट्वांबुगतांजपेदिति**याज्ञवल्क्येन**जलेस्वप्रतिबिंबदर्शनेप्रायश्चित्तोक्तेश्च वाक्यस्य**चंद्रिका**द्यलिखितत्वेननिर्मू लत्वाच्च । **स्मृतिरत्नावल्यांपृथ्वीचंद्रेचब्राह्मे**—सदर्भेणतुहस्तेनयःकुर्यात्तिलकंबुधः । आचम्यसविशुद्ध्येतदर्भत्यागेनचैवहि । **ब्र ह्मांडे**—नामान्युच्चार्यविधिनाधारयेदूर्ध्वपुंड्रकम् । ललाटेकेशवंविद्यान्नारायणमथोदरे । माधवंहृदयेन्यस्येद्गोविंदंकंठकूपके । विष्णुंदक्षिण

१ मत परमितिपाठ ।

कुक्षौतुतद्भुजेमधुसूदनम् । त्रिविक्रमंकर्णमूलेवामकुक्षौतुवामनम् । श्रीधरंचहृषीकेशंवामयोर्बाहुकर्णयोः । पद्मनाभंपृष्ठदेशेककुद्दामोदरंस्मरेत् । वासुदेवंस्मरेन्मूर्ध्नितिलकंधारयेत्क्रमात् । केशवादिमंत्राश्चतुर्थ्यंतनमोंताद्रष्टव्याः । तिलकलापनक्रमोप्ययमितिप्रयोगपारिजातः । आश्वलायनः—मूर्ध्निललाटेनाभौचहृदयेकंठकूपके । पार्श्वेबाह्वोःपरगलेदक्षसव्येचपश्चिमे । स्तनयोर्मूर्तिमंत्रैश्चस्थानेष्वेवंत्रिदंडिशुखः । तत्रैव—संकर्षणादिभिःकृष्णेशुक्लेचेत्केशवादिभिः । कृष्णभट्टीयेप्येवम् । पंचायतनसारेपाद्मे—एवंद्वादशपुंड्राणिब्राह्मणःसततंचरेत् । चत्वारिभूभृतांप्रोक्तपुंड्राणिद्वेविशांस्मृते । एकपुंड्रंचनारीणांशूद्राणांचविधीयते । ललाटेहृदिबाह्वोश्चतुःपुंड्राणिधारयेत् । ललाटेहृदयेद्वेतुभालेत्वेकंविधीयते । मदनपारिजातेब्रह्मांडे—श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा । श्रीकरंपीतमित्याहुःश्वेतंमोक्षप्रदायकम् । श्याममृगमदादेः । रक्तंसिंदूरादेः । पीतंगोरोचनादेः । हारीतः—अभ्यंगेमृतकेचैवविवाहेपुत्रजन्मनि । मांगल्येषुचसर्वेषुनधार्यंगोपिचंदनम् । श्राद्धदीपकलिकायांविष्णुः—ऊर्ध्वपुंड्रंद्विजातीनामग्निहोत्रसमोविधिः । श्राद्धकालेतुसंप्राप्तेकर्ताभोक्ताचवर्जयेत् । तत्रैवनारायणः—ऊर्ध्वपुंड्रंत्रिपुंड्रंवाचंद्राकारमथापिवा । श्राद्धकर्तानकुर्वीतयावत्पिंडान्ननिर्वपेत् । विश्वादर्शेप्येवम् । श्राद्धदिनेतिलकनिषेधः प्रातःसंध्यावंदनादावपीतिश्राद्धकाशिका । तन्न । नर्जयेत्तिलकंभालेश्राद्धकालेकदाचनेतिसत्यव्रतोक्तेः । यत्तुपराशरः—ऊर्ध्वंचतिलकंकुर्याद्दैवेपित्र्येचकर्मणीति तत्तर्पणादिपरम् । यत्तु—ऊर्ध्वंचतिलकंकुर्यान्नकुर्याच्चत्रिपुंड्रकम् । निराशाःपितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमितिवृद्धपराशरेण श्राद्धेऊर्ध्वपुंड्रंभवतीत्युक्तम् तद्भोक्तृपरं नकर्तृपरमितिपृथ्वीचंद्रः । निष्कर्षस्तुशिष्टाचाराद्व्यवस्था । ऊर्ध्वपुंड्रंचतुलसींश्राद्धेनेच्छंतिकेचन । वृद्धाचारःपरिग्राह्यस्तस्माच्छ्रेयोर्थिभिर्नरैरितिबृहन्नारदीयात् । आचारतिलके—नचोर्ध्वंधारयेद्भस्ममृदंतिर्यङ्नधारयेत् । चंदनागरुकस्तूरीकुंकुमानियथेच्छया । स्मृतिरत्नावल्यां—ब्राह्मणानांनृपाणांचभस्ममिश्रंचचंदनम् । नेत्रयुग्मप्रमाणंतुत्रिपुंड्रंधारयेद्द्विजः । मध्यमा

नामिकांगुष्ठैर्ललाटेयत्रिपुंड्रकम् । तत्रिपुंड्रंभवेच्छस्तंमहापातकनाशनम् । **केदारखंडे**—ललाटेंगुष्ठरेखाचआदौभाव्याप्रयत्नतः । मध्यमांव र्जयित्वातुअंगुलीद्वयकेनच । एवंत्रिरेखासंयुक्तंललाटेयस्यदृश्यते । सशैवःशिववज्ज्ञेयोदर्शनात्पापनाशनः । **पुरुषार्थप्रबोधे**—श्रौतंभस्मद्वि जामुख्यंस्मार्तंगौणंप्रकीर्तितम् । श्रौतंभस्मतथास्मार्तंद्विजानामेवकीर्तितम् । औपासनसमुत्पन्नंगृहस्थानांविशेषतः । समिदग्निसमुत्पन्नंधार्यंवै ब्रह्मचारिणा । शूद्राणांश्रोत्रियागारेपचनाग्निसमुद्भवम् । अन्येषामपिसर्वेषांधार्यंदावानलोद्भवम् । अपक्वमतिपक्वंचसंत्यज्यभसितंसितम् । आदायवाससालोड्यभस्माधारेविनिक्षिपेत् । **चंद्रोदयेशैवे**—तर्जन्यनामिकामध्यैस्त्रिपुंड्रंतुसमाचरेत् । पंचांगुलैर्न्यसेन्मूर्ध्निप्रणवेनतुमं त्रतः । अंगुलैर्विन्यसेद्भालेशिरोमंत्रेणदेशिकः । सव्येनदक्षिणेकर्णेवामदेवेनवामतः । अघोरेणतुकंठेचमध्यांगुल्यास्पृशेद्बुधः । हृदयंहृदयेनैव त्रिभिरंगुलिभिःस्पृशेत् । विन्यसेद्दक्षिणेबाहौशिखामंत्रेणदेशिकः । वामेबाहौन्यसेद्धीमान्कवचेनत्रियंगुलैः । मध्येनसंस्पृशेन्नाभ्यामीशानाभिध मंत्रतः । **तत्रैवक्रियासारे**—भस्मनावैत्रिपुंड्रंचगृहिणांजलसंयुतम् । धार्यंत्रिपुंड्रंस्त्रीणांचयतीनांजलवर्जितम् । वनस्थव्रतिकन्यानांदीक्षा हीननृणांतथा । षडंगुलायतंमानमपिवाधिकमानकम् । नेत्रयुग्मप्रमाणेनभालेदीप्तंत्रिपुंड्रकम् । अग्निरित्यादिभिर्मंत्रैःषड्भिराथर्वणैस्तथा । त्र्या युषेणचमंत्रेणमेधावीत्यादिनाथवा[1] । त्रैयंबकेणमंत्रेणसतारेणशिवेनच । पंचाक्षरेणमंत्रेणप्रणवेनयुतेनच । चंदनाद्युपरिप्राज्ञोधारयेद्भस्मवैदि कम् । लौकिकंचंदनाद्यंतुभस्मोपरिनधारयेत् । **सूतसंहितायाम्**—ऊर्ध्वपुंड्रत्रयंनित्यंधारयेद्भस्मनामृदा । ललाटेऽर्हागमेनिष्ठश्चंदनेनाथवा नरः । अर्हागमेनिष्ठस्तांत्रिकः । **धारणप्रकारेचंद्रोदयेचवाराहे**—दक्षिणेतुभुजेविप्रोबिभृयाद्वैसुदर्शनम् । सव्येतुशंखंबिभृयादितिवेद विदोविदुः । **क्षत्रादेस्तुब्रह्मांडे**—चक्रंचदक्षिणेबाहौशंखंवामेपिदक्षिणे । गदांवामेगदाधस्तात्पुनश्चक्रंचधारयेत् । शंखोपरितथापद्मंपुनः

---

१ माधवीत्यादिनेतिपाठ ।

पद्मंचदक्षिणे । **हलायुधे**—वामेबाहौगदांपद्मंशंखंचक्रंचदक्षिणे । उपर्यधःक्रमोक्तेनधृत्वापापक्षयोभवेत् । हृदयेवाललाटेवाविलिखेन्मत्स्य कच्छपौ । मन्त्रमष्टाक्षरंवापिप्रीयतेतस्यकेशवः । **रामार्चनचंद्रिकायां**—ललाटेतुगदाधार्यामूर्ध्निचापःशरस्तथा । नदकश्चैवहृन्मध्येशंखच क्रेभुजद्वये । **प्रयोगपारिजातेसायणीयेचशंखः**—चक्रांकितःसदातिष्ठेन्मद्भक्तःसर्वदाशुचिः । अनयोर्व्यवस्थासूतसंहितायाम्— वेदमार्गैकनिष्ठानांवेदोक्तेनैववर्त्मना । ललाटेभस्मनातिर्यक्त्रिपुंड्रंधार्यमेवहि । विष्ण्वागमादितन्त्रेषुदीक्षितानांविधीयते । शंखचक्रगदापूर्वैर कनंनान्यदेहिनाम् । वेदमार्गैकनिष्ठस्तुमोहेनाप्यंकितोयदि । पतत्येवनसंदेहस्तथापुंड्रांतरादपि । **अत्रैपाव्यवस्था**—शुद्धवैदिकेनशिवभ क्तेनविभूतिरेवधार्या । शुद्धवैदिकेनविष्णुभक्तेनगणपत्यादिभक्तेनचतिलकोधार्यः । तांत्रिकवैदिकवैष्णवेनत्वच्छिद्रतिलकश्चक्रादिचधार्यम् । तांत्रिकवैदिकेनशैवेनविभूतिस्तिलकश्चविभूतिमात्रवाधार्यम् । शुद्धतांत्रिकेणविष्णुभक्तेनसच्छिद्रतिलकश्चक्रादिचधार्यमिति । **यत्तुविष्णुः**— शंखचक्राद्यंकनचगीतनृत्यादिकतथा । एकजातेरयंधर्मोनजातुस्याद्द्विजन्मनः । शंखचक्रमृदायस्तुकुर्यात्तप्तायसेनवा । सशूद्रवद्बहिष्कार्यःसर्व- स्माद्द्विजकर्मणइति । **यच्चाश्वलायनः**—यथाश्मशानजकाष्ठमनर्हंसर्वकर्मसु । तथाचक्रांकितोविप्रःसर्वकर्मसुगर्हितइति । **यच**—यस्तुस तप्तशंखादिलिंगचिह्नतनुर्नरः । ससर्वयातनाभोगीचांडालोजन्मकोटिषु । द्विजतुतप्तशंखादिर्लिंगांकिततनुर्नरः । संभाष्यरौरवयातियावदिंद्राश्च तुर्दशेतिबृहन्नारदीयंतच्छुद्धवैदिकपरम् । **सूतसंहितावाक्येनवैदिकस्यचक्रादि**धारणनिषेधादनेनतांत्रिकस्यापितन्निषेधेशंखचक्रादिविध्या नर्थक्यापत्तेः । नचतस्यशूद्रविषयत्वेनसावकाशत्वम् ।—शंखवाशंखचक्रेवातथापंचायुधानिवा । धारयित्वाथविप्रोवैब्रह्मकर्मसमारभेदिति **नृसिंहप्रसादेपाद्मेन,** ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायदिचेन्नरः । शंखचक्रांकिततनुःशिरसामंजरीधरः । गोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुत इतिकाशीखंडेन,दक्षिणेचभुजेविप्रोबिभृयाद्वैसुदर्शनमितिचंद्रोदयेधारणप्रकाशेचवाराहेणब्राह्मणादेरपितद्विधानात् । यत्त्वत्रविप्रा.

दिपदं गावोवाएतत्सत्रमासतेत्यादिवत्स्तुत्यर्थनविप्रादीन्प्रतिविध्यर्थमितिस्मृतिरत्नावली। तन्न। विधिश्रुतेः। तत्रतदभावात्तथेति। एतेषां वाक्यानांपतितब्राह्मणविषयत्वोक्तिरज्ञधीदंभ्रणायैव। अत्रयच्चशून्यललाटेनेतिभालेतिलकाभावेऽल्पफलश्रुतेरूर्ध्वपुंड्रंत्रिपुंड्रंतिलकमित्येकवचनात्तदविवक्षायांमानाभावाच्चललाटेएकपुंड्रंनित्यं द्वादशपुंड्राणितुकाम्यानीतिकेचित्। तन्न। कामयोगाभावात्। नचात्रविश्वजिन्न्यायः। स्वर्गकल्पनानुपपत्तेःफलान्तरेविनिगमकाभावात्। अतएकंपुंड्रमदीक्षितपरं, द्वादशपुंड्राणितुमंत्रसाध्यत्वाद्दीक्षितपराणीतियुक्तंप्रतीमः। द्वादशपुंड्राणिवैष्णवपराणीत्याचारचंद्रोदयः। इतिश्रीमन्नारायणभट्ट०लक्ष्मणभट्टकृतावाचाररत्नेतिलकप्रकरणम् ॥ ॥

अथसंध्यानिर्णयः। **स्कांदे**—उदयात्प्राक्तनीसंध्याघटिकात्रयमुच्यते। सायंसंध्यात्रिघटिकाअस्तादुपरिभास्वतः। **दक्षः**—रात्र्यंतयामनाड्यौद्वेसंध्यादिःकालइष्यते। दर्शनाद्रविरेखायास्तदस्तोमुनिभिःस्मृतः। **सुधानिधौ**—उत्तमातारकोपेतामध्यमालुप्ततारका। अधमासूर्यसहिताप्रातःसंध्यात्रिधामता। उत्तमासूर्यसहितामध्यमालुप्तभास्करा। कनिष्ठातारकोपेतासायंसंध्यात्रिधामता। **संवर्तः**—प्रातःसंध्यांसनक्षत्रामुपासीतयथाविधि। सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्कराम्। संध्यायामुपस्थानमेवप्रधानं मार्जनादित्वंगम्। तेतथैवमहाराजदंशितारणमूर्धनि। संध्यागतंसहस्रांशुमादित्यमुपतस्थिरे। इति**भारतादितिचंद्रिका**। अर्घ्यदानस्यश्रौतत्वादाशौचेतदेवानुष्ठेयमिति**चंद्रिकोक्तेः**गायत्रीजपोपस्थानयोराशौचेपाक्षिकत्वस्यवक्ष्यमाणत्वात्। उभयोःसंध्ययोःकालेरजसावार्घ्यमुत्क्षिपेदितिवाक्याच्चार्घ्यदानंप्रधानमितिवयम्। **भट्टदिनकर**स्तुसंध्यामुपासीतेतिमन्वादिस्मृतावुपपूर्वस्यासतेरुपस्थानमेववाच्यम्। नोपतिष्ठंतियेसंध्यांस्वस्थावस्थासुवैद्विजाइत्यत्रिस्मृतेरुपस्थानमेवप्रधानमित्याह। उपपूर्वस्यासतेर्ध्यानंवाच्यमिति**माधवःकृष्णभट्टश्च। स्मृतिरत्नावल्यांशंखः**—प्रातःसंध्यांसनक्षत्रां

१ तदतोमुनिभिरिति पाठ।

मध्यमांस्नानकर्मणि । स्नानकर्मणीतिमध्याह्नस्नानोत्तरमितितत्रैवोक्तम् । सध्यायाअकरणेप्रत्यवायो **मनुः**—नानुतिष्ठतियःपूर्वांनोपास्तेयस्तुपश्चि
माम् । सशूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः । **याज्ञवल्क्यः**—सर्वावस्थोपियोविप्रःसंध्योपासनतत्परः । ब्राह्मण्याच्चनहीयेतह्यन्यजन्मग
तोपिसः । **याज्ञवल्क्यः**—अनार्तश्चोत्सृजेद्यस्तुसविप्रःशूद्रसंमितः । **भारते**—येनपूर्वामुपासतेद्विजाःसंध्यांनपश्चिमाम् । सर्वांस्तान्धार्मि
कोराजाशूद्रकर्माणिकारयेत् । **स्कांदकौर्मयोः**—संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यत्किंचित्कुरुतेकर्मनतस्यफलमाप्नुयात् । **वि
ष्णुपुराणे**—सर्वकालमुपस्थानंसंध्ययोःपार्थिवेष्यते । अन्यत्रसूतकाशौचविभ्रमातुरभीतितः । विभ्रमःअभ्रादिनासंध्याकालाज्ञानं पैशाच्यंवा ।
सध्याविधिषुद्विजपदोक्तेर्नशूद्रस्यसंध्या आगमदीक्षायुक्तस्यतुतदुक्तास्त्येवेतिपं**चायतनसारेस्मृतिकौमुद्यांच** । ब्राह्मणाद्ब्राह्मण्यामुत्पन्नयोः
कुडगोलकयोरपिसंध्या—कुडोवागोलकोविप्रःसंध्योपासनमात्रविदितिस्**मृतिकौमुद्यांस्मृ**तेः । **शातातपः**—अनृतंमद्यगंधंचदिवामैथुन
मेवच । पुनातिवृषलस्यान्नंबहि·सध्याह्युपासिता । गृहेपुप्राकृतीसध्यागोष्ठेदशगुणास्मृता । नदीपुशतसाहस्राअनंताशिवसंनिधौ । अनंतावि
ष्णुसनिधावितिचं**द्रिकायांवसिष्ठ**पाठ· । प्राकृतीएकगुणा । **व्यासः**—बहिःसंध्यादशगुणागर्तप्रस्रवणादिपु । ख्याततीर्थेशतगुणासाह
स्रीजाह्नवीजले । **माधवीयेऽत्रिः**—उभेसंध्येतुकर्तव्येब्राह्मणैश्चगृहेष्वपि ॥ ॥ **अथप्रयोगः** । **वृहत्पराशरः**—पूर्वासंध्यातुगायत्री
ब्राह्मणीहंसवाहना । रक्तपद्मारुणादेवीरक्तपद्मासनस्थिता । रक्ताभरणभारांगीरक्तमाल्यांबरातथा । अक्षमालाजलाधारवरहस्तामरार्चिता ।
विश्वमात सुराभ्यर्च्येपुण्येगायत्रिवैधसि । आवाहयाम्युपास्त्यर्थमंहोनिघ्नन्पुनीहिमाम् । सध्यामाध्याह्निकीश्वेतासावित्री[1]रुद्रदेवता । वृषेंद्रवा
हनादेवीज्वलत्रिशिखधारिणी । श्वेतांबरवराश्वेतनागाभरणभूपिता । श्वेतस्रगक्षमालापिकृतानुरक्तशकरा । जलाधारजटाधात्रीधरेद्रप्रभवा

१ रुद्रवादिनीइतिपाठ ।

तथा । मातर्भवानिविश्वेशिविश्वेविश्वजनार्चिते । शुभेवरेवरेण्येत्वमाहूतैहिपुनीहिमाम् । संध्यासायंतनीकृष्णाविष्णुदेवीसरस्वती । खगगाकृष्णवस्त्रातुशंखचक्रगदाधरा । कृष्णस्रग्भूषणैर्युक्तासर्वज्ञानमयीवरा । वीणाक्षमालिकाचापहस्तास्मितवरानना । मातर्वाग्देवतेदेविवरेण्येचधनप्रदे । सर्वामरगणस्तुत्येआहूतैहिपुनीहिमाम् । त्रिशिखंत्रिशूलम् । खगोगरुडः । **मदनरत्ने**—वृद्धांसरस्वतीकृष्णांपीतवस्त्रांचतुर्भुजाम् । शंखचक्रगदापद्महस्तांगरुडवाहनाम् । बदर्याश्रमवासांतामायांतीसूर्यमंडलात् । सामवेदकृतोत्संगांवनमालाविभूषिताम् । वैष्णवीमक्षरांशांतांदेवीमावाहयाम्यहम् । **आचारादर्शे**—रक्ताभवतिगायत्रीसावित्रीशुक्लवर्णिकेतिपाठः । **संवर्तः**—अथाचम्यकुशैर्युक्तआसनेसमुपस्थितः । करसंपुटकंकृत्वासंध्यांनित्यंसमारभेत् ॥ ॥ **आसनम्** । **स्मृतिसारे**—कौशेयंकेवलंवापिअजिनंपटमेवच । दारुजंतालपर्णवाआसनंपरिकल्पयेत् । श्रीपर्ण्यादिदारुविहितं । **चंद्रिकायांकौशिकः**—कुशासनंसदापूतंयतीनांतुविशेषतः । **योगयाज्ञवल्क्यः**—कौशेयंवाथवाचर्मचैलंमूलमथापिवा । **मार्कंडेये**—चित्रासनंयोगपट्टंतथैवमृगचर्मच । कृष्णाजिनंतथातातवर्जयेत्पुत्रवान्गृही । **स्मृतिसमुच्चये**—वंशासनेतुदारिद्र्यंपाषाणेव्याधिसंभवः । धरण्यांदुःखसंभूतिर्दौर्भाग्यंभिन्नदारुजे । तृणासनेयशोहानिःपल्लवेचित्तविभ्रमः । कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि । वस्त्रासनेव्याधिनाशःकेवलेदुःखमोचनम् । अभिचारेनीलवर्णोरक्तोवश्यादिकर्मणि । शांतिकेधवलःप्रोक्तःसर्वार्थश्चित्रकंबलः । **मार्कंडेये**—तद्वन्नोपविशेत्प्राज्ञःपादेनाक्रम्यचासनम् । **बृहस्पतिः**—बध्वासनेनियम्यासून्स्मृत्वाचर्ष्यादिकंततः । सन्निमीलितदृङ्मौनीप्राणायामंसमभ्यसेत् । **आसनंतुवायुपुराणे**—पद्ममर्धासनंवापितथास्वस्तिकमासनम् । **शांतिहेमाद्रौकौर्मे**—ऊर्वोरुपरिविप्रेंद्रकृत्वापादतलेउभे । समासीनात्मनःपद्ममेतदासनमुत्तमम् । एकंपादमथैकस्मिन्विन्यस्योरुणिसत्तम । आसीनोर्धासनमिदं

१ विष्णुदेवाइतिपाठ ।

योगसाधनमुत्तमम् । उभेकृत्वापादतलेजानूर्वोरंतरेणहि । समासीनात्मनःप्रोक्तमासनंस्वस्तिकंपरम् । **छंदोगपरिशिष्टे**—रक्षयेद्वारिणा त्मानंपरिक्षिप्यसमंततः । रक्षा शिखावंधइतिकेचित् । तन्न । शिखावंधस्ततत्रानुक्तेः । साप्राणायामात्पूर्वमित्या**चारादर्शः** । प्राणायामोत्तर मितिका**मधेनुः** ॥ ॥

प्राणायामनिर्वचनंतुकौर्मे—प्राणाःस्वदेहजोवायुरायामस्तुनिरोधनम् । **तद्वैविध्यंकौर्मे**—सएवद्विविधःप्रोक्तःसगर्भोऽगर्भएवच । सगर्भमाहुःसजपमगर्भमजपंबुधाः । अगर्भोयोगाभ्यासोपयोगी । **व्यासशौनकौ**—प्रणवव्याहृतियुतांगायत्रीशिरसासह । त्रिःपठेदायत प्राणःप्राणायामःसउच्यते । प्रणवव्याहृतीतिद्वंद्वेव्याहृतीनांप्रणवयोगोनस्यात् । मध्यमपदलोपिसमासेगायत्र्यास्तद्योगोनस्यात् । मास्त्वितिचे त् सव्याहृतिसप्रणवामिति**योगयाज्ञवल्क्य**विरोधः । अतोगायत्रीशिरसासार्धजपेद्व्याहृतिपूर्विकाम् । प्रतिप्रणवसंयुक्तांत्रिरयंप्राणसंयमइ ति**याज्ञवल्क्या**द्व्यवस्था । गायत्र्याएवप्रणवयोगेप्रतीतिव्यर्थस्यात् । नचव्याहृतिगायत्रीशिरसांप्रत्येकंतद्योगात्त्रिःप्रणवत्वेनप्रतीतिसार्थकम् । सप्तव्याहृतिभिःसार्धससोंकारसमन्विताम् । शिरसासहितांदेवीप्राणायामेनियोजयेदिति**चंद्रोदये**योगयाज्ञवल्क्य**विरोधात् । यत्त्वतएव व्याहृतीनामेवादौप्रणवइतिविज्ञानेश्वरस्ताच्चित्यम् । गायत्रीविशेषणत्वादुभयोःपरस्परमन्वयायोगात् । गायत्रीविशेषणस्यतयाऽसंबद्धार्थस्यव्याहृ त्यन्वयायोगाच्च । नचवाजपेयन्यायः । तत्रप्रधानेन्वयायोगाद्युक्तोंगेष्वन्वयः । षष्ठ्याःसंबधसामान्येउपपत्तेश्च । नचात्रतथा । अतोयथाज पेतिसृणामेकेनप्रणवपूर्वत्वंतथात्रापिशंकानिरासार्थ**विज्ञानेश्वरोक्तिः**समाधेया । प्रतीत्युक्तेरेवशिरसापिप्रणवान्वयः । अतोनवप्रणवाइतिचं **द्रिका** । तदपिन । **व्यासस्मृतौ** प्रणवांतशिरोभिधानात् । प्रतिप्रतीकंप्रणवमुच्चारयेदंतेचशिरसइति**छंदोगपरिशिष्टाच्च** । अतोदशप्रण वाइतिपृ**थ्वीचंद्रः** । शिष्टाचारोप्येवम् । युक्तंचैतदेव—एतामेताःसहानेनतथैभिर्दशभिःसह । त्रिःपठेदायतप्राणःप्राणायामःसउच्यतेइ

तिच्छंदोगपरिशिष्टाच्च । एताव्याहृतयःसप्त एतांगायत्रीं अनेनशिरसा एभिःप्रणवैः दशभिरितियथाप्राप्तानुवादः प्रतिप्रतीकमित्युक्तेः नतुसंततमोंकारदशकं । व्याहृतयःसप्त। भूर्भुवःस्वर्महर्जनस्तपःसत्यंतथैवच । इतिसप्तव्याहृतयःप्राणायामेषुनित्यशइतिचं**द्रिकायांयोगयाज्ञवल्क्योक्तेः** । **व्यासः**—आदानंरोधमुत्सर्गंवायोस्त्रिस्त्रिःसमभ्यसेत् । **शांतिहेमाद्रौयोगयाज्ञवल्क्यः**—नासिकाकृष्टउच्छ्वासो धृतःपूरकउच्यते । कुंभकोनिश्चलश्वासोरिच्यमानस्तुरेचकः । नीलोत्पलदलश्यामंनाभिदेशेव्यवस्थितम् । चतुर्भुजंमहात्मानंपूरकेणविचिंतयेत् । कुंभकेनहृदिस्थानेध्यायीतकमलासनम् । ब्रह्माणंगौरवर्णंचचतुर्वक्त्रंपितामहम् । रेचकेनेश्वरंविद्याल्ललाटस्थंमहेश्वरम् । शुद्धस्फटिकसंकाशं निर्मलंपापनाशनम् । पूरकेणेत्यादितृतीयासप्तम्यर्थे । गौरंरक्तम् । रक्तंप्रजापतिंध्यायेदिति**व्यासोक्तेः** । पूरकादीनांमिलितानांप्राणायामत्वम् । पूरककुंभकरेचैःप्राणायामस्त्रिलक्षणोज्ञेयइति**योगयाज्ञवल्क्योक्तेः** । प्रत्येकंत्रिर्मंत्रपाठेप्रत्येकंप्राणायामत्वमित्**याचारादर्शः** । **शौनकः**—नासिकामंगुलीभिश्चतर्जनीमध्यमादृते । दक्षिणेनसमाकृष्यसव्येनतुविसर्जयेत् । **देवजानीयेस्मृत्यंतरे**—दक्षिणेश्वासमाहृत्यवामेचैवविसर्जयेत् । **शांतिहेमाद्रावीश्वरगीतासु**—रेचकंदक्षिणेप्रोक्तंपूरकंवामतश्चरेत् । जपारंभेतुविज्ञेयोविपरीतश्चसंस्थितौ । संस्थितिःसमाप्तिः । विपरीतोदक्षिणेनपूरकोवामेनरेचकइत्यर्थः । **बह्वृचपरिशिष्टे**—दर्भपाणिःप्रथमममंत्रकंपंचदशमात्रिकंप्राणायामत्रयंकृत्वासमंत्रकंसकृत्कुर्यादिति ॥ ॥ **मात्रास्वरूपमुक्तंसंग्रहे**—यावत्कालंत्रिरावेष्ट्यजानुहस्तेनदक्षिणम् । छोटिकाकरणंयत्सामात्रेतिपरिपठ्यते । मात्राभिःपंचदशभिःप्राणायामोऽधमःस्मृतः । मध्यमोद्विगुणःश्रेष्ठस्त्रिगुणोधारणास्मृता । **विज्ञानेश्वरोप्येवम्** । **गायत्रीरहस्येस्मृतिसारे**—पंचांगुलीभिर्नासाग्रपीडनंप्रणवाभिधा । मुद्रेयंसर्वपापघ्नीवानप्रस्थगृहस्थयोः । कनिष्ठानामिकांगुष्ठैर्नासाग्रस्यचपीडनम् ।

---

१ वनस्थस्ययतेस्त्रयाइतिपाठ ।

ओंकारमुद्रासाप्रोक्तायतेश्चब्रह्मचारिणः । **चंद्रोदयेसंग्रहे**—अंगुष्ठतर्जनीभ्यांतुऋग्वेदीसामगायनः । अंगुष्ठानामिकाभ्यांचग्राह्यंसर्वैरथर्वभिः । **व्यासः**—अंगुष्ठेनपुटंधार्यनासायादक्षिणंपुनः । कनिष्ठानामिकाभ्यांतुवामंप्राणस्यसंग्रहे । **मनुः**—प्राणायामत्रयंकार्यसंध्यासुचतिसृष्व पि ॥ ॥ **प्रणवस्वरमाहचंद्रोदयेवृद्धपराशरः**—ऋग्वेदेस्वरितोदात्तउदात्तश्चयजुःश्रुतौ । सामवेदेसविज्ञेयोदीर्घःसप्लुतएवच । **योग याज्ञवल्क्यः**—आथर्वणेसमुद्दिष्टउदात्तोनात्रसंशयः । **शांतिहेमाद्रौ**—अनुदात्तोदात्तऋग्वेदेषण्मात्रःस्वरउच्यते । सर्वोदात्तोयजुःसा म्नांप्लुतातीतःप्लुतस्तथा । पूर्वास्तिस्रोनुदात्तास्तिस्रउदात्ताः । तत्रैव**शौनकः**—बाष्कलेनैकमात्रोयमोंकारःसमुदाहृतः । शाकलायनआचार्यो द्विमात्रमभिवांछति । सार्धद्विमात्रंतंप्राहमुद्गलोमुनिपुंगवः । सार्धत्रिमात्रमोंकारंवसिष्ठोमुनिरब्रवीत् । पराशरश्चतुर्मात्रंप्राहत्वध्यात्मतत्त्ववित् । मात्राश्चार्धचतस्रोऽस्यविज्ञेयाःपरमार्थतः । **अथर्वणश्रुतौ**—यद्येकमात्रमभिध्यायीतेत्येकमात्रउक्तः ॥ ॥ ऋष्यादिस्मरणंकार्यमित्युक्तंतत्रचं **द्रोदयेव्यासः**—प्रणवस्यऋषिर्ब्रह्मागायत्रीछंदएवच । देवोऽग्निःसर्वकर्मादौविनियोगःप्रकीर्तितः । देवोग्निरितिजपपरम् । ध्यानकालेपरंब्रह्मज पकालेग्निरिष्यतइति**योगयाज्ञवल्क्योक्तेः** ॥ ॥ **व्याहृतीनामृषीनाहभरद्वाजः**—भरद्वाजःकश्यपश्चगौतमोऽत्रिस्तथैवच । वि श्वामित्रोजमदग्निर्वसिष्ठश्चर्षयःक्रमात् । **चंद्रिकायाम्**—विश्वामित्रोजमदग्निर्भरद्वाजोथगौतमः । ऋषिरत्रिर्वसिष्ठश्चकश्यपश्चयथाक्रमम् । **आग्नेये**—गायत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेवच । त्रिष्टुप्चजगतीचेतिछंदांस्येतान्यनुक्रमात् । अग्निर्वायुस्तथासूर्योबृहस्पत्यपएवच । इंद्रश्च विश्वेदेवाश्चदेवताःसमुदाहृताः । सूर्यस्थाने आदित्यः अपांस्थानेवरुणः**चंद्रिकायां**पठितः । **तत्रैव**—व्याहृतीनांचसर्वासामृषिरुक्तःप्रजाप तिः । **गायत्र्याऋष्याद्याहयोगयाज्ञवल्क्यः**—सवितादेवतायस्यामुखमग्निस्त्रिपात्स्थिता । विश्वामित्रऋषिश्छंदोगायत्रीसाविशिष्यते ।

---

१ ग्राह्यनासायाइतिपाठ । २ परिकीर्तिता ।

शूद्राचारशिरोमणौशातातपः—तत्सवितुर्वरेण्यमितिसावित्रीब्राह्मणस्य देवसवितरितिराजन्यस्य विश्वारूपाणीतिवैश्यस्येति । **योग याज्ञवल्क्यः**—आपोज्योतिरित्येषमंत्रोयस्तुप्रकीर्त्यते । तस्यप्रजापतिश्चर्षिर्यजुश्छंदोपिवर्णितम् । ब्रह्माग्निवायुसूर्याश्चदेवताःसमुदाहृताः ॥ ॥

न्यासाः चंद्रिकायाम्—पादयोश्चतथाजान्वोर्जंघयोर्जठरेपिच । कंठेमुखेतथामूर्ध्निक्रमेणव्याहृतीर्न्यसेत् । भूरंगुष्ठद्वयेन्यस्यभुवस्तर्जनिकाद्वये । ज्येष्ठांगुलिद्वयेधीमान्स्वःपदंविनियोजयेत् । करन्यासविधिंकृत्वाअंगन्यासंसमारभेत् । भूःपदंहृदिविन्यस्यभुवःशिरसिविन्यसेत् । शिखायांस्वःपदंन्यस्यकवचेतत्पदंन्यसेत् । अक्ष्णोर्भर्गपदंन्यस्यदिग्विदिक्षुधियःपदम् । तदित्यादिपादपरम् । ततःशिरसासर्वांगन्यासः ।—शिरस्तस्यास्तुसर्वांगेप्राणायामेपरंन्यसेदितिव्यासोक्तेः । **न्यासांतरमाहचंद्रोदयेव्यासः**—आपोगुह्येन्यसेज्ज्योतिश्चक्षुष्यथरसोमुखे । अमृतंजानुनोर्ब्रह्महृदयेभूःपदंन्यसेत्[1] । भुवर्नाभौललाटेस्वरोंकारंमूर्ध्निविन्यसेत् । **शौनकः**—प्राणानायम्यविधिवद्वाग्यतःसंयतेंद्रियः । अथ संध्यामुपासिष्यइतिसंकल्प्यमार्जयेत् ॥ ॥ **चंद्रिकायांवृहन्मनुस्मृतौब्रह्मांडेच**—नद्यांतीर्थेहृदेवापिभाजनेमृन्मयेथवा । औदुंबरेच सौवर्णेराजतेदारवेजलम् । कृत्वाथवामहस्तेवासंध्योपास्तिंसमारभेत् । औदुंबरे ताम्रपात्रे । **यत्तुव्यासः**—वामहस्तेजलंकृत्वायेतुसंध्यामुपासते । सासंध्यावृषलीज्ञेयाह्यसुरास्तैस्तुतर्पिताइति । तत्पात्रांतरसत्वेइतिचंद्रिकादयः । नद्यादिपरमितिवयम् । गंगायांवापिकायांवातडागेपितथैवच । वामहस्तेजलंगृह्णन्नकुर्यान्मार्जनंक्वचिदितिगायत्रीरहस्येआपस्तंबोक्तेः । **बह्वृचपरिशिष्टे**—स्थिरेतूदकाशयेयावतिकर्म कुर्वीततावदुदकस्यविभागंकल्पयित्वातीर्थानितत्रावाह्येत्युक्तम् । **बृहस्पतिः**—धाराच्युतेनतोयेनसंध्योपास्तिर्विगर्हिता इति ॥ ॥

मार्जनं योगयाज्ञवल्क्यः—आपोहिष्ठेतितिसृभिर्ऋग्भिस्तुप्रयतःशुचिः । नवप्रणवयुक्ताभिर्जलंशिरसिमार्जयेत् । नवप्रणवाःप्रतिपादम् ।

[1] जानुनोश्चैवहृदये ।

बहृचपरिशिष्टे—सदर्भपाणिनादायोत्तानंशिरसिमार्जयेत्। **छंदोगपरिशिष्टे**—शिरसोमार्जनंकुर्यात्कुशैःसोदकबिंदुभिः । ऋगंतेमार्जनं कुर्यात्पादांतेवासमाहितः । प्रणवोभूर्भुवःस्वर्द्वौगायत्रीचतृतीयकम् । अब्दैवतंतृचंचैवचतुर्थमितिमार्जनम् । **योगीश्वरनारायणौ**—तृच स्यांतेथवाकुर्यादृषीणांमतमीदृशम् । एवचत्रयःपक्षाः—[1]ऋगतेमार्जनमित्येकः । नवभिःपादैःप्रणवोपेतैर्नवमार्जनानीतिद्वितीयः । तृचांतेमा र्जनमितितृतीयः । **व्यासः**—यस्यक्षयायेतिजलंसकुशंप्रक्षिपेदधः । **हारीतः**—मार्जनंचकुशाभावेदेवतीर्थेन यद्वाकुशसहितेनदेवतीर्थेन । **यत्तुस्मृत्यर्थसारे**—पच्छोर्धर्चशऋक्शश्चमार्जनेतन्मयेतृचे । ब्रह्महस्तच्युतंतोयंस्वयंशिरसिधारयेदिति तन्मंत्रस्नानपरम् । मंत्रस्नानोपक्रमात् । **प्रकारांतरमुक्तं काशीखंडे**—आपोहिष्ठेतितिसृभिर्मार्जनंतुततश्चरेत् । भूमौशिरसिचाकाशेआकाशेभुविमस्तके । मस्तकेचतथाकाशेभूमौ चनवधाक्षिपेत् । भूमिशब्देनचरणावाकाशंहृदयंस्मृतम् ॥ ॥ आपोहिष्ठेत्यस्यऋष्याद्याह**योगयाज्ञवल्क्यः**—सिंधुद्वीपोभवेदार्षंगायत्रंछं दएवच । आपश्चदैवतंप्रोक्तंविनियोगश्चमार्जने । **भृगुः**—आपोहिष्ठानवस्वृक्षुसिंधुद्वीपऋषिःस्मृतः । अब्दैवत्यास्तुसप्तर्चोगायत्र्योद्वेत्वनुष्टुभौ । **मैत्रायणीयपरिशिष्टे**—प्रातःसूर्यश्चमेत्युक्त्वासायमग्निश्चमेतिच । आपःपुनतुमध्याह्नेकुर्यादाचमनंततः । प्राणायामोत्तरसूर्यश्चमेत्या चम्यमार्जयेदितिक्रमः**कात्यायनादीनाम्** । अन्येषांप्राणायामोत्तरमाचम्यमार्जयित्वासूर्यश्चेतिसकृदाचमनद्वयमितिपृथ्वी**चंद्रदेवयाज्ञि कौ** ।—स्नात्वामंत्रवदाचम्यपुनराचमनंचरेदिति**टोडरानंदेनारासिंहा**त्सकृदाचमनमेव । **पितामहः**—सूर्यश्चेत्यनुवाकस्यछंदोगायत्रमु च्यते । सवितादेवतातस्यऋषिरत्रिरितिस्मृतः । **चंद्रोदयेसंग्रहे**—आपःपुनंतुमंत्रस्यऋषिःपूतइतिस्मृतः । छंदोनुष्टुब्भवेद्वापिपृथिवीतस्यदे

---

१ मार्जनेचत्वारःपक्षाः—आदौप्रणवेनसमस्तव्याहृतिभि गायत्र्यामार्जनकृत्वासमस्ततृचेनैकमार्जनकुर्यादित्येक । प्रणवोपेतैर्नवभि पादैर्नवमार्जनानीतिद्वितीय । ऋगतेमार्जनमितितृतीय । तृचातेमार्जनमितिचतुर्थइत्यप्यन्यत्र ।

वता । **तत्रैव**—अग्निश्चेतिपिबेत्तोयंत्वस्यसूर्यमृषिंविदुः । देवताग्निर्भवेच्छंदोगायत्रंप्रोक्षणेविधिः । सूर्यस्येत्यस्याग्निर्ऋषिःप्रकृतिश्छंदःसूर्यमन्यु मन्युपतिरात्रयोदेवताइतिचं**द्रिकामदनपारिजातौ** । नारायणऋषिःसूर्योदेवतागायत्र्युपरिष्टाद्बृहतीछंदइति**हरिहरः** । ब्रह्माऋषिःप्रकृति श्छंदःआपोदेवतेति **पृथ्वीचंद्रः** । अग्निश्चेत्यस्यसूर्यऋषिः प्रकृतिश्छदः अग्निमन्युमन्युपत्याहानिदेवताइति**चंद्रिका** । आपःपुनंत्वित्यस्यमारी चःकश्यपोविष्णुर्वाऋषिः आपोदेवताअनुष्टुप्छंदइतिसएव । नारायणऋषिरितिदे**वजानीये** ॥ ॥ छंदोगानामाचमनेमंत्रमाह**गौतमः**— अहश्चमादित्यश्चपुनात्वितिप्रातः । रात्रिश्चमावरुणश्चपुनात्वितिसायमिति । अनयोःप्रजापतिर्ऋषिर्लिंगोक्तादेवतेति**चंद्रिका** । **विष्णुः**— जानुभ्यामुपरिष्टात्तुशुष्कवासाःस्थितोजले । सांध्यमाचमनंकुर्वन्शुचिःस्यादशुचिस्त्वधः । पुनर्मार्जनमुक्तं **बहृचपरिशिष्टे**—अथपुनराच म्यमार्जयेत्प्रणवव्याहृतिसावित्रीभिरापोहिष्ठेतिसूक्तेनेति । **शौनकीये**ऽप्येवम् । **गायत्रीकल्पेतु**—आपोहिष्ठेतित्रिभिःपादान्ते शंनोदे वीरितिचतुर्भिरर्धर्चांते इदमापइतित्रिभिर्ऋगंते । मार्जनोत्तरम**घमर्षणंयोगयाज्ञवल्क्यः** । जलपूर्णंतुचुलुकंनासिकाग्रेविधृत्यच । प्राणा न्निरुंधन्द्रुपदांपठित्वातज्जलंक्षिपेत् । **कात्यायनः**—जपेदनायतासुर्वात्रिःसकृत्[1]वाघमर्षणम् । **कौर्मे**—आपःपाण्योःसमादायप्राणमासज्यत त्रच । **बहृचपरिशिष्टे**—अथगोकर्णवत्कृतेनहस्तेनोदकमादायनासिकाग्रेधारयन्कृष्णघोरपुरुषाकृतिमा[2]त्मानमंतर्व्याप्यस्थितंविचिन्त्य संयतप्रा णोऽघमर्षणसूक्तंद्रुपदामृचंवावर्तयेत्तंपाणिस्थेउदकेपतितंध्यात्वावामतोभुवितीव्रपातेनक्षिपेदित्येवमेकेनकुर्वंतीति । **संध्याकल्पे**—स्वहस्तवा रिनासाग्रेपठित्वाद्रुपदांक्षिपेत् । अर्धंभूमौशिरस्यर्धंसर्वंभुव्यघमर्षणम् । अत्रकरपाण्योरैच्छिकोविकल्पः । **योगयाज्ञवल्क्यः**—अघमर्षण सूक्तस्यऋषिश्चैवाघमर्षणः । आनुष्टुभंभवेच्छंदोभा[3]ववृत्तंचदैवतम् । अश्वमेधावभृथकेविनियोगोस्यकल्पितः । अघमर्षणोत्तरमाचमनंसाहचंद्रि

---

१ सकृद्वाइतिपाठ । २ पाप्मानमितिपाठ । ३ भाववृत्तिश्चेतिपाठ ।

कादौशंखः—उपस्पृशेत्ततःपश्चान्मंत्रेणानेनमंत्रवित् । अंतश्चरसिभूतेषुगुहायांविश्वतोमुखः । त्वयज्ञस्त्वंवषट्कारआपोज्योतीरसोमृतम् ॥ ॥
अथसूर्यार्घः । कौर्मे—ॐकारव्याहृतियुतांगायत्रीवेदमातरम् । जप्त्वाजलांजलिंदद्याद्भास्करप्रतितन्मनाः । अंजलयस्त्रयः । कराभ्यां तोयमादायगायत्र्याचाभिमंत्रितम् । आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोःक्षिपेदिति**व्यासोक्तेः** । अतएवकेवलगायत्र्यार्घ्यत्रयंनव्याहृतियुतया । तदुहवाएतेब्रह्मवादिनःपूर्वाभिमुखाःसंध्यायांगायत्र्याभिमंत्रिताअपऊर्ध्वंविक्षिपंत्युद्यंतमस्तंयंतमादित्यमिति**तैत्तिरीयारण्यकात्** । अतएवचतुर्थार्घंतुगायत्र्यादद्याद्व्याहृतिसंयुतमितिप्रायश्चित्तार्घ्येविशेषः। **कौर्मेतु**कात्यायनपरमिदमित्युक्तम् । उत्थायार्कंप्रतिप्रोहेत्त्रिकेणांजलिमंभसाइति**कात्यायनस्मृतेः** । त्रिक प्रणवव्याहृतित्रयगायत्र्यः । **संध्याकल्पेआश्वलायनः**—सकृन्मंत्रेणद्विस्तूष्णीमर्घ्यंदद्याद्विचक्षणः । **मनुः**—परंनम्रःप्रभातेस्यान्मध्याह्नेतुऋजुःस्थितः । द्विजोऽर्घंप्रक्षिपेद्देव्यासायंचोपविशन्भुवि । प्रातर्माध्याह्निकींसंध्यांतिष्ठन्नेवसमर्पयेत् । उपविश्यतुसायाह्नेजलेत्वर्घ्यंननिक्षिपेत् । **यत्तुवसिष्ठः**—उपविश्यचयच्चार्घ्यंसर्वंतन्निष्फलंभवेदिति तत्सायंसंध्याभिन्नपरम् । **कश्यपः**—त्रिंशत्कोट्योमहावीर्यामंदेहानामराक्षसाः । कृष्णातिदारुणाघोराःसूर्यमिच्छतिखादितुम् । ततोदेवगणाःसर्वेऋषयश्चतपोधनाः । उपासतेतदासंध्यांप्रक्षिपंत्युदकांजलिम् । दह्यंतेतेनतेदैत्यावज्रीभूतेनवारिणा । **अर्घ्यकालः काशीखंडे**—अर्वोदयास्तसमयेतस्मादर्वोदकंक्षिपेत् । **कौर्ममार्कंडेययोस्तु**—जप्त्वाजलांजलिंदद्याद्भास्करंप्रतितन्मनाः । सावित्रींप्रजपेद्विद्वान्प्राङ्मुखःप्रयतःशुचिः । अथोपतिष्ठेदादित्यमुदयंतंसमाहितइत्युक्तम् । **देवजानीयेप्येवम् । चंद्रिकायामपि** गायत्रीजपोत्तरमुपस्थानमुक्तम् । नचआदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोःक्षिपेदिति**व्यासोक्तेः**सूर्योदयोत्तरमर्घ्यदानमितिवाच्यम् । तस्याआदित्यदिगभिमुखत्वार्थत्वात् । यत्तूपस्थानोत्तर जपउक्तः सशाखांतरपरः । **शौनकः**—असावादित्यमंत्रेणप्रदक्षिणमतःपरं । अपःस्पृष्ट्वादक्षिणेतुपश्चाद्देवान्विसर्जयेत् । प्रदक्षिणोत्तरंजलंस्पृशेत् । सायमंत्रवदाचम्यप्रोक्ष्य

सूर्यस्यचांजलिम्। दत्त्वाप्रदक्षिणंकृत्वाजलंस्पृष्ट्वाविशुध्यतीतिचंद्रोदयेनारसिंहात् ॥ ॥ अर्घ्यदानोत्तरंसंध्यातर्पणमुक्तंप्रयोगपारिजाते—अस्यकश्यपऋषिः ब्रह्मादेवता गायत्रीछंदः तर्पणेविनियोगः। भूःपुरुषंतर्पयापि ऋग्वेदंतर्पयामि। मंडलं आत्मानं ब्रह्मरूपिणीं गायत्रीं वेदमातरं सांकृतिं संध्यां बालां ब्रह्माणी उषसं निम्रुचं सर्वसिद्धिकरीं सर्वमंत्राधिपां। सायंतु विष्णुर्देवता अनुष्टुप्छंदः स्वःपुरुषंतर्पयामि सामवेदंतर्पयामि विष्णुरूपिणी परमात्मानं सरस्वती वृद्धां वैष्णवी। एवंपंचदशकृत्वस्तर्पयित्वाद्विराचामेदिति। **संध्याकल्पेप्रयोगपारिजातेचस्मृत्यंतरे**—ततस्त्वाचम्यविधिवत्प्राणायामान्नवाचरेत् ॥ ॥

गायत्रीस्वरूपध्यानन्यासादि। **चंद्रोदयेवृद्धपराशरः**—जपेतुत्रिपदाज्ञेयाअर्चनेतुचतुष्पदा। न्यासेजपेतथाध्यानेअग्निकार्येतथार्चने। सर्वत्रत्रिपदाज्ञेयाब्राह्मणैस्तत्वचिंतकैः। पदशब्दःपादपरः। गायत्र्याश्चतुर्थपादउक्तोगारुडे—परोरजसेसावदोंचतुर्थंपदमीरितम्। **षट्त्रिंशन्मते**—मानस्तोकेतिमंत्रेणशिखाबंधतुकारयेत्। जपंहिंसंतिरक्षांसिरक्षाकर्मविवर्जितम्। **कात्यायनः**—भूर्भुवसुवरित्यापोऽभिमंत्र्यचपरिक्षिपेत्। रक्षयेद्वारिणात्मानंपरिक्षिप्यसमंततः। प्रणवाद्याव्याहृतीस्तुसावित्रीचजपेत्ततः। **शांतिहेमाद्रौब्राह्मे**—छंदोगायत्रीगायत्र्याःसविताचैवदेवता। शुक्लोवर्णोमुखंचाग्निर्विश्वामित्रऋषिस्तथा। त्रयीशिरःशिखारुद्रोविष्णुर्हृदयमेवच। उपासनेविनियोगःसांख्यायनसगोत्रजा। त्रैलोक्यंचरणंज्ञेयंपृथिवीकुक्षिरेवच। एवंध्यात्वातुगायत्रींजपेद्द्वादशलक्षणाम्। **न्यासाकरणेदोषउक्तः शांतिहेमाद्रौ**—कर्मणोन्यासहीनस्यगृह्णंत्यर्धंहिराक्षसाः। अस्त्रेणकरशुद्धिंकृत्वान्यासंकुर्यादित्युक्तंचंद्रिकायाम्। **प्रणवन्यासमाहयोगयाज्ञवल्क्यः**—अकारंनाभिदेशेतुउकारंहृदिविन्यसेत्। मकारंमूर्ध्निविन्यस्येदेषन्यासोविमुक्तिदः। **व्याहृतिन्यासमाहपराशरः**—भूर्लोकंपादयोर्न्यस्यभुवर्लोकंतुजानुनोः। स्वर्लोकंगुह्यदेशेतुनाभिदेशेमहस्तथा। जनलोकंतुहृदयेकंठदेशेतपस्तथा। भ्रुवोर्ललाटसंधौतुसत्यलोकःप्रतिष्ठितः। मध्य

देशंभुवरिति । **पारिजातेगायत्रीरहस्ये**—तत्सवितुर्ब्रह्मात्मनेसावित्रीशक्तिरंगुष्ठाभ्यांनमः । वरेण्यंविष्ण्वात्मनेलक्ष्मीशक्तिस्तर्जनीभ्यां नमः । भर्गोदेवस्यशिवात्मनेगौरीशक्तिर्मध्यमाभ्यांनमः । धीमहिपरमात्मनेज्ञानशक्तिरनामिकाभ्यांनमः । धियोयोनःनिरंजनात्मनेईपणाश क्तिःकनिष्ठिकाभ्यांनमः । प्रचोदयान्निरासात्मनेमायाशक्तिःकरतलकरपृष्ठाभ्यांनमः । तत्सवितुर्ब्रह्मात्मनेसावित्रीशक्तिर्हृदयायनमः । वरेण्यं विष्ण्वात्मनेलक्ष्मीशक्तिःशिरसेस्वाहा । भर्गोदेवस्यरुद्रात्मनेगौरीशक्तिःशिखायैवषट् । धीमहिपरमात्मनेज्ञानशक्ति कवचायहुम् । धियोयोनः निरंजनात्मनेईपणाशक्तिर्नेत्रत्रयायवौषट् । प्रचोदयान्निरासात्मनेमायाशक्तिरस्त्रायफट् इतिषडंगः । **चंद्रिकायांब्रह्मकल्पेऽक्षरन्यास उक्तः**—तकारंविन्यसेत्स्वांगेपादांगुष्ठद्वयेद्विजः । सकारगुल्फदेशेतुविकारंजंघयोर्न्यसेत् । जान्वोस्तुकारंविन्यस्यवकारंचोरुदेशके । रेकारंवि न्यसेद्गुह्येणकारंवृपणेन्यसेत् । कटिदेशेयकारंतुभकारनाभिमंडले । गोकारजठरेयोगीदेकारंस्तनयोर्न्यसेत् । वकारंहृदिविन्यस्यस्यकारंकंठए- वतु । धीकारमास्येविन्यस्यमकारंतालुकेन्यसेत् । हिकारंनासिकाग्रेतुधिकारंनयनद्वये । भ्रुवोर्मध्येतुयोकारंललाटेतुद्वितीयकम् । पूर्वाननेतुनः कारप्रकारंदक्षिणानने । उत्तरास्येतुचोकारंदकारंपश्चिमानने । विन्यसेन्मूर्ध्नियाकारंसर्वव्यापिनमीश्वरम् । **अथपदन्यासः**—तत्पादांगुष्ठाभ्यां नमः । सवितुर्जंघाभ्यां । वरेण्यंकटिभ्यां । भर्गोनाभ्यै । देवस्यहृदयाय । धीमहिकंठाय । धियोमुखाय । योचक्षुर्भ्यां । नःललाटाय । प्रचोदयात्मूर्ध्ने । **अथपादन्यासः**—प्रथमपादस्यऋग्वेदऋपिःत्रिष्टुप्छंदःब्रह्मादेवताभूस्तत्सवितुर्वरेण्यंपादयोर्ब्रह्मणेनमः । द्वितीयपादस्य यजुर्वेदऋपिःअनुष्टुप्छंदःरुद्रोदेवताभुवोभर्गोदेवस्यधीमहिहृदयेरुद्रायनमः । तृतीयपादस्यसामवेदऋपिः जगतीछंदःविष्णुर्देवतास्वर्धियोयो नःप्रचोदयात्ललाटेविष्णवेनमः । तुरीयपादस्यविमलऋपिः परमात्मादेवतागायत्रीछंदःपरोरजसेसावदोंब्रह्मरंध्रेपरमात्मनेनमः । **अक्षरदे वताब्राह्मे**—आग्नेयंप्रथमंवायव्यंद्वितीयंतृतीयंसौर्यंचतुर्थंवैद्युतंपंचमंवारुणंषष्ठंसप्तमंबार्हस्पत्यमष्टमंपार्जन्यनवममैंद्रंदशमंगांधर्वंपौष्णमेकादशं

शैवंद्वादशंत्वाष्ट्रंत्रयोदशंवासवंचतुर्दशंमारुतंपंचदशंसौम्यंषोडशमांगिरिसंसप्तदशंवैष्णवमष्टादशमाश्विनमेकोनविंशंप्राजापत्यंविंशंसर्वदेवमेकविंशं रौद्रंद्वाविंशंब्राह्मंत्रयोविंशंवैष्णवंचतुर्विंशमिति । **चंद्रिकायाम्**—अथतत्त्वानिवक्ष्यामिअक्षराणांविशेषतः । पृथिवीह्युदकंतेजोवायुरंबरमेव च । गंधोरसोथरूपंचस्पर्शःशब्दोथवागिति । हस्तावुपस्थंपायुश्चपच्छ्रोत्रेत्वक्चचक्षुषी । जिह्वाघ्राणंमनस्तत्त्वमहंकारोमहांस्तथा । गुणत्रयंच सततंक्रमशस्तत्त्वनिश्चयः । **तत्रैव**—सहानित्याविश्वहृदयाविलासिनीप्रभावतीलीलाशांताशांतिर्दुर्गासरस्वतीविश्वरूपाविशालाआप्यायनीवि मलातमोमयीहिरण्यरूपासूक्ष्माविश्वायोनिर्जयावहापद्मालयावराशोभनागदारूपेतिशक्तयइति । अक्षरदेवतातत्त्वशक्तीनामुक्तिरक्षरन्यासोत्तरं देवतादिन्यासार्था । यद्वामुकदेवताकामुकशक्तिकामुकतत्त्वकामुकाक्षरायनमइत्यक्षरन्यासार्था । अक्षरविन्यासकालेतत्तद्देवतादिध्येयमित्येवमर्थं वा । **चंद्रिकायामंगन्यासमाहव्यासः**—हृदितत्सवितुर्न्यस्यन्यसेत्कंठेवरेणियम् । भर्गोदेवस्येतिखंडंशिखायांतुततोन्यसेत् । धीमहीति न्यसेद्वक्त्रेधियोयोनश्चनेत्रयोः । प्रचोदयादितिपदमस्त्रार्थेविनियोजयेत् । ॐभूरंगुष्ठयोर्न्यस्यॐभुवस्तर्जनीद्वये । ॐस्वश्चैवतथान्यस्यमध्यमा स्यांयतेंद्रियः । अनामिकाद्वयेधीमान्न्यसेत्तत्पदमग्रतः । कनिष्ठिकाद्वयेभर्गःपाण्योर्मध्येधियःपदम् । अत्रसर्वेमंत्राःसप्रणवानमोंताश्च । ॐकार मादावुच्चार्यमत्रबीजमतःपरम् । नामग्राह्यंनमोंतंचजपन्यासःप्रकीर्तितइति**चंद्रिकायांशांतिहेमाद्रौचभृगूक्तेः** ॥ ॥ **अथगायत्री कवचम् । चंद्रिकायां** ॐमितिहृदि । भूरितिमुखे । भुवइतिशिरसि । स्वरितिसर्वांगे । **तत्रैवव्यासः**—विन्यस्यैवंजपेद्यस्तुगायत्रीं वेदमातरम् । ब्रह्मलोकमवाप्नोतिव्यासस्यवचनंयथा ।

मुद्राप्रकारः—**चंद्रिकायांब्रह्मकल्पेच**—अथातोदर्शयेन्मुद्राःसंमुखंसंपुटंतथा । ततोविततविस्तीर्णेद्विमुखत्रिमुखेततः । चतु र्मुखंपंचमुखंषण्मुखाधोमुखेततः । व्यापकांजलिकाख्यंचशकटंतदनंतरम् । यमपाशंचग्रथितंततःस्यात्संमुखोन्मुखम् । प्रलंबंमुष्टिकोमीनः

कूर्मोवाराहएवच । सिंहाक्रांतंमहाक्रांतंततोमुद्गरपल्लवाविति । तल्लक्षणंतत्रैव—संमुखंसधितौहस्तावुत्तानौकुंचितांगुली । कुचितावक्राः । संपुटंपद्मकोशाभौकरावन्योन्यसहतौ । विततंसंहतौहस्तावुत्तानावायतांगुली । विस्तीर्णसहतौपाणीमिथोमुक्तांगुलिद्वयौ । अंगुल्यौकनिष्ठे । संमुखासक्तयोःपाण्योःकनिष्ठाद्वययोगतः । शेषांगुलीनांवैकल्येद्विमुखत्रिमुखादयः । कनिष्ठयोर्योगेंगुष्ठयोर्योगेचशेषांगुलीनांवैकल्येद्विमुखम् । तर्जन्योर्योगेत्रिमुखम् । मध्यमयोर्योगेचतुर्मुखम् । अनामिकयोर्योगेपंचमुखम् । शेषांगुलीनामसंयोगेकनिष्ठायोगनाशने । तिर्यक्संयुज्यमानाग्रौसंयुक्तांगुलिमंडलौ । हस्तौपण्मुखमित्युक्तामुद्रामुद्राविशारदैः । आकुंचिताग्रौसंयुक्तौन्युब्जौहस्तावधोमुखम् । उत्तानौताद्दशावेवव्यापकांजलिकंकरौ । अधोमुखौवद्धमुष्टीमुक्ताग्रांगुष्ठकौकरौ । शकटनामकथितयमपाशमतःपरम् । वद्धमुष्टिकयोःपाण्योरुत्तानावामतर्जनी । कुंचिताग्रान्ययायुक्तातर्जन्यान्युब्जवक्रया । उत्तानसंधिसंलीनवद्धांगुलिदलौकरौ । समुखौघटितौदीर्घांगुष्ठौग्रथितमुच्यते । संचितोर्ध्वांगुलिर्वामस्ताद्दशादक्षिणेनतु । अधोमुखेनसंयुक्तःसमुखोन्मुखमुच्यते । संचितासवद्धा । उत्तानोन्नतकोटीचप्रलंबःकथितौकरौ । उत्तानानामिकाकनिष्ठिकावित्यर्थः । मुष्टीचान्योन्यसंवद्धावुत्तानौमुष्टिकोभवेत् । मत्स्यस्तुसमुखीभूतौयुक्तानामकनिष्ठिकौ । ऊर्ध्वसंयुक्तवक्राग्रौगेषांगुलिदलौकरौ । अधोमुखःकरोवामस्ताद्दशादक्षिणेनतु । पृष्ठदेशेसमाक्रांतःकूर्मोनामाभिधीयते । ऊर्ध्वमध्येवामभुजःपक्षाभ्यामाश्रयेत्करम् । वराहःकथ्यतेकक्षसमीपाश्रयकेकरे । सिंहाक्रांतसमाख्यातंकर्णार्पितकरावुभौ । किंचिदाकुंचिताग्रौचमहाक्रांतंततःपरम् । ऊर्ध्वंकिंचिद्गतोपाणीमुद्गरोवामतर्जनी । ग्रस्तादक्षिणहस्तेनपल्लवोदक्षिणःकरः । मूर्ध्निअधोमुखःस्थितोदक्षिणःकरःपल्लवइत्यर्थः । **चंद्रिकायांमहासंहितायाम्**—नजातुदर्शयेन्मुद्रामहाजनसमागमे । **शौनकस्तु**योनिमुद्रामेवाह—षडगमंत्रैर्विन्यस्ययोनिमुद्रांप्रदर्शयेत् । गायत्रींसंस्मरेद्धीमान्हृदिवासूर्यम

---

१ लक्ष्यसमीपेतिपाठ ।

डले । **कृष्णभट्टीयेव्यासः**—हस्ताभ्यांमुकुलीकृत्वानामिकामूलपर्वणः । अंगुष्ठौतुक्षिपेदुक्तामुद्रैपावाहनीबुधैः । अधोमुखीत्वियंचेत्स्यात्स्थापनीमुद्रिकास्मृता । संनिधायोच्छ्रितांगुष्ठौमुष्ट्यासंयोजनीभवेत् । अंतःप्रवेशितांगुष्ठासैवसरोधिनीमता । नमस्काराभिधामुद्राज्ञेयापाणीतुसंहतौ । प्रसार्यदक्षिणंहस्तंवामस्योपरिचक्रमात् । कनिष्ठाद्यंगुलीनांचसंकोचेनसमानयेत् । अगुष्ठान्मूलपर्यंतंसंहाराख्येयमीरिता । हस्तयोरुभयोःसम्यगुच्छ्रितामंगुलीषुच । मध्यमातर्जनीयोगात्कनिष्ठोपकनिष्ठयोः । सश्लेषाद्धेनुमुद्रेयंगोस्तनीचेश्वरप्रिया ॥ ॥ **गायत्र्याःस्वरूपमाहयोगयाज्ञवल्क्यः**—श्वेतवर्णासमुद्दिष्टाकौशेयवसनातथा । श्वेतैर्विलेपनैःपुष्पैरलंकारैश्चभूषिता । आदित्यमडलांतस्थाब्रह्मलोकगतातथा । अक्षसूत्रधरादेवीपद्मासनगताशुभा । **बह्वृचपरिशिष्टे**—अथमंत्रदेवतांध्यात्वाआगच्छवरदेदेविजपेमेसंनिधौभव । गायंतंत्रायसेयस्माद्गायत्रीत्वंततःस्मृतेत्यावाह्यपूजयेदिति । **चंद्रिकायांगोभिलः**—आयाहिवरदेदेवित्र्यक्षरेब्रह्मवादिनि । गायत्रिछंदसांमातर्ब्रह्मयोनेनमोस्तुते । **व्यासः**—तेजोसीतिचमंत्रेणगायत्रीमावहेद्द्विजः । उपस्थायतुरीयेणनमस्कृत्यजपेच्चताम् । तुरीयेणेतिनमस्तेतुरीयायेत्यादिसावदोमित्यतेन । आवाहनमंत्राणांयथाशाखंव्यवस्था ।

गायत्रीजपप्रकारमाहयोगीश्वरः—प्रणवःपूर्वमुच्चार्योभूर्भुवःस्वस्ततःपरम् । गायत्रीप्रणवश्चांतेजप्येष्वेवमुदाहृतम् । **बौधायनः**—उभयतःसप्रणवांसव्याहृतिकांजपेदिति । **वृद्धपराशरः**—प्रणवोभूर्भुवःस्वश्चपुनःप्रणवसंयुताम् । अंत्योंकारसमायुक्तांमन्यंतेकवयःपरे । प्रणवोंतेतथाचादौआहुरन्येजपक्रमम् । आदावेवकारोव्याहृत्याचादितस्ततः । तदाद्यांचतदंतांचकुर्यात्प्रणवसंपुटाम् ।

---

१ सवर्त —गायत्रीत्र्यक्षरावालासाक्षसूत्रकमडलुम् । रक्तवस्त्राचतुर्वक्त्राहसवाहनसस्थिताम् । ब्रह्माणीब्रह्मदैवत्याब्रह्मलोकनिवासिनीम् । आवाहयाम्यहंदेवीगायत्रीसूर्यमडलात् । इति । २ आवहेदावाहयेत् ।

देवजानीयेवृद्धमनुः—पडोंकारांजपेद्विप्रोगायत्रीमनसाशुचिः । तिस्रोव्याहृतयःपूर्वंप्रथमोंकारसंयुताः । पुन.सहृत्यचोंकारमंत्रस्याद्यंतयो
स्तथा । तत्रैवहारीतः—प्रणवोव्याहृतयःसावित्रीचेति । अन्वयथासम्प्रदायव्यवस्थेतिपृथ्वीचंद्रः । स्मृतिरत्नावल्यांतु—तत्रैकप्रण
वाग्राह्यागृहस्थैर्जपकर्मणि । गृहस्थवच्चजप्तव्यासाचवैब्रह्मचारिभिः । सपुटाचपडोंकाराभवेत्सातूर्ध्वरेतसामितिव्यवस्थेत्युक्तम् । ऊर्ध्वरेतसोनै
ष्ठिकाब्रह्मचारिणश्च । वनस्थायतयः । मोक्षार्थिनंप्रत्याहवृद्धपराशरः—योनचाठतिसतानंमोक्षमिच्छतिकेवलम् । अंत्योंकारमसौकुर्व
न्नक्षरंपदमाप्नुयात् । योगयाज्ञवल्क्यस्तु—प्रणवव्याहृतीसार्धंस्वाहांतोहोमकर्मणि । प्रतिलोमाप्रकर्तव्याफट्कारांताभिचारकेइत्याह ॥ ॥
अथजपस्थानानि । याज्ञवल्क्यः—अग्न्यगारेजलांतेवाजपेद्देवालयेपिवा । पुण्यतीर्थेगवांगोष्ठेसिद्धक्षेत्रेथवागृहे । शंखः—गृहेत्वे
कगुणंजप्यनद्यादौद्विगुणंमतम् । गवांगोष्ठेशतगुणमग्न्यगारेशताधिकम् । सिद्धक्षेत्रेपुतीर्थेपुदेवतायाश्चसंनिधौ । सहस्रशतकोटीनामनंतंवि
ष्णुसंनिधौ । कौर्मे—गुह्यकाराक्षसा.सिद्धाहरंतिप्रसभयतः । एकांतेतुशुभेदेशेतस्माज्जप्यंसदाचरेत् । पारिजातेमंत्र्याकल्पे—प्रात
र्नाभौकरौकृत्वामध्याह्नेहृदिसंस्थितौ । सायंजपस्तुनासाग्रेत्रिसंध्यजपलक्षणम् । योगयाज्ञवल्क्यः—तिष्ठन्यदाजपंकुर्याद्धस्तोहृदयस
मितः । आसीनजपएवस्याज्जानुमात्रेणसमितः । विशेषांतरमाहसएव—जपस्येहविधिंवक्ष्येयथाशक्तिसमासतः । नचक्रमन्नविहसन्न
पार्श्वमवलोकयन् । नापाश्रितोनजल्पंश्चनप्रावृतशिरास्तथा । पादेनपादमाक्रम्यनचैवहितथाकरौ । नैवंविधजपंकुर्यान्नचसंश्रावयेज्जपम् ।
उष्णीषीकंचुकीनग्नोमुक्तकेशोगलावृतः । अपवित्रकरोऽशुद्धःप्रलपन्नजपेत्क्वचित् । क्रोधोमदःक्षुधातंद्रानिष्ठीवनविजृंभणे । श्वनीचदर्शनं
निद्राप्रलापश्चजपद्विपः । एतेषांसंभवेवापिकुर्यात्सूर्यादिदर्शनम् । आचम्यवाजपेच्छेषंकृत्वावाप्राणसंयमम् । चंद्रोदयेसांबपुराणे—
जपंकुर्वन्यदिष्ठीवेत्क्षुवतेजृंभतेपिवा । आचामेद्धुविन्यस्ताक्ष.स्पृशेदम्भोथगोमयम् । योगयाज्ञवल्क्यः—प्रसार्यपादौनजपेत्कुक्कुटासनए

वच । गतासनःशयानोवारथ्यायांशूद्रसंनिधौ । रिक्तभूम्यांचखट्वायांनजपेज्जापकःस्वयम् । आसनस्थोजपेत्सम्यङ्मंत्रार्थगतमानसः । ध्याये न्मनसामंत्रंजिह्वोष्ठौचनचालयेत् । नकंपयेच्छिरोग्रीवांदंतान्नैवप्रकाशयेत् । **वृद्धमनुः**—वस्त्रेणाच्छाद्यस्वकरंदक्षिणंयःसदाजपेत् । तस्यत त्सफलंजप्यंतद्धीनंनिष्फलंस्मृतम् । **योगयाज्ञवल्क्यः**—तूष्णीमासीतचजपंश्चंडालपतितादिकान् । दृष्ट्वातान्वार्युपस्पृश्याभाष्यस्नात्वा विशुद्ध्यति । **शांतिहेमाद्रौ**—जपकालेयदापश्येदशुचिंमंत्रवित्तमः । प्राणायामस्तदाकार्यस्ततःशेषंसमाचरेत् । यदाचैषभवेन्मंत्रीस्वयम प्यशुचिःपुनः । आचांतःप्रयतोभूत्वान्यासंपूर्ववदाचरेत् । अशुचिर्मूत्रोत्सर्गादिनाऽस्पृश्यस्पर्शादिनावेत्यर्थः । **गोभिलः**—कदाचिदपिनोवि द्वान्गायत्रीमुदकेजपेत् । गायत्र्यग्निमुखाप्रोक्तातस्मादुत्थायतांजपेत् । उत्थायजलान्निर्गत्य । **सएव**—अभावादन्यवस्त्रस्यसंध्यार्चातर्पणा दिकम् । जलमध्येजपोल्पोऽपिसावित्र्याःक्वापिसर्वशः । [अपिशब्दोऽत्रतुशब्दार्थे] । **कौर्मे**—यदिस्यात्क्लिन्नवासावैवारिमध्यगतोजपेत् । अ न्यथातुशुचौभूम्यांदर्भेषुचसमाहितः ॥

अथजपभेदाः । बृहन्नारदीये—मंत्रस्योच्चारणंसम्यक्स्फुटाक्षरपदंयथा । जपस्तुवाचिकःप्रोक्तःसर्वयज्ञफलप्रदः । मंत्रस्योच्चारणंकिंचि त्पदात्पदविवेचनम् । जपस्तुकथितोपांशुःपूर्वस्माद्द्विगुणाधिकः । धियायदक्षरश्रेण्यास्तत्तदर्थविचारणम् । मानसस्तुजपःप्रोक्तोयोगसिद्धि प्रदायकः । वाचिकउच्चैर्जपः । **विष्णुधर्मोत्तरे**—त्रयाणांजपयज्ञानांश्रेयःस्यादुत्तरोत्तरम् । **यत्तुशंखः**—नोच्चैर्जपंबुधःकुर्यात्सावित्र्या श्चविशेषतइति । तन्मानसादिजपप्रशंसार्थ नतूच्चैस्त्वनिषेधार्थमितिचंद्रिका । अल्पफलपरमितिपृथ्वीचंद्रः । अन्यश्रवणनिषेधार्थमि तितुयुक्तम् । **मनुः**—विधियज्ञाज्जपयज्ञोविशिष्टोदशभिर्गुणैः । उपांशुःस्याच्छतगुणःसाहस्रोमानसःस्मृतः । **वसिष्ठः**—मानसःशांतिको जप्यउपांशुःपौष्टिकःस्मृतः । सशब्दश्चाभिचारोयंत्रिविधोजपउच्यते । **व्यासः**—शतंजप्तातुसादेवीपापोपशमनीस्मृता । सहस्रजप्तासादेवी

उपपातकनाशिनी । लक्षजाप्येनचतथामहापातकनाशिनी । कोटिजाप्येनराजेंद्रयदिच्छतितदाप्नुयात् । **मनुः**—सहस्रकृत्वस्त्वभ्यस्यबहि रेतत्रिकंद्विजः । महतोप्येनसोमासात्त्वचेवाहिर्विमुच्यते । त्रिकं प्रणवोव्याहृतित्रयंगायत्रीच । **व्यासः**—अष्टोत्तरशतंनित्यमष्टाविंशति मेववा । विधिनादशकंवापित्रिकालेपुजपेद्बुधः । **यमस्मृतौनारसिंहेच**—सहस्रपरमांदेवींशतमध्यांदशावराम् । गायत्रींतुजपेन्नित्यंसर्व पापप्रणाशिनीम् । **याज्ञवल्क्यः**—जपन्नासीतसावित्रींप्रत्यगातारकोदयात् । संध्याप्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनात् । प्रत्यक्प्रत्यङ्मुखः । प्राक्प्राङ्मुखः । अत्रोदयोत्तरंकालांतरेसायंसंध्यावंदनेपिउत्तरावधौविधेयेनासनप्रत्यङ्मुखत्वयोर्बाधः एवप्रातरपि । अबाधेनगतौसंभवत्यांवा धायोग्यत्वात् । **मनुः**—पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् । पश्चिमांतुसमासीनःसम्यगृक्षविभावनात् । दशेत्यापत्परमितिचं**द्रिका** । संभवापेक्षयाविकल्पइतिदे**वजानीये** । सूर्योदयनक्षत्रावधिर्जपःकाम्यः । कामनाभावेविहितदशादिसंख्याग्रहइत्या**चारादर्शः** । तन्न कामाश्रुतेः । आपद्यष्टसंख्येतिस्मृ**त्यर्थसारे** । **आपस्तंबः**—सावित्रीसहस्रकृत्वआवर्तयेच्छतकृत्वअपरिमितकृत्वोवेति । अपरिमितेत्य नेनगणनानिराक्रियते ।—असंख्यातंतुयज्जप्तंतज्जप्तंनिष्फलंभवेदितिशं**खोक्तेः** । किंतु सहस्रादिभ्योऽधिकसंख्याग्रहणंपाठन्यायादितिके चित् । युक्तंत्वत्राष्टाविंशत्यादिन्यूनग्रहणमेव । सहस्रकृत्वइत्युक्त्वाशतकृत्वइतिन्यूनप्रक्रमात् । पाठेतुएकादेयातिस्रोदेयाइत्यधिकोपक्रमाद्वै लक्षण्यमिति । **चंद्रिकायांयोगयाज्ञवल्क्यः**—ब्रह्मचार्याहिताग्निश्चशतमष्टोत्तरंजपेत् । वानप्रस्थोयतिश्चैवसहस्रादधिकंजपेत् । शत मित्यनुदितहोमिपरमितिचं**द्रिका** ॥

जपमालाविचारः । **माधवीयेशंखः**—कुशवृस्यांसमासीनःकुशोत्तरीयोवाकुशपवित्रपाणिःसूर्याभिमुखोवाक्षमालामादायदेवतां ध्यायन्जपंकुर्यादिति । **स्कांदे**—सौवर्णराजतंताम्रंस्फाटिकंरत्नजंतथा । अरिष्टपुत्रजीवं(?)चशंखंपद्मंतथामणिम् । कुशग्रंथिचरुद्राक्षमुत्तमंचो

त्तरोत्तरम् । **सांबपुराणे**—प्रवालहेममुक्ताभिर्मणिरुद्राक्षपुष्करैः । दर्भारिष्टकबीजैश्चशंखैर्वाजीवकैर्जपेत् । **रामार्चनचंद्रिकायाम्**—तुलसीकाष्ठघटितैर्मणिभिर्जपमालिका । सर्वकर्मसुसर्वेषामीप्सितार्थफलप्रदा । **हारीतः**—स्फटिकेंद्राक्षकैर्मालातथैवांगुलिपर्वभिः । शंखरूप्यमयीमालाकांचनीनिचजोत्पलैः । पद्माक्षकैश्चरुद्राक्षैर्विद्रुमैर्मणिमौक्तिकैः । **गौतमः**—अंगुल्याजपसंख्यानमेकमेकमुदाहृतम् । रेखयाष्टगुणंपुत्रजीवै(?)र्दशगुणाधिकम् । शतंस्याच्छंखमणिभिःप्रवालैश्चसहस्रकम् । स्फटिकैर्दशसाहस्रमौक्तिकैर्लक्षमुच्यते । पद्माक्षैर्दशलक्षंतुसौवर्णैःकोटिरुच्यते । रुद्राक्षमधिकृत्योमासंवादे**ब्राह्मे** ।—लक्षकोटिसहस्राणिलक्षकोटिशतानिच । जपेतुलभतेपुण्यंनात्रकार्याविचारणा । शिवकार्तिकेयसंवादे**लैंगे**—सर्वमंत्रजपंकुर्याद्द्विजोरुद्राक्षमालया । **ब्राह्मे**—सशब्दाचंचलायाचत्रुटिताग्रथिनाविना । भिन्नसूत्रेणग्रथितापाखंडस्यपुरातनी । मालादुःखप्रदायिन्योग्रथितानियतंतुभिः । **वाराहे**—उत्तमाष्टाधिकशतंचतुःपंचाशन्मध्यमा । कनीयसीतदर्धंचपरिमाणेनसुंदरि । नोच्छिष्टःसंस्पृशेत्तांतुस्त्रीणांहस्तेनधारयेत् । आकाशेस्थापनकुर्यान्नचवामेनसंस्पृशेत् । नदर्शयेच्चकस्यापिचिंतयित्वाचगोपयेत्॥ ॥**मालासंस्कारविधिः । मंत्रदेवप्रकाशिकायाम्**—समासेनाक्षसूत्रस्यविधानमिहकथ्यते । पंचविंशतिभिर्मोक्षस्त्रिंशद्भिर्धनसिद्धयः । सर्वेऽर्थाःसप्तविंशत्यापंचदश्याभिचारकम् । पंचाशद्भिःकाम्यकर्मसिद्धिःस्याच्चतुरुत्तरैः । अष्टोत्तरशतैःसर्वसिद्धिरक्षैःकृतस्रजः । अन्योन्यसमरूपाणिनातिस्थूलाकृतीनिच । जंतुभिर्नविशीर्णानिनजीर्णानिनवानिच । गव्यैस्तुपंचभिस्तानिसंप्रक्षाल्यपृथक्पृथक् । ततोद्विजेंद्रपुण्यस्त्रीनिर्मितंग्रंथिवर्जितम् । त्रिगुणंत्रिगुणीकृत्यसूत्रंप्रक्षाल्यपूर्ववत् । अश्वत्थपत्रैर्नवभिःपद्माकारंप्रकल्पयेत् । सूत्रमणींश्चगंधाद्भिःक्षालितांस्तत्रनिक्षिपेत् । तारंशक्तिंमातृकांचसूत्रेचैवमणिष्वथ । विन्यस्यपूजयेदाज्यैर्जुहुयाद्भक्तिसंयुतः । मणिमेकैकमादायसूत्रेतत्रतुयोजयेत् । मुखेमुखंतुसंयोज्यंपृष्ठेपृष्ठंचयोजयेत् । प्रोक्तसंख्यान्यमेकाक्षंमेरुत्वेनाग्रतोन्यसेत् । एकैकमणिमध्येतुग्रंथिबंधंप्रकल्पयेत् । स्वयंग्रथितमालातुश

कस्यापिश्रियंहरेत् । एवंकृताक्षमालायांज्येष्ठेनावर्तयेत्क्रमात् । भुक्तिमुक्तिप्रदःसोयमालिकागणनक्रमः । अंगुष्ठेनाक्षमालांचचालयेन्मध्य
माग्रतः । तर्जन्यानस्पृशेत्सोयमुक्तिदोगणनक्रमः । अंगुष्ठमध्यमाभ्यांतुजपेदुत्तमकर्मणि । अगुष्ठानामिकाभ्यांतुजपेदाकृष्टकर्मणि । तर्जन्य
गुष्ठयोगात्तुद्विपदुच्चाटनेजपः । कनिष्ठांगुष्ठकाभ्यांतुजपेन्मारणकर्मणि। जपान्यकालेतांमालांपूजयित्वातुगोपयेत् । जीर्णेसूत्रेपुनःसूत्रंग्रंथयित्वाशत
जपेत् । प्रमादात्पतितेहस्ताच्छतमष्टोत्तरजपेत् । जपेन्निषिद्धसस्पर्शेक्षालयित्वायथोचितम् । अक्षसूत्रतुनिपतेन्मौचेत्कुर्वतोजपम् । उद्धारं
तस्यकुर्वीतजापकोहृदयेनतु । हृदयमघोरायनमइतिमंत्रः । **योगयाज्ञवल्क्यः**—अंगुष्ठस्यतुमध्यस्थंपरिवर्तंसमाचरेत् । परिवर्तोभ्रमणम् ।
अगुष्ठाग्रेणयज्ञस्यज्ञसमेरुलंघितम् । असंख्याततुयज्जप्तंजप्तनिष्फलंभवेत् । **स्मृतिरत्नावल्याम्**—पर्वभिस्तुजपःकार्योनांगुलीनानिपा
तनैः । तन्निपातैस्तुयज्जप्तसर्वंविद्यात्तदासुरम् । अगुलीनामगुष्ठनिपातंगुलिनिपेधोनेत्युक्तम् । **मंत्रदेवप्रकाशिकायाम्**—तत्रागुलिजप
कुर्वन्सांगुष्ठांगुलिभिर्जपेत् । अगुष्ठेनविनाकर्मकृततदफलंभवेत् । **गौतमोपि**—अगुष्ठेनजपेज्जाप्यमन्यैरगुलिभिःसह । **अगस्त्यसं
हितायाम्**—मध्यमाद्यद्वयंपर्वजपकालेतुवर्जयेत् । एतमेरुविजानीयाद्रूपितंब्रह्मणापुरा । अस्मिन्पक्षेऽनामिकाद्वितीयपर्वप्रभृतिगणना तर्ज
न्यादिपर्वणिसमाप्तिः । पर्वशब्दोरेखावचनइतिकेचित् । अस्मिन्पक्षेऽनामामध्यरेखामादिंकृत्वातदधःक्रमेणप्रादक्षिण्येनतर्जन्यादिरेखायां
समाप्तिः । **विधानांतरंमंत्रदेवप्रकाशिकायाम्**—अगुलीपर्वभिर्मंत्रजपनित्यप्रकल्पयेत् । मध्यमानामिकामध्यपर्वद्वितयकल्पितम् ।
मेरुंप्रदक्षिणीकुर्वन्ननामामूलपर्वसु । आरभ्यमध्यमामूलपर्वांतगणयेत्क्रमात् । अगुलीर्नवियुजीतकिंचिदाकुंचितेतले । अगुलीनावियोगेतु
छिद्रेपुस्रवतेजपः । मालादेरनावश्यकतोक्ताबृद्धपराशरेण—यथाकथंचिद्गणयेत्ससंख्यतद्भवेद्यथा । **चंद्रोदयेसंग्रहे**—प्रातःसंध्यांग
भूतेनगायत्र्याजपितेनच । यथासंख्येनजाप्येनब्रह्मामेप्रीयतांरविः । मध्याह्नेसायंचब्रह्मपदेक्रमाद्रुद्रविष्णुपदे प्रातःपदेमध्याह्नसायंपदेचोह्ये ।

॥ ॥ **अथगायत्रीतर्पणम्** । **नागदेवाह्निकेप्रयोगपारिजातेच**—आचम्यप्राणानायम्यगायत्रीतर्पणंकरिष्यइतिसंकल्प्य तत्स वितुरितिसवितारमावाह्य गायत्रीषडंगेषुविन्यस्यभूःपुरुषमृग्वेदायनमस्तर्पयामि । भुवःपुरुषंयजुर्वेदायनमस्तर्पयामि । स्वःपुरुषंसामवेदायन मस्तर्पयामि । महःपुरुषमथर्ववेदायनमस्तर्पयामि । जनःपुरुषमितिहासपुराणेभ्योनमस्तर्पयामि । तपःपुरुषंसर्वागमायनमस्तर्पयामि । सत्यं सर्वलोकायनमस्तर्पयामि । भुर्भुवःस्वःपुरुषंमंडलांतर्गतंसवितारंतर्पयामि । सवित्रेइतिकेचित् । भूःएकपदांगायत्रीतर्पयामि । भुवःद्विपदांगा यत्रीतर्पयामि । स्वःत्रिपदांगायत्रींतर्पयामि । भूर्भुवःस्वःचतुष्पदांगायत्रींतर्पयामि । उपसेनमस्तर्पयामि । गायत्रीनमस्तर्पयामि । सावित्री नमस्तर्पयामि । सरस्वतीनमस्तर्पयामि । वेदमातरंनमस्तर्पयामि । सत्कृतिंनमस्तर्पयामि । सांकृतिमित्यपरे । पृथिवींनमस्तर्पयामि । कौ शिकीनमस्तर्पयामि । जयांनमस्तर्पयामि । अपराजितांनमस्तर्पयामि । सहस्रमूर्तिंनमस्तर्पयामि । अनंतमूर्तिंनमस्तर्पयामीति । **कृष्णभट्टीये** प्येवम् । श्रीशक्त्यैनमस्तर्पयामीतिकृष्णभट्टः । तन्न । मंत्रैरेभिस्तुयोनित्यंचतुर्विंशतिसंमितैः । गायत्रीतर्पयेत्तेनतर्पितंस्याच्चराचरमिति **गायत्रीकल्पविरोधात्** । **तत्रैव**—अनेनविधिनाकुर्यात्प्रातःकालेचतर्पणम् । मध्याह्नेचैवसायंचमंत्रैरेतैश्चतर्पणम् ।

अथगायत्रीपुरश्चरणम् । तत्रकाम्येजपेभक्ष्यमुक्तम**आचारादर्शे**—शाकयावकभैक्ष्याणिपयोमूलफलानिच । दधिसर्पिस्तथाह्यापः प्रशस्तंह्युत्तरोत्तरम् । चरमोह्युपवासश्चभक्ष्यंतक्रमयाचितम् । विशश्रृंगाटशालूकहविष्यान्नानियानितु । एतान्यनुव्रतान्याहुःशस्तानिजपक र्मणि । शाकादिविकल्पेपिभक्ष्यविशेषेणजपारंभेएकादश्युपवासोपिनेतिह**रिहरः** । तन्न । अस्यरागप्राप्तभक्ष्यनियामकत्वेनोपवासाबाधक त्वात् । **शारदातिलके**—व्याहृतित्रयसंयुक्तांगायत्रीदीक्षितोजपेत् । तत्वलक्षविधानेनभिक्षाशीविजितेंद्रियः । तत्त्वानिचतुर्विंशतिः । क्षीरौदनतिलादूर्वाःक्षीरद्रुमसमिद्वराः । पृथक्सहस्रत्रितयंजुहुयान्मंत्रसिद्धये । तर्पणादिततःकृत्वागुरुंसंतोष्ययत्नतः । प्रयोगानाचरेद्विद्वांस्त

दनुज्ञापुरःसरम् । तपर्णादीत्यादिपदेमार्जनविप्रभोजनयोर्ग्रहः ॥ ॥ **अथप्रयोगः** ॥ योगपिठन्यासांतेशिरसिब्रह्मणेऋषयेनमः । मुखेदेवी गायत्रीछंदसेनमः । हृदयेश्रीपरमात्मनेदेवतायैनमः । पुनःशिरसिजमदग्निभरद्वाजभृगुगौतमकश्यपविश्वामित्रवसिष्ठेभ्योऋषिभ्योनमः । मुखे गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीभ्यश्छंदोभ्योनमः । हृदयेअग्निवायुसूर्यगुरुवरुणवृपविश्वेभ्योदेवोभ्योनमः । ततोमहाव्याहृतिभिः प्राणायामत्रयंकृत्वा शिरसिविश्वामित्रायऋषयेनमः । मुखेगायत्रीछंदसेनमः । हृदिसवित्रेदेवतायैनमः ॐब्रह्मणेहृदयायनमः । विष्णवेशिः रसेस्वाहा । रुद्रायशिखायैवषट् । ईश्वरायकवचायहुम् । सदाशिवायनेत्रत्रयायवौषट् । सर्वात्मनेऽस्त्रायफट् इतिषडंगविधाय हृदिॐभूर्नम मुखे । एवं सर्वत्र । भुवःदक्षिणांसे । स्वःवामांसे । महःदक्षोरौ । जनःवामे । तपः जठरे । सत्यं पादांगुलिमूलयोः । तत् गुल्फयोः । सः जानुनोः । विऊरुमूले । तुःलिंगे । वं नाभौ । वेंहृदि । णिंकंठे । यं करांगुलिमूलयोः । भंमणिबंधयोः । गोंकूर्परयोः । देंभुजमूलयोः । वं मुखे । स्यनासिकयोः । धीकपोलयोः । मंनेत्रयोः । हिकर्णयोः । धिभ्रुवोः । योंशिरसि । योंचूडाधः । नःवामकर्णे । (प्र) दक्षिणकर्णे । चो मुखे । दं शिरसि । यात्नमःशिरसि ॥ तत् भ्रूमध्ये । सवितुःनेत्रयोः । वरेण्यंमुखे । भर्गःकठे । देवस्यहृदि । धीमहिनाभौ । धियःगुह्ये । यःजानुनोः । नःपादयोः । प्रचोदयात् पुनःशिरसि । ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोंनमइतिविन्यस्यध्यायेत् । **गायत्रीरहस्ये**— पंचवक्त्रांचतुर्बाहुंप्रतिवक्त्रंत्रिलोचनाम् । जटाकिरीटांपट्कुक्षित्रिपदांस्फटिकप्रभाम् । साक्षसूत्राभयांकुशौदधतीदक्षहस्तयोः । सवारिजपत्रव रदांलगुडंवामहस्तयोः । आत्मपूजांतेसौरपीठमभ्यर्च्य तत्रमंत्रमूर्तिंगायत्र्याःपरिकल्प्य तस्यांदेवीमावाह्य पुष्पांतैरुपचारैःसंपूज्य त्रिकोण स्थाग्नेयकोणादिप्रादक्षिण्येनकोणत्रयेॐब्राह्म्यैनमः । माहेश्वर्यैनमः । वैष्णव्यैनमः इतिसंपूज्य कर्णिकायामेवत्रिकोणाद्बहिर्ह्रैंब्र्यादिचतुर्दिक्षु

---

१ अत्र विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपाइतिक्रमोयुक्तइतिभाति ।

ॐआदित्यायनमः । रवयेनमः । भानवेनमः । भास्करायनमः । आग्नेयादिचतुष्कोणेषुउंउमायैनमः। प्रप्रज्ञायैनमः । प्रंप्रभायैनमः । संस ध्यायैनवः । अष्टदलकेसरेषुअंगानिसंपूज्य दलेषु प्रह्लादिन्यैनमः । प्रभायैनमः नित्यायैनमः विश्वंभरायै० विशालिन्यै० प्रभावत्यै० जयायै० शांत्यै० दलाग्रेषुकांत्यै० दुर्गायै० सरस्वत्यै० विश्वरूपायै० विशालायै० ईशायै० व्यापिन्यै० विमलायै० । द्वितीयाष्टदलमूलेषुतमोपहारिण्यै० । सूक्ष्मायै० विश्वयोन्यै० जयावहायै० पद्मालयायै० परायै० शोभायै० पद्मरूपायै० । दलमध्येषुब्राह्मयाद्याःनारसिहीचाष्टमी ब्राह्मयै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० चामुंडायै० नारसिंह्यै० इति । दलाग्रेषुसोमाद्यष्टग्रहान्।सोमाय० भौमाय० बुधाय०वृहस्पतये०शुक्राय शनैश्वराय० राहवे० केतवे० इति सर्वान्संपूज्य चतुरस्रवीथीद्वयेइंद्रादीन्वज्रादींश्वइंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय०वायवे० सोमाय० ईश्वराय० इति । वज्राय० शक्तये० दंडाय० खड्गाय० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० इति संपूज्यधूपादिपूजांसमाप्यजपंकृत्वा जपदशांशेनप्रत्यहसर्वजपांतेवाहोमंकुर्यात् । अत्रमूलं**गायत्रीरहस्ये**ज्ञेयम् । इतिगायत्रीपुरश्वरणविधिः ॥

उपस्थानम् । गायत्रीजपोत्तरंकर्तव्यमुक्तंकौर्मगारुडयोः—सावित्रींप्रजपेद्विद्वान्प्राङ्मुखःप्रयतःशुचिः । अथोपतिष्ठेदादित्यमुदयंतंसमाहितः । **वसिष्ठः**—शास्त्रैस्तुविविधैःसौरैर्ऋग्यजुःसामसंभवैः । उपस्थानंस्वकैर्मंत्रैरादित्यस्यतुकारयेत् । **बह्वृचपरिशिष्टे**—जातवेदसेतच्छंयोरितिनमोब्रह्मणइत्येताभिःप्रदक्षिणंदिशःसाधिपान्नत्वाथसंध्यायैसावित्र्यैगायत्र्यैसरस्वत्यैसर्वाभ्योदेवताभ्यश्चनमस्कृत्य । उत्तमेशिखरेदेविभूम्यांपर्वतमूर्धनि । ब्राह्मणैरभ्यनुज्ञातागच्छदेवियथासुखमितिसंध्यांविसृज्य भद्रनोअपिवातयमनइत्युक्त्वाशांतिंचत्रिरुच्चार्यप्रदक्षिणंपरिक्रमंन् । आसत्यलोकादापातालादालोकालोकपर्वतात् । येसंतिब्राह्मणादेवास्तेभ्योनित्यंनमोनमःइतिनमस्कृत्य भूमिमुपसंगृह्य

गुरून्वृद्धांश्चोपगृह्णीयादेवंसायमिति । पर्वतवासिनि । ब्रह्मणासमनुज्ञातेतिदेवजानीयेपाठः । **आश्वलायनः**—जप्त्वोदितेसमुत्तिष्ठन्नुपतिष्ठेद्दिवाकरम् । ऋग्भिश्चतसृभिर्मंत्रैर्गायत्रैरेवबह्वृचः । उपस्थायेतरस्त्वीयैर्मंत्रैःकुर्यात्प्रदक्षिणम् । चतुःप्रदक्षिणंकुर्याज्जपदोषापनुत्तये । तस्माद्दूरिदमित्युक्त्वाकुर्यात्पूर्वंप्रदक्षिणम् । भुवःस्वर्भूर्भुवःस्वेतिचतुर्वारंपृथक्पृथक् । ततःशक्रादिकान्नत्वापूर्ववाथप्रदक्षिणात् । तत्तन्मंत्रैरुपस्थाय स्पृष्ट्वाभूमिनमेद्गुरून् । ततोऽभिवादयेद्भूमौपित्रादिभ्यःसुसंयतः । कीर्तितेभ्योयथान्यायंस्वकीयनामकीर्तयन् । **शौनकः**—सायंप्रातरुपस्थायजातवेदसइत्यृचा । तच्छंयोर्नमोब्रह्मणइत्युच्चार्यदिशोनमेत् । इमंमेवरुणतत्त्वेतिसायकालेविशेषतः । मित्रस्यचर्षणीद्वाभ्यांप्रातःकालेपि संजपेत् । पिशंगभृष्टिमित्यृचामुखस्पृश्यप्रदक्षिणम् । भद्रकर्णेतिमंत्रेणकर्णस्पृष्ट्वाप्रदक्षिणम् । केश्यग्निमित्यृचैकयाशिखांस्पृष्ट्वाप्रदक्षिणम् । संध्यांगायत्रीसावित्रीसर्वान्देवान्प्रणम्यच । **स्मृत्यर्थसारे**—यद्वोभयत्रजातवेदसेनवैष्णवैरौद्रैर्वोपतिष्ठेतेति **नारायणः** । वारुणीभिस्तथादित्यमुपस्थायप्रदक्षिणम् । कुर्वन्दिशोनमस्कुर्याद्दिगीशांश्चपृथक्पृथक् । प्रदक्षिणाभिवादौचआत्मानंचाभिवादयेत् । आत्मपादौतथाभूमिसंध्याकालेभिवादयेत् । वारुण्यःसायंसंध्यापराइतिचंद्रिका । **तत्रैवबौधायनः** सायजपांतेरात्र्युपस्थानमाह—वारुणीभ्यांरात्रिमुपतिष्ठेत इमंमेवरुणतत्त्वायामीतिद्वाभ्यां । दिगभिवादनेप्राच्यैदिशेइंद्रायनमः दक्षिणायैदिशेयमायनमइत्यादिप्रयोगइतिकेचित् । अन्येतु प्राच्यैदिशेयाश्च देवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमइत्यादितैत्तिरीयारण्यकमंत्रैरित्याहुः ॥

अभिवादनम् । **यमः**—ज्यायानपिकनीयांसंसंध्याकालेऽभिवादयेत् । विनाशिष्यंचपुत्रंचदौहित्रंदुहितुःपतिम् । **सुदर्शनभाष्ये**—रोरेमघृज्येचिषुवृद्धिरादौठात्पेचवांत्यश्रवशाश्वयुक्षु । शेषेपुनाम्वोःकपरःस्वरोंत्यःस्वाप्वोरदीर्घःसविसर्गइष्टः । **अस्यार्थः**—रोहिणीरेवतीमघामृगज्येष्ठाचित्रासुरौहिणोरैवतइतिआदिवृद्धिर्वा । नक्षत्रेभ्योबहुलमितिनक्षत्राणांवालुगुक्तेः । ठात्पेप्रोष्ठपदशब्देठकारात्परेपकारेवृद्धिः । उत्तरपदा

धिकारे जेप्रोष्ठपदानामित्युक्तेः । अंत्यमपभरणी शब्दश्रुतौतथोक्ते[1] । श्रवणशतभिषक्अश्वयुक्षुवाआदिवृद्धिः । अपभरणः आपभरणः श्रवणः श्रावणः शतभिषक् शातभिषजः अश्वयुक् आश्वयुजः । भरणीशब्देपिवा । नक्षत्रेभ्योबहुलम् वत्सशालेतिचवालुगुक्तेः । शेषेषुन वृद्धिर्नैत्यर्थः । कृत्तिकः तिष्यः आश्लेषः फल्गुनः हस्तः विशाखः अनूराधः अषाढः श्रविष्ठः । श्रविष्ठेत्यादिनानित्यंलुगुक्तेः । आर्म्वोरार्द्रामूलयोरंत्य.स्वरः कपरः । आर्द्रकः मूलकः पूर्वाह्णापराह्णेत्यादिनावुन् । स्वाप्वोःस्वातीपुनर्वस्वोरंत्यःस्वरोदीर्घःसविसर्गश्च । स्वातिः पुनर्वसुः । एषांनाम्नांसंध्याभिवादने प्रथमयानिर्देशइति**सुदर्शनाचार्यः** । अभिजित् आभिजितः कृत्तिकः कार्तिक इतितुयुक्तम् । धनिष्ठेत्यत्रापिवादिवृद्धिः श्राविष्ठीयःआषाढीयइत्यपिबहुलोक्तेः । तत्तन्नक्षत्रचरणाक्षरघटितंनामपठंतिशिष्टाः । **नागदेवाह्निके**—भोःशब्दंकीर्तयेदंतेस्वस्यनाम्नोभिवादने । आयुष्मान्भवसौम्येतिवाच्योविप्रोऽभिवादने । अकारश्चास्यनाम्नोंऽतेवाच्यःपूर्वोत्तरःप्लुतः । तदुत्तरकृत्यमाह**वृद्धपराशरः**—यदक्षरपदभ्रष्टंमात्राहीनंचयद्भवेत् । तत्सर्वंक्षम्यतांदेविकाश्यपप्रियवादिनि । **पुष्पसारसुधानिधौ**—प्रातःसंध्यावसानेतुनित्यंसूर्यंसमर्चयेत् । संध्याकालातिक्रमेप्रायश्चित्तं**कर्मप्रदीपे**—प्रातःसंध्यांसनक्षत्रांनोपास्तेयःप्रमादतः । गायत्र्यष्टशतंतस्यप्रायश्चित्तंविशुद्धये । प्रातःकालांतरोपलक्षणमितिपृथ्वीचंद्रः । **दक्षः**—संध्यामकुर्वतःकालेउदयेस्तमयेपिवा । गायत्र्यष्टशतंजाप्यंप्रायश्चित्तंभवेत्तदा । चतुरर्घ्यंतुगायत्र्यादद्याद्व्याहृतिसंयुतम् । कालातीतविशुद्ध्यर्थंततःसंध्यांसमाचरेत् । **स्कांदे**—उदयास्तमयादूर्ध्वंयावत्स्याद्घटिकात्रयम् । तावत्संध्यामुपासीतप्रायश्चित्तमतःपरम् । **संध्याकल्पेस्मृत्यंतरे**—प्राणायामत्रयंप्रातर्द्विगुणंसंगवेस्मृतम् । मध्याह्नेत्रिगुणंप्रोक्तमपराह्णेतुषड्गुणम् । सायाह्नेद्वादशगुणंसूर्यहत्यांततोव्रजेत् । प्रातरादिष्वकरणइत्यर्थः । **शातातपः**—निश्यर्धयामेवातीतेअर्धयामेपिवासरे । अतिकालमतिक्रांतेसंध्यालोपंनकारयेत् । संध्याकाले

---

1 शब्दश्रुतौ लगधज्योतिषे अग्नि प्रजापतिरित्यारभ्यअश्विनौयमएवचेतिक्रमेणात्यमपभरणी ।

व्यतिक्रांतेजपंकृत्वापुनर्मनः । ऋचंव्यृचंतृचंवापिपुनःसंध्यामुपासयेत् । पुनस्त्वर्थे । इदंचरात्रिप्रथमयामावधि दिवोदितानीत्याद्युक्तवचनात् । तदूर्ध्वप्रायश्चित्तमात्रम् । यदाप्रातर्मध्याह्नसायसंध्यानामेककालेप्राप्तिस्तदाप्रातःसंध्यांपूर्वंकुर्यात् । संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु । यदन्यत्कुरुतेकर्मनतस्यफलभाग्भवेदितिकाशीखंडे प्रातःसंध्याप्रकरणेपाठात्प्रातःसंध्यांविनाकर्मांतरेऽनधिकारात् । विज्ञानेश्वरस्तुसंध्यापदसर्वसध्यापरमित्याह । मध्याह्नसायंसंध्ययोःसंपातेपूर्वंसायसंध्या मध्याह्नसंध्यायाःसायसंध्याधिकारसंपादकत्वाभावात् । प्राप्तकालबाधेमानाभावात् एकस्यगौणकालत्वेसभवत्युभयोर्गौणकालत्वस्यान्याय्यत्वाच्च पांचमिकसांतपनीयांतःपात्यग्निहोत्रन्यायाच्च सहालंभेसवनीयोपाकरणन्यायाच्च । **यत्तुस्मृत्यंतरे**—दिवोदितानिकर्माणिप्रमादादकृतानिवै । शर्वर्याःप्रथमेयामेतानिकुर्याद्यथाक्रममिति तत्सायंसंध्यामुख्यकालातिक्रमेज्ञेयम् । अतएवसायंसंध्यामुख्यकालातिक्रमेतिसृणामपिगौणेकालेक्रमेणैवानुष्ठानम् । सायंसंध्यागौणकालस्तुरात्रौसार्धप्रहरावधिः । रात्रिभोजनस्यसार्धप्रहरकालोक्त्यासंध्याभावेभोजनासंभवात् प्रदोषावसानेसायंसायंसंध्यायागौणकालइतिमाधवीयेदेवजानीयेच । संध्याप्रकरणेप्रायश्चित्तपरिभाषायामुक्तंतत्प्रतिनिधिनापिकार्यमित्युक्तम् । इतिश्रीमद्रामेश्वरभट्टसूनु०लक्ष्मणभट्टकृताचाररत्नेसंध्याप्रकरणम् ॥

अथौपासनहोमः । **हेमाद्रौ शाट्यायनिः**—ततःसूर्यमुपस्थायसम्यगाचम्यचस्वयम् । अभ्युक्षणंसमादायसंयतात्मागृहंव्रजेत् । **तत्रैवगार्ग्यः**—त्रिसंध्यांवाग्यतोवारिगुप्तमाहृत्यशोधयेत् । होमोपहारभूगेहद्रव्यात्मपरिचारकान् । **चंद्रिकायांप्रचेताः**—अभ्युक्षणोदपात्रंतुनतावत्स्थाप्यतेक्वचित् । यावन्नाचमनदत्तप्रोक्षितानगलंतिका । असमर्थंप्रत्याह**शांख्यायनिः**—नद्यादौसम्यगाचांतःसंयतोगृहमागतः । उद्धृत्यमणिकात्तोयंतेनप्रोक्षणमाचरेत् । गृहेवासमुपस्पृश्यकृत्वास्वर्णकुशोदकम् । कृत्वाचमनमाचांतःपुनःप्रोक्षणमाचरेत् । **चंद्रिकायांगोभिलसूत्रे**—पुराप्रादुष्करणवेलायाःसायप्रातरपआहरेदनुगुप्तादपिवाकुंभाद्वामणिकाद्वागृह्णीयादिति । **तत्रैवशाट्यायनिः**—अब्जंहिरण्म

यंरौप्यंदारवंमृण्मयंदृढम् । ताम्रंपत्रपुटंपुण्यंपात्रमभ्युक्षणायवै । अभ्युक्षणकरणव्युत्पत्त्याजलं । पत्रपुटमन्यालाभपरम् । सर्वालाभेतुपात्राणांपर्णपा त्रंविधीयतइत्या**पस्तंबोक्तेः** । **आपस्तंबः**—शैवालवालुकादूर्वातृणपर्णायसैरपि । नालिकाभिन्नपात्रेणकांस्यपात्रेणचैवहि । प्राण्यगफलजे नापिकुर्यान्नाभ्युक्षणद्विजः । **शाट्यायनिः**—नाहरेदेकपात्रस्तुनाव्रतोनचकन्यका । एकपात्रःपिधानरहितपात्रः । **ततोग्निप्रादुष्करणंका त्यायनः**—सूर्येस्तशैलमप्राप्तेषड्विंशद्भिःसदांगुलैः । प्रादुष्करणमग्नीनांप्रातर्भासांचदर्शनात् ॥

अथहोमः । तत्रशक्तेनार्धाधानंकृत्वाश्रौतःस्मार्तश्चहोमःकार्यः । श्रौतंस्मार्तंचयत्किंचिद्विधानंसर्वमादरात् । गृहेनिवसताकार्यमन्यदादो पमृच्छतीति**मनूक्तेः** । तत्राशक्तःसर्वाधानंकृत्वाश्रौतमेवयावज्जीवंजुहुयात् यावज्जीवश्रुतेः । [एतेनैकादश्यांतमकुर्वतःपरास्ताः । अकरणे प्रत्यवायश्रुतेः अहरहरितिवक्ष्यमाणा**पस्तंबोक्तेश्च**, होमकालातिक्रमेहोमलोपेचप्रायश्चित्तोक्तेश्च, कर्मस्मार्तंविवाहाग्नौकुर्वीतप्रत्यहंगृहीति **याज्ञवल्क्योक्तेश्च**, अग्निहोत्रंयजुहुयादाद्यंतेद्युनिशोःसदेति**मनूक्तेः**, अथतत्रैववसतिहोमकालव्यतिक्रमः । लौकिकोऽग्निर्विधीयेतका ठकश्रुतिदर्शनादिति**चंद्रिकायांशौनकोक्तेः**, पक्षहोमैश्चतुर्दशचतुर्गृहीतानुपपत्तेश्च, सप्तशतानिविंशतिश्चसंवत्सरेसायमाहुतयोहूयंतेसप्तश तानिविंशतिश्चप्रातरित्यादिश्रुत्यनुपपत्तेश्च यत्किंचिदेतत्] । त्रीणिवर्षाणिविप्राइति**भारतात्** यावज्जीवाशक्तौवर्षत्रयंवाजुहुयात् । येचा ग्निहोत्रंजुह्वतिश्रद्दधानायथाम्नायमितिस्मृतेः । तत्राप्यशक्तःस्मार्तमेवजुहुयान्नत्वादध्यात् तत्राप्यशक्तःसदाचारमात्रंकुर्यान्नस्मार्तमपि । श्रौतं कर्मनचेच्छक्तःकर्तुंस्मार्तंसमाचरेत् । तत्राप्यशक्तःकरणेसदाचारंलभेद्बुधइति**चंद्रिकायांव्यासोक्तेः** । **कौर्मे**—अथागम्यगृहंविप्रः समा चम्ययथाविधि । प्रज्वाल्यवह्निंविधिवज्जुहुयाज्जातवेदसम् । तत्रश्रौतंस्मार्तंवाहोमंयजमानएवस्वयंकुर्यात् । अहरहर्यजमानःस्वयमग्निहोत्रंजु हुयात्पर्वणिवेत्या**पस्तंबोक्तेः** । अत्रपर्वणिस्वयमेवेतिनियमोनतुपर्वण्येवस्वयमिति । पाणिग्रहणादिगृह्यंपरिचरेत्स्वयंपत्न्यपिवापुत्रःकुमार्यंतेवा

सीवेत्याश्वलायनोक्तेः । स्वस्याशक्तौमाधवीयेचंद्रिकायांचशातातपः—श्रौतंयत्स्यात्स्वयंकुर्यादन्योपिस्मार्तमाचरेत् । अशक्तौश्रौतमप्यन्यःकुर्यादाचारमंततः । **चंद्रोदयेगारुडे**—ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोऽथविट्पतिः । एतैरेवहुतंयत्स्यात्तद्धुतंस्वयमेवतु । विट्पतिर्जामाता । **तत्रैवकौर्मे**—ऋत्विक्पुत्रोथवापत्नीशिष्योवापिसहोदरः । पत्नीस्मार्तएव । कामंगृह्येग्नौजुहुयात्सायंप्रातर्होमावितिगोभिलोक्तेः । **स्मृत्यर्थसारे**—पत्नीकन्याचजुहुयाद्विनापर्युक्षणक्रियाम् । अत्रऋत्विक्त्रिधा—प्रतिकर्मवृतः, परंपरागतः, एकस्यसर्वकर्मार्थंसकृद्वृतश्च । आद्ययोरेवहोमकर्तृत्वमितिवृत्तिकृत् ॥ ॥ **अन्यकर्तृकहोमेविशेषः । स्मृत्यर्थसारे**—असमक्षंतुदंपत्योर्होतव्यंनर्त्विगादिना । द्वयोरप्यसमक्षंचेद्भवेद्धुतमनर्थकम् । **कात्यायनः**—प्रक्षिप्याग्निंस्वदारेषुपरिकल्प्यर्त्विजंतथा । प्रवसेत्कार्यवान्विप्रोवृथैवनचिरंवसेत् । **स्मृत्यर्थसारे**—सन्निधौयजमानःस्यादुद्देशत्यागकारकः । असन्निधौतुपत्नीस्यादुद्देशत्यागकारिका । असन्निधौतुपत्न्याःस्यादध्वर्युस्तदनुज्ञया । उन्मादेप्रसवेचर्तौकुर्वीतानुज्ञयासदा । सर्वदायजमानोवात्यजेत्तद्दिङ्मुखःशुचिः । **मनुः**—उदितेऽनुदितेचैवसमयाध्युषितेतथा । सर्वथावर्ततेयज्ञइतीयंवैदिकीश्रुतिः ॥ ॥ **अनुदितादिलक्षणमाह कात्यायनः**—रात्रेःस्तुषोडशेभागेग्रहनक्षत्रभूषिते । कालंत्वनुदितंज्ञात्वाहोमंकुर्याद्विचक्षणः । तथाप्रभातसमयेनष्टेनक्षत्रमंडले । रविर्यावन्नदृश्येतसमयाध्युषितंचतत् । रेखामात्रंचदृश्येतरश्मिभिश्चसमन्वितः । उदिततंविजानीयात्तत्रहोमंप्रकल्पयेत् । अनुदितहोमःकातीयछंदोगपरः । उदितहोमोबह्वृचपरइति**मदनपारिजातः** । अनुदितहोमिभिरर्घ्यंदत्वासूर्योदयात्पूर्वंहुत्वागायत्रीजप्या । उदितहोमिभिस्तुजस्वाहोतव्यमितिपृथ्वीचंद्रः । उभयोःसंध्यांसमाप्यहोमइति**कल्पतरुः** ॥ ॥ **अनुदितहोमिनोगौणकालमाह कात्यायनः**—हस्तादूर्ध्वंरविर्यावद्गिरिंहित्वानगच्छति । तावद्धोमविधिःपुण्योनान्योऽनुदितहोमिनाम् । यावत्सम्यङ्नभाव्यंतेनभस्यृक्षाणिसर्वतः । नचलोहितिमापैतितावत्सायंचहूयते । रजोनीहारधूमाभ्रवृक्षाग्रांतरितेरवौ । संध्यामुद्दिश्यजुहुयाद्

तमस्यनलुप्यते । सायंत्वर्धास्तमितेसूर्येनुदितहोमिनोहोमकालः । अस्तमितेतूदितहोमिनः । **तथाचोशनाः**—अर्धमंडलसंप्राप्तेभानावनुदितेहुतम् । तस्मिन्नस्तमितेहोमोभवेदुदितएवतु ॥ ॥ मुख्यगौणकालावाह**आपस्तंबः**—तस्मात्संधौहोतव्यंनक्षत्रंदृष्ट्वाप्रदोषेनिशायांवासायमिति । संधिरर्धास्तोदयौनक्षत्रमेकं सर्वोदयःप्रदोषः द्वितीययामोनिशेति**माधवः** । सायंप्रातश्चसंधिर्मुख्यकालः नक्षत्रदर्शनादयस्त्रयःसायंगौणाइति**माधवपृथ्वीचंद्रौ** । **धूर्तस्वामिभाष्येरामांडारे**चचत्वारोमुख्यकालाइत्युक्तम् । प्रातर्होमकालश्चतुर्धा**आपस्तंबे**नोक्तः । उषस्युपोदयं–समयाध्युषितं–उदितं–प्रातरिति**आश्वलायनः** । प्रदोषांतोहोमकालःसंगवांतःप्रातस्तमतिनीयचतुर्गृहीतमाज्यंजुहुयादिति प्रदोषातिक्रमेप्रायश्चित्तविधानात्तदंतोमुख्यःकालइतिकश्चित् । तन्न । संधौतदुत्तरंचहोमेफलतुल्यतापत्तेः । अतःसंधिरेवमुख्यः । कालातिपत्तिर्नवनाडिकोर्ध्वमिति**चंद्रिका** । प्रातर्द्वादशनाडिकोर्ध्वकालचतुष्टयातिपत्तिः । **स्मृत्यर्थसारे**—प्रातर्होमःसंगवांतःकालस्त्वनुदितस्तथा । सायमस्तमितेहोमकालस्तुनवनाडिकाः । संगवःपंचधाभक्तदिनद्वितीयांशः । **रामांडारोप्येवम्** । कालातिक्रमेप्रायश्चित्तोर्ध्वमपिहोमःकार्यः । यदिगृह्येग्नौसायंप्रातर्होमयोर्हव्यंहोतारंनाधिगच्छेत्कथंकुर्यादित्यासायमाहुतेःप्रातराहुतिर्नित्येत्याप्रातराहुतेःसायमाहुतिरिति**गोभिलोक्तेः** । गृह्यइतिश्रौतस्याप्युपलक्षणम् । अनौचित्यापत्तेः । आसायमितिनकालग्रहणम् । आहुतिपदवैयर्थ्यादितिकेचित् । तन्न । सायंहोमोनलब्धश्चेत्तस्यांरात्रावभोजनम् । प्रातर्होमोनलब्धश्चेत्तदहर्भोजनंत्यजेत् । तावताहोमसिद्धिःस्यात्तत्प्रायश्चित्तमिष्यतइति**त्रिकांडमंडन**विरोधात् । अतएव**चंद्रिकाया**मासायमित्यनेनकालग्रहणं उत्तरस्मिन्कालआगतेहोमश्चेदनिवृत्तः पूर्वस्यसेयंकालातिपत्तिः तस्यांप्रायश्चित्तंमनोज्योतिरित्यादशरात्रमिति**भरद्वाजोक्ते**रित्युक्तम् । बह्वृचानांत्वतीतबहुहोमानुष्ठानम् ।—अतीतहोमान्कृत्वादौकालहोमंततश्चरेदिति**शौनकोक्तेः** । **वृत्तिकृता**प्येवमुक्तमिति**प्रयोगपारिजातः** । **आश्वलायनवृत्ता**वपि—विहृतेष्वग्निष्वहुतेषुहोमांतरकालप्राप्तावुपक्रांतमेवहोमंकालातिपत्ति

प्रायश्चित्तसहितंकृत्वावर्तमानकालमनुद्धृतप्रायश्चित्तसहितंकुर्यात् । अविहृतेषुकालांतरप्राप्तौमनस्वतीहोममतिपन्नस्यप्रतिहोमंचकृत्वाअनुद्धृतप्रा यश्चित्तादीनि । इदमनापत्परम् । आपदितुनकिंचित्प्रायश्चित्तंकितुहोममात्रंकुर्यात् । आपदितुहोममित्येवप्रतीयादितिबौधायनोक्तेः । **छंदोगपरिशिष्टे**—स्वगृह्योक्तेनविधिनाहोमंकुर्याद्यथाविधि ॥ ॥ **अर्धाधानिनोहोमक्रममाह चंद्रोदयेभरद्वाजः**—होमंवैतानिके कृत्वास्मार्तंकुर्याद्विचक्षणः । स्मृतीनांवेदमूलत्वात्स्मार्तंकेचित्पुराविदुः । **विष्णुः**—बहुशुष्केंधनेचाग्नौसुसमिद्धेहुताशने । विधूमेलेलिहानेच होतव्यंकर्मसिद्धये । योनार्चिषुजुहोत्यग्नौव्यंगारेचैवमानवः । मंदाग्निरामयावीचदरिद्रश्चोपजायते । पात्रादावुद्धृतेह्यग्नौनहोमादिसमाचरेत् । **दामोदरीयेसांबपुराणे**—क्षुत्तृट्क्रोधत्वरायुक्तोहीनमंत्रैर्जुहोतियः । अप्रबुद्धेसधूमेवामोघःस्यादन्यजन्मनि । क्षुत्तृषौप्रमादादेरुपलक्ष णमितिरत्नाकरः । स्वल्पेरूक्षेसस्फुलिंगेवामावर्तेभयानके । आर्द्रकाष्ठैःसुसंपूर्णेफूत्करोतिचपावके । कृष्णार्चिपिसुदुर्गंधेतथालिंपतिमेदिनीम् । आहुतीर्जुहुयाद्यस्तुतस्यनाशोभवेद्ध्रुवम् । **मदनपारिजातेकात्यायनः**— जुहुयुश्चहुतेचैवपाणिशूर्पास्यदारुभिः । नकुर्यादग्निधमनंनकुर्या व्यजनादिना । **व्रतहेमाद्रौ**—मुखेनैवधमेदग्निंमुखादेषोह्यजायत । नाग्निंमुखेनेतितुयल्लौकिकेयोजयंतितत् । **कात्यायनः**—हविष्येषुय वामुख्यास्तदनुव्रीहयःस्मृताः । अभावेव्रीहियवयोर्दध्नावापयसापिवा । तदभावेयवाग्वावाजुहुयादुदकेनवा । **स्मृत्यर्थसारे**—पयोदधियवागू श्चसर्पिरोदनतंडुलाः । सोमोमांसंतैलमापोदशैतान्यग्निहोत्रके । स्यादग्निहोत्रवद्द्रव्येसंस्कारोमंत्रवर्जितः । शालिश्यामाकनीवाराव्रीहिगोधूमया वकाः । एतेषांतंदुलाहोम्यायावनालाःप्रियंगवः । प्रियंगवःशालयश्चगोधूमाव्रीहयोयवाः । सारूप्येणापिहोम्याःस्युःस्वरूपेणैववैतिलाः । अत्रव्री हिपदंषाष्टिकपरम् । **छंदोगपरिशिष्टे**—माषकोद्रवगौरादि(?)सर्वालाभेपिवर्जयेत् । **शौनकः**—दध्यादीनामपक्कानांनाधिश्रयणमुच्यते । उल्मुकेनावज्वलयेदपक्कंपक्कमेवच । सायहोमेद्रव्यंचप्रातरपिग्राह्यंकमैक्यात् । यदिसायंगृहीतंद्रव्यंप्रातर्नलभ्यतेतदाप्रतिनिधिभूतंद्रव्यांतरंग्राह्यं

नतुवैकल्पिकंद्रव्यांतरम् । **बृहस्पतिः**—प्रस्थधान्यंचतुःषष्टिराहुतिःपरिकीर्तिता । तिलानांतुतदर्धस्यात्तदर्धस्याद्घृतस्यतु । **बौधायनः**—व्रीहीणांवायवानांवाशतमाहुतिरिष्यते । **कात्यायनः**—पाण्याहुतिर्द्वादशपर्वपूरिकारसादिनाचेत्स्रुवमात्रपूरिका । दैवेनतीर्थेनचहूयतेहविःस्वंगारिणिस्वर्चिषितच्चपावके । द्वादशपर्वपूरिकाद्रव्यासंभवे **टोडरानंदेशंखः**—आर्द्रामलकमात्रावैग्रासाद्याइंदुव्रतेस्मृताः । तथैवाहुतयोग्नौचशौचार्थेयाचमृत्तिका । **बह्वृचपरिशिष्टे**—शतंचतुःषष्टिर्वाहुतिर्व्रीहितुल्यानांतदर्धतिलानांतदर्धसर्पिस्तैलयोरिति । **गोभिलसूत्रे** कृतंचेत्प्रक्षाल्यजुहुयादिति । **चंद्रिकायांशातातपः**—तीर्थायतनसंसृष्टंप्रातरुत्तानपाणिना । व्यंगुलंसमिधोतीत्यसर्वत्रजुहुयाद्धविः । **चंद्रोदयेसंग्रहे**—द्रवंस्रुवेणहोतव्यंपाणिनाकठिनंहविः । **याज्ञवल्क्यः**—हुत्वाग्नीन्सूर्यदेवत्यान्जपेन्मंत्रान्समाहितः । आपत्तौ **मरीचिः**—प्रवसन्नग्निहोत्रीयस्त्रिपंचाश्वाहरादितः । दातव्योहोमएकाहेसायंप्रातःपृथक्पृथक् । तथान्यास्वपिचापत्सुपक्षहोमोविधीयते । तत्प्रकारो**मैत्रायणीयपरिशिष्टे**—पर्वणोंतेसायंचतुर्दशचतुर्गृहीतानिसकृदुन्नयनमेकासमित्सकृद्धोमः सकृत्पाणिमार्जनंसकृदुपस्थानमित्येवंप्रातरिति । **स्मृत्यर्थसारे**—पक्षहोमानशेषान्वाशेषहोमानथापिवा । समस्यजुहुयात्तत्रप्रयोगोयंनिरूप्यते । प्रतिपद्युन्नयेत्सायमापद्यन्यत्रवादिने । यावंत्यौपवसथ्याहात्प्राग्दिनानिभवंतिहि । तावंतिपरिगृह्णीयाच्चतुरुन्नयनानितु । एवमेवोत्तरत्रापिप्रातर्होमान्समस्यतु । जुहोत्यौपवसथ्याहात्प्रातर्होमावधीन्सकृत् । एवमेकत्रपक्षेयेहोमास्तेपामशेषतः । न्यूनानांवासमासःस्यान्नपक्षांतरवर्तिनाम् । सर्वथौपवसथ्याहेसायंहोमःपृथग्भवेत् । तथैवयजनीयाहेप्रातर्होमोभवेत्पृथक् । **तत्रैव**—तृतीयेऽनंतरेपक्षेसमासंनसमाचरेत् । आपच्चेदनुवर्तेतदीर्घकालंकथंचन । यावज्जीवमविच्छिन्नंपक्षहोमंसमाचरेत् । **यत्तुचंद्रिकायाम्**—यदिपक्षहोमेनपक्षत्रयमतीयात्पुनराधेयमिति तदनापत्तिपरम् । पक्षहोमेकृतेतत्पक्षमध्येआपन्निवृत्तावाह **मरीचिः**—पक्षहोमानथोकृत्वागत्वाऽकस्मान्निवर्तितः । होमंपुनःप्रकुर्यात्तुनचासौदोषभाग्भवेत् । पक्षहोमानित्युपलक्षणम् । अतःशेषहोमा

दावप्येवम् । **चंद्रिकायांबैजवापः**—एकेभ्युदितहोमाःस्युरन्येनुदितहोमिनः । अन्येभोजनहोमाश्चपक्षहोमास्तथापरे । **शौनकः**—अग्नावनुगतेयत्रहोमकालद्वयंव्रजेत् । उभयोर्विप्रवासेवालौकिकोऽग्निर्विधीयते । स्मार्तपरमिदम् । सर्वाश्चेदनुगतानादित्योभ्युदियाद्वाभ्यस्तमियाद्वाऽग्न्याधेयंपुनराधेयंवासमारूढेषुचारणीनाशेइत्या**श्वलायनोक्तेः** । यस्यचोभावनुगतावभिनिम्लोचेदभ्युदियाद्वापुनराधेयंतस्यप्रायश्चित्तमित्या**पस्तंबाच** । **कात्यायनः**—विहायाग्निंसभार्यश्चेत्सीमामुल्लंघ्यगच्छति । होमकालात्ययेतस्यपुनराधानमिष्यते । **शौनकः**—अथतत्रैववसतिहोमकालव्यतिक्रमः । लौकिकोग्निर्विधीयेतकाठकश्रुतिदर्शनात् । प्रोषितेतुयदापत्नीपत्यौग्रामांतरंव्रजेत् । होमकालेयदिप्रासानसादोषेणयुज्यते । **त्रिकांडमंडनः**—अग्निहोत्रेणरहितःपंथानशतयोजनम् । आहिताग्निःप्रयायाच्चेदग्निहोत्रंविनश्यति । विनाग्निभिर्यदापत्नीनदीमंबुधिगामिनीम् । अतिक्रामेत्तदाग्नीनांविनाशःस्यादितिश्रुतिः । अब्दंस्वयमजुह्वन्योहावयेदृत्विगादिना । तस्यस्यात्पुनराधानंपवित्रेष्टिरथापिवा । होमातिक्रमेप्रायश्चित्तमुक्तं**कारिकायाम्**—नित्यहोमेत्वतिक्रांतेसस्कृत्याज्यंचपूर्ववत् । चतुःकृत्वागृहीत्वाज्यंमनस्वत्याजुहोत्यथ । आद्वादशदिनादेवंमूर्ध्वंविच्छिद्यतेऽनलः । प्रायश्चित्तंतुयत्प्रोक्तमग्नित्यागोपपातके । मनुनातत्प्रकुर्वीतततत्कालानुसारतः । प्रायश्चित्तंकृत्वाहोमंकुर्यात् । कालातीतेषुहोमेषुउत्तरेष्वागतेषुच । कालातीतानिहुत्वैवउत्तराणिसमाचरेत् । यस्त्वतीतान्यनुक्रम्यउत्तराणिसमारभेत् । नदैवान्नैवचमुनीन्हविस्तदुपतिष्ठत इतिस्मृति**रत्नावल्यां**वचनात् । **पुलस्त्यः**—अकालेचेत्कृतंकर्मकालंप्राप्यपुनःक्रिया । कालातीततुतत्कुर्यादकृतंतद्विनिर्दिशेदिति तद्वादशाहोत्तरंज्ञेयम् । द्वादशेतिबह्वृचपरम् । आपस्तंबानांतुचतूरात्रमहूयमानोग्निर्लौकिकइत्या**पस्तंबोक्तेः** । **औपासनविच्छेदेप्रायश्चित्तमाह चंद्रोदयेभरद्वाजः**—एकाग्निर्द्वादशाहविच्छिन्नःपुनराधेयोदीर्घकालविच्छेदेऽतिकृच्छ्रमिति । विच्छिन्नोऽहुतः । **यत्तुशौनकः**—

---

१ देवपूर्वविच्छिद्यतेइतिपाठ ।

होमद्वयात्ययेदर्शपूर्णमासात्ययेतथा । पुनरेवाग्निमादध्यादितिभार्गवशासनमिति तच्छ्रौताग्निपरम् । दर्शपूर्णमाससाहचार्यात् । **आपस्तंबः**—
नासतियजमानेग्रामममर्यादामग्नीनतिहरेयुलौंकिकाःसंपद्येरन्निति । **ग्रामसीमोक्तादेवीपुराणे**—नगराद्योजनंखेटःखेटाद्ग्रामोऽर्धयोजन
म् । द्विक्रोशंपरमासीमाक्षेत्रसीमाचतुर्धनुः । **चंद्रिकायाम्**— यावंत्योग्राममर्यादानद्यश्चस्युस्ताअतिक्रामंतावन्वारभेयातामाद्यतयोर्वायदिन
लौकिकाःसपद्येरन्निति । **जातूकर्ण्यः**—विनाग्निभिर्यदापत्नीनदीमंबुधिगामिनीम् । अतिक्रामेत्तदाग्नीनांविनाशःस्यादितिश्रुतिः । **चंद्रिका
यांवृद्धांगिराः**—मासत्रयषण्मासादिविच्छेदेऽर्धकृच्छ्रकृच्छ्रातिकृच्छ्रंप्रायश्चित्तम् । **भरद्वाजगृह्येपि**—यावत्कालमहोमीस्यात्तावद्द्रव्यमशे
षतः । तद्देयंचैवविप्रेभ्योयथाहोमस्तथैवतत् ॥ ॥ ब्रह्मचारिणःसंध्योत्तरंकर्मोक्तं **मदनरत्नेकौर्मे**—सायंप्रातर्द्विजःसंध्यामुपासीतसमाहि
तः । अग्निकार्यततःकुर्यात्संध्ययोरुभयोरपि । देवताभ्यर्चनंकुर्यात्पुष्पैःपत्रेणवांबुना । **तत्रैवलौगाक्षिः**—सायमेवाग्निमिधेतेत्येकइति ।
याज्ञवल्क्यः—भैक्षाग्निकार्येत्यक्त्वातुसप्तरात्रमनातुरः । कामावकीर्णइत्याभ्यांजुहुयादाहुतिद्वयम् । उपस्थानंततःकुर्यात्संमासिंचंत्वनेनतु ।
कामावकीर्णोस्म्यवकीर्णोस्मिकामकामायस्वाहा । कामावपन्नोस्म्यवपन्नोस्मिकामायस्वाहेति । एतद्गुरुकार्यव्यग्रतयाअकरणेज्ञेयम् । अन्यथातु
मनुः—अकृत्वाभैक्षचरणमसमिध्यचपावकम् । अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेत् । **विज्ञानेश्वरोप्येवम्** । सकृल्लोपेतु**ऋग्विधाने**—
मानस्तोकेजपेन्मंत्रंशतसंख्यंशिवालये । अग्निकार्यविनाभुक्त्वानपापंब्रह्मचारिणः ॥ ॥ **अथव्रत्याहनियमाः** । **चंद्रिकायांपुलस्त्यः**—
सकृत्पर्वणिसर्पिष्मद्धविष्यंलघुभोजनम् । नसायंनोपवासःस्यात्तैलामिषविवर्जनम् । **आपस्तंबः**—अतृप्तिश्चान्नस्ययच्चैतयोःप्रियंस्यात्तदस्मिन्न
हनिभुंजीयातामधश्चशयीयातामिति । **भरद्वाजः**—वर्जयेत्पर्वकालेतुस्त्रीतैलामिषवृक्षजम् । **सांख्यायनः**—कलहंक्रीतविक्रीतंप्रहासंबहु
भाषणम् । तौर्यत्रिकंवृथाशय्यांयक्ष्यमाणोविवर्जयेत् । **जाबालिः**—कोविदारान्कुलित्थांश्चवर्जयेत्कोद्रवांस्तथा । दंतशौचंचपूर्वेद्युर्यागस्यैता

निवर्जयेत् । मसूराल्लँवणाक्षारांश्चणकान्कोरदूपकान् । मापान्मधुपरान्नंचवर्जयेत्पर्वणिद्विजः । **गृह्यपरिशिष्टे**—शाकमांसंमसूरांश्चअणवः कोरदूषकाः । वर्ज्याइतिशेपः । **आपस्तंबसूत्रे** आधानप्रकरणे ऋचीसमन्नंनाश्नीयादिति । ऋचीसमन्तरुष्म । **बौधायनः**—सर्वमेवैतद हःकोशामुद्गमाषादिधान्यंवर्जयेदन्यत्रतिलेभ्यइति । **स्मृत्यर्थसारेदिवोदासीये**— लवणंमधुमांसंचक्षारानश्नन्नहूयते (?)। उपवासेनभुंजी तउरुरात्रौचकिंचन । **मिताक्षरायां स्मृत्यर्थसारेच**—यआहिताग्नेर्धर्मःस्यात्स्मार्तौपासनिकस्सच । इतिश्रीमद्रामेश्वरभट्टसूनुश्रीमन्नराय ण०लक्ष्मणभट्टकृतावाचाररत्नेहोमप्रकरणम् ॥

अथहोमोत्तरंकर्म । **मदनरत्नेमरीचिः**—विधायदेवतापूजांप्रातर्होमादनंतरम् । **शौनकः**—प्रातर्मध्यंदिनेसायंविष्णुपूजांसमा चरेत् । अशक्तौविस्तरेणैवप्रातःसपूज्यकेशवम् । मध्याह्नेचैवसायंचपुष्पांजलिमपिक्षिपेत् । **हलायुधः**—प्रातःकालेसदाकुर्यान्निर्माल्योद्वास नंबुधः । **प्रयोगपारिजातेक्रियासारे**—मध्यमानामिकामध्येपुष्पंसंगृह्यपूजकः । अंगुष्ठतर्जन्यग्राभ्यांनिर्माल्यमपनोदयेत् । अपनीतंच निर्माल्यंचंडेशायनिवेदयेत् । मध्यमानामिकाभ्यांदेवोपरिपुष्पंधृत्वानिर्माल्यमपनोदयेदित्यर्थः । **वाराहे**—निर्माल्यंशिरसोत्तार्यधार्यंशिरसिचा त्मनः । **लिंगेविशेषस्तत्रैव**—अशून्यंमस्तकंलिंगेसदाकुर्वीतपूजकः । **विष्णुधर्मोत्तरे**—उशीरकूर्चकंदत्वासर्वपापैःप्रमुच्यते । दत्वा गोवालजंकूर्चंसर्वपापंव्यपोहति ॥ ॥ **अथनित्यदानम्** । **भारते**—एकेनांशेनधर्मस्तुकर्तव्योभूतिमिच्छता । एकेनांशेनकामस्तुएकमंशं विवर्धयेत् । **स्मृतिरत्नावल्यां याज्ञवल्क्यः**—दातव्यंप्रत्यहंपात्रेनिमित्तेपुविशेपतः । निमित्तंग्रहणादि । अत्रकेचित्प्रत्यहश्रवणादहनि यदाकदाचिन्नित्यदानमाहुः । **भट्टदिनकरस्तु**—उपोयेतेप्रयामेपुयुंजतेमनोदानायसूरयइतिमंत्रालिंगाद्धोमात्पूर्वंनित्यदानमाह । **चंद्रोदये वामनपुराणे**—होमंचकृत्वालभनंशुभानांततोगृहान्निर्गमनंप्रशस्तम् । दूर्वांचसर्पिर्दधिचोदकुंभंधेनुंसवत्सामृपभंसुवर्णम् । मृद्गोमयंस्वस्ति

कमक्षताश्चतैलंमधुब्राह्मणकन्यकाश्च । श्वेतानिपुष्पाणितथाशमींचहुताशनंचंदनमर्कबिंबम् । अश्वत्थवृक्षंचसमालभेतततश्चकुर्यान्निजजातिधर्मान् । नित्यदानांतंकर्माष्टधाविभक्तदिनाद्यभागेकार्यम् । तदुक्तंनारसिंहे—दिवसस्याद्यभागेतुसर्वमेतत्समाचरेत् ॥ ॥ **दिनद्वितीयभागकृत्यं** दक्षः—द्वितीयेचतथाभागेवेदाभ्यासोविधीयते । चतुर्धाभक्ताहर्द्वितीयइतिस्मृतिरत्नावल्यां । **कौर्मे**—जपेदध्यापयेच्छिष्यान्धारयेद्वैविचारयेत् । समित्पुष्पकुशादीनांसकालःसमुदाहृतः ॥ ॥ **दिनतृतीयभागकृत्यं** दक्षः—तृतीयेचतथाभागेकुर्यादर्थस्यसंग्रहम् । **याज्ञवल्क्यः**—उपेयादीश्वरंचैवयोगक्षेमार्थसिद्धये । इदंचशक्तस्यनित्यंदृष्टार्थत्वात् । **मनुः**—देवतान्यधिगच्छेत्तुधार्मिकांश्चद्विजोत्तमान् । ईश्वरंचैवरक्षार्थंगुरूनेवचपर्वसु । **छागलेयः**—यतीनांदर्शनंचैवस्पर्शनंभाषणंतथा । कुर्वाणःपूयतेनित्यंतस्मात्पश्येत्तुनित्यशः । अग्निचित्कपिलासत्रीराजाभिक्षुर्महोदधिः । दृष्टमात्राःपुनंत्येतेतस्मात्पश्येत्तुनित्यशः । **विष्णुपुराणे**—ततःस्ववर्णधर्मेणवृत्त्यर्थंचधनार्जनम् । धनार्जनेप्रवासकालनियममाह **चंद्रिकायांपैठीनसिः**—मासद्वयंप्रवासोस्तिपरतोनाहिताग्निवत् । आहिताग्निवदनाहिताग्नेरपिमासद्वयमेवप्रवासः ।

अथदिनचतुर्थभागेमध्याह्नस्नानम् । तच्चदिवसचतुर्भागे । तथाचदक्षः—चतुर्थेतुतथाभागेस्नानार्थंमृदमाहरेत् । अरुक्दिवाचरेत्स्नानंमध्याह्नात्प्राग्विशेषतः । **यत्तुस्मृतिरत्नावल्याम्**—दिनतृतीयेभागेमध्याह्नस्नानमुक्तंतत्पंचधाभागपरम् । **दक्षः**—प्रयतोमृदमादायदूर्वामार्द्रंचगोमयम् । **भविष्ये**—नात्यर्थंदेहजीर्णायावंध्यायाश्चविशेषतः । रोगार्तनवसूतायानगोर्गोमयमाहरेत् । गृहीत्वागोमयंस्वच्छंस्थानेचपतितंशुभे । उपर्यधश्चसंत्यज्यप्रत्यग्रंजंतुवर्जितम् । **चंद्रिकायाम्**—मृत्तिकातुसमुद्दिष्टाआर्द्रामलकमात्रिका । गोमयस्यप्रमाणंतत्रेधांगंलेपयेत्ततः । त्रेधात्रिवारम् । **प्रयोगपारिजातेदेवजानीयेच**—नंदायांभार्गवदिनेकृत्तिकासुमघासुच । भरण्यांभानुवारेचगजच्छायाद्वयेतथा । अयनद्वितयेचैवमन्वादिषुयुगादिषु । मृदास्नानंपिंडदानंनकुर्यात्तिलतर्पणम् । विवाहव्रतचूडासुवर्षमर्धंतदर्धकम् । मृदास्नानंन

कुर्वांतनिशिसंध्याग्रहेषुच । नैमित्तिकेपिचस्नानेतथाभौमार्कवारयोः । त्रयोदश्यांचसप्तम्यांभरण्यांकृत्तिकासुच । **वसिष्ठेनमृत्तिकास्नाने** प्रकारांतरमुक्तम्—मृदैकयाशिरःक्षाल्यंद्वाभ्यांनाभेस्तथोपरि । पुनश्चतिसृभिःकार्यंपङ्किःपादौतथैवच । **स्मृतिप्रदीपिकायाम्**—कटिःसक्थी ऊरुजंघेचरणौचत्रिभिस्त्रिभिः । तथैवहस्तावाचम्यनमस्कुर्याज्जलंतुतत् । ततो**गोमयस्नानमाह यमः**—आचम्यगोमयेनापिमानस्तोक्या समालभेत् । अग्रमग्रमितिस्मृत्वामानस्तोकेनवापुनः । मार्जयेद्गोमयप्राज्ञःसोदकंभानुदर्शितम् । मार्जयेल्लेपयेत् ।

अथबौधायनोक्तःस्नानविधिः—अथहस्तौप्रक्षाल्यकमंडलुंमृत्पिंडंचपरिगृह्यतीर्थंगत्वात्रिःपादौक्षालयेत्रिरात्मानमथापोभिप्रपद्यतेहिरण्यशृंगंवरुणमित्यथांजलिनाउपहंतिसुमित्रियानआपओषधयःसंत्वितितांदिशंनिरीक्षतियस्यामस्यद्वेष्योभवति दुर्मित्रियास्तस्मैसंत्वित्यपउपस्पृश्य त्रिःप्रदक्षिणमुदकमावर्तयतियदपांक्रूरंयदमेध्यंयदशांतंतदपगच्छतादित्यप्सुनिमज्योन्मज्ज्यचांतःपुनराचामेत् आपोवाइदꣳसर्वंविश्वाभूतान्यापः प्राणावाआपःपुनंतुपृथिवीमितिपवित्रेकृत्वाद्भिर्मार्जयत्यापोहिष्ठेतितिसृभिर्हिरण्यवर्णाइतिचतसृभिःपवमानःसुवर्जनइत्यनुवाकेनचांतर्जलगतोघमर्षणेनत्रीन्प्राणायामान्कृत्वोत्तीर्यवासोनिष्पीड्यप्रक्षालितोरुरहतानिवासांसिपरिधायेति । उपहंति गृह्णंति ॥

अथकात्यायनोक्तः—अथातोनित्यस्नानंनद्यादौमृद्गोमयकुशतिलसुमनसआहृत्योदकांतंगत्वाशुचौदेशेस्थाप्यप्रक्षाल्यपाणिपादौकुशोपग्रहोवद्धशिखोयज्ञोपवीत्याचम्योरुंहीतितोयमामंत्र्यावर्तयेद्येतेशतमितिसुमित्रियानइत्यपोंजलिनादायदुर्मित्रियाइतिद्वेष्यंप्रतिनिषिंचेत्कटिवस्त्यूरुजंघेचरणौकरौमृदात्रिस्त्रिःप्रक्षाल्याचम्यनमस्योदकमालभेदंगानिमृदेदंविष्णुरितिसूर्याभिमुखोनिमज्जेदापोअस्मानितिस्नात्वोदिदाभ्यइत्युन्मज्ज्यनिमज्योन्मज्ज्याचम्यगोमयेनविलिपेन्मानस्तोकइतिततोभिषिंचेदिमंमेवरुणेतिचतसृभिरिदमापउदुत्तमंमुंचंत्ववभृथेत्यतेचैतन्निमज्योन्मज्ज्याचम्यदर्भैः पावयेदापोहिष्ठेतितिसृभिरिदमापोहविष्मतीर्देवीरापइतिद्वाभ्यामापोदेवीद्रुपदादिवशंनोदेवीरपांरसमपोदेवीःपुनंतुमेतिनवभिः चित्पतिर्मेत्योंका

रेणव्याहृतिभिर्गायत्र्यावादावंतेचांतर्जलेघमर्षणंत्रिरावर्तयेत् द्रुपदांवायंगौरितिवातृचंप्राणायामंवासशिरसमोमितिविष्णोर्वास्मरणमिति । सुमनसामभावेतुलस्यादि । अभ्यर्हितत्वात्पाणिशब्दस्यपूर्वनिपातः । तेनपूर्वंदक्षिणोपक्रमंचरणौप्रक्षाल्यपाणीक्षालयेदित्यर्थः । कुशानामुपग्रहोधारणंयस्येतिधृतकुशइत्यर्थः । अंतेचैतदिति इमंमेवरुणइत्याद्यष्टभिर्मंत्रैरभिषेकोवक्ष्यमाणमंत्राभिषेकोत्तरमपिकार्यइत्यर्थः । आदावंतेचेति आपोहिष्ठेत्यादौचित्पतिर्मापुनात्वित्यस्यांतेच प्रणवव्याहृतिगायत्रीभिरभिषिंचेदित्यर्थः । नित्यंमध्याह्नस्नानंतेनास्यविधेर्नैमित्तिकस्नानादावप्राप्तिः प्रकृतिविकृतिभावस्यचनित्यपदेननिरासात् । अन्यथाप्रातःस्नानमित्येवावक्ष्यत् । प्रातःस्नानेतुयथाहनीत्यतिदेशाद्दक्षेणनित्यत्वोक्तेश्चतत्प्राप्तिरितिनिर्णयचिंतामणिः । तन्न । ग्रहणादिस्नानेधर्माभावप्रसक्तेश्च । एषस्नानविधिरित्यस्यातिदेशार्थत्वाच्च ॥

अथाश्वलायनपरिशिष्टोक्तम्—मध्यंदिनेतीर्थमेत्यधौतपादपाणिमुखोद्विराचम्यायतप्राणःस्नानंसंकल्प्यसदर्भपाणिः शुचौदेशेखनित्रेण भुवंगायत्र्याखात्वोपरिमृदंचतुरंगुलमुद्वास्याधस्तान्मृदंतथाखात्वागायत्र्यादायगर्भमुद्वासितयाप्रतिपूर्यमृदमुपात्तांशुचौतीरेनिधायगायत्र्याप्रोक्ष्यतच्छिरसात्रेधाविभज्यदक्षिणंभागमस्त्रेणदिक्षुदशसुविक्षिप्योत्तरंतीर्थेक्षिप्त्वातृतीयंगायत्र्यभिमंत्रितमादित्यायदर्शयित्वातेनमूर्ध्नआपादात् गायत्र्याप्रणवेनवासर्वांगमनुलिप्य सुमित्र्यानआपओषधयःसंत्वितिसकृदद्भिरात्मानमभिषिच्यदुर्मित्रियास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मइतिमृदमद्भिःप्रक्षालयेदथवरुणप्रार्थनादिनातर्पणांतोक्तेनविधिनास्नायान्नास्मिन्प्राग्ब्रह्मयज्ञांगतर्पणाद्वस्त्रंनिष्पीडयेदपुत्रादयोह्यंतेतर्प्यौभौमादिषुगृहेचनमृदास्नायादिति । वरुणप्रार्थनादिप्रातःस्नानउक्तम् ॥

अथपाद्मभविष्योत्तरोक्तः—अनुद्धृतैरुद्धृतैर्वाजलैःस्नानंसमाचरेत् । तीर्थंप्रकल्पयेद्विद्वान्मूलमंत्रेणमंत्रवित् । नमोनारायणायेतिमूलमंत्रउदाहृतः । दर्भपाणिस्तुविधिनास्वाचांतःप्रयतःसुधीः । चतुर्हस्तसमायुक्तंचतुरस्रंसमंततः । प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः ।

विष्णुपादप्रसूतासिवैष्णवीविष्णुदेवता । त्राहिनस्त्वेनसस्तस्मादाजन्ममरणांतिकात् । तिस्रःकोट्योर्धकोटीचतीर्थानांवायुरब्रवीत् । दिविभुव्यंत
रिक्षेचतानितेसंतिजाह्नवि । नंदिनीत्येवतेनामदेवेपुनलिनीतिच । क्षमापृथ्वीचविहगाविश्वकायाशिवासिता । विभावरीसुप्रसन्नातथालोक
प्रसादिनी । एतानिपुण्यनामानिस्नानकालेप्रकीर्तयेत् । भवेत्संनिहितातत्रगंगात्रिपथगामिनी । सप्तवाराभिजप्तेनकरसपुटयोजितम् । मूर्ध्नि
क्षिप्त्वाजलंभूयस्त्रिचतुःपंचसप्तवा । स्नानंकुर्यान्मृदातद्वदामंत्र्यचविधानतः । अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे । मृत्तिकेहरतत्सर्वंयन्मया
दुष्कृतंकृतम् । उद्धृतासिवराहेणकृष्णेनशतबाहुना । नमस्तेसर्वभूतानांप्रभवारणिसुव्रते । एवंस्नात्वाततःपश्चादाचम्यचविधानतः । उत्था
यवाससीधौतेअक्लिन्नेपरिधायच । अयंविधिःस्त्रीशूद्रादेरपीत्याचारादर्शः ॥

अथस्नानभेदाः । शंखः—स्नानंतुद्विविधंप्रोक्तंगौणमुख्यप्रभेदतः । तयोस्तुवारुणंमुख्यंतत्पुनःषड्विधंभवेत् । नित्यंनैमित्तिकंकाम्यं
क्रियांगंमलकर्षणम् । क्रियास्नानंततःषष्ठंस्नानंतत्रमताक्रिया । तल्लक्षणानिसएवाह—अस्नातस्तुपुमान्नार्होजप्याग्निहवनादिषु । प्रातःस्नानं
तदर्थंतुनित्यस्नानंप्रकीर्तितम् । चंडालशवयूपादिस्पृष्ट्वास्नातोरजस्वलाम् । स्नानार्हस्तुयदास्नातिस्नानंनैमित्तिकंतुतत् । पुष्यस्नानादिकंयत्तुदैवज्ञ
विधिचोदितम् । तद्धिकाम्यंसमुद्दिष्टंनाकामस्तत्करोतिवै । जप्तुकामःपवित्राणिअर्चिष्यन्देवताःपितॄन् । स्नानंसमाचरेद्यस्तुक्रियांगंतत्प्रकीर्ति
तम् । मलापकर्षणंनामस्नानमभ्यंगपूर्वकम् । सरःसुदेवखातेषुतीर्थेषुचनदीषुच । क्रियास्नानंसमुद्दिष्टंस्नानंतत्रमताक्रिया । मध्यंदिनीयमपि
नित्यमुक्तं **माधवीयेविष्णुः**—स्नानार्होयोनिमित्तेनकृत्वातोयावगाहनम् । आचम्यप्रयतःपश्चात्स्नानंविधिवदाचरेत् । **योगयाज्ञव**
ल्क्यः—तूष्णीमेवावगाहेतयदास्यादशुचिःपुमान् । विधिवदितिनित्यस्नानधर्मातिदेशः । अतएवदैवपित्र्यविवर्जितमित्युक्तम् । क्रियांगे

पिनित्यधर्माइति**माधवीये** । ग्रहणनिमित्तस्नानेपि—गंगास्नानंप्रकुर्वीतग्रहणेचंद्रसूर्ययोः । महानदीषुचान्यासुस्नानंकुर्याद्यथाविधीति**भार**
तात् धर्मप्राप्तिः । अनेकेषांस्नानानामेककालपातेनित्यनैमित्तिककाम्यानामुत्तरोत्तरेणपूर्वपूर्वस्यप्रसंगसिद्धिरन्येषांतंत्रता ॥

अथस्नाननिमित्तानि ॥ मदीयाःश्लोकाः—शैवान्पाशुपतांस्तथाचितिखरांश्चर्मारलोकयतान्कैवर्ताजरकान्नटोष्ट्रबुरुडान्भिल्लानुदक्याशु
नः । यूपंधीवरसूतिगृध्रपतितान्शूद्रान्वृकान्नास्तिकानस्थ्यार्द्रशवकाकसूकरशिवागोमायुमद्यैडकान् । व्यंगवानरविडालदीपिकादीपतैलचितिधूम
नीलिकाः । अश्वकुक्कुरवराहदेवलान्साविकाशुचिमदिष्णुदाहकान् । स्पृष्ट्वादुःस्वप्नवांतेषुविरक्तक्षुरमैथुने । श्मशानाक्रांत्यजीर्णेषुस्नायादभ्युदया
स्तगे । शैवपाशुपतयोरनधिकारिणोःस्नानमिति**मदनपारिजातः** । श्रोत्रियादीनांसाक्षिनिषेधवद्दोषाभावेपिवाचनिकंस्नानमित्यपि सएव ।
लोकायतो बौद्धः । उदक्या रजस्वला । विकर्मस्थशूद्रस्पर्शेस्नानंनशूद्रमात्रस्य । विकर्मस्थान्द्विजान्शूद्रान्सवासाजलमाविशेदिति **हारीतोक्ते**
श्च । शूद्रोच्छिष्टंद्विजःस्पृष्ट्वाउच्छिष्टंशूद्रमेववा । शुचिमप्यवगुह्यैनंसवासाजलमाविशेदितिचं**द्रिकायांव्यासोक्तेश्च** । एतच्चकर्मकाले ।
अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंस्पर्शदूपितेतिवचनात्—द्वावप्यंत्यांत्यजौस्पृष्ट्वासवासाजलमाविशेत् । अन्येष्वाचमनंप्रोक्तंक्रियायांस्नानमाचरे
दिति **पराशरोक्तेश्च** । **मदनपारिजाते**—अंसजाम्लेच्छशवरादयइति**कुल्लूकभट्टः** । अंत्यजांश्चाह**विज्ञानेश्वरीयेंगिराः**—चंडा
लश्वपचक्षत्तासूतोवैदेहकस्तथा । मागधायोगवौचैवसप्तैतेंत्यावसायिनः । **पराशरस्त्वन्यानाह**—रजकश्चर्मकारश्चनटोबुरुडएवच । कैवर्तमे
दभिल्लाश्चसप्तैतेत्वंत्यजाःस्मृताः । यत्तु रजकादिस्पर्शेआचमनमुक्तंतच्छिरोभिन्नांगस्पर्शे । शिरःस्पर्शेस्नानमिति **प्रायश्चित्तशूलपाणिः** ।
शिरःपदंनाभेरूर्ध्वांगोपलक्षणमिति **चंद्रिका** । अस्थिनरस्यैव । नारंस्पृष्ट्वास्थिसस्नेहमिति**मनूक्तेः** । इदंद्विजास्थिविषयम् । अन्यस्मिंस्तु
स्निग्धेत्रिरात्रमस्निग्धेत्वहोरात्रमिति**विज्ञानेश्वरादयः** । अमानुषेत्वस्थनि **विष्णुः**—भक्ष्यवर्ज्यपंचनखशवंतदस्थिचस्पृष्ट्वापूर्ववद्स्नात्वायं

क्षालितंबिभृयादितिचंद्रिकायामंगिराः । साध्वाचारानतावत्स्यात्स्नातापिस्त्रीरजस्वला । यावत्प्रवर्तमानंचरजोनविनिवर्तते । स्नायाद्रजसि निर्वृत्तेशौचार्थंतुततःपुनः । रोगेणरजःप्रवृत्तौनाशुचित्वमित्युक्तं **चंद्रिकायांयाज्ञवल्क्यः**—उदक्याशुचिभिःस्नायात्संस्पृष्टस्तैरुपस्पृशेत् । तैःस्पृष्टैः । इदंचाचेतनस्पृष्टस्पर्शे । चेतनस्पर्शेतुस्नानम् । दिवाकीर्तिमुदक्यांचपतितंसूतिकांतथा । शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुद्ध्यतीति **मनूक्तेः** । तृतीयस्यत्वाचमनम् । तत्स्पृष्टिनंस्पृशेद्यस्तुस्नानंतस्यविधीयते । ऊर्ध्वमाचमनप्रोक्तद्रव्याणांप्रोक्षणंतथेति**संवर्तोक्तेः** । इदंचाका मविषयम् । कामतस्तृतीयस्यापिस्नानम् । पतितचंडालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शेसचैलम् । उदकोपस्पर्शनाच्छुद्ध्येदिति**गौतमो क्तेः** । तत्स्पृष्टिपदेनपतितस्पृष्टिग्रहणमित्या**चारादर्शः** । **यत्तुकौर्मे**—तत्स्पृष्टस्पृष्टिनंस्पृष्ट्वाबुद्धिपूर्वंद्विजोत्तमः । आचामेत्तस्यशुद्ध्यर्थंप्राहदे वःपितामहइति तदशक्तविषयम् । चतुर्थस्यत्वाचमनम् । **संग्रहे**—अबुद्धिपूर्वंसंस्पर्शेद्वयोःस्नानंविधीयते । त्रयाणांबुद्धिपूर्वेतुतत्स्पृष्टिन्याय कल्पनेति**माधवीयेसंग्रहोक्तेः** । उपस्पृशेच्चतुर्थस्तुतदूर्ध्वंप्रोक्षणंस्मृतमितितत्रैवस्मृतेश्च । **विज्ञानेश्वरीयेप्येवं** । **चंद्रोदये**—कटधूम स्पर्शंवांतंविरक्तंक्षुरकर्मिणम् । मैथुनाचरितारंचस्पृष्ट्वास्नानंनविद्यते । भोजनोर्ध्वमुहूर्तोर्ध्ववांतेस्नानमिति **स्मृत्यर्थसारेकृष्णभट्टीयेच** । **प्रायश्चित्तशूलपाणिस्तु** स्नानंमाषमसूराद्यन्नपरम् । मसूरमाषमांसानिभुक्त्वायोवमतिद्विजः । त्रिरात्रमुपवासोस्यप्रायश्चित्तंविधीयते । प्राणायामैस्त्रिभिःस्नात्वाघृतंप्राश्यविशुद्ध्यतीति**यमोक्तेः** । पर्युषितवांतेस्नानम् । भोजनदिनेत्वाचमनमिति **श्राद्धहेमाद्रौचंद्रिकायामा चारादर्शेच** । **मिताक्षरायांतु**—अश्नन्भुक्त्वार्द्रपाणिर्वाचांतोनस्नानमाचरेत् । अन्यदावमनेस्नायात्तथाशोकाश्रुपातनइति**योगयाज्ञव ल्क्योक्ते**र्वमनेपिस्नानमुक्तम् । **वस्त्रान्तरितस्पर्शेप्रचेताः**—वस्त्रान्तरितसंस्पर्शःसाक्षात्स्पर्शोभिधीयते । साक्षात्स्पर्शेतुयत्प्रोक्तंतद्व स्त्रांतरितेपिच । **शूलपाणावापस्तंबः**—एकशाखांसमारूढश्चांडालादिर्यदाभवेत् । ब्राह्मणस्तत्रनिवसन्स्नानेनशुचितामियात् । आदिशब्दा

दुदक्यादीनि । शाखाग्रहणमेकावयव्युपलक्षणम् । तेनैकपाषाणादेरपिग्रहणमितिशूलपाणिः । शाखास्वपिकाष्ठादिपुचंडालेनसहावस्थितः स्नायान्नसचैलमितिसएव । एतदपवादमाहशूलपाणौपराशरः—रथ्याकर्दमतोयानिनावःपंथास्तृणानिच । स्पर्शनान्नप्रदुष्यंतिपक्वेष्टकचितानिच । तृणानीतिवहुवचनादेकतृणस्पर्शेस्नानमितिशूलपाणिः । माधवीयेशातातपः—येनकेनचिदभ्यक्तश्चंडालंसंस्पृशेद्यदि । अहोरात्रोषितःस्नात्वापंचगव्येनशुद्ध्यति । उच्छिष्टःसंस्पृशेद्विप्रोमद्यशूद्रशुनोऽशुचीन् । अहोरात्रोषितःस्नात्वापंचगव्येनशुद्ध्यति । हेमाद्रौ कौर्मे—उच्छिष्टोऽद्भिरनाचांतश्चंडालान्स्पृशतिद्विजः । प्रमादाद्वैजपेत्स्नात्वागायत्र्यष्टसहस्रकम् । मनुः—यस्तुच्छायांश्वपाकस्यब्राह्मणोवाधिगच्छति । तत्रस्नानंतुतस्यैवघृतंप्राश्यविशुध्यति । शूलपाणौवृद्धशातातपः—अशुचिंसंस्पृशेद्यस्तुएकएवसदुष्यति । तंस्पृष्ट्वान्योनदुष्येतसर्वद्रव्येष्वयंविधिः । चंद्रिकायां श्मश्रुकर्मण्यपिस्नानमुक्तम् ॥ ॥ स्पृष्टास्पृष्टौहेमाद्रौशातातपः—ग्रामेतुयत्रसंस्पृष्टिर्यात्रायांकलहेषुच । ग्रामसंदूषणेचैवस्पृष्टिदोषोनविद्यते । संग्रामेराजमार्गादौयज्ञेषुप्रकृतेषुच । उत्सवेषुचसर्वेषुस्पृष्टास्पृष्टिर्नदुष्यति । बृहस्पतिः—तीर्थेविवाहेयात्रायांसंग्रामेदेशविप्लवे । नगरग्रामदाहेचस्पृष्टास्पृष्टिर्नदुष्यति । दानेविवाहेयज्ञेचमहोत्पातेरुजागमे । आपद्यपिचकष्टायांसद्यःशौचंविधीयते इतियाज्ञवल्क्योक्तेः । एतद्यत्राहमनेनस्पृष्टइतिनज्ञातंतद्विषयमितिहेमाद्रिः । मदनपारिजातेप्येवम् । उच्छिष्टाशुचिस्पर्शपरमितिचंद्रिकायां । शातातपः—काकविष्ठोपघातेसचैलंस्नानंव्याहृतिहोमंचकुर्यादिति । बालस्यास्पृश्यस्पर्शे आपस्तंबः—अन्नप्राशनात्प्रयताभवंत्यासंवत्सरादित्येकेयावतावादिशोनप्रज्ञायंतइति । स्मृतिप्रदीपिकायाम्—शिशोरभ्युक्षणंप्रोक्तंबालस्याचमनंस्मृतम् । रजस्वलादिसंस्पर्शेस्नानमेवकुमारके । तल्लक्षणंतु—प्राक्चूडाकरणाद्बालःप्रागन्नप्राशनाच्छिशुः । कुमारकस्तुविज्ञेयोयावन्मौंजीनिबंधनम् । आशार्के—सर्वत्रास्पृश्यसंस्पर्शेवारुणंस्नानमुच्यते ॥ ॥ रात्रिस्नानेविशेषमाह चंद्रिकायांयमः—विप्रःस्पृष्टो

निशायांतुउदक्यापतितादिना । दिवानीतेनतोयेनसस्नायादग्निसंनिधौ । माधवीयेमरीचिः—दिवाहृतंतुयत्तोयंगृहयेदिनविद्यते । अज्वा ल्याग्निततःस्नायान्नदीपुष्करिणीषुच । पराशरः—यदिगेहेनतोयंस्यात्तदाशुद्धिःकथंभवेत् । धाम्नोधाम्नेतिमंत्रेणगृह्णीयादग्निसंनिधौ । आतुरादिविषये सएव—आतुरेस्नानउत्पन्नेदशकृत्वोह्यनातुरः । स्नात्वास्नात्वास्पृशेदेनंततःशुद्ध्येत्सआतुरः । स्नानेनैमित्तिकेप्राप्तेनारीयदि रजस्वला । पात्रांतरिततोयेनस्नानकृत्वाव्रतंचरेत् । सिक्तगात्राभवेदद्भिःसांगोपांगाकथंचन । नवस्त्रपीडनकुर्यान्नान्यद्वासश्चधारयेत् । चंद्रिकायामुशनाः—ज्वराभिभूतायानारीजरसाचपरिप्लुता । कथतस्याभवेच्छौचंशुद्धिःस्यात्केनकर्मणा । चतुर्थेहनिसंप्राप्तेस्पृशेदन्यातुतांस्त्रियम् । सासचैलावगाह्यापःस्नात्वास्नात्वापुनःस्पृशेत् । दशद्वादशकृत्वोवाआचमेच्चपुनःपुनः । अंतेचवाससांत्यागस्ततःशुद्धाभवेत्तुसा । दद्याच्छक्त्याततोदानंपुण्याहेनविशुध्यति । शंखः—रथ्याकर्दमतोयेनष्ठीवनाद्येनवापुनः । नाभेरूर्ध्वंनरःस्पृष्टःसद्यःस्नानेनशुद्ध्यति । स्मृत्यर्थसारे—यत्रपुसःसचैलंस्यात्स्नानंतत्रसुवासिनी । कुर्वीतैवाशिरःस्नानंशिरोरोगीजटीतथा ।

अथामलकस्नानम् । चंद्रिकायांक्रतुः—षष्ठींचसप्तमीचैवनवमीचत्रयोदशीम् । संक्रांतौरविवारेचस्नानमामलकैस्त्यजेत् । योगयाज्ञवल्क्यः—धात्रीफलैरमावास्यासप्तमीनवमीषुच । यःस्नायात्तस्यहीयंतेतेजआयुर्धनंसुताः । व्यासः—श्रीकामःसर्वदास्नानंकुर्वीतामलकैर्नरः । सायणीयेबृहस्पतिः—सर्वकालतिलस्नानंपुण्यंव्यासोऽब्रवीन्मुनिः । षट्त्रिंशन्मते—तथासप्तम्यमावास्यासंक्रांतिग्रहसूतिषु । धनपुत्रकलत्रार्थीतिलपिष्टंनसंस्पृशेत् । प्रयोगपारिजातेवृद्धवसिष्ठः—आसीनःप्राङ्मुखोभूत्वातैलाभ्यंगंसमाचरेत् । व्रतहेमाद्रौमात्स्ये—तस्मात्कृतोपवासेनस्नानमभ्यंगपूर्वकम् । वर्जनीयप्रयत्नेनरूपघ्नंतत्परंनृप । पाद्मेमाघमाहात्म्ये—उपोष्यैकादशींशुक्लांतैलाभ्यंगः कृतस्तथा । द्वादश्यांप्राग्भवेदेहेतेनव्याघ्रमुखोऽभवत् । अत्र मदीयःश्लोकः—दिग्विष्टिव्यतिपातवैधृतियुगादिष्वेवमन्वादिषुश्राद्धेजन्मदिने

व्रतेवमदिनेनंदासुरिक्तासुच । ऋष्यग्न्यर्कतिथौवसावहिदिनेकामोत्तराफल्गुनीज्येष्ठार्द्राहरिभेषुशुक्रगुरुभौमार्केषुजन्मत्रये । तैलाभ्यंगंनकुर्वीतम तिमानेषुसर्वदा । दिग्दशमी । अमवदिनंदिनक्षयः । नंदाः प्रतिपत्षष्ठ्येकादश्यः । रिक्ताश्चतुर्थीनवमीचतुर्दश्यः । ऋषिःसप्तमी । अग्नि स्तृतीया । अर्कःद्वादशी । तिथिःपूर्णिमामावास्ये । वसुरष्टमी । अहिःपंचमी । कामस्त्रयोदशी । हरिभंश्रवणः । अत्रमूलंचंद्रोदयादिषु स्पष्टम् । **आयुर्वेदसंहितायाम्**—नाभ्यंगस्तत्रबालानांवृद्धानांतुनदोषदः । तत्रपूर्वोक्तेषु । **चंद्रिकायांसंग्रहे**—स्त्रीणांतुबुधवारेणतैला भ्यंगंविवर्जयेत् । **कृष्णभट्टीये**—सोमवारेतथाभ्यंगंपुत्रवान्वर्जयेत्सदा । **मार्कंडेयः**—अपुष्टिःकांतिरल्पायुर्धनंनिर्धनतांतथा । अनारो ग्यंसर्वकाममभ्यंगाद्भास्करादिषु । अन्यद्रव्ययुतंतैलंनदुष्यतिकदाचन । **चंद्रिकायांयमः**—घृतंचसार्षपंतैलंयत्तैलंपुष्पवासितम् । नदोषः पक्वतैलेषुस्नानाभ्यंगेषुनित्यशः । **आयुर्वेदसंहितायाम्**—निषिद्धतिथिवारर्क्षग्रहणेष्वपिरात्रिषु । किंचिद्वोघृतसंयुक्तंविप्रपादरजोन्वितम् । **तिथ्यालोके**—रवौपुष्पंगुरौदूर्वांभूमिभूमिजवासरे । भार्गवेगोमयंदद्यात्तैलदोषोपशांतये । **षट्त्रिंशन्मते**—सूर्यशुक्रादिवारेषुनिषिद्धा सुतिथिष्वपि । स्नानेवायदिवास्नानेपक्वतैलंनदुष्यति । अत्रतिलतैलमेवनिषिद्धं । तिलानामिदंतैलमितिविकारतद्धितात् । सार्षपादौतुतैलशब्दो गौणः । अयंचतिथिनिषेधोभ्यंगएवननित्यस्नानादौ ।—पुत्रजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा । नित्यस्नानेचकर्तव्येतिथिदोषोनविद्यतइतिगा र्ग्योक्तेः । याद्दच्छिकंतुयत्स्नानंभोगार्थंक्रियतेद्विजैः । तन्निषिद्धंदशम्यादौनित्यनैमित्तिकेविनेतिचंद्रिकोक्तेः । **मनुः**—शिरःस्नातस्तुतैले ननांगंकिंचिदुपस्पृशेत् । तैलेनशिरसोभ्यंगोत्तरमन्येनापितैलेननांगाभ्यंगः । सार्षपादिनातुतदभ्यंगेउभयाभ्यंगेवानदोषः । यद्वाशिरोभ्यंगशेष स्यैवनिषेधः । शिरोभ्यक्तावशिष्टेनतैलेनांगंनलेपयेदिति **देवलोक्तेरितिकुल्लूकभट्टः** । **अमांप्रकृत्यचंद्रिकायांप्रचेताः**—तैलंचन स्पृशेदाम्रवृक्षादींश्चनकर्तयेत् । तत्रैव**बौधायनः**—अष्टम्यांचचतुर्दश्यांनवम्यांचविशेषतः । शिरोभ्यंगंवर्जयेत्तुपर्वसंधौतथैवच । तत्रैव**गर्गः**—

पंचदश्यांचतुर्दश्यामष्टम्यांरविसंक्रमे । द्वादश्यांसप्तमीषष्ठ्योस्तैलस्पर्शंविवर्जयेत् । तत्रैवहारीतः—पंचमीदशमीचैवपौर्णमासीत्रयोदशीम् । तथैवैकादशीचैवयस्तैलमुपसेवते । अभ्यंगात्स्पर्शनाद्वापिभक्षणाच्चतथैवच । उत्तीर्णातस्यवृद्धिःस्याद्धनापत्यबलायुषाम् ॥

अथोष्णोदकस्नानम् । तत्रमदीयःश्लोकः—रवौसप्तमीश्राद्धपष्ठीव्रतेपुस्वजन्माहसंक्रांतिजन्मन्यनिदौ । ग्रहेस्पृश्यसस्पर्शनेपौर्णमास्यां मृतौवर्जयेत्स्नानमुष्णोदकेन । अत्रमूलंहे**माद्र्यादौस्पष्टम्** । मैथुनेक्षौरेचोष्णोदकंनेति**कृष्णभट्टः** । अस्पृश्यस्पर्शेउष्णोदकनिषेधोदिवसे । अस्पृश्यस्पर्शनेस्नानंनिश्युष्णेनजलेनचेति **स्मृत्यर्थसारात्** । यत्तु**पराशरः**—वृथाह्युष्णोदकस्नानंवृथाजाप्यमवेदिकम् । यच्च**याज्ञवल्क्यः**—अशुचिस्पर्शदुष्टाभिरुद्धृताभिस्तुमानवः । स्नानंसमाचरेद्यस्तुनसशुद्ध्यतिकर्हिचिदिति तद्गंगोदकभिन्नपरम् । **वृहन्मनुः**—स्नातस्य वह्नितप्तेनतथैवपरवारिणा । शरीरशुद्धिर्विज्ञेयानतुस्नानफललभेदिति तदनातुरस्य । तीर्थसत्वेतु—भूमिष्ठमुद्धृतवापिशीतमुष्णमथापिवा । गांगंपयःपुनात्याशुपापमामरणांतिकमिति**हेमाद्रौमरीच्युक्तेः** । चिरंपर्युषितवापिशूद्रस्पृष्टमथापिवा । जाह्नव्याःस्नानदानादौपुनात्येवसदा पयइति तत्रैवा**दित्यपुराणाच्च** । यत्तु**षट्त्रिंशन्मते**—आपःस्वभावतोमेध्याःकिंपुनर्वह्निसंयुताः । तस्मात्संतःप्रशसंतिस्नानमुष्णेनवारिणेति तदातुरपरम् । आदित्यकिरणैःपूतंपुनःपूतंतुवह्निना । आम्नातमातुरेस्नानंप्रशस्तंचोष्णवारियदिति**चंद्रिकायांयमोक्तेः** । अनातुरस्यापितीर्थाभावे—नित्यंनैमित्तिकंकाम्यक्रियांगंमलकर्षणम् । तीर्थाभावेतुकर्तव्यमुष्णोदकपरोदकैरिति**यमोक्तेः** । मरणादिपुतुतीर्थाभावेपि नोष्णोदकस्नानकिंतुपरोदकैरुद्धृतैर्वेति**चंद्रिका** । तत्रेतिकर्तव्यतामाह**व्यासः**—शीतास्वप्सुनिषिच्योष्णामंत्रसंभारयोगतः । गृहेपिशस्यते स्नानंतद्धीनमफलभवेत् । सभारा मृदादयः । **मंत्रमहोदधौ**—तीर्थाभावेस्वसदनेस्नायादुष्णेनवारिणा । हस्तयोरपआदायकुर्यात्तत्राघमर्षणम् । **स्मृत्यर्थसारे**—उद्धृतजलस्नानेमार्जनंकार्यम् । अघमर्षणंजलतर्पणंचानित्यमित्युक्तम् **गृह्यपरिशिष्टे**—नशीतोदकेनशीतोष्णो

दकेनगृहेस्नायान्मंत्रविधिंवर्जयेत्बहिर्वाशुचौदेशेसर्वंपश्चात्कुर्यादिति । **पारिजातेआश्वलायनः**—स्नानमध्येत्वाचमनंतर्पणंवस्त्रपीडनम् । करपात्रगतंतोयंगृहएतानिवर्जयेत् । गृहस्नानेनकुर्वीततर्पणंमार्जनंतथा । नांतराचमनंकुर्यात्पश्चादाचम्यशुद्ध्यति । **चंद्रोदयेयोगयाज्ञवल्क्यः**—वापीकूपगृहस्नानेसूतकेमृतकेतथा । मासोच्चारंनकुर्वीततज्जलंरुधिरंभवेत् ॥ ॥ **अथमंत्रस्नानंबह्वृचपरिशिष्टे**—शुचौदेशे शुचिराचांतः प्राणानायाम्यसव्येपाणावपःकृत्वातिसृभिरापोहिष्ठीयाभिस्त्रिःपच्छःप्रणवपूर्वंदर्भोदकैर्मार्जयेत् पादयोर्मूर्ध्निहृदयेमूर्ध्निहृदयेपादयोर्हृदयेपादयोर्मूर्ध्निचाथार्धशोमूर्ध्निहृदयेपादयोर्हृदयेपादयोर्मूर्ध्निचाथऋक्शोहृदयेपादयोर्मूर्ध्निचाथतृचेनमूर्ध्निमार्जयित्वा गायत्र्यादशधाभिमंत्रिताअपःप्रणवेनपीत्वाद्विराचामेदित्येतन्मंत्रस्नानम् । **प्रकारांतरंहेमाद्रौ**—शंनआपस्तुद्रुपदाआपोहिष्ठाघमर्षणम् । एभिश्चतुर्भिर्ऋङ्मंत्रैर्मंत्रस्नानसुदीरितम् । **अन्यकर्तृकस्नानेमंत्रमाह तत्रैवव्यासः**—दाक्षायणमयैःकुंभैर्मंत्रवज्जाह्नवीजलैः । कृतमंगळपुण्याहैःस्नानमस्तुतवानघम् । दाक्षायणं सुवर्णं । इत्युक्त्वाजाह्नवीस्थानेतीर्थान्यन्यानिकीर्तयेत् । सर्वतीर्थाभिषेकस्तेभूयादित्यंततोब्रवीत् । अत्रविशेषश्चंद्रिकायाम्—आदौतावत्प्रभासेबहुगुणसलिलेमध्यमेपुष्करेचगंगाद्वारेप्रयागेकनखलसहितेकुंभकोणेगयायाम् । राहुग्रस्तेचसोमेदिनकरसहितेसंनिहत्यांविशेषाद्दैवैर्विख्याततीर्थैस्त्रिभुवनसहितैःस्नानमच्छिद्रमस्तु । प्राप्यसारस्वतंस्नानंभवेन्मुदितमानसः । सर्वतीर्थाभिषेकाद्धिपवित्राविदुषांहिवाक् ॥ ॥ **अथविभूतिस्नानम्** । तदुत्पत्तिश्चंद्रोदयेशिवपुराणे—भस्मसंपादनविधिःसुलभःसमुदीरितः । पौर्णमास्याममावास्यामष्टम्यांवाविशुद्धधीः । कपिलायाःशकृत्स्वल्पंगृह्णीत्वागगनेपतत् । उपर्यधःपरित्यज्यगृह्णीयात्पतितंयदि । पिंडीकृत्यशिवाग्न्यादौतत्क्षिपेन्मूलमंत्रतः । धारयेन्नित्यकार्येषुविभूतिंतुप्रयत्नतः । **क्रियासारे**—पद्मपत्रेणवान्येनशुचिपत्रेणवापुनः । सद्येनगोमयंगृह्यतद्वामेनाभिमंत्रयेत् । शुद्धाभूमावघोरेणदहेत्तल्लौकिकाग्निना । सद्येन सद्योजातंप्रपद्यामीत्यनेन । वामेन वामदेवायनमोज्येष्ठायइत्यनेन । ताम्रकुंभेक्षिपेद्भस्मशुद्धेतत्पुरुषे

णतु । सिकतांगारपाषाणानीशानेनविशोधयेत् । एवंविधिकृतेनैवभस्मनास्नानमाचरेत् । त्रिपुंड्रमथवाद्ध्यात्सर्वपापक्षयोभवेत् । अन्यजातम नाधारंयत्रक्वापिस्थितंचयत् । संस्काररहितंयत्तन्नहिधार्यंकथंचन । शूद्रहस्तस्थितंभस्मद्विजातिर्नैवधारयेत् । तथैवांत्यजहस्तस्थंशूद्रैर्धार्यंनजातु चित् ॥ ॥ **स्नानप्रकारःक्रियासारे**—स्नानस्योपक्रमेपादौकरौप्रक्षाल्यवाग्यतः । आचम्योक्तासनेस्थित्वाप्राङ्मुखोवाप्युदङ्मुखः । पवित्रहस्तद्वितयःप्राणायामंसमाचरेत् । ततोमूलेनभसितमष्टकृत्वोभिमंत्र्यच । ईशानेनशिरोदेशंमुखंतत्पुरुषेणतु । **स्मृतिभास्करे**—त्र्यायु षैःशिवमंत्रैश्चलिप्यादापादमस्तकम् ॥ इतिश्रीनारायणभट्ट०लक्ष्मणभट्टकृतावाचाररत्नेमध्याह्नस्नानम् ॥

अथपंचमहायज्ञाः । तत्स्वरूपमाह**मनुः**—अध्ययनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणम् । होमोदैवोबलिर्भौतोनृयज्ञोतिथिपूजनम् । पचैतान्यो महायज्ञान्नहापयतिशक्तितः । सगृहेपिवसन्नित्यसूनादोषैर्नलिप्यते । **सूनाःसएवाह**—पंचसूनागृहस्थस्यचुल्लीपेषण्युपस्करः । कंडनीचोदकुं भश्चबध्यतेयास्तुवाहयन् । उपस्करः संमार्जनी । **हारीतः**—सूनाःपंचविधाद्रुतावगाहनतरणविक्षोभणविक्षेपणापूतग्रहणयानादिभिराद्यां कुर्वंत्यवेलाविस्पष्टद्रुतगमनाक्रमणादिभिर्द्वितीयां हननप्रहरणबंधनच्छेदनकुट्टनोत्पाटनादिभिस्तृतीयामाक्रमणघर्षणपेषणादिभिश्चतुर्थींउद्दीपन तपनस्वेदनभर्जनपचनादिभिःपंचमी तदेतासूनानीरययोनीरहरहःप्रजाःकुर्वंत्यग्निगुरुशुश्रूषास्वाध्यायैरादितःसूनात्रयंब्रह्मचारिण'पावयंति पंचभि र्यज्ञैर्गृहवनस्थाःपञ्चपावयंति पवित्रज्ञानध्यानैर्भिक्षवःसूनाद्वयंपावयंति ।

अथब्रह्मयज्ञः । तत्कालं**मरीचिराह**—सचार्वाक्तर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः । वैश्वदेवावसानेवानान्यत्रेतेनिमित्तकात् । मध्याह्न पक्षेतर्पणात्पूर्वम् । **बृहस्पतिः**—यदिस्यात्तर्पणादर्वाग्ब्रह्मयज्ञःकृतोनहि । कृत्वामनुष्ययज्ञंवैततःस्वाध्यायमारभेत् । **वृत्तौश्रुतिः**—मध्यं दिनेप्रबलमधीयीतयएवंविद्वान्महारात्रउषस्युदितइतिच । **तैत्तिरीयश्रुता**वुदितआदित्यइत्युक्तेरुदयात्प्राक्ब्रह्मयज्ञनिषेधइति**माधवः** ।

निषेधोनेति**चंद्रिका** । स चावोक्तर्पणादिति तर्पणस्यपृथगुक्तेर्नब्रह्मयज्ञांगतर्पणंकिंतुस्वतंत्रंप्रधानमतस्तर्पणस्यपृथक्संकल्पः । कृतब्रह्मयज्ञस्यतीर्थप्राप्तौपितृतर्पणंभवति—अकालेप्यथवाकालेतीर्थेश्राद्धंतथानरैः । प्राप्तैरेवसदाकार्यंकर्तव्यंपितृतर्पणमिति**श्राद्धशूलपाणौदेवीपुराणात्** । आश्वलायनानांतुब्रह्मयज्ञांगतर्पणं तत्सूत्रेतद्धर्मैःसंदंशात् । **बृहन्नारदीये**—कुर्यात्प्रतिदिनंवर्णीब्रह्मयज्ञंचतर्पणम् । **प्रयोगपारिजाते जैमिनिः**—अनुपाकृतवेदस्यकर्तव्योब्रह्मयज्ञकः । वेदस्थानेतुसावित्रीगृह्यतेतत्समाहिसा । उपनयनदिनेनारंभः । आरभेद्ब्रह्मयज्ञंचमध्याह्नेतुपरेहनीति**प्रयोगपारिजाते**वचनात् । **बृहन्नारदीये** वनस्थंप्रक्रम्य—अधःशायीब्रह्मचारीपंचयज्ञपरायणः । **शूद्रस्याधिकारमाह याज्ञवल्क्यः**—भार्यारतःशुचिर्भृत्यभर्ताश्राद्धक्रियारतः । नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेत् । सर्वत्रमहाकार्येनमस्कारविध्यर्थोमंत्रशब्दइत्या**परार्कः** । **कौमुद्यांमाधवीयेच**—स्वाहाकारेनमस्कारोमंत्रःशूद्रेविधीयते । तेनशूद्रःपाकयज्ञैर्यजेतब्रह्मवान्स्वयम् । नमस्कारमंत्रोदेववताभ्यःपितृभ्यइति**मिताक्षरा** । त्रिरावर्तितोनमःशब्दइतिपृथ्वीचंद्रः ॥ ॥ **अथविधिस्तैत्तिरीयश्रुतौ**—ब्रह्मयज्ञेनयक्ष्यमाणःप्राच्यांदिशिग्रामादच्छदिर्दर्शउदीच्यांवोदितआदित्येदक्षिणतउपवीयोपविश्यहस्तावनिज्यत्रिराचामेद्द्विःपरिमृज्यसकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभ्ययत्सव्यंपाणिंपादौप्रोक्षति दर्भाणांमहदुपस्तीर्योपस्थंकृत्वाप्राङासीनःस्वाध्यायमधीयीतदक्षिणोत्तरौपाणीपादौकृत्वासपवित्रावोमितिप्रतिपद्यतेत्रीनेवप्रयुक्तंभूर्भुवःस्वरित्याहाथसावित्रीगायत्रीत्रिरन्वाहपच्छोर्धर्चशोनवानमथोप्रज्ञातयैवप्रतिपदाछंदांसिप्रतिपद्यतइति । वामपादांगुष्ठोपरिदक्षिणपादांगुष्ठंनिधायपादपार्ष्णिमेलनेनोपस्थमिति**चंद्रोदयः** । इतरेतरपादव्यत्यासेनोपवेशनंतदिति **स्मृतिमंजर्यांमदनपारिजातेच** । वामोरूपरिदक्षिणजानुनिधानंतदिति**वृत्तिकृत्** । **कारिका**—कृत्वोपस्थंकरेसव्येउत्तानेप्राग्दिगंगुलौ । पवित्रेस्थापयेदुक्तेप्रागग्रेदक्षिणेनतु । न्यचंप्रागंगुलंतेनसंदध्याद्दक्षिणंकरम् । **शौनकः**—सव्यस्यपाणेरंगुष्ठप्रदेशिन्योस्तुमध्यतः । दक्षिणस्यांगुलीर्न्यस्येच्चतस्रोंगुष्ठ

वर्जिताः । तथासव्यकरांगुष्ठंदक्षिणांगुष्ठवेष्टितम् । कुर्वीतचैवंसंवद्धौपाणीदक्षिणसक्थनि । **चंद्रिकायांयोगयाज्ञवल्क्यः**—प्रदक्षिणंस मावृत्यनमस्कृत्वोपविश्यच । दर्भेषुदर्भपाणिभ्यांसंहताभ्यांकृतांजलिः । **विष्णुः**—ॐकारंव्याहृतीस्तिस्रःसावित्रीचतथाऋचम् । मनस्येता ननुस्मृत्यवेदादीन्समुपक्रमेत् । **तैत्तिरीयब्राह्मणे**—यत्स्वाध्यायमधीयीतैकामप्यृचयजुःसामवातद्ब्रह्मयज्ञःसंतिष्ठतइति । **व्यासः**—वेद मादौसमारभ्ययथोपर्युपरिक्रमात् । यदधीतेऽन्वहशक्त्यास्वाध्यायंतंप्रचक्षते । उपर्युपरीतिप्रथमेऽह्निवेदादिंपठित्वा तदुत्तरंकंचिद्वेदभागंपठे-त्तदन्यदिनेषुवेदादिपठित्वातदुत्तरान्वेदभागान्पठेदितिचंद्रिका । प्रत्यहवेदादिपाठोनास्तीतिपृथ्वीचंद्रः । स्वशाखाध्ययनंविप्रब्रह्मयज्ञ इतिस्मृत इति **लिंगपुराणादनेकशाखाध्यायिनः** स्वशाखामात्राध्ययनाद्ब्रह्मयज्ञसिद्धिरित्यपरार्कः । **याज्ञवल्क्यः**—वेदाथर्व पुराणानिसेतिहासानिशक्तितः । जपयज्ञप्रसिद्ध्यर्थंविद्यांचाध्यात्मिकींजपेत् । **मनुः**—सावित्रीमप्यधीयीतगत्वारण्यसमाहितः । **तैत्तिरी यश्रुतौ**—नमोब्रह्मणइतिपरिधानीयांत्रिरन्वाहापउपस्पृश्यगृहानेत्ययद्ददातिसादक्षिणेति । ब्रह्मयज्ञस्यावतयोर्विद्युदृष्टिमंत्रौपठनीयौ सर्वे षुयज्ञक्रतुष्विति होष्यन्नपउपस्पृशेत् विद्युदसिविद्यमेपाप्मानमिति अथहुत्वोपस्पृशेत् वृष्टिरसिवृश्चमेपाप्मानमिति यक्ष्यमाणोवेष्ट्वावेति **तैत्तिरीयश्रुतेः**। **श्रुतिभाष्येमाधवोप्येवम्** । इदंतैत्तिरीयमात्रपरम् । अन्यथानहृचस्यवैश्वदेवादावपितदापत्तिः । होष्यन्नित्युक्तेःसहो मकेष्वेवयज्ञेष्विदमितिकेचित् । **पारिजातेसंग्रहे**—नकुर्यादासनस्थस्तुब्रह्मयज्ञकथचन । **योगयाज्ञवल्क्यः**—जप्त्वाथप्रणवंचापिततत स्तर्पणमाचरेत् । तत्रैवस्मृत्यंतरे—कुशानुत्तरतःक्षिप्त्वातथाचमनमाचरेत् । **तैत्तिरीयश्रुतौ**—ग्रामेमनसास्वाध्यायमधीयीतेति । **मनुः**—वेदोपकरणेचैवस्वाध्यायेचैवनैत्यके । नानुरोधोस्त्यनध्यायेहोममंत्रेषुचैवहि । **आपस्तंबस्तु**—मनसाचानध्यायेविद्युतिचाभ्यग्रायांस्तन यित्नावप्रायत्येप्रेतान्नेनीहारेचश्राद्धभोजनएवैकेकइत्याह । **अथगौतमः**—अथयदिवातोवायात्स्तनयेद्वाविद्योततेवाऽवस्फूर्जेद्वैकांवर्चमेकं

वायजुरेकंवासामाभिव्याहरेद्भूर्भुवःस्वःसत्यंतपःश्रद्धायांजुहोमीतिचैतत्तेनैवचास्यैतदहःस्वाध्यायउपात्तोभवतीति । एष्वेवाल्पपाठोनान्यानध्या येष्विति **माधवप्रयोगपारिजातौ** । अनध्यायांतरेष्वपीतिचं**द्रिकामदनरत्नमदनपारिजाताः** । अनध्यायेष्वल्पंपर्वण्यल्पतरंपठे दितिदेवजानीये ॥ ॥ **पंचयज्ञाकरणेप्रायश्चित्तमाहदक्षः**—अनिवर्त्यमहायज्ञान्योभुङ्क्तेप्रत्यहंगृही । अनातुरःसतिधनेस कृच्छ्रार्धेनशुध्यति । **बौधायनः**—एतेभ्यःपंचयज्ञेभ्योयद्येकोपितुहीयते । मनस्वत्याहुतिस्तत्रप्रायश्चित्तंविधीयते । द्व्यहंवापित्र्यहंवापि प्रमादादकृतेषुतु । तिस्रस्तंतुमतीर्हुत्वाचतस्रोवारुणीर्जपेत् । दशाहंद्वादशाहंवाविनिवृत्तेषुसर्वतः । चतस्रोवारुणीर्हुत्वाकार्यस्तांतुमतश्चरुः । तथा—अकृत्वापंचयज्ञांस्तुभुक्त्वाचांद्रायणंचरेत् । **उज्वलायांतु**भोजनोत्तरंनब्रह्मयज्ञः किंतूपवासःप्रायश्चित्तमेवकार्यमित्युक्तम् ॥ ॥

अथतर्पणम् । तस्यमुख्यकालोमध्याह्नएव । **कात्यायनादिसूत्रेषु**माध्याह्निकप्रकरणेपाठात् । यत्तु—प्रहराभ्यंतरेपुत्रःपित्रेदद्याज्जला ञ्जलीन् । द्वितीयेतुपयोज्ञेयंतृतीयेजलमेवच । चतुर्थेशोणितंज्ञेयमितिधर्मविदोविदुरिति । तत्काम्यपरम् । नित्यस्यसायंकालावधिकत्वात् । यत्तुतर्पणंप्रकृत्य—तस्मात्सदैवकर्तव्यमकुर्वन्महतैनसा । युज्यतेब्राह्मणःकुर्वन्विश्वमेतद्बिभर्तिसइति । तत्रसदेतियावज्जीवन्यायेनविहितमध्याह्न परम् । यत्तुप्रातःस्नातेनोदयात्पूर्वकृततर्पणेनमध्याह्नेस्नानाभावेपिपुनस्तर्पणंकार्यम् । अहःकालिकतर्पणस्यावश्यकत्वात् । उदयोत्तरंप्रातस्तर्पण करणेतेनैवनिर्वाहान्नपुनस्तर्पणम् । वैधस्नानपक्षेतुपुनःकरणमिति**वाचस्पतिराचारचंद्रोदयश्च** । तन्न । उदयात्पूर्वंतर्पणेविध्यभावात् । स्नानप्रकरणपाठादावृत्तिरितिचेत्तृतीयस्नानेप्यावृत्त्यापत्तेः । मध्याह्नसंध्यावृत्त्यापत्तेश्च । **वसिष्ठः**—जपित्वैवंततःकुर्याद्देवर्षिपितृतर्पणम् । तर्पणस्यब्रह्मयज्ञानंतर्यंप्रातर्होमोत्तरंब्रह्मयज्ञपक्षइतिचं**द्रिका** । **वृद्धपराशरेण**तुमध्याह्नसंध्योत्तरंतर्पणमुक्तं—उपास्यविधिवत्संध्यामुपस्था यचभास्करम् । गायत्रीशक्तितोजप्त्वातर्पयेद्देवताःपितॄन् ॥ ॥

अत्राधिकारिणआहमनुः—चतुर्णामपिवर्णानांतर्पणंतुभवेत्सदा । वर्णानामितिनकर्मपष्ठी । सवर्णेभ्योजलदेयंनासवर्णेभ्यएवचेति **योगयाज्ञवल्क्येन** असवर्णतर्पणनिषेधात्असवर्णपदहीनपरम् ।—ब्राह्मणस्त्वन्यवर्णानांनकुर्यात्कर्मकिंचन । कामाल्लोभाद्भयान्मोहात्कृत्वात जातितांव्रजेदितिब्राह्मेऽसवर्णतर्पणेतज्जातित्वापत्तिहेतूक्तेः । उत्तमजात्यापत्तेस्त्विष्टत्वादिति **मदनपारिजातः** । असवर्णःपितातर्प्यइति **गोविंदराजहरनाथौ** । हीनवर्णामातातर्प्येतिगोविंदराजः । **शातातपः**—तर्पणंतुशुचिःकुर्यात्प्रत्यहंस्नातकोद्विजः । **वृद्धनार दीये**—कुर्यात्प्रतिदिनंवर्णाब्रह्मयज्ञचतर्पणम् । इदंनित्यं । प्रत्यहमित्याद्युक्तेः ।—देवताश्चमुनींश्चैवपितॄन्वैयोनतर्पयेत् । देवादीनामृणीभूत्वान रकसव्रजत्यधइतिहेमाद्रौ **ब्रह्मवैवर्तेअकरणे**प्रत्यवायश्रुतेश्च । जीवत्पितृकस्तुदेवर्षिंमनुष्यानेवतर्पयेत् । जीवत्पितृकोप्येतानितिका त्यायनसूत्रात् । अत्रैतानेवेतिनियम्यते । जीवत्पितृकस्यवर्णत्वादेवप्राप्तेः । **हेमाद्रौचंद्रिकायांयोगयाज्ञवल्क्यः**—कव्यवाडनलं सोमयममर्यमणतथा । अग्निष्वात्तान्सोमपांश्चतथाबर्हिषदःपितॄन् । यदिस्याज्जीवपितृकएतान्दिव्यान्पितॄंस्तथा । येभ्यएवपितादद्यात्तेभ्योवापि प्रदापयेत् । येभ्यइतिसन्यस्तपतितपितृकादिपरंतीर्थपरंवेतिपृथ्वीचंद्रः । अत्र—सपितुःपितृकृत्येषुअधिकारोनविद्यते । नजीवतमतिक्रम्य किंचिद्दद्यादितिश्रुतिरिति । पित्र्यजीवत्पितुर्नोक्तमित्यादिस्मृतिभिर्जीवत्पितृकस्यसर्वपित्र्यनिषेधे उद्वाहेपुत्रजननइत्यादिवत्प्रतिप्रसवाभावात् मातृमातामहतर्पणनेतिदक्षः । प्रादेशमात्रमुद्धृत्यसलिलप्राङ्मुखःसुरान् । उदङ्मनुष्यांस्तर्प्येतपितॄन्दक्षिणतस्तथा । उदक् उदङ्मुखः । दक्षिणतो दक्षिणामुखः । **बौधायनः**—अनुतीर्थमपउपसिंचतीति देवानांदैवेनऋषीणामार्षेणपितॄणांपित्र्येणेत्यर्थः । समाख्यायाअनन्यार्थ त्वात् । **अपरार्केविष्णुसमुच्चये**—प्राजापत्येनतीर्थेनमनुष्यांस्तर्पयेत्पृथक् । **वृद्धपराशरः**—दक्षिणजानुमूलग्नोदेवेभ्यःसेचयेज्जलम् । **पुलस्त्यः**—मनुष्यतर्पणकुर्वन्नकचिज्जानुपातयेत् । **पितृतर्पणंप्रक्रम्यवृद्धपराशरः**—भूलग्नसव्यजानुश्चदक्षिणाग्रकुशेनच । तर्पयेदिति

संबंधः । **बौधायनः**—अथनिवीतीऋषीस्तर्पयेदिति । यत्तुउपवीतीऋषींस्तर्पयेदित्याचारादर्शस्तद्वचोविरुद्धम् । **चंद्रोदयेपाद्मे**—कृतोपवीतीदेवेभ्योनिवीतीचभवेत्ततः । मनुष्यांस्तर्पयेद्भक्त्याऋषिपुत्रानृषींस्तथा । अपसव्यंततःकृत्वासव्यंजानुचभूतले । पितॄंस्तर्पयेदितिसंबंधः । **वृद्धगार्ग्यः**—नकुर्वीतापसव्यंचनकुर्वीतापिमुंडनम् । अपसव्यनिषेधःप्रकोष्ठादुपरि । अपसव्यंद्विजाग्र्याणांपित्र्येसर्वत्रकीर्तितम् । आप्रकोष्ठात्प्रकर्तव्यंमातापित्रोस्तुजीवतोरितिवचनादित्युक्तंजीवत्पितृकनिर्णयेपितृचरणैः । **हेमाद्रौशंखलिखितौ**—अपसव्यंवासोयज्ञोपवीतेकृत्वेति । तत्रैवप्रचेताः—अपसव्ययज्ञोपवीतवाससइति । वासउत्तरीयम् । **बौधायनस्तु**—यज्ञोपवीतान्यपेशलानिकृत्वेति । अत्रविकल्पःशाखाविशेषपरत्वेनव्यवस्थितिरितिहेमाद्रिः । **लौगाक्षिः**—नजीवत्पितृकःकुर्यात्तिलैःकृष्णैस्तुतर्पणम् । कृष्णपदंशुक्लतिलनिवृत्त्यर्थमितिकेचित् । कृष्णत्वस्योद्देश्यविशेषणत्वेनाविवक्षितत्वात्तर्पणेतिलमात्रनिषेधइत्यन्ये । **गोभिलः**—लोमसंस्थांस्तिलान्कृत्वायस्तुतर्पयतेपितृन् । पितरस्तर्पितास्तेनरुधिरेणमलेनच । **स्मृत्यर्थसारे**—वामहस्तेतिलान्क्षिप्त्वाजलमध्येतुतर्पयेत् । स्थलेशाख्यांतटेपात्रेरोममूलेन(?)कुत्रचित् । **कल्पतरौमरीचिः**—वामहस्तेतिलाग्राह्यामुक्त्वाहस्तंतुदक्षिणम् । तिलग्रहणंनांगुष्ठेन ।—अंगुष्ठेनतिलैःकुर्याद्देवतापितृतर्पणम् । रुधिरंतद्भवेत्तोयंप्रदाताकिल्विषीभवेदितिब्राह्मोक्तेः । **मरीचिः**—मुक्तहस्तेनदातव्यंमुद्रांतत्रनदर्शयेत् । मुद्रातर्जन्यंगुष्ठयोगः । **चंद्रिका हेमाद्र्योर्मरीचिः**—सप्तम्यांरविवारेचगृहेजन्मदिनेतथा । पक्षयोरुभयोराजन्सप्तम्यांनिशिसंध्ययोः । विद्यापुत्रकलत्रार्थीतिलान्पंचसुवर्जयेत् । **मदनरत्नेबौधायनः**—सप्तम्यांरविवारेचजन्मर्क्षदिवसेषुच । भानौभौमेत्रयोदश्यानंदाभृगुमघासुच । पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणम् । यस्तुगृहेतिलनिषेधः गृहेनिषिद्धंसतिलतर्पणंतद्बहिर्भवेत् । यद्युद्धृतंप्रसिंचेत्तुतिलान्संमिश्रयेज्जले । अतोन्यथातुसव्येनतिलाग्राह्याविचक्षणैः ।

१ शाख्यातरे इति पाठ ।

सप्तम्यांभानुवारेचमातापित्रोःक्षयेऽहनि । तिलैर्यस्तर्पणंकुर्यात्सभवेत्पितृघातकः ।
सपृथकृतिलपरः । **स्मृतिरत्नावल्यांवृद्धमनुः**—सप्तम्यांभानुवारेचमातापित्रोःक्षयेऽहनि । तिलैर्यस्तर्पणंकुर्यात्सभवेत्पितृघातकः । श्रेयो
स्मृत्यर्थसारे—शोभनेशोभनदिनेनकुर्यात्तिलतर्पणम् । **हेमाद्रौकालिकापुराणे**—रवौशुक्रेत्रयोदश्यांसप्तम्यांनिशिसंध्ययोः । श्रेयो
र्थीब्राह्मणोजातुनकुर्यात्तिलतर्पणम् । यदिकुर्यात्ततःकुर्याच्छुक्लैरेवतिलैःकृती । **प्रयोगपारिजातेदेवजानीये**—नंदायांभार्गवदिनेकृत्तिका
सुमघासुच । मरण्यांभानुवारेचगजच्छायाह्वयेतथा । अयनद्वितयेचैवमन्वादिपुयुगादिपु । पिंडदानंमृदास्नाननकुर्यात्तिलतर्पणम् । मन्वादिपु
गादिषुनिषेधेमूलंचित्यम् । —मन्वाद्यासुयुगाद्यासुप्रदत्तःसतिलोजलिः । सहस्रवार्षिकींतृप्तिंपितॄणामावहेत्सदेति**कालादर्श**विरोधात् ।—
आसुतोयमपिस्नात्वातिलदर्भविमिश्रितम् । पितॄनुद्दिश्ययोदद्यात्सगतिंपरमांलभेदिति **मन्वादीःप्रक्रम्यनागरखंडाच्च** ।—वैशाखमासस्यच
यातृतीयानवम्यसौकार्तिकशुक्लपक्षे । नभस्यमासस्यचकृष्णपक्षेत्रयोदशीपंचदशीचमाघे । इत्युपक्रम्य—पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यः
प्रयतोमनुष्यः । श्राद्धंकृततेनसमाःसहस्रंरहस्यमेतत्पितरोवदंतीति**हेमाद्रौविष्णुपुराणात्** । **बौधायनः**—विवाहेचोपनयनेचौलेसति
यथाक्रमम् । वर्षमर्धतदर्धचनैत्यकेतिलतर्पणम् । संस्कारेपुतथान्येपुमासमासार्धमेवच । **स्मृतिरत्नावल्यांकात्यायनः**—वृद्धावनंतरश्चैव
यावन्मासःसमाप्यते । तावत्पिडान्नदद्यात्तुनकुर्यात्तिलतर्पणम् । अत्रमदीयः**संग्रहश्लोकः**—पित्रोःक्षयेमनुयुगादिपुकामनंदाजन्माहशुक्ररवि
भौममघासुयाम्ये । जन्मर्क्षवह्निभगृहव्ययनेनिशायांसध्यागजेचतिलतर्पणमत्यनिष्टम् । नदाःप्रतिपत्पष्ठ्येकादश्यः । यत्त्वेकादशीप्रकृत्यलघु
नारदीये—अकृतश्राद्धनिचयाजलपिंडविनाकृताइति तदेकादशीस्तुत्यर्थं पितृभिरेकादश्यांजलपिडोपयोगोनकृतइति । एतेनयेचैकादश्यां
श्राद्धतर्पणादिनिपेधमाहुस्तेनिरस्ताः । प्रतिगृहनिपेधेनपुत्रादीन्प्रत्यप्रवृत्तेः । अतएवपुत्रादिभिन्नश्राद्धादिनिपेधपरत्वमपिन । **स्मृत्यर्थसारे**—
तिथिवारसमायोगान्निषेधोयउदाहृतः । ऋषिभिस्तर्पणेनित्येनैमित्तंनतुबाध्यते । अतःसक्रांत्यादिनिमित्तेनिपिद्धदिनादावपिगृहेतिलतर्पणंकार्यं

तीर्थतर्पणवत् । तिथिवारग्रहणंनक्षत्रयोगादेरुपलक्षणम् । **कात्यायनः**—उपरागेपितुःश्राद्धेपातेमायांचसंक्रमे । निषिद्धेपिहिसर्वत्रतिलैस्तर्पण माचरेत् । संक्रमोऽयनभिन्नइति**प्रयोगपारिजातः**। तन्न—उपप्लवेचंद्रमसोरवेश्चत्रिष्वष्टकास्वप्ययनद्वयेच । पानीयमप्यत्रतिलैर्विमिश्रंदद्या त्पितृभ्यःप्रयतोमनुष्यः । श्राद्धंकृतंतेनसमाःसहस्रंरहस्यमेतत्पितरोवदंतिइति **हेमाद्रौविष्णुपुराण**विरोधात् । अत्रपानीयमितिवचनादा वश्यकतायनश्राद्धद्वयस्योच्यतइति**हेमाद्रौ** । मकरंप्रकृत्य**कृत्यकल्पद्रुमे**—तिलैःस्नानंप्रकुर्वीततिलैरेवाशनंबुधः । देवतानांपितॄणांचतिलै स्तर्पणमाचरेत् । अतः**पारिजातोक्तिः**श्चिन्त्या । **कात्यायनोक्तिः**स्नानांगतर्पणपरा । मुख्येतिलनिषेधएवेति । **देवजानीये**गंगादौननि षेधः—तीर्थेतिथिविशेषेचगंगायांप्रेतपक्षके । निषिद्धेपिहिसर्वत्रतिलैस्तर्पणमाचरेदितिपृथ्वी**चंद्र**धृतवचनात् । तीर्थपदेनैवगंगाग्रहेपुनर्गंगाग्र हःसर्वदातत्रतिलप्राप्त्यर्थः अन्यतीर्थेषुप्राप्तिदिनेएवेति । तिथितीर्थविशेषेपुकार्यंप्रेतेचसर्वदेति**प्रयोगपारिजातेबौधायनोक्तेश्च** । संक्रांत्या दिनिमित्तेषुस्नानांगेतर्पणेद्विजः । तिथिवारनिषिद्धेपितिलैस्तर्पणमाचरेदिति**योगयाज्ञवल्क्योक्तेश्च** । **हारीतः**—वसित्वावसनंशुष्कंस्थले विस्तीर्णबर्हिषि । विधिज्ञस्तर्पणंकुर्यात्पात्रेषुनकदाचन । यत्राशुचिस्थलंवास्यादुदकेदेवताःपितॄन् । तर्पयेत्तुयथाकाममप्सुसर्वंप्रतिष्ठितम् । **विष्णुः**—आर्द्रवासादेवर्षिपितृतर्पणमंभःस्थएवकुर्यात्परिवर्तितवासाश्चेत्तीर्थादुत्तीर्येति । अंभःस्थइतिकातीयान्यपरम् । तेषामुत्तीर्यतर्पणंकार्यमि त्युक्तेरित्य**ाचारादर्शः** । **हेमाद्रौषट्त्रिंशन्मते**—नतर्पयेत्पितॄन्दिव्यान्जलसंस्थःस्थलेक्वचित् । स्थलस्थस्तुक्वचित्कुर्याज्जलेप्यशुचिचे त्स्थलम् । **बौधायनः**—वस्त्रंपरिधायाद्भिरेवाप्सुयथोत्तरंदेवान्पितॄंस्तर्पयेदिति । अप्स्वेवेत्यर्थः ।

उद्धृतजलेनतर्पणेविशेषमाह **हारीतः**—पात्राद्वाजलमादायशुभेपात्रेविनिक्षिपेत् । जलपूर्णेतथागर्तेनस्थलेतुविबर्हिषि । **हेमाद्रौ गोभिलः**—नोदकेषुनपात्रेषुनक्रुद्धोनैकपाणिना । नोपतिष्ठतितत्तोयंयन्नभूमौप्रदीयतइति तत्स्थलस्थस्यानुद्धृततर्पणपरम् । **पितामहः**—

हेमरूप्यमयंपात्रंताम्रकांस्यसमुद्भवम् । पितॄणांतर्पणेपात्रंमृन्मयंतुपरित्यजेत् । इदमधिकरणपात्रमितिसर्वेनिबंधाः । यस्तुतर्पणेकांस्यनिषेधः सभिन्नपरइतिस्**मृतिरत्नावली** । विकल्पस्तुयुक्तः । **शंखलिखितौ**—नेष्टकाचितेपितॄंस्तर्पयेत् वापीकूपतडागोदपानेषुससपंचत्रीन्वापिंडा नुद्धृत्यदेवपितॄंस्तर्पयेदिति । एतन्नद्यभावइति**हेमाद्रिः** । **भारते**—यइच्छेत्सफलंजन्मजीवितंश्रुतमेववा । सपितॄंस्तर्पयेद्गंगामभिगम्यसरि द्वराम् । **पितृगाथासुयमः**—अपिनःसकुलेभूयाद्योनोदद्याज्जलांजलीन् । नदीषुबहुतोयासुशीतलासुविशेषतः । **हारीतः**—नस्रवंतीवृथा तिक्रामेदिति । इदमपिस्नानंकृत्वातर्पणाकरणे—यस्तुतीर्थेनरःस्नात्वानकुर्यात्पितृतर्पणम् । पिबंतिदेहनिःस्रावंपितरोस्यजलार्थिनइतिप्र**घट्टके** वचनात् । इदमपिख्याततीर्थपरम् ।—गिरिषुख्याततीर्थेषुनदीषुचविशेषतः । साकांक्षाःपितरोनित्यंतिष्ठंतिसलिलार्थिनइतितत्रैवोक्तेः । केचि त्तु—पितॄनतर्पयित्वातुनदींस्तरतियोनरः । तस्यास्रक्पानकामास्तेभवतिभृशदुःखिताइतिवचनान्नद्यां वारुणस्नानाभावेपितर्पणमावश्यकमित्याहुः । **बोपदेवः**—तातांबात्रितयंसपत्नजननीमातामहादित्रयंसस्त्रिस्त्रीतनयादितातजननीस्वभ्रातरस्तस्त्रियः । तातांबात्मभगिन्यपत्यधवयुग्जाया पितासद्गुरुःशिष्याप्ताःपितरोमहालयविधौतीर्थेतथातर्पणे । अस्यार्थः—पितामह्यादिशब्दैःपितृजननीत्वाद्युच्यतेनपितामहपत्नीत्वादीति**हेमा द्रिः** । युक्तंचैतत् । पितृव्यमातुलमातामहपितामहाइतिसूत्रेपितामहादिशब्दस्यडामहजंतत्वनिपातनात्तस्यचस्त्रियांमातरिपच्चेतिपित्वविधेःषि द्गौरादिभ्यश्चेतिङीष्सिद्धेः पुंयोगेङीष्भावात् पितुर्मातापितामहीत्यमराच्च । प्रतिपादितंचैत**द्भाष्यकाशिकारायमुकुटादौ** । सपत्नभ्रातृ भगिनीपितृष्वस्रादीनांनभ्रातृत्वादिनातर्पणम् । यत्तुपित्रादित्रयमिलितमुद्दिश्यांजलित्रयंदेयमित्या**चारादर्श**स्तत्पित्रेपितामहायप्रपितामहा येत्यादि**शंखादि**विरोधादुपेक्ष्यम् । सस्त्रीत्युक्तेर्मातामहाःसपत्नीकाइति**त्रिस्थलीसेतौ**वचनाच्चतर्पणेपिमातामहानांसपत्नीकत्वेनोल्लेखइतिके चित् । तन्न । अन्नतर्प्यसंग्रहेतात्पर्येणोल्लेखेतात्पर्याभावात् । मातामहीनामजल्येकत्वत्रित्वविचारायोगात् मातुलान्यादीनांपृथक्तर्पणविधेर

नौचित्यापत्तेश्च । अथमातामहीनांचसपत्नीनामनंतरमित्यादिवाक्यविरोधाच्च । अतस्तर्पणंपृथगेव । तर्पणीयत्वावच्छेदकस्यमातृजनकत्वस्यो भयत्रतुल्यत्वेनविनिगमनाविरहेणमातुलयोरिवेतरेतरसाहित्यस्यवक्तुमशक्यत्वात् । एवंश्वश्रूश्वशुरयोःपृथक्तर्पणं भार्याजनकत्वस्यावच्छेदकस्याभे दात् । मातुलान्यास्तुनपृथक्तर्पणं मातुलस्यतत्संबंधघटकत्वात् । यदपि मातुलानीचदुहितेतिमातुलान्याःपृथक्श्रवणंतन्मातुलस्यसपत्नीकत्वेनै वतर्पणेउपपन्नंनपृथक्तर्पणगमकम् । एवंपितृव्यभ्रातृपुत्रपत्नीनामपि । एवंपितृष्वसुःसभर्तृकायास्तर्पणं तस्यास्तत्संबंधघटकत्वात् । यत्तुपितृष्वसुश्च तद्भर्तुरितिगारुडंतत्पूर्ववदेवोपपन्नम् । एवंमातृष्वसृभगिनीपुत्रीणामपि । भागिनेयदौहित्रयोर्नपृथक्तर्पणं किंतुभगिनीसापत्यां पुत्रींसापत्यामि त्येव । पैतृष्वसेयमातृष्वसेयमातुलादीनांतुपृथक् बंधुत्वस्यावच्छेदकस्यभेदात् । भागिनेयत्वंहिभगिन्यपत्यत्वम् । बंधुत्वंतुनपैतृष्वसेयादि समनियत परस्परव्यभिचारात् । बंधवस्त्वात्मपितृमातृबंधवः । केचित्तुसर्वेषांपृथक्तर्पणमाहुः । भ्रातुर्ज्येष्ठस्यैवतर्पणंनकनिष्ठस्य । ज्येष्ठभ्रा तृंस्तर्पयेदितिहारीतोक्तौज्येष्ठग्रहणात् । यत्तुचंद्रोदयेबौधायनः—यदिस्नेहेनकुर्यातांसपिंडीकरणंविना । गयायांतुविशेषेणज्यायानपि समाचरेदिति तत्सपिंडीकरणपर्युदासाद्दशाहांतकृत्यपरम् । अन्यथापुनर्गयाश्राद्धविधिवैयर्थ्यात् । अन्याभावेकुर्यादेव । एवंपुत्रस्यापि । नच मातानचपिताकुर्यात्पुत्रस्यपैतृकमितिकात्यायनोक्तेः—अन्याभावेकुर्यादेव । एवंपत्न्याअपि । नपत्न्यैतुपतिर्दद्यादेषधर्मःसनातनइतिस्मृति रत्नावल्यांवचनात् पत्न्यैचापिपतिर्दद्यादितिगयायातुर्विधानाच्च अन्याभावेकुर्यात् । पितृष्वस्रादिसत्वे नतद्भर्त्रादितर्पणंद्वारलोपात् । मातु लादिसत्वे नतत्स्त्रीणाम् । जननीसत्वेसपत्नमातृमरणेपितस्याएवतर्पणं नमातामह्यादीनांजनन्यास्तत्रद्वारत्वात् । नचपितृपत्न्यःसर्वामातरइति तासामपिद्वारत्वम् । उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपितेत्युक्तेर्जीवत्यपिजनकेब्रह्मदश्राद्धतर्पणाद्यापत्तेः । नचैवंमातृमरणे पितामहीसत्वेसप त्नपितामहीमरणेपिनप्रपितामहीतर्पणंस्यात् । यस्यपिताप्रेतःस्यादितिश्राद्धन्यायेनोपपत्तेः । भारते—ज्येष्ठामातृसमाचैवभगिनीभरतर्षभ ।

। वयंतुनपूर्वशेषवाक्य
भ्रातुर्भार्याचतद्वत्स्याद्यस्याबाल्येस्तनंपिबेत् । स्तनपानमुभयोःशेषइतिकेचित् । एकार्थांतर्गतत्वेनभ्रातृपत्न्याएवेत्यन्ये । वयंतुनपूर्वशेषवाक्य
भेदेनयोजयामः । यस्या स्तनंपिबेत्सायाकापिमातृसमातस्याअपितर्पणम् ॥ ॥ **विधवायाविशेषः काशीखंडे**—तर्पणप्रत्यहंकुर्याद्भ
र्तुःकुशतिलोदकैः । तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकम् । इदंपुत्रपौत्राभावपरमिति पितामहचरणाः । **मदनपारिजातेप्येवम्** । **हे**
माद्रौ—द्व्यामुष्यायणकादद्युर्द्वाभ्यांपिंडोदकेपृथक् । तर्पणंसंन्यासिनानकार्यम् । नकुर्यात्सूतकभिक्षुःश्राद्धपिंडोदकक्रियामितित्रिस्थली
सेतौवचनात् । **शंखः**—पूर्वाग्रैस्तर्पयेद्देवानुदगग्रैश्चमानवान् । तानेवद्विगुणीकृत्यतर्पयेत्प्रयतःपितॄन् । **हेमाद्रौनारदीये**—तर्पणादीनि
कार्याणिपितॄणांयानिकानिचित् । तानिस्युर्द्विगुणैर्दर्भैःसमपत्रैर्विशेषतः । **दक्षः**—अग्रैस्तुतर्पयेद्देवान्मनुष्यान्कुशमध्यतः । पितॄस्तुकुशमूलाग्रै
र्विधिःकौशेयथाक्रमम् । **काशीखंडे**—अगुष्ठद्वयमध्येतुकृत्वादर्भानृजून्द्विजः । कव्यवाडनलादींश्चपितॄन्दिव्यान्प्रतर्पयेत् । प्राचीनावीति
कोदर्भैर्द्विगुणैस्तिलमिश्रितैः । **शंखः**—विनारूप्यसुवर्णेनविनाताम्रतिलेनच । विनादर्भैश्चमन्त्रैश्चपितॄणांनोपतिष्ठते । हेम्नाचसहयद्दत्तंक्षीरेण
मधुनाथवा । तदप्यक्षय्यतांयातिपितॄणांतुतिलोदकम् । **रामायणे**—पादशौचंविनाभ्यंगंतिलहीनंचतर्पणम् । सर्वतत्रिजटेतुभ्यंयच्चश्राद्धम
दक्षिणम् । **सत्यव्रतः**—खड्गमौक्तिकहस्तेनकर्तव्यंपितृतर्पणम् । मणिकांचनदर्भैर्वानशुद्धेनकदाचन । अत्रसंभवेसमुच्चयः ।—एषामन्य
तमेनापियुक्तपाणिःसमाचरेत् । द्वाभ्यांवाथत्रिभिर्वापिसर्वेषांतर्पणंबुधइतिहे**माद्रौमरीच्युक्तेः** । तिलानामप्यलाभेतुसुवर्णरजतादिकम् ।
तदभावेनिषिंचेत्तुदर्भैर्मंत्रेणवाप्यथेतिचं**द्रोदयेयोगयाज्ञवल्क्योक्तेश्च** । **प्रयोगपारिजातेवाराहे**—तर्जन्यांरजतंधृत्वापितृभ्योयत्प्रदी
यते । अतोस्तिपरमाणूनामस्यांतोनैवविद्यते । **हारीतः**—कांचनेनतुपात्रेणराजतौदुंबरेणच । दत्तमक्षय्यतांयातिखड्गेनाश्मकृतेनच । **मनुः**—
राजतैर्भाजनैरेषामथवारजतान्वितैः । वार्यपिश्रद्धयादत्तमक्षय्यायोपकल्पते । **भारते**—अमावास्यांतुयेमर्त्याःप्रयच्छंतितिलोदकम् । पात्रमौ

दुंवरंगृह्यमधुमिश्रंतपोधनाः । कृतंभवतितैःश्राद्धंसरहस्यंयथार्थवत् । खड्गपात्रादिधारणंचांजलिमध्ये । लघुपात्रंकरेकृत्वासौवर्णखाड्गमेववा । राजतंताम्रजंवापितेनसंतर्पयेत्पितॄनितिहेमाद्रौछागलेयोक्तेः । एतेनखड्गपात्रेणतर्पणंनेतिवदन् **मदनपारिजातो**ऽपास्तः ॥

अंजलिसंख्या । **हेमाद्रौकौर्मे**—देवतानांतुसर्वासामेकैकांजलिरिष्यते । तत्रैव**ब्रह्मांडे**—अंजलिद्वितयंदद्याद्देवान्संतर्पयन्बुधः । तत्रैव**विष्णुपुराणे**—त्रिरपःप्रीणनार्थायदेवानामपवर्जयेत् । तथर्षीणांयथान्यायंसकृच्चापिप्रजापतेः । **ब्रह्मांडे**—ऋषीणांचमनुष्याणांसकृद्देवप्रदीयते । **कौर्मे**—ऋषीणामेकएवस्यान्मनुष्याणांद्वयंस्मृतम् । अत्रयथाशाखंव्यवस्था । शाखायामंजलिसंख्यानुक्तौविकल्पइति**हेमाद्रिः** । **शंखः**—एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः । अर्हंतिपितरस्त्रींस्त्रींस्त्रियस्त्वेकैकमंजलिम् । **हेमाद्रौकौर्मे**—त्रयस्त्रयःपितॄणांतुस्त्रीणामेकैकइष्यते । पितृपदेनदिव्यपितरोप्युच्यंतइति**पृथ्वीचंद्रः** । **पैठीनसिः**—तिलोदकांजलींस्त्रींस्त्रीनुच्चैरुच्चैर्विनिक्षिपेत् । उच्चैरितिपित्र्यंजलिभ्यः पितामहांजलयःकिंचिदुच्चाः ततःप्रपितामहस्येति **हेमाद्रिः** । नच—यश्चैनमुत्पादयतेयश्चैनंत्रायतेभयात् । यश्चास्यकुरुतेवृत्तिंसर्वेते पितरस्त्रयइति**भारता**देषामंजलित्रयापत्तिः । नित्यत्वबाधनेतात्पर्यात् । अन्यथासपत्नमातुरपितत्वापत्तिः । मात्रादिभ्योप्येकैकांजलिरितिश्राद्ध**हेमाद्रिः** । वस्तुतस्तुस्त्रीपदंमात्रादिभिन्नपरम् ।—मातृमुख्यास्तुयास्तिस्रस्तासांदद्याज्जलांजलीन् । स्त्रींस्त्रीन्दद्यादथान्यासांस्त्रीणामेकैकमंजलिमितिचं**द्रोदये शालंकायनोक्तेः** । मातुस्त्रीनंजलीन्दद्यादन्यासामेकमंजलिम् । सपत्न्याचार्यपत्नीनांद्वौद्वौदद्याज्जलांजलीनिति**काशीखंडा**त्सापत्नमात्राचार्यपत्नीनांत्रीन् । **हेमाद्रौब्रह्मांडे**—गुर्वाचार्यश्वशुराणांसुहृत्संबंधिनांसकृत् । मातामह्यादीनामेकस्त्रयोवा ।—मातामह्यादिसर्वासामेकैकंतुतिलांजलिम् । दद्यात्तीर्थविशेषेणधर्मपरममास्थितइति**चंद्रिकायां गारुडात्** । मातृमातामहांस्तद्वत्स्त्रींस्त्रीनेवत्रिभिस्त्रिभिः । मातामहीश्चयेप्यन्येगोत्रिणोदातृवर्जिताः । तानेकांजलिदानेनप्रत्येकंचपृथक्पृथगिति**मदनरत्ने**व्यासोक्तेश्चेति

केचित्। अन्येतुमातामह्यादीनामंजलित्रयम् । **गारुडे** मातामह्यादिपदेअतद्गुणसंविज्ञानबहुव्रीहिणामातामह्यादिभिन्नानामेकांजलिविधाना दित्याहुः। तन्न। मातामह्याद्यादीतिपाठापत्तेः । अन्यथामातामह्याएवांजलित्रयापत्तेः । विरूपैकशेषेमानाभावात्। मातामह्यादीनामंजलि द्वयविधानेनानौचित्यापत्तेश्च। **व्यासोक्तौ**चस्वार्थे द्वितीयाप्रथमार्थे। अग्रेअपिशब्दात् मातामहानांत्वंजलित्रयम्।—पितॄणांप्रीणनार्थायत्रिरपः पृथिवीपते। पितामहेभ्यश्चतथाप्रीतयेप्रपितामहान्। मातामहायतत्पित्रेतत्पित्रेचसमाहितः। **इतिविष्णुपुराणात्**। मातृमातामहांस्तद्वत्स्त्री स्त्रीनेवत्रिभिस्त्रिभिरितिव्यासोक्तेश्चेतिचंद्रोदयेमदनरत्नेच। द्वौद्वौमातामहानांचमातुलानांसकृत्तथेतिब्रह्मांडाद्धावितिहेमाद्रौ। विकल्पस्तु युक्तः॥ **अत्रप्रत्यंजलिमंत्रा**वृत्तिः। ननुमंत्रस्यतर्पणकरणत्वात्ससंख्यांजलिदानस्यैककर्मत्वादवरक्षोदिवइतिवत्सकृदेवमंत्रपाठःस्यात्। न। अवघातप्रोक्षणयोस्तएवव्रीहयःपुनरवहन्यंते सैववेदिःपुनःप्रोक्ष्यतइतिद्रव्यैकत्वान्नमत्रावृत्तिः। इहतुसत्यप्येककर्मत्वेप्रत्यंजलिद्रव्यभेदान्निर्वाप— लवन—सध्यार्घ्यदान—वन्मत्रावृत्तिरितिकेचित् । वस्तुतस्तुद्विस्त्रिरितिक्रियाभ्यावृत्तौसुज्विधानात्सख्यायाःकर्मसामानाधिकरण्याभावेनभेदक त्वाभावान्नतर्पणभेदः। किंतुत्रिरावृत्तिर्विशिष्टमेकंतर्पणंत्रिःप्रोक्षतीतिवत्तदंगचमत्रोनावर्तते । तर्पणानावृत्तेः । नचांजलिभेदान्मंत्रावृत्तिः। मत्रस्यतदनंगत्वात् । निर्वापेतुसंस्कार्यद्रव्यभेदान्मत्रावृत्तिः। नचेहद्वितीययांजलयःसंस्कार्याः । धात्वर्थकर्मतयासक्तुवद्द्वितीयोपपत्तेः । तर्पणस्ययागांगत्वेनांजलिकरणकत्वात्। नचमत्रोंऽजलिसंस्कारः। मत्रैश्चदेयमुदकमित्यादिस्मृतौ तृतीययायाज्यावदानक्रियांगत्वादजल्यगत्वे मानाभावात्। कारकाणांपरस्परासबंधाच्च । अतःपशुसोमाधिकरणन्यायेनप्रथमावगतयागैक्यानुरोधेनैकादशांगकरणकैकयागत्ववदंजलित्रय करणकमेकंतर्पणम्। **यत्तुपैठीनसिः**—उदीरतामितित्रिभिर्मत्रैस्त्रीनंजलीन्निनयेदिति । तत्राप्येकशेषस्यद्वद्वापवादत्वेनत्रयाणांमंत्राणामेकैक

स्मिन्निनयनेकरणत्वासंभवात्रीणित्रिभिर्मंत्रैःसाध्यंतइतिकोविरोधः । अर्घ्यदानेपिकराभ्यांतोयमादायगायत्र्याचाभिमंत्रितमितिव्यासोक्तौ मंत्रस्यद्रव्यसंस्कारकत्वात्तद्भेदान्मंत्रावृत्तिः । नेहतथेतिनमंत्रावृत्तिरितियुक्तमुत्पश्यामः । अत्रोदीरतामंगिरसआयंतुनऊर्जंपितृभ्योयेचेहमधु वाताइतितृचंजपन्प्रतिसिंचेदितिकात्यायनसूत्रेशतृप्रत्ययान्मंत्रपाठकालेप्रसेकः । मंत्रातैःकर्मादिरित्यादिपरिभाषा करणमत्रपरेतिहरिहरः । श्रीदत्तस्तुनेहायंवर्तमाने । एवंहिमंत्रपाठकालेप्रसेकेगोत्राद्युच्चारणाभावप्रसंगात् । किंतुवर्तमानसामीप्ये । अतोमंत्रपाठोत्तरमेकैकांजलिदान मित्याह । अत्रविनिगमनाभावेनप्रतिमंत्रंगोत्राद्युच्चारणम् । अन्यथाप्रत्यंजलिश्रीदत्तादिलिखितत्यागानुपपत्तेः । सर्वत्रपितृशब्दश्रुतेः । यत्तुप्रसे कतर्पणयोर्भेदइतिहरिहरस्तच्चिंत्यम् मानाभावात् शब्दांतराद्भेदइतिचेन्निनयनस्यापिभेदापत्तेः । त्वयैवतृप्यध्वमितिप्रसेकोक्तेश्च । समंत्रकांज लिदानंप्रसेकोंजलित्रयंतर्पणमितिभेदइतिचेत् त्वयादानार्थकत्वस्याप्यनंगीकारात् अतोयत्किंचिदेतत् ।

अंजलितर्पणनिर्णयः । सर्वत्रांजलिश्रुतेरंजलिनैवतर्पणमितिकेचित् । **अन्येतु**—अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु । देवर्षींस्तर्प येद्विद्वानुदकांजलिभिःपितॄनितिकौर्माद्देवादितर्पणेसव्यान्वारंभः । पितृतर्पणेत्वंजलिरेवेतिव्यवस्थामूचुः । अपरेतु—एकेनवाहस्तेनकुर्याद्दे वपितृतर्पणं सव्यान्वारब्धेनोभाभ्यांवेतिश्राद्धहेमाद्रौवसिष्ठोक्तेः सर्वत्रविकल्पमाहुः । अंजलिश्चनहस्तद्वययोगमात्रंकिंतुव्याकोशः । बह्वृचानांत्वनादेशेदक्षिणंप्रतीयादितितत्सूत्राद्धस्तेनैवतर्पणम् । **काशीखंडे**—तर्पयेच्छुचिभिस्तोयैस्तृप्यत्वितिसमुच्चरन् । **वृद्धपराशरः**— देवेभ्यश्चनमःस्वाहापितृभ्यश्चनमःस्वधा । अत्रचतुर्थीनिर्देशाद्ब्राह्मणैर्नमःस्वाहेत्यादिप्रयोगइतिपृथ्वीचंद्रः । अत्रचतुर्थ्यादेवादीनांदेवतात्वा वगमाद्द्रव्यदेवतासंयोगेनयागत्वकल्पनात्तर्पणेनममेतित्यागइत्युक्तंदेवजानीयेआचारादर्शेच ॥

तर्पणेविभक्तिविचारः हेमाद्रौसत्यतपाः—देवपितृमनुष्यादिस्वशाखाविधिचोदनात् । एकैकांजलिनातृप्तिंप्रथमांतेनवाचयेत् ।

चंद्रोदयेयोगयाज्ञवल्क्यः—तृप्यतामितिवक्तव्यंनाम्नातुप्रणवादिना। तत्रैवगोभिलः—गोत्रकस्तर्पणेप्रोक्तःकर्ताएवंनमुह्यति। शर्मन्नर्घादिकेकार्यंशर्मातर्पणकर्मणि। हेमाद्रौभविष्ये—चतुर्थीसर्वकार्येषुप्रथमातर्पणेस्मृता। छंदोगपरिशिष्टेबृहत्प्रचेतःस्मृतिनागरखंडेषु—सर्वत्रैवपितःप्रोक्तंपितातर्पणकर्मणि। हेमाद्रौव्यासः—प्रथमातर्पणेप्रोक्तासंबुद्धिमपरेजगुः। छंदोगपरिशिष्टे—नमोंतेतर्पयामीतिआदावोमितिचब्रुवन्। नमांतेइतिहेमाद्रौपाठः। यमः—संबंधनामगोत्रेणस्वधांतेनेनमोंततः। तर्पयामिपदेनैवतर्पयेत्पितृपूर्वकम्। तेनद्वितीयांतनामप्रयोगोपिसिद्धः। प्रयोगस्तुप्रथमापक्षेअस्मत्पितामुकशर्मामुकगोत्रस्तृप्यताम्। तृप्यत्वितिवा। द्वितीयापक्षेअस्मत्पितरममुकशर्माणममुकगोत्रंतर्पयामिनमःस्वधा। स्वधानमइतिवा। संबुद्धिपक्षेस्मत्पितरमुकशर्मन्नमुकगोत्रेदत्तेजलंनमःस्ववेति। वस्तुतस्तुबहुस्मृत्यनुसारात्प्रथमांतप्रयोगमेवयुक्तपश्यामः। बह्वृचानांगोत्रोच्चारःपूर्वं तस्यगोत्रनामचगृहीत्वेतिबह्वृचमन्त्रात्। यद्यपीदंप्रकरणांतरेउक्तंतथापिविशेषप्रायदर्शनादितिन्यायेनसर्वत्राप्येवंज्ञेयम्। हेमाद्रिस्तु—गुरुपुबहुवचनंकनिष्ठेषुचैकवचनं तेनसगोत्रनामग्रहणंपुरुषप्रतीतिचंद्रिकायांपैठीनसिस्मृतेः, सकारेणतुवक्तव्यगोत्रंरार्वत्रधीमतेतिमात्स्याच्चामुकसगोत्रानस्मत्पितॄनमुकशर्मणस्तर्पयामिस्वधानमइतिप्रयोगइत्याह। आचारादर्शेकल्पतरौतु—अमुकगोत्रःपिताअमुकशर्मातृप्यतामिदंजलतस्मैस्वधेतिप्रयोगइत्युक्तम्। तन्न। पुनश्चतुर्थ्यंतप्रयोगेमानाभावात्। नचस्वधायोगानुपपत्तिर्मानम्। पितॄन्स्वधानमस्तर्पयामीतिबौधायनेनवाचनिकतत्प्रयोगात्प्रथमांतेपितृप्रयोगोपपत्तेः। योगयाज्ञवल्क्यः—नामतस्तुस्वधाकारैस्तर्प्याःस्युरनुपूर्वशः। अमुकदेवशर्मेतिप्रयोगइतिपृथ्वीचंद्रः। चतुर्थ्यंतनामप्रयोगोपिहेमाद्रावुक्तः। मदनपारिजातेतु—पितृतर्पणेवसुरूपेत्यादिकीर्तनंनेत्युक्तम्। तन्न।—संबंधमनुकीर्त्यैवनामगोत्रेत्वनंतरम्। वस्वादिरूपंसंकीर्त्यस्वधा

कारेणतर्पयेदिति**वसिष्ठस्मृति**विरोधात् । पित्रादीनांमंत्रैस्तर्पणंमात्रादीनांनाम्नेति**हेमाद्रिश्चंद्रिकाच** । वैदिकमंत्रैर्देवानावाह्यनाम्नातर्पयेत् । पितॄन्मंत्रैरावाह्यमंत्रैस्तर्पयेदिति**कल्पतरुरत्नाकरवाचस्पत्यादयः । आचारचंद्रोदयेप्येवम्** ॥

नामाज्ञानेबौधायनः—पृथिवीषत्पितावाच्यस्तत्पिताचांतरिक्षसत् । अभिधानापरिज्ञानेदिविषत्प्रपितामहः । इदंचापस्तंबादिपरम् । आश्वलायनानांतुतन्नेत्यादि । यदिनामनविद्यात्तत्पितामहप्रपितामहेतिब्रूयादितितत्सूत्रात् । **बौधायनः**—शर्मातंब्राह्मणस्योक्तंवर्मातंक्षत्रियस्यतु । गुप्तांतंचैववैश्यस्यदासांतंशूद्रजन्मनः । **मनुः**—वैश्यस्यधनसंयुक्तंशूद्रस्यप्रेष्यसंयुतम् । स्त्रीणांलक्ष्मीदामितिदांतंनाम । दांतंनाम स्त्रीणामिति **चंद्रोदयेगोभिलोक्तेः** । चंद्रिकायांतुदायीशब्दांतमुक्तंदेवीशब्दांतंवा । गोत्रंमातानामदेवीतृप्यत्वेवंस्वधोच्चरन्निति**वाराहा दितिदिवोदासः** । शूद्रस्यकाश्यपगोत्रं गोत्रनाशेतुकाश्यपइति**व्याघ्रपादोक्तेः**, तस्मादाहुःसर्वाःप्रजाःकाश्यप्यइतिश्रुतेश्चेति**हेमाद्रिः** । गोत्राज्ञानेप्येवम् । गोत्रस्यत्वपरिज्ञानेकाश्यपंगोत्रमुच्यतइति**चंद्रिकायांप्रयोगपारिजातेचस्मृत्यंतरात्** । **कौस्तुभ्यांतु**शूद्राणामपि ब्राह्मणादिवत्परंपराप्रसिद्धंगोत्रंग्राह्यम् । चतुर्णामपिवर्णानांपितॄणांपितृगोत्रतइति**चंद्रिकायांहेमाद्रौबौधायनोक्तेः**रित्युक्तम् । इदंचद्विजोढशूद्रोत्पन्नशूद्रपरमिति**श्राद्धहेमाद्रिः** । सएव—पितृगोत्रंकुमारीणामूढानांभर्तृगोत्रतः । **हेमाद्रौवृद्धशातातपः**—ब्राह्मादिषुविवाहेषुयातूढाकन्यकाभवेत् । भर्तृगोत्रेणकर्तव्यास्तस्याःपिंडोदकक्रियाः । आसुरादिषुचान्येषुपितृगोत्रेणधर्मवित् । ब्राह्मादिष्वपिपितृभर्तृगोत्रयोर्विकल्पेपिवंशपरंपरायाताचारेणव्यवस्था । येनास्यपितरोयाताइत्यादिवचनादिति**विज्ञानेश्वरः** ॥

अथतर्प्याः । हेमाद्रौमात्स्ये—देवासुरास्तथानागागंधर्वाप्सरसोऽसुराः । क्रूराःसर्पाःसुपर्णाश्चतरवोजृंभकाःखगाः । वाय्वाधाराजलाधारास्तथैवाकाशगामिनः । निराधाराश्चयेजीवाःपापकर्मरताश्चये । कृतोपवीतीकृत्वैवनिवीतीचभवेत्ततः । सनकश्चसनंदश्चतृतीयश्चसनातनः ।

कपिलश्चासुरिश्चैववोढुःपंचशिखस्तथा । सर्वेतेतृप्तिमायांतुमद्दत्तेनांबुनासदा । मरीचिमत्र्यगिरसौपुलस्त्यंपुलहंक्रतुम् । प्राचेतसंवसिष्ठंचभृगुं
नारदमेवच । देवान्ब्रह्मऋषींश्चैवतर्पयेदक्षतोदकैः । तत्रैव **पैठीनसिः**—गौतमोथभरद्वाजोविश्वामित्रश्चतापसः । जमदग्निर्वसिष्ठश्चकश्यपो
त्रिस्तथोत्तमः । स्वारोचिषोरैवतश्चमहातेजाश्चचाक्षुषः । वैवस्वतस्तथातार्थइति । **चंद्रिकायाम्**—अथकांडऋषीनेतानुदकांजलिभिःशुचिः ।
अव्यग्रस्तर्पयेन्नित्यंमंत्रैःपर्वाष्टमीषुच । कांडानितिवेदस्य । याज्ञुपपरमितिमाधवः । **हेमाद्रौभविष्ये**—अथसव्यंततःकृत्वासव्यंजानुचभू
तले । अग्निष्वात्ताबर्हिपदोहविष्मंतस्तथोष्मपाः । सुकालिनस्तथाभौमाआज्यपाःसोमपास्तथा । तर्पयेद्वैपितृन्भक्त्यासतिलोदकचंदनैः । **चंद्रो
दयेवृद्धपराशरः**—गायत्रीशक्तितोजस्वातर्पयेद्देवताःपितृन् । ब्रह्मेशकेशवात्पूर्वंप्रजापतिमथश्रुतीः । छंदोयज्ञानृषीन्सिद्धानाचार्यांस्तनया
नपि । गंधर्ववत्सरर्तूंश्चमासपक्षदिनानितु । देवान्देवानुगांश्चैवनागान्नागकुलानिच । सरितःसागरांस्तीर्थान्पर्वतान्कुलपर्वतान् । किन्नरान्खे
चरान्यक्षान्मनुष्यानथतर्पयेत् । वनस्पतीनोषधीश्चभूतग्रामंचतुर्विधम् । ब्रह्माद्योमयाहूताःसमागत्याददत्वपः । अनृणमांप्रकुर्वंतुप्रसीदंतुम
मोपरि । स्मृतपूर्वाग्रदर्भेषुसाग्रेषुसकुशेषुच । प्रादेशिकेषुशुद्धेषुब्रह्मादिभ्योंबुसेचयेत् । उदीरतामंगिरसआयंतुवोर्जमित्यपि । पितृभ्यश्चस्वधा
यिभ्योयेचेहपितरस्तथा । अग्निष्वात्तोपहूताश्चतथाबर्हिपदोपिच । येनःपूर्वेपितरश्चसोमपान्समुदीरयेत् । आवाह्यचपितृनेतैरपसव्योपवीतिना ।
दक्षिणाभिमुखोद्वाभ्यांकराभ्यामंबुसेचयेत् । रुक्मरूप्यतिलैस्ताम्रदर्भमंत्रैःक्षिपेत्पयः । वसून्रुद्रांस्तथादित्यान्नमस्कारसमन्वितान् । ध्रुवोध्वरश्च
सोमश्चआपश्चैवानिलोनलः । प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्तिताः । अजैकपादहिर्बुध्न्योविरूपाक्षोथरैवतः । हरश्चबहुरूपश्चत्र्यंबकश्चसुरे
श्वरः । सावित्रश्चजयंतश्चपिनाकीचापराजितः । इंद्रोधाताभगःपूषामित्रोथवरुणोर्यमा । अंशुर्विवस्वांस्त्वष्टाचसवितात्रिष्णुरेवच । कव्यवाड
नलःसोमोयमश्चैवतथार्यमा । अग्निष्वात्ताःसोमपाश्चतथाबर्हिपदोपिच । यमश्चधर्मराजश्चमृत्युश्चैवतथांतकः । वैवस्वतश्चकालश्चसर्वभूतक्षय

स्तथा । औदुंबरश्चदध्नश्चनीलश्चपरमेष्ठिना । सहितइतिशेषः । वृकोदरश्चचित्रश्चचित्रगुप्तस्तथार्यमा । तस्मात्प्राक्तर्पयित्वैतान्पित्रादीस्तर्पये त्ततः । मातामहान्मातुलांश्चसखिसंबंधिबांधवान् । स्वजनान्ज्ञातिवर्गीयानुपाध्यायान्गुरूनपि । पितॄन्भृत्यानपत्यांश्चयेभवंतितदाश्रिताः । तान्सर्वांस्तर्पयेद्विद्वानीहंतेतेयतोजलम् । अत्रध्रुवायनमइतिप्रयोगइतिचंद्रिका । ध्रुवंतर्पयामिनमइतिहेमाद्रिः । कव्यवाडनलएकादेवतेति हरिहरः । कव्यवाट्अनलइतिद्विदेवतेतिकल्पतरुः । तन्न । कव्यवाहोनलश्चेतिगोभिलविरोधात् । यमादितर्पणंचतुर्थ्यंतनामभिरेवेति हेमाद्रिः । कव्यवाडनलःसोमोधर्मश्चेतिचंद्रिकायांपाठः ॥

यमतर्पणेविशेषमाह चंद्रोदयेयमः—देवत्वाद्देवतीर्थेनपितृत्वाद्दक्षिणामुखः । देवत्वचपितृत्वंचयमस्यास्तिद्विरूपता । **हेमाद्रौ ब्राह्मे** इदंप्रकृत्य—यज्ञोपवीतिनाकार्यप्राचीनावीतिनातथा । **मनुः**—एकैकस्यतिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन् । **स्मृत्यर्थसारे**— दीपोत्सवचतुर्दश्यांकार्यंतुयमतर्पणम् । अंगारकचतुर्दश्यामपिकार्यसदैववा ॥ ॥ **अथभीष्मतर्पणम्** । तन्माघशुक्लाष्टम्यांभीष्मायतु तिलोदकम् । अन्नंचविधिवद्द्युःसर्वेवर्णाद्विजातयइतिधवलनिबंधस्मृतेः । जीवत्पिताप्येतत्कुर्यात् । जीवत्पितापिकुर्वीततर्पणंयमभीष्मयो रितिपाद्मादितिपितृचरणाः । इदंचनित्यम्—ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मायनोजलम् । संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमेतिमदनरत्नो क्तेः । **धवलनिबंधे**—भीष्मःशांतनवोवीरःसत्यवादीजितेंद्रियः । आभिरद्भिरवाप्नोतुपुत्रपौत्रोचितांक्रियाम् । वैयाघ्रपद्यगोत्रायसांकृत्यप्र वरायच । अपुत्रायददाम्येतज्जलंभीष्मायवर्मणे । वसूनामवतारायशंतनोरात्मजायच । अर्घ्यंददामिभीष्मायआबालब्रह्मचारिणे । इति । अयं तर्पणमंत्रइतिकेचित् । अर्घ्यंददामीत्यग्रेतनेनैकवाक्यत्वान्नार्घ्यमंत्रइतिनाम्नातर्पणम् । यत्तु—सत्यव्रतायशुचयेगांगेयायमहात्मने । भीष्मायैतद्द दाम्यर्घ्यमाजन्मब्रह्मचारिणे । वैयाघ्रपद्यःसव्येनानेनमंत्रेणवर्णिकमितिपाद्मंतत्रतदर्पणंगौणम् । अर्घ्योपक्रमात् । नचानयोर्नभेदः । अर्घ्येसव्य

जान्वाचनाद्यभावेनभेदावश्यकत्वादितिवयंप्रतीमः । एतेनापसव्येनेतिवदन् दिवोदासोऽपास्तः । **हेमाद्रौब्राह्मे**—प्रथमंतर्पयेद्देवान्ब्रह्मादींश्चततोऋषीन् । मरीचिप्रमुखांश्चैवरुद्रादित्यवसूंस्तथा । यक्षान्पशून्सुपर्णांश्चभूतग्रामचतुर्विधम् । आचार्यानितरांश्चैवकालस्यावयवानपि । सनकप्रमुखांश्चैवमनुष्यांस्तदनंतरम् । कव्यवाडनलादींश्चततःपितृगणानपि । ततोमातामहानांचपितृव्याणांततःपरम् । पत्नीनांचसुतानांचपितृमातृष्वसुस्तथा । मातुलानीचदुहितास्वसाचार्यर्त्विजस्तथा । शिष्याश्चज्ञातयश्चैवसुहृत्सचिविनस्तथा । एतेषांतर्पणकार्यंयथावदनुपूर्वशः । ज्ञाताज्ञातान्समुद्दिश्यप्रदेयश्चांजलिस्ततः । **तत्रैवस्कांदे**—पूर्वंमोदप्रमोदादींस्तर्पयेत्पद्विनायकान् । एतौमोदप्रमोदौसुमुखदुर्मुखाविघ्नविघ्नहर्तारइतिपट् । ततोब्रह्मादयोदेवाःसनकाद्यास्ततःपरम् । अग्निष्वात्तादिकानांतुपितॄणामप्यनुक्रमात् । यमायधर्मराजायकुर्यात्संतर्पणंबुधः । पितॄणामथमातॄणांततोमातामहस्यच । पत्नीश्वशुरबंधूनांगुतसचिविनांततः । **भारते**—पूर्वंस्ववंशजातानांकृत्वाद्भिस्तर्पणंबुधः । सुहृत्संबंधिवर्गाणांततोदद्याज्जलांजलीन् । सदानाविजलतज्ज्ञाःप्रयच्छतिसमाहिता । **नारदीये**—अग्निप्रभृतयोदेवास्तर्प्याःस्युरनुपूर्वशः । ततःशतर्चिनाद्यास्तुमुनयःशंसितव्रताः । ततःकाण्डऋषीन्सर्वास्तर्पयेच्छ्रद्धयान्वितः । पितृभ्यःप्रत्यहदद्यात्ततोमातृभ्यएवच । ततोमातामहानांचपितृव्यस्वसुतस्यच । **पित्रादितर्पणोत्तरंगारुडे**—अथमातामहीनांचस्वपत्नीनामनंतरम् । तर्पणंचपितृव्याणांतत्पत्नीनांततोपिच । पितृष्वसुश्चतद्भर्तुर्मातुलस्यापिनित्यशः । मातुलान्यास्ततोमातृष्वसुस्तत्पत्युरेवच । श्वशुरस्यचकर्तव्यश्वश्रूणामपितर्पणम् । आचार्याणांततःकुर्यादाचार्यानीभ्यएवच । बंधूनांभ्रातृपत्नीनांपुत्रंचैवस्नुषामपि । पुत्रीतस्याःपतिचैवभगिनींतत्पतितथा । भागिनेयंचपौत्रंचदौहित्रयाज्यमृत्विजम् । शिष्यंचमित्रसंतर्प्यतत्पत्नीस्तुतथैवच । **वाराहे**—आत्मनोपिजलंदद्यादितिद्वैपायनोब्रवीत् । इदंचापुत्रपरम् । **शंखः**—आसप्तमात्पुरुषात्पितृपक्षेयावतांनामजानीयात्तावतांतर्पणंकुर्यादितिहारीतः । पित्रादीन्मात्रादीन्मातामहादीन्पितृव्यांस्तत्पुत्रान्ज्येष्ठभ्रातृंस्तत्पत्नीर्मातुलांस्तत्पत्नीर्गुर्वाचार्योपा

गृह्ये अर्घ्यदानेऋजुत्वमुक्तम् । **कात्यायनः**—पुष्पाण्यंबुमिश्राण्यूर्ध्वंप्रक्षिप्योर्ध्वबाहुःसूर्यमुदीक्षेतेति । अर्घ्यदानोत्तरंसंध्यातर्पणमुक्तं **प्रयोगपारिजाते**—कश्यपऋषिः रुद्रोदेवतात्रिष्टुपछंदः पुरुषतर्पणेविनि० । ॐभूःपुरुषंतर्पयामि यजुर्वेदंतर्पयामि मंडलंत० रुद्ररूपिणंत० अंतरात्मानंत० सावित्रीत० वेदमातरंत० सांकृतित० संध्यांत० युवतींत० रौद्रींत० उषसंत० निम्रुचंत० सर्वसिद्धिकरींत० सर्वमत्राधिपंत० एवंपंचदशतर्पणानिकृत्वाद्विराचम्यादित्यमुपतिष्ठेतेति । **गायत्रीध्यानम्**—सावित्रींयुवतींयुक्तांशुक्लवस्त्रांत्रिलोचनाम् । त्रिशूलिनींवृषारूढांपंचास्यांरुद्रदेवताम् । कैलासविहितावासामायांतींसूर्यमंडलात् । वरदांत्र्यक्षरांसाक्षाद्देवीमावाहयाम्यहम् । **गायत्रीजपेचंद्रिकायां शातातपः**—तिष्ठंश्चेद्वीक्षमाणोऽर्कमासीनःप्राङ्मुखोजपेत् । आसीनश्चेदित्यर्थः । रात्रौमध्याह्नसंध्याकरणे नोपस्थानम् । रात्रौप्रहरपर्यंतमित्यादिसंग्रहादिति**चंद्रोदयः** । **कृष्णभट्टीयप्रयोगपारिजातयो**स्तु रात्रौगायत्र्याघ्र्यंदद्यादुपस्थानेहविष्पांतसूक्तंजपेदित्युक्तं । इयंब्रह्मयज्ञात्पूर्वकार्या । उपास्यविधिवत्संध्यामुपस्थायचभास्करम् । गायत्रीशक्तितोजप्त्वातर्पयेद्देवताःपितॄनितिवृहत्पराशरोक्तेरिति**माधवचंद्रिका मदनरत्नस्मृत्यर्थसारकृष्णभट्टाः** । **प्रयोगपारिजातस्तु**—अपांसमीपेनियतोनित्यकंविधिमास्थितः । सावित्रीमप्यधीयीतगत्वारण्यंसमाहितइतिमनूक्तेर्मध्याह्नसंध्योत्तरंब्रह्मयज्ञमाहसब्रह्मयज्ञप्रकरणानभिज्ञत्वादसंबद्धंवदन्नुपेक्ष्यः । **मदनपारिजाते**तुततोर्घ्यंभानवेदद्यात्तिलपुष्पजलान्वितमितिनारसिंहेततःशब्देनब्रह्मयज्ञानंतर्यंमध्याह्नसंध्यायाइत्युक्तं । **जयंतवृत्ता**वप्येवम् । बह्वृचांतुतत्सूत्रे अथस्वाध्यायविधिरित्युपक्रम्यआप्लुत्येतिमध्याह्नस्नानमुक्त्वाततोब्रह्मयज्ञोक्तेरवांतरप्रकरणात्स्नानंब्रह्मयज्ञांगं तयोर्मध्येनसंध्या । अंगांगिनोरंगेनव्यवायापत्तेः कर्मणिकर्मांतरारंभायोगाच्च आगंतूनामंतेनिवेशइतिन्यायाच्च ब्रह्मयज्ञोत्तरमेवसंध्या । नचैवमंतेयद्ददातिसादक्षिणेत्युक्तेस्तावत्पर्यंतमवांतरप्रकरणाद्ब्रह्मयज्ञोत्तरमपिसंध्यानस्यादितियुक्तम् । ददातीत्यस्याविधायकत्वात् । अतएव**वृत्तिकृत्**अन्यथादद्यादित्येवावक्ष्यदिति । संध्योत्तरंब्रह्म

यज्ञस्तुआपस्तंबादिपरः । इदमापःप्रवहतधाम्नोधाम्नस्तथैवच । विमोचनेतुतीर्थस्यआप्यायस्वेतिवैजपेत् । देवागातुविदइतिकृत्वाजप्य निवेदनम् । प्रक्षाल्यतीर्थदेशंचगत्वास्वंधर्ममाचरेत् । **श्राद्धहेमाद्रावुशनाः**—स्रवंत्यादिष्वथाचम्यसोपानत्कोह्यसंस्पृशन् । आगतःसोद पात्रस्तुयत्नेनशुचिरेवसः । तेनोदकेनद्रव्याणिप्रोक्ष्याचम्यपुनर्गृहे । ततःकर्माणिकुर्वीतनित्यंवैयानिकानिच । **शातातपः**—यद्यानीततुसव्येन प्रोक्षयेद्दक्षिणेनतु । इतिश्रीमन्नारायण० लक्ष्मणभट्टकृतेआचाररत्नेमाध्याह्निकविवरणम् ॥

अथदेवपूजा । तत्र**प्रयोगपारिजातेवसिष्ठः**—कौबेर्यांतुधनस्थानमैशान्यांदेवतालयम् । **माधवीयेदक्षः**—भागेतुपंचमेदेवम र्चयेत्पुरुषोत्तमम् । इति । **मंत्रराजविधाने**—प्रातर्होमंचकृत्वावादेवतार्चनमारभेत् । यद्वामाध्याह्निकंकृत्वापूजयेत्पुरुषोत्तमम् । इति । **चं द्रिकायांहारीतः**—कुर्वीतदेवतापूजांजपयज्ञादनंतरम् । **अथपूजापात्राणि** । **प्रयोगपारिजाते पैठीनसिः**—सीसकायसपाषाण हीनभग्नपात्राणिवर्ज्यानि । हीनानि मानतः । **मानं शिवरहस्ये**—षट्त्रिंशदंगुलपात्रमुत्तमंपरिकीर्तितम् । मध्यमंतुत्रिभागोनंकनिष्ठंद्वाद शांगुलम् । तत्रैव**देवीपुराणे**—वस्वंगुलविहीनंतुनपात्रंकारयेत्क्वचित् । क्वचिदितिसर्वधर्मकार्येनिषेधइति**टोडरानंदः** । तत्रैव—नानावि चित्ररूपाणिपुंडरीकाकृतीनिच । शंखनीलोत्पलाभानिपात्राणिपरिकल्पयेत् । **वाराहे**—शृणुतत्वेनमेदेविप्रियपात्राणियानिमे । सौवर्णराज तंताम्रंकांस्यंचैवतुयद्भवेत् । सर्वेभ्योभ्यधिकंताम्रंतदेवममरोचते । **अग्निपुराणे**—मृन्मयंचतथाकांस्यमारकूटादिराभवम् । त्रपुसीसलोहजा तमर्घपात्रंविवर्जयेत् । **वैखानसग्रंथेअभिषेकपात्रमुक्तम्**—अरत्निमात्रविस्तारंमध्येष्टदलसंयुतम् । प्रतिपत्रदलमध्येसुषिराणांशत भवेत् । अष्टोत्तरशतंवापिभूषितंमध्यतस्तथा । खचितंचमहारत्नैरेवंधारासहस्रकम् । धाराष्टकेनवायुक्तमभिषेकायकल्पयेत् । विंशत्यावाष्टभि र्वापिद्वाभ्यांवादशभिश्चवा । तत्रैव—पानीयपात्रंसौवर्णराजतंताम्रमेवच । वृत्तायतंसुवृत्तंवाभवेदायतमेववा । प्रस्थमानप्रमाणांभःपूरयोग्यांत

रंशुचि । नीराजनक्रियापात्र्योहेमादिद्रव्यनिर्मिताः । तत्रैव**पुष्पसारसुधानिधौ**—अर्घ्यपात्रंतुवायव्येनैर्ऋत्यांपाद्यपात्रकम् । आग्नेय्यांस्नानकलशमीशेत्वाचमनीयकम् । मध्येतुमधुपर्कःस्यादित्येतत्पात्रलक्षणम् । **चंद्रिकायामाचारादर्शेचस्कांदे**—नैवेद्यपात्रंवक्ष्यामिकेशवस्य महात्मनः । सौवर्णंराजतंताम्रंकांस्यंमृन्मयमेववा । पालाशंपद्मपत्रंविष्णोरतिप्रियम् । पूर्वोक्तमृन्मयनिषेधस्तुकुलालचक्रनिष्पन्नपरः ।—कुलालचक्रनिष्पन्नमासुरंमृन्मयंस्मृतम् । तदेवहस्तघटितंस्थाल्यादिदैविकंमतमिति**कल्पतरुदिवोदासीयादौ**वचनात् । **शौनकः**—पूजागृहं प्रविश्याथमंडलंपरिकल्प्यच । सौवर्णचचतुर्द्वारंसप्राकारंसविस्तरम् । मडपंरचयित्वातुवितानध्वजतोरणैः । **कृष्णभट्टीये**—दर्शनीयामहामुद्रापूजारंभावसानयोः । संहारमुद्राकर्तव्यापरिपूर्णेर्चनादिके । अधोमुखाभ्यांहस्ताभ्यामापादतलमस्तकम् । पसारिताभ्यांसंस्पृश्यमहामुद्रेयमीरिता । **आचारचिंतामणौ**—गंधादिकानिवेद्यांतापूजापंचोपचारिकी । अर्घपाद्याचमनीयमधुपर्काचमानिच । गंधादिपंचकंचेतिउपचारादशोदिताः । **षोडशोपचारास्तत्रैव**—आसनंस्वागतंचार्घःपाद्यमाचमनंतथा । मधुपर्काचमस्नानवसनाभरणानिच । गंधपुष्पेधूपदीपौ नैवेद्यंचंदनंतथा । **प्रयोगदीपिकायांविष्णुपुराणे**—पूर्वमावाहनंप्रोक्तमासनंचततःपरम् । ततश्चपाद्यमर्घ्यंचततस्त्वाचमनीयकम् । स्नानंवस्त्रंचोपवीतंततोगंधादिचंदनम् । पुष्पंधूपंचदीपंचनैवेद्यंतदनंतरम् । ततोदेयःप्रणामश्चततोदेयाप्रदक्षिणा । विसर्जनंततोदद्यादुपचारास्तुषोडश । क्वचित्प्रणामप्रदक्षिणास्थानेतांबूलदक्षिणेउक्ते । **हेमाद्रौभविष्ये**—आवाहनासनार्घ्यपाद्याचमनमधुपर्कसेवाश्च । भूषणगंधाः सुमनोयुतधूपदीपभोज्यानि । प्रादक्षिण्यंस्तुतिरितिकथयंत्युपचारषोडशकम् । **आचारचिंतामणावष्टादशउक्ताः**—आसनावाहनेचार्घ्यंपाद्यमाचमनंतथा । स्नानवस्त्रोपवीतंचभूषणानिचसर्वशः । गंधपुष्पेतथाधूपदीपावन्नेनतर्पणम् । माल्यानुलेपनंचैवनमस्कारविसर्जने । पाद्यार्घयोःपौर्वापर्येविकल्पइति**स्मार्ताः** । तत्रैव—आसनाभ्यंजनेतद्वदुद्वर्तननिरूपणे । संमार्जनंसर्पिरादिस्नापनावाहनेततः । पाद्यार्घाचमनीयंच

स्नानीयमधुपर्कौ । पुनराचमनीयंचवस्त्रयज्ञोपवीतके । अलंकारागंधपुष्पेधूपदीपौतथैवच । नैवेद्यमथतांबूलंपुष्पमालातथैवच । अनुलेपनं चशय्याचचामरव्यजनेतथा । आदर्शोरार्तिकंचैवनमस्कारोथनर्तनम् । गीतवाद्यादिदानानिस्तुतिहोमप्रदक्षिणम् । दंतकाष्ठप्रदानंचततोदेवविसर्जनम् । उपचाराइमेज्ञेयाःषट्त्रिंशत्सुरपूजने । **शांतिहेमाद्रौत्वन्येउक्ताः**—आवाहनासनेपाद्यमर्घ्यमाचमनंतथा । गंधपुष्पेतथाधूपं दीपंचमधुपर्ककम् । उपहारंतथाचामंस्नानंचांगविभूषणम् । वस्त्रोपवीतमाचाममलंकारान्विलेपनम् । गंधपुष्पेतथाधूपंदीपमंजनमेवच । आदर्शमंगलंसर्वदेयंसर्वात्मनातथा । होमंभोजनमाचाममलंकारांस्तथापुनः । गंधादिचपुनर्दद्यान्मुखवासंप्रदक्षिणाम् । स्तुतिंदंडंनमस्कारमात्मनोपिनिवेदनम् । **तत्रैव**—स्तुतिःस्वकृतावैदिकीदेवादिकृतावेति ।

भार्गवार्चनदीपिकायांषष्टिसंख्याउक्ताः—पूर्वंप्रबोधनंकुर्याज्जयशब्दांस्ततःपुनः । नमस्कारंततःकुर्यात्ततोनीराजनंपरम् । ततोदिव्यासनंदद्यात्ततोवैदंतधावनम् । पादप्रक्षालनंदद्यात्ततोर्घ्यंचप्रकल्पयेत् । आचामंमधुपर्कंचपुनराचमनीयकम् । ततःसुगंधितैलेनमर्दनंकारयेद्धरेः । ततोभ्यंगसुगंधैस्तुकुर्यात्तैलापसारणम् । ततःपुण्योदकैःकुर्यादभिषेकसुगंधिभिः । क्षीरेणदध्नाचतथाघृतेनमधुनापिच । शर्करयामंत्रपूतैर्गंधपुष्पोदकैरपि । महाभिषेकंतथाचाममंगवस्त्रंततोर्पयेत् । वाससीपरिधानार्थमुपवीततथाचमम् । गंधसाभरणंपुष्पंधूपंनीराजनतथा । दृष्ट्युत्तारणनैवेद्यौमुखवासंसुगंधिभिः । तांबूलंशयनंकेशसाधनंवस्त्रदानकम् । किरीटचंदनेदद्यात्ततआभरणानिच । पुष्पनीराजनादर्शामंडपागमनंततः । तत्रासनंपाद्यमर्घ्यमाचामंधूपदीपकौ । नैवेद्यंचसतांबूलंचंद्रनीराजनंपरम् । चामरव्यजनंछत्रंपुरोगीतंमनोहरम् । मृदंगादिस्वनं नृत्यंनमस्कारंप्रदक्षिणाम् । स्तुतिंकुर्यात्ततोविष्णोश्चरणौमस्तकेन्यसेत् । निर्माल्यधारणंकुर्यान्नैवेद्यांशस्यभोजनम् । सेवामुद्दिश्योपविशेन्मंचके तूलिकांनयेत् । सुखासनेनशयनेनीत्वातंतत्रशाययेत् । अर्चेत्कुसुमतांबूलैःपादौसंवाहयेत्ततः । अत्रविष्णुपदंशिवादेरुपलक्षणम् । विधिवद्वा

र्चयेत्सर्वान्योविप्रोभक्तितत्परइतिपारिजातेवृद्धपराशरोक्तेः। सएव—स्नानेवस्त्रेचनैवेद्येदद्यादाचमनंहरेः। अत्रपितृचरणाः—सुवर्णप्रतिमादौतंडुलपुंजादिषुचषोडशाद्युपचारपूजैव। आवाहनाभावेपूजायाअसंभवात्। पंचोपचारादशोपचारास्तुपूर्वस्थापितदेवेष्वित्यूचुः।

प्रतिमाविचारः। भविष्ये—सौवर्णीराजतीताम्रीमृन्मयीचतथाभवेत्। पाषाणधातुयुक्तावारीतिकांस्यमयीतथा। शुद्धदारुमयीवापिदेवतार्चाप्रशस्यते। अंगुष्ठपर्वादारभ्यवितस्तिंयावदेवतु। प्रतिमाचतथाकार्यानाधिकाशस्यतेबुधैः। **पंचरात्रे**—मृद्दारुलाक्षागोमेदमधूच्छिष्टमयीनतु। **स्मृतिसारेपुराणे**—शैलीदारुमयीलौहीलेप्यालेख्याचसैकती। मनोमयीमणिमयीप्रतिमाष्टविधास्मृता। चलाचलेतिद्विविधाप्रतिष्ठाजीवमंदिरम्। **प्रयोगपारिजातेविष्णुधर्मे**—तयोरसंभवेचैवसाचेहनवधास्मृता। रत्नजाहेमजाचैवराजतीताम्रजातथा। रैतिक्यर्चातथालौहीशैलजाद्रुमजातथा। अधमाधमाविज्ञेयामृन्मयीप्रतिमाचया। रैतिकी पित्तलजा। **स्मृतिसारे**—नार्च्यागृहेश्मजामूर्तिश्चतुरंगुलतोधिका। नवितस्त्यधिकाधातुसंभवाश्रेयइच्छता। **देवीपुराणे**—सप्तांगुलंसमारभ्ययावच्चद्वादशांगुलम्। गृहेष्वर्चासमाख्याताप्रासादेचाधिकाशुभा। **कपिलपंचरात्रे**—मानांगुलप्रमाणेनदशपंचदशांगुला। गृहेतुप्रतिमापूज्यानाधिकातुप्रशस्यते। **हयशीर्षपंचरात्रे**—दशांगुलप्रमाणावातिथ्यंगुलमितापिवा। **दानमदनरत्नेप्येवम्। तत्रैवमात्स्ये**—त्रीहिभिर्वात्रिभिश्चोर्ध्वैरधमांगुलमीरितम्। मध्यमंतुत्रिभिःसार्धैश्चतुर्भिश्चतथोत्तमम्। मानांगुलमितिख्यातंमात्रांगुलमथोच्यते। **गोविंदराजीये देवीपुराणे**—तथाचोर्ध्वस्थिताकार्यासदादेवीचतुर्भुजा। अन्यथातुनकर्तव्याकृताभयकरीसदा। अष्टभुजासदाकार्याप्रासादेवागृहेतथा। ऊर्ध्वस्थितागृहेघोरारौद्राचाभिभवेद्युधि। गृहेनसजटापूज्याशैलजापितथैवच। अष्टभुजाऊर्ध्वाघोरेतिगोविंदराजः। **वाराहे**—गृहेग्निदग्धाभग्नाश्चनार्चाःपूज्यावसुंधरे। एतासांपूजनान्नित्यमुद्वेगंप्राप्नुयाद्गृही। **स्कांदे**—शालग्रामशिलायास्तुप्रतिष्ठानैवविद्यते। महापूजांतुकृत्वादौपूजयेत्तांततोबुधः। **बृहद्वामने**—

प्रतिष्ठादिविधानेनविनैववसतेहरिः । सदातत्रशिलामात्रेवक्रचिह्नंवरानने । चक्रचिह्नइत्युक्तेरचक्रेहिरण्यगर्भादौशालग्रामशिलाकृतमूर्त्यादौच प्रतिष्ठाभवतीति **पंचायतनसारः** । अत्रकेचित्प्रतिष्ठावाहनयोर्मिलितयोर्देवतासन्निधिजनकत्वात्स्थापितदेवेष्वप्यावाहनमित्याहुः । तन्न । आवाहनात्पूर्वंपादस्पर्शादावपिदोषाभावप्रसक्तेः । मालादिदानेपुण्याभावापत्तेश्च । अतो नावाहनम् । **पंचायतनसारे**तुदेवतायाव्यासगांतराभावध्यानार्थंप्रतिष्ठितदेवतायामप्यावाहनमित्युक्तम् । अन्येतुप्रतिष्ठयादेवसन्निधियोग्यताक्रियतेआवाहनेनतत्सन्निधिरित्याहुः । दैशिकसान्निध्येपिबौद्धसान्निध्यार्थमावाहनमिति **भट्टदिनकरः** । **स्मृतिसारेपुराणे**च—उद्वासावाहनेनस्तःस्थिरायामुद्धवार्चने । अस्थिरायांविकल्पास्स्यात्स्थंडिलेतुभवेद्द्वयम् । स्नपनंचाविलेख्यायामन्यत्रपरिमार्जनम् । **पंचायतनसारेनंदिपुराणे**—स्थिरलिङ्गेऽनलेतोयेहृदयेसूर्यमंडले । आवाहनादिचत्वारिकुर्यान्नोद्वासनतथा । तत्रैव**पाद्मे**—शालग्रामशिलायांचनावाहनविसर्जने । **देवीपुराणे**—पाद्यंश्यामाकदूर्वाचविष्णुक्रांतादिरिष्यते । गधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः । तत्रैव—बिल्वरक्ताक्षतैःपुष्पैर्दधिदूर्वाकुशैस्तिलैः । सामान्यःसर्वदेवानामर्घोयंपरिकीर्तितः[1] । अभावेदधिदूर्वादेर्मानसंवाप्रकल्पयेत् । रक्तंकुंकुमम् । **पुष्पसारसुधानिधौ**—इक्षुर्मधुघृतंचैवपयोदधिसहैवतु । प्रस्थप्रमाणवाग्राह्यंमधुपर्कमिहोच्यते । **पंचायतनपूजासारे**—जातीलवंगककोलान्याचमनीयद्रव्याणि ॥

अथस्नानं । **बृहन्नारदीये**—वादित्रनिनदैरुच्चैर्गीतमगलनिःस्वनैः । यःस्नापयतिदेवेशंजीवन्मुक्तोभवेद्द्विसः । वादित्राणामभावेतुपूजाकालेचसर्वदा । घंटाशब्दोनरैःकार्यःसर्ववाद्यमयीयतः । **योगिनीतन्त्रे**—शिवागारेझल्लकं[2]चसूर्यागारेचशंखकम् । दुर्गागारेवंशवाद्यंमधूरी[3]चन वादयेत् । **स्कांदे**—वेणुवीणास्वनैश्चैवकुर्यात्तुस्नपनहरेः । शिवंशंखेननस्नापयेत् । नशिवंशंखवारिणेति**पंचायतनसारे**वचनात् । सर्वत्रैव

१ परिकल्पित । २ झल्लक कांस्यतालवाद्यम् । ३ मधूरीवेणुवाद्यम् ।

प्रशस्तोऽब्जःशिवसूर्यार्चनंविनेतिप्रयोगपारिजातेब्राह्माच्च । शिवार्चनेशंखउक्तःसौरपुराणेपाद्मे—कुशपुण्योदकस्नानाद्ब्रह्मलोकमवाप्नुयात् । रत्नोदकेनसावित्रंकौबेरंहेमवारिणा । नारसिंहंतुसंस्नाप्यकर्पूरागरुवारिणा । इंद्रलोकेसमोदित्वापश्चाद्विष्णुपुरंव्रजेत् । कपिलाक्षीरमादायशंखेकृत्वाजनार्दनम् । यज्ञायुतसहस्रस्यस्नापयित्वालभेत्फलम् । ताम्रमूर्तौगव्याभिषेकोननिषिद्धः। स्नानतर्पणदानेष्वित्यादिपूर्वोक्तवचनात् । **नारसिंहे**—यःपुनःपुष्पतैलेनसंस्नापयतिकेशवम् । दिव्यौषधियुतेनापितस्यप्रीतोभवेत्सदा । **रुद्रयामले**—द्वादश्यांचदिवास्नापस्तुलस्यवचयस्तथा । तत्रविष्णोर्दिवास्नानंवर्जनीयंसदाबुधैः । **पाद्मे**—शंखेतीर्थोदकंकृत्वायःस्नापयतिकेशवम् । द्वादश्यांबिंदुमात्रेणकुलानांतारयेच्छतम् । द्वादश्यांस्नानेविकल्पइतिकेचित् । दिवापदोपादानाद्दिवसेनिषिद्धंनतुरात्रावित्यन्ये । विष्णुमूर्तेःस्नाननिषेधोनशालग्रामादेरित्यपरे । **प्रयोगपारिजातेव्यासः**—प्रतिमापट्टयंत्राणांनित्यंस्नानंनकारयेत् । कारयेत्पर्वदिवसेयदावामलधारणम् । **पाद्मेवैशाखमाहात्म्ये**—चंदनोशीरकर्पूरकुंकुमागरुवासितैः । सलिलैःस्नापयेन्मंत्रीनित्यदाविभवेसति । **स्कांदे**—क्षीराद्दशगुणंदध्नाघृतेनैवशतोत्तरम् । घृताद्दशगुणंक्षौद्रंक्षौद्राच्चैक्षवजंतथा । स्नानादिषुद्रव्यमानमुक्तंशिवधर्मोत्तरे—स्नानंपलशतंज्ञेयमभ्यंगंपंचविंशतिः । पलानांद्वेसहस्रेतुमहास्नानंप्रकीर्तितम् । **हरनाथीये**—अष्टोत्तरपलशतंस्नानेदेयंतुसर्वथा । **व्रतहेमाद्रौकालिकापुराणे**—पंचविंशत्पलंलिंगेअभ्यंगंकारयेदथ । शिवस्य सर्पिषास्नानंप्रोक्तंपलशतेनच । तावतामधुनाचैवदध्नाचैवपुनःपुनः । तावतैवचक्षीरेणगव्येनैवभवेत्ततः । भूयःसार्धसहस्रेणपलानामैक्षवंतथा । पलंचकुडवःप्रस्थआढकोद्रोणएवच । धान्यमानेषुबोद्धव्याःक्रमशोऽमीचतुर्गुणाः । **मदनरत्नेआथर्वणपरिशिष्टे**—पंचकृष्णलकोमाषस्तैश्चतुःषष्टिभिःपलम् । **चंद्रिकायांपुलस्त्यः**—स्नाप्यमानंचपश्यंतियेघृतेनोत्तरायणे । तेयांतिविष्णुसालोक्यंसर्वपापविवर्जिताः । घृतमानं प्रस्थोवाआढकंवेतितत्रैव । तत्रैववामने—देवमाल्यापनयनंदेवागारसमूहनम् । स्नपनंसर्वदेवानांगोप्रदानसमंस्मृतम् ॥ ॥ **वस्त्रादि** ॥ अग्नि-

पुराणे—दुकूलपट्टकौशेयरांककार्पासकादिभिः । वासोभिःपूजयेद्देवंसुशुभैरात्मनःप्रियैः । **विष्णुधर्मोत्तरे**—रांकवामृगरोम्याश्चकंदस्यश्च तथाशुभाः । **निषिद्धानिवाराहे**—नीलिरंजितवस्त्रंयोमर्त्योमह्यंनिवेदयेत् । नवमक्षालितचैवसचिरंरौरवेवसेत् । नीलीदोषःकार्पासएवोक्तः । **तथा**—यज्ञोपवीतदानेनसुरेभ्योब्राह्मणायवा । भवेद्विप्रश्चतुर्वेदीशुद्धधीर्नात्रसंशयः । **नंदिपुराणे**—अलंकारचयोदद्याद्विप्रायचसुरायच । सोमलोकेरमित्वासविष्णुलोकेमहीयते । वस्त्रालंकारादिनप्रत्यहमपूर्वम् । वस्त्रमभ्युक्षणाच्छुध्येदपरंतुदिनेदिनेइतिहरनाथीयेतत्वसागर-**संहितोक्तेः** । अपरंतदेव । ननिर्माल्यंभवेद्वस्त्रस्वर्णरत्नविभूषणमितितत्रैवचिंद्राकरीयनिबंधाच । उपवीतमपिप्रत्यहंनापूर्वंवस्त्रसमत्वा दितिहरनाथः ॥ ॥ गंधपुष्पधूपदीपादेवताभेदेनवक्ष्यंते । **चंद्रिकायांपाद्मे**—गंधेभ्यश्चदनंपुण्यंचंदनादगरुर्वरः । कृष्णागरुस्ततः श्रेष्ठःकुंकुमंतुततोवरम् । **मदनरत्नेगारुडे**—कस्तूरिकायाभागौद्वौचत्वारश्चदनस्यतु । कुंकुमस्यत्रयश्चैवशशिनःस्यात्तनःसमम् । कर्पूरंच-दनंदर्पः[२]कुंकुमचसमांशके । सर्वगंधमितिप्रोक्तंसमस्तसुरवल्लभम् । **काशीखंडे**—कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यतु । चंदनस्यत्रयोभा-गाःशशिनस्त्वेकएवहि । **यक्षकर्दम**इत्येपसर्वदेवमनोहरः । **मदनरत्ने**—कर्पूरमगरुश्चैवकस्तूरीचदनंतथा । कंकोलंचभवेदेभिःपंचभिर्यक्ष कर्दमः । **विष्णुधर्मोत्तरे**—दारिद्र्यंपद्मकंकुर्यादस्वास्थ्यंरक्तचंदनम् । **उशीरं**विप्रविभ्रंशमन्येकुर्युरुपद्रवम् । केवलनिषेधोयंमिलितानांवि धानादितिपंचायतनसारः । **गारुडेस्कांदेच**—योददातिहरेर्नित्यंतुलसीकाष्ठचदनं । पितॄणांचविशेषेणसदाभीष्टंहरेर्यथा । तुलसीदल लग्नेनचदनेनजनार्दनम् । विलेपयतियोनित्यंलभतेचिंतितफलम् ॥

अथपुष्पाणि । पुष्पदानंकराभ्यामितिकेचित् । तन्न । तत्रदक्षिणकरनियमात् । पुष्पांजलिविधानजलिविधेश्च । यत्तु—यजन्क

---

१ कदसी तृणविशेष । २ दर्प जवादि ।

राभ्यांयज्ञेशमिति । यच्च—तावेवकेवलौश्लाघ्यौयौतत्पूजाकरौकराविति । तत्कथंचिल्लब्धकरद्वयव्यापारानुवादइति**टोडरानंदः** । पुष्पांजल्यादिपरमितिवयम् । **पाद्मे**—श्यामापितुलसीविष्णोःप्रियागौरीविशेषतः । **विष्णुरहस्ये**—तुलसीप्राप्ययोनित्यंनकरोतिममार्चनम् । तस्याहंप्रतिगृह्णामिनपूजांशतवार्षिकीम् । **विष्णुधर्मे**—रक्तान्यकालजातानिचैत्यवृक्षोद्भवानिच । श्मशानजातपुष्पाणिनैवदेयानिकर्हिचित् । **विष्णुः**—नोग्रगंधिपुष्पंनागंधिनकंटकिजम् । कंटकिजमपिशुक्लंसुगंधिदद्यात् । नरक्तंदद्यात् । रक्तमपिकुंकुमंजलजंचदद्यादिति । **विष्णुरहस्ये**—नशुष्कैःपूजयेद्देवंकुसुमैर्नमहीगतैः । नविशीर्णदलैःस्पृष्टैर्नाशुभैर्नाविकासिभिः । अतिगंधीन्यगंधीनिअम्लगंधीनिवर्जयेत् । अविकासिभिरितियेषांविकासोनजातः । येषांतुविकासोत्तरंमुकुलत्वंकमलादीनांतेपांसूर्यएवनिषेधइतिवक्ष्यते । **भविष्ये**—केशकीटापविद्धानिशीर्णपर्युषितानिच । स्वयंपतितपुष्पाणित्यजेदुपहतानिच । मुकुलैर्नार्चयेद्देवमपक्वंननिवेदयेत् । गंधवंत्यपवित्राणिकुसुमानिविवर्जयेत् । गंधहीनमपिग्राह्यंपवित्रंयत्कुशादिकम् । **तिथ्यालोकेमत्स्यसूक्ते**—बंधुजीवंचद्रोणंचसरस्वत्यैनदापयेत् । **विष्णुधर्मोत्तरे**—नगृहेकरवीरोत्थैःकुसुमैरर्चयेद्धरिम् । गृहेजातोयःकरवीरस्तदुत्थैरित्यर्थइति**पंचायतनसारः** । यथाश्रुतमेवतुयुक्तम् । **निषिद्धपुष्पाणिगारुडे**—नार्कनोन्मत्तकंकिंचित्तथैवगिरिकर्णिकाम् । नकंटकारिकापुष्पमच्युतायनिवेदयेत् । कुटजंशाल्मलीपुष्पंशिरीषंचजनार्दने । निवेदितंभयंशोकंनिःस्वतांचप्रयच्छति । करानीतंपटानीतंतत्पुष्पंसकलंत्यजेत् । करोवामः । पटोऽधोवस्त्रम् । देवोपरिधृतंयच्चवामहस्तेचयद्धृतम् । अधोवस्त्रधृतंयच्चतत्पुष्पंपरिवर्जयेदिति**पंचायतनसारात्** । **विष्णुः**—याचितंनिष्फलंपुष्पंक्रयक्रीतंचनिष्फलम् । अस्पृश्यत्वाद्रजस्वलायादेवकार्यनिषेधेसिद्धे । नदेवकार्यंकुर्यादिति**हारीतोक्ति**र्देवार्थपुष्पनैवेद्यादीत्येतदर्थेति**कल्पतरुः** । **विष्णुधर्मोत्तरे**—अधोवस्त्रधृतंयच्चजलांतःक्षालितचयत् । देवतास्तन्नगृह्णंतिपुष्पंनिर्माल्यतांगतम् ॥ **पर्युषितदिनविचारः** । **हलायुधेभविष्ये**—केशकी-

टापविद्धानित्यजेत्पर्युषितानिच। तुलस्यगस्तिविल्वानांनास्तिपर्युषितात्मता। **मदनपारिजाते**—जलंपर्युषितंत्याज्यंपत्राणिकुसुमानिच। तुलस्यगस्तिविल्वानिगांगंवारिनदुष्यति। **विष्णुधर्मोत्तरे**—तुलस्यांविल्वपत्रेचजलजेपुचसर्वशः। नपर्युषितदोपोस्तिमालाकारगृहेपुच। **स्कांदे**—पलाशदिनमेकचपकजंचदिनत्रयम्। पंचाहंविल्वपत्रचदशाहतुलसीदलम्। पर्युषितंनेत्यर्थः। **हलायुधे**—जलजानांचसर्वेपांविल्वपत्रस्यचैवहि। तेषांपर्युषिताशकाकार्यापचदिनोर्ध्वतः। तीर्थसौख्येप्राप्ते—तुलसीनोपर्युषिताविल्वंचत्रिदिनावधि। पद्मंपंचदिनात्याज्यंशेषंपर्युषितंविदुः। तत्रैवस्कांदेदमनमुपक्रम्य—तत्पमालाभगवतःपरमप्रीतिकारिणी। शुष्कापर्युषितावापिनदुष्टाभवतिक्कचित्। पूर्वोक्तदिनसंख्यातिक्रमेपिमालाकारगृहस्थमदुष्टमितिशैवागमः। **स्मृतिसारावल्यां**—जलजानांचसर्वेपांपत्राणामहतस्यच। कुशपुष्पस्यरजतसुवर्णकृतयोरपि। नपर्युषितदोपोस्तितीर्थतोयस्यचैवहि। **वोपदेवः**—विल्वापामार्गजातीतुलसिशमिशताकेतकीभृंगदूर्वामदांभोजाहिदर्भामुनितिलतगरब्रह्मकह्लारमल्ली। चपाश्वारातिकुंभादमनमरुवकाविल्वतोहानिशस्ताद्स्त्रिंशत्येकार्यरीशोदधिनिधिवसुभूयमाभूयएव। **अस्यार्थः**—शताशतावरी। मदोमदारः। अहिर्नागचपकः। मुनिरगस्त्यः। ब्रह्मपलाशम्। कह्लारकुमुदम्। तेननपौनरुक्त्यम्। अश्वारातिःकरवीरः। अरीषट्। ईशःएकादश। उदधिश्चत्वारः। निधिर्नव। वसुरष्टौ। भूरेकः। यमौद्वौ। विल्वमारभ्याहिपर्यंतंगणयित्वादर्भमारभ्यत्रिंशदादिसंख्ययापुनर्गणयेदित्यर्थः। **तत्वसागरसंहितायां**—यद्वापर्युषितैश्चापिपुष्पाद्यैरविकारिभिः। गंधोदकेनचैतानित्रिःप्रोक्ष्यैवप्रपूजयेत्। **पारिजातेआदित्यपुराणे**—शिवेकुंदंमदतीचयूथींचधूककेतकम्। जपांरक्तत्रिसंध्यैद्वेसिंदूरकुटजानितु। मालतीघुसृणंचैवहयारिंचवर्वरींत्यजेत्। नशस्तंशाल्मलपुष्पंकूष्मांडंचनशोभनम्। कलिकामुकुलैर्नेज्याविनाचपकपकजैः। **पुष्पमालायाम्**—मंदारमर्कंधत्तूरशाल्मलीकांचनालजम्। निषिद्धंविष्णुपूजायांपुष्पचैभीतकतथा। निपिद्धंविद्धितंविष्णौशिरीषंशक्रपुड्रकम्। नरसिंहस्यपूजायां

निषिद्धंकेतकीद्वयम् । **चंद्रिकायामप्येवम्** । **मदनपारिजातेविष्णुधर्मे**—क्रकचाख्यस्यपुष्पाणितथाधत्तूरकस्यच । कृष्णंचकुटजं चार्कंनैवदेयंजनार्दने । शाल्मलंचशिरीषंचबृहतींगिरिमल्लिकाम् । सर्जकंचैवकूष्मांडकंचनारंचवर्जयेत् । **शातातपः**—देवीनामर्कमंदारौ सूर्यस्यतगरंतथा । निषिद्धमित्यर्थः । **कार्तिकमाहात्म्ये**—गणेशंतुलसीपत्रैर्दुर्गांनैवतुदूर्वया । मुनिपुष्पैस्तुसूर्यंचलक्ष्मीकामोनचार्चयेत् । **पाद्मे**—नबिल्वेनार्चयेद्धातुंनकेतक्यामहेश्वरम् । नाक्षतैःपूजयेद्विष्णुंनतुलस्यागणाधिपम् ॥

तुलसीग्रहणादौविशेषः । हारीतः—स्नानंकृत्वातुयेकेचित्पुष्पंचिन्वंतिमानवाः । देवतास्तन्नगृह्णंतिभस्मीभवतिकाष्ठवत् । तन्म ध्याह्नस्नानपरम् । अस्नात्वातुलसींछित्त्वादेवतापितृकर्मणि । तत्सर्वनिष्फलंयातिपंचगव्येनशुध्यति इति **पाद्मोक्तेरितिचंद्रिका** । अत्रतुलसीपदंपुष्पमात्रपरम् शिष्टाचारानुरोधादितिरुद्रधरः । **देवयाज्ञिकनिबंधेस्मृतिसारे**—श्रवणेचव्यतीपातेभौमभार्गवभानुषु । पर्वद्वयेचसंक्रांतौद्वादश्यांसूतकद्वये । तुलसींयेविचिन्वंतितेछिंदंतिहरेःशिरः । क्वचिच्छ्रवणस्थानेवैधृतिपदम् । **पाद्मे**—भृग्वर्कांगारवारेषुद्वा दश्यांपंचपर्वसु । येविचिन्वंतितुलसींतेछिंदंतिहरेःशिरः । **विष्णुधर्मोत्तरे**—रविवारंविनादूर्वांतुलसींद्वादशींविना । जीवितस्याविनाशाय नविचिन्वीतधर्मवित् । तथा—संक्रांतावर्कपक्षांतेद्वादश्यांनिशिसंध्ययोः । यैश्छिन्नंतुलसीपत्रंतैश्छिन्नंहरिमस्तकम् । **विष्णुधर्मे**—नछिंद्या तुलसींविप्रोद्वादश्यांवैष्णवःक्वचित् । **हरिभक्तिविलासे**—संक्रांत्यादौनिषिद्धोपितुलस्यवचयःस्मृतौ । परंश्रीविष्णुभक्तैस्तुद्वादश्यामेवनेष्यते । अयंनिषेधोनकृष्णतुलस्याम् ।—तुलसीकृष्णतुलसीतथारक्तंचचंदनम् । केतकीपुष्पपत्रंचसद्यस्तुष्टिकरंहरेरिति **भविष्ये**कृष्णतुलस्याःपुनरु पादानेनतुलसीत्वाभावात् । जीरकंकृष्णजीरकमितिवत् । **पाद्मे**—द्वादश्यांतुलसीपत्रंधात्रीपत्रंचकार्तिके । लुनातिसनरोगच्छेन्निरयानतिग र्हितान् । **रुद्रयामले**—देवार्थेतुलसीछेदोहोमार्थेसमिधस्तथा । इंदुक्षयेनदुष्येतगवार्थेपितृणस्यच । **पाद्मे**—तुलस्यमृतजन्मासिसदात्वंके

शवप्रिये । केशवार्थंविचिन्वामिवरदाभवशोभने । इतितुलसीग्रहणमत्रः । **अवंतीखंडेस्कांदे**—येऽर्चयतिहरेर्मूर्तिंकोमलैस्तुलसीदलैः । कोटिकोटिसुवर्णानांदानस्यफलमाप्नुयुः । तत्रैव—सुमजर्यासदलयातुलसीभवयाहरेः । पूजांकुर्वीतयोनित्यंसपूजाफलमश्नुते । **शंखः**—वानस्पत्येमूलफलेदार्वग्न्यर्थेचगोस्तृणम् । देवतार्थंचकुसुममस्तेयंमनुरब्रवीत् । इदंद्विजपरम् । द्विजस्तृणैधःपुष्पाणिसर्वतःस्वयमाहरेदितियाज्ञवल्क्योक्तः । एतन्नित्यपूजापरम् ।—पारक्यारामसजातैःकुसुमैरर्चयेत्सुरान् । तेनपापेनलिप्येऽहयदेतदनृतभवेदितिनारदीयादितिपंचायतनसारः । **आह्निकप्रदीपेस्कांदे**—पत्रंवायदिवापुष्पंफलंनेष्टमधोमुखम् । दुःखदतत्समाख्यातयथोत्पन्नप्रदापयेत् । अधोमुखार्पणंनेष्टंपुष्पांजलिविधिविना॥ ॥ **लक्षपूजायांविशेषः** । लक्षपूजासुसर्वासुपुष्पमेकैकमर्पयेत् । समुदायेनचेत्पूजालक्षपुष्पार्पणंहितत् । लक्षपुष्पादौपुष्पाद्यर्पणंयथेच्छमितिपंचायतनसारे । **जटमल्ले**—येपांशंसंतिपुष्पाणिप्रशस्तान्यर्चनेहरेः । पल्लवाअपितेपांस्युःफलंवार्चाविधौहरेः । **पाद्मे**—बिल्वपत्रंशमीपत्रतुलस्यामलकंतथा । कुशपत्रंभृंगराजसदाग्राह्यहरेर्बुधैः । **बिल्वपत्रेविशेषः शिवधर्मोत्तरे**—अच्छिन्नैर्बिल्वपत्रैश्चअच्छिन्नाग्रैस्त्रिपत्रकैः । वामपत्रेवसेद्ब्रह्मापद्मनाभश्चदक्षिणे । पत्राग्रेलोकपालाश्चमध्येपत्रेसदाशिवः । पृष्ठभागेस्थितायक्षाःपूर्वभागेऽमृतस्थितम् । तस्माद्वैपूर्वभागेनअर्चयेद्गिरिजापतिम् । **जटमल्ले**—येपांशंसतिपुष्पाणिप्रशस्तान्यर्चनेहरेः । पल्लवाअपितेपांस्युःफलंवार्चाविधौहरेः । **भविष्ये**—फलानामप्यलाभेतुतृणगुल्मौषधीरपि । औषधीनामभावेतुभक्त्याभवतिपूजितः । मनसापूजयेदित्यर्थः ॥

अथधूपः । **तिथितत्त्वेकालिकापुराणे**—मधुमुस्ताघृतगंधोगुग्गुल्वगरुशैलजम् । सरलसिद्धसिद्धार्थादशांगोधूपइष्यते । **मदनरत्ने**—षड्भागकुष्ठद्विगुणोगुडश्चलाक्षात्रयंपंचनखस्यभागाः । हरीतकीसर्जरसश्चमांसीभागैकमेकत्वथशैलजस्य । घनस्यचत्वारिपुरस्यचैकंधूपोदशांगःकथितोमुनींद्रैः । द्विगुणोव्यंशः । शैलजंमध्यदेशेतूलइतिप्रसिद्धम् । घनोमुस्ता । पुरोगुग्गुलुः । **व्रतहेमाद्रौभविष्ये**—अगरुच

दनंमुस्तासिह्लकंवृषणंतथा । समभागंतुकर्तव्यंधूपोयममृताह्वयः । तथा—श्रीखंडंग्रंथिसहितमगरुंसिह्लकंतथा । मुस्तातथेंदुर्भूतेशशर्कराचददे त्रयम् । इत्येपोऽनंतधूपश्चकथितोदेवसत्तम । तथा—कृष्णागरुसिह्लकंचवालकंवृषणंतथा । चंदनंतगरंमुस्ताप्रबोधःशर्करान्वितः । तथा—कर्पूरंचंदनंकुष्ठमुशीरसिह्लकंतथा । ग्रथिकंवृषणंभीमकुंकुमंगृंजनंतथा । हरीतकीतथोशीरयक्षधूपउदाहृतः । तथा—वृषणंसिह्लकंबिल्वंश्रीखंडमगरुंतथा । कर्पूरंचतथामुस्ताशर्करासत्वचंद्विज । इत्येषविजयोधूपःस्वयंदेवेननिर्मितः । वृषणंकस्तूरिकेति**समयप्रदीपः** । कर्पूरंचंदनंमांसीत्वक्पत्रैलालवंगके । अगरुंसिह्लकंधूपंप्राजापत्यंप्रचक्षते । श्रीखडंतगरंकुष्टंकर्पूरसिह्लकतथा । महानयस्मृतोधूपःप्रियोदेवस्यसर्वदा । **चंद्रिकायांहारीतः**—रुंहिकाख्यंकणंदारुसिह्लकंसागरुंसितम् । शंखंजातीफलश्रीशेधूपानिस्युःप्रियाणिवै । रुहिकामांसी । कणोगुग्गुलविशेषः । दारुदेवदारुः । शंखंनखी । **नारसिंहे**—विनामृगमदंधूपेजीवजातंविवर्जयेत् । एतन्नृसिंहान्यपरम् । महिषाख्यंगुग्गुलंयआज्ययुक्तंसशर्करम् । धूपंददातिराजेंद्रनरसिंहायभक्तिमानितितत्रैवोक्तेः । देव्यादौतस्यवक्ष्यमाणत्वाच्च । तत्रैव—कृष्णागरुसमुत्थेनधूपेनश्रीधरालयम् । धूपयेद्वैष्णवोयस्तुसमुक्तोनरकार्णवात् । **गौतमः**—तीर्थकोटिशतैर्धौतोयथाभवतिनिर्मलः । करोतिनिर्मलंदेहंधूपशेषस्तथाहरेः । **पाद्मे**—धूपंचारात्रिकंविष्णोःकराभ्यांयःप्रविदते । कुलकोटिंसमुद्धृत्ययातिविष्णोःपरंपदम् ॥

अथदीपः । नारसिंहे—घृतेनवाथतैलेनदीपंप्रज्वालयेन्नरः । **अथमहादीपःव्रतहेमाद्रौविष्णुधर्मे**—महावर्तिःसदादेयाकृष्णपक्षेविशेषतः । देवस्यदक्षिणेपार्श्वेदेयातैलतुलानृप । पलाष्टकयुतांराजन्वर्तिंतत्रप्रकल्पयेत् । महारजनरक्तेनसमग्रेणतुवाससा । वामपार्श्वेतुदेवस्यदेयाघृततुलानृप । पलाष्टकयुतांपुण्यांशुक्लांवर्तिंचदीपयेत् । वाससातुसमग्रेणसोपवासोजितेंद्रियः । एवंवर्तिद्वयमिदंसकृद्दत्वामहीयते ।

१ हरिकाख्येति पाठ ।

एकामप्यथवाद्द्यादभीष्टामनयोर्द्वयोः । दीपदानंमहासत्रंकृत्वाफलमुपाश्नुते । **दीपनिर्वाणनिषेधोभविष्ये**—तांश्चदत्वानहिंसेतनच तैलविवर्जितान् । कुर्वीतदीपहिंसांयोमूपकोऽधःप्रजायते । **भविष्योत्तरे**—प्रज्वाल्यदेवदेवस्यकर्पूरेणतुदीपकम् । अश्वमेधमवाप्नोति कुलंचैवसमुद्धरेत् । **संवर्तः**—देवागारेद्विजानांचदीपदत्वाचतुष्पथे । मेधावीज्ञानसंपन्नश्चक्षुष्मान्जायतेनरः ॥

अथनैवेद्यं । **कृष्णभट्टीये**--नैवेद्यजलपुष्पादौधेनुमुद्रांप्रदर्शयेत् । **गोविंदराजीयेब्रह्मांडे**—पत्रपुष्पफलंतोयमन्नपानाद्य मौषधम् । अनिवेद्यनभुंजीतयदाहारायकल्पितम् । **तत्रैवपाद्मे**--अनिवेद्यहरेर्भुंजन्सप्तजन्मनिनारकी । निवेदितस्यभक्षणप्रतिपत्तिरिति **गोविंदराजः** । तन्न । यद्भक्षयेत्तन्निवेदितमितिवाक्यार्थात् । अनिवेदितभक्षणनिषेधात्सर्वान्ननिवेदननिषेधः । अवदानद्वारापुरो डाशस्येवोद्धृतान्ननिवेदनद्वारासर्वान्ननिवेदनमितिवाच्यम् । उद्धरणाविधानात् । तद्विधानेपिसर्वपुरोडाशत्यागवत्सर्वान्ननिवेदनसिद्धेश्च । निवेदितशेषत्वेनसर्वस्यनिवेदितत्वांगीकारेलक्षणापानाच्च । पाकैक्येनिवेदितेनैववैश्वदेव स्विष्टकृद्वत् । **यत्तुशातातपः**—एकस्मिन्वाप्यशक्त श्चेत्पूर्वविष्णुनिवेदनम् । वैश्वदेवततःशिष्टाद्व्यासस्यवचनयथेतिशिष्टपदतत्सर्वपुरोडाशत्यागे शेषात्स्विष्टकृतवद्विष्णोर्निवेदितान्नेनयष्टव्यदेवतांतर मितिश्रीधरोक्तेःसर्वनिवेदनेप्युपपन्नमितिगोविंदराजः । **भट्टदिनकरस्तु** वैश्वदेवार्थनैवद्यार्थपाकभेदेनिवेदितमेवसस्कृतमेव भक्षयेदिति नियमद्वयंनयुक्तम् । एकभक्षणेन्यतरनियमबाधात् । उभयभक्षणेनियमद्वयबाधात् । अतोनिवेदितमेवभक्षयेदितिवचोहोमासाधनवटकतांबूला दिपरं । हुतमेवभक्षयेदितिहविष्यपर । यद्वानिवेदितमेवभक्षयेदितिवैश्वदेवानधिकारिपरम् । अथवापाकैक्येप्यहविष्यस्येवपाकभेदेपिनिवेदित स्याहुतस्यापिहुतत्वमस्त्येव । नहिपाकभेदेवैश्वदेवभेदः । महानससंस्कारत्वाद्वैश्वदेवस्य । एवंनिवेदितत्वमपिनचसर्वनिवेदन । निवेदितस्यदा हादिविधानेनसर्वान्नदाहाद्यापत्तेः । पाकैक्येप्येवम् । तस्मादुद्धृत्यैवनिवेदनमित्याह । **विष्णुः**—मेषीमहिषीछागीनांदुग्धदधिघृतान्यदेयानि ।

गारुडे—तुलसीदलसंमिश्रंहरेर्यच्छतियःसदा । नैवेद्यमित्यादिस्मृतिरत्नावल्याम् । नैवेद्यस्यत्वभावेतुफलान्यपिनिवेदयेत् । फलाना
मप्यलाभेतुतृणगुल्मौषधीरपि । औषधीनामलाभेतुतोयान्यपिनिवेदयेत् । तदलाभेतुसर्वत्रमानसंप्रवरंस्मृतम् । **नैवेद्यांशदानमुक्तं**
पारिजातेसंग्रहे—विष्वक्सेनायदातव्यंनैवेद्यस्यशतांशकम् । पादोदकंप्रसादंचलिंगेचंडेश्वरायतु । **तद्विधिःपंचरात्रे**—ततोजव
निकांविद्वानपसार्ययथाविधि । मुख्यादीशानतःपात्रान्नैवेद्यांशंसमुद्धरेत् । **टोडरानंदेविष्णुधर्मे**—फलानिदत्वादेवेभ्यःसफलांविंदतेश्रि
यम् । **अथफलंभविष्ये**—फलंचक्कथितंविद्धंक्रमिभिस्तद्विवर्जयेत् । यत्नपक्कमपिग्राह्यंकदलीफलमुत्तमम् । **अथतांबूलंस्कांदे**—
तांबूलानांकिसलयंदत्वास्वर्गमवाप्नुयात् । इति ॥

अथप्रणामः । टोडरानंदेचंद्रिकायांचवाराहभविष्ययोः—प्रणम्यदंडवद्भूमौनमस्कारेणयोर्चयेत् । सयांगतिमवाप्नोतिनतांक्रतु
शतैरपि । **हलायुधे**—नदेवंपृष्ठतःकृत्वाप्रणामंक्वचिदाचरेत् । वरमुत्थायकर्तव्यंनवृथाभ्रमणंचरेत् । तत्रैव–एकहस्तप्रणामश्चएकाचैवप्रद
क्षिणा । अकालेदर्शनंचैवपुण्यंहंतिपुराकृतम् । एकेतिचंडान्यपरम् । तस्याएकप्रदक्षिणायावक्ष्यमाणत्वात् । **गोविंदराजीयेभविष्ये**—
अग्रेपृष्ठेवामभागेसमीपेगर्भमंदिरे । जपहोमनमस्कारान्नकुर्यादेवतालये । **वाराहे**—वस्त्रप्रावृतदेहस्तुयोनरःप्रणमेतमाम् । सदासजायते
मूर्खःसप्तजन्मसुभामिनि । इदंपरिधानीयान्यपरम् । **चंद्रिकायांनारसिंहे**—नमस्कारेणचैकेनअष्टांगेनहरिंस्मरेत् । पद्भ्यांकराभ्यांशिरसा
पंचांगाप्रणतिःस्मृता । दोर्भ्यांपद्भ्यांचजानुभ्यामुरसाशिरसातथा । मनसावचसाभक्त्याप्रणामोष्टांगईरितः । **चंद्रिकायांतु**—उरसाशिरसा
दृष्ट्यामनसापिधियापिच । पद्भ्यांकराभ्यांवाचाचप्रणामोष्टांगउच्यतेइत्युक्तम् । **संग्रहे**—शिरोहस्तौचजानूचचिबुकंबाहुकद्वयम् । पंचांग
स्तुनमस्कारोविद्वद्भिःसमुदाहृतः । **पाद्मे**—भूमिमापीड्यजानुभ्यांशिरआसेव्यवैभुवि । प्रणमेद्योहिदेवेशंसोऽश्वमेधफलंलभेत् ॥

अथप्रदक्षिणा। **वाराहे**—प्रदक्षिणंनकर्तव्यपुरतःपृष्ठदर्शनात् । चक्रवद्भ्रामयेदंगंपृष्ठतोगनदर्शयेत् । अत्रविशेषोवक्ष्यतेकेदारखंडे—आरात्रिकसकर्पूरंयेकुर्वतिदिनेदिने । तेप्राप्नुवतिसायुज्यनात्रकार्याविचारणा । **टोडरानंदेविष्णुधर्मे**—गीतवादित्रदानेनसौख्यंप्राप्नोत्यनुत्तमम् । प्रेक्षणीयकदानेनरूपवानभिजायते । प्रेक्षणीयनृत्यगीतादि । **अथशंखपूजाभविष्ये**—त्रैलोक्येयानिभूतानिवासुदेवस्यचाज्ञया । शंखेवसंतिविप्रेंद्रतस्माच्छंखप्रपूजयेत् । **तत्रमंत्रः**—त्वपुरासागरोत्पन्नोविष्णुनाविधृतःकरे । निर्मितःसर्वदेवैश्चपांचजन्यनमोस्तुते । गर्भादेवादिनारीणांविशीर्यंतेसहस्रशः । तवनादेनपातालेपांचजन्यनमोस्तुते । **वाराहे**—द्वौशखौनार्चयेदिति । **शिवार्चनचंद्रिकायां सारसंग्रहे**—शंखमानंतुप्रादेशंचतुरगुलमुच्छ्रितम् । **क्रियासारे**—प्रस्थांबुप्रमितःशखःश्रेष्ठस्तत्र्यंशपूरकः । मध्यस्तदर्धप्रमितःकनिष्ठः क्रमशोभवेत् । गोक्षीरधवलःस्निग्धोदीर्घनालोवृहत्तनुः । वृत्तोयोदक्षिणावर्तःसज्ञेयःशंखसज्ञकः । पूर्वोक्तलक्षणोपेतोवामावर्तोथवापियः । **प्रस्थो दानरत्नेज्ञेयः । मदनरत्नेस्कांदे**—पलद्वयेनप्रसृतद्विगुणकुडवंमतम् । चतुर्भि कुडवैःप्रस्थआढकस्तैश्चतुर्गुणैः । चतुराढकोभवेद्द्रोणइत्येतद्व्यमानकम् । इति ॥

अथपूजाधिकारिणः । तत्र**विष्णुपुराणे**—ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चपृथिवीपते । स्वधर्मतत्परोविष्णुमाराधयतिनान्यथा । **स्कांदेशालिग्राममाहात्म्ये**—ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणामथापिवा । शालग्रामेधिकारोऽस्तिनान्येषांतुकदाचन । अन्येसकरजाः । **प्रतिष्ठाहेमाद्रौ**—चत्वारोब्राह्मणैःपूज्यास्त्रयोराजन्यजातिभिः । वैश्यैर्द्वावेवसपूज्यौतथैकःशूद्रजातिभिः । ब्राह्मणैर्वासुदेवस्तुनृपैःसकर्षणस्तथा । प्रद्युम्नःपूज्यतेवैश्यैरनिरुद्धस्तुशूद्रकैः । **प्रयोगपारिजाते मंत्रराजानुष्टुब्विधाने**—शालग्रामशिलांवापिचक्रांकितशिलांतथा ।

१ त्वत्तोयेसर्वतीर्थानिपाचजन्यनमोस्तुते इति पाठ ।

ब्राह्मणःपूजयेन्नित्यंक्षत्रियादिर्नपूजयेत् । क्षत्रियादिरदीक्षितः । नित्यंसर्वदा । अतोब्राह्मणस्यादीक्षितस्यापिशालिग्रामपूजानित्या । क्षत्रियादे स्तुदीक्षितस्य । अत्रदीक्षामंत्रविहीनेपीत्युक्तेः अयंविनैवमंत्रेणपुण्यराशिःप्रकीर्तितइतिविष्णुपूजाप्रकरणे**भविष्योक्तेश्च** । विष्णुपूजायामदीक्षित स्याप्यधिकारोनान्यत्रेति**टोडरानंदः** । तेनादीक्षितस्यापिक्षत्रियादेर्मूर्तिपूजनेऽधिकारः । **स्मृत्यर्थसारे**—स्त्रीणामप्यधिकारोस्तिविष्णोरा राधनंप्रति । यत्तु**स्मृतिकौमुद्यांशूद्राचारशिरोमणौच मनुः**—जपस्तपस्तीर्थयात्राप्रव्रज्यामंत्रसाधनम् । देवताराधनंचेतिस्त्रीशूद्रपत नानिषडिति तत्स्पर्शवत्पूजापरम् ।—आर्जवंलोभशून्यत्वंदेवब्राह्मणपूजनम् । अनभ्यसूयाचतथाधर्मःसामान्यउच्यत इति**टोडरानंदे विष्णू क्तेः** । साधारणधर्माश्चतुर्वर्णपराइति **व्रतहेमाद्रौविज्ञानेश्वरीयेच** । स्त्रीशूद्रपतनानिषडितिशूद्रस्यद्विजसेवाऽविरोधेनस्त्रियास्तुभर्तृसेवाऽत्या गपरमितिभ**ट्टपादाः** । **जातिविवेके**—स्पर्शनंदेवतानांचकायस्थायविवर्जयेत् । नास्याधिकारोधर्मेस्तीति**मनुव्याख्यानेमेधातिथिः** । स्नानोपवासदेवतार्चनादौनशूद्रस्यनित्योधिकारइति । शूद्रादेःपूजास्पर्शविना ।—स्त्रीणामनुपनीतानांशूद्राणांचजनेश्वर । स्पर्शनेनाधिकारोऽ स्तिविष्णोर्वाशंकरस्यवेति**बृहन्नारदीयात्** । यदिभक्तिर्भवेत्तस्यस्त्रीणांनापिवसुंधरे । दूरादेवास्पृशन्पूजांकारयेत्सुसमाहितइति**वाराहाच्च** । ब्राह्मण्यपिहरंविष्णुंनस्पृशेच्छ्रेयइच्छती । अनाथावासनाथावातस्यानास्तीहनिष्कृतिरिति**पंचायतनसाराच्च** । सांप्रदायिकास्तुनिषेधेषुस्त्रीशू- द्रपदस्याप्यदीक्षितपरत्वाद्विधिषुतत्पदंदीक्षितपरम् । अतोदीक्षितानांतेषांशालग्रामपूजास्पर्शवत्यपिभवति । स्पर्शनिषेधोऽदीक्षितपरइत्याहुः । तन्न । वचनंविनाव्यवस्थाकल्पनेमानाभावात् । अतोऽदीक्षितस्यपूजैवन । **यत्तु**—मातरःसर्वलोकैस्तुस्थाप्याःपूज्याःसुरोत्तमेति**देवीपुराणेस** र्वपदंतत्स्त्रीशूद्रान्यपरमितिकेचित् । दीक्षितस्याप्यस्पर्शेनेतियुक्तम् । विष्णुमूर्तेःप्रतिष्ठायांचाधिकारः—चतुर्वर्णैस्तथाविष्णुःप्रतिष्ठाप्यःसुखार्थि भिरिति**कल्पतरौदेवीपुराणात्** । अन्येतुसर्वपदसंकोचेमानाभावात्—ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायदिवास्त्रियः । पूजयेन्मातरोभक्त्यास

सर्वंलभतेफलमितिदेवीपुराणाच्च शुचित्वस्यनैमित्तिकपरत्वादीक्षितस्यतत्पूजाभवतीत्याहुः । **कौमुद्यांनारसिंहे** शूद्राधिकारे—पुराणंशृणुयान्नित्यंनरसिंहस्यपूजनं । कुर्यादितिशेषः। तत्रैव—ब्राह्मणाःक्षत्रियावैश्याःस्त्रियःशूद्रांत्यजातयः। संपूज्यतंसुरश्रेष्ठंभक्त्यासिंहवपुर्धरम् । अत्रांत्यजातयोऽसच्छूद्रानतुचंडालादयः। चंडालाःसर्वधर्मबहिष्कृताइतिस्मृतेः । **लिङ्गेपिचातुर्वर्ण्यस्याधिकारउक्तःशिवसर्वस्वेभविष्ये**—यस्तुपूजयतेदेविलिंगेमांचजगत्पतिम् । ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवामत्परायणः । तस्यप्रीतःप्रदास्यामिशिवॉल्लोकाननुत्तमान् । **ब्रह्मचारिणंप्रकृत्यमनुः**—देवताभ्यर्चनंचैवसमिदाधानमेवच । कुर्यादितिसवधः । **तिथितत्त्वेस्कांदे**—शूद्रःकर्माणियोनित्यंस्वीयानिकुरुतेप्रिये । तस्याहमर्चागृह्णामिचंद्रखंडविभूषिते । इदंपुराणप्रसिद्धजीर्णलिंगविषयमिति **त्रिस्थलीसेतौभट्टपादाः** । **नूतनलिंगपूजायांतु**—यदाप्रतिष्ठितंलिंगमंत्रविद्भिर्यथाविधि । तदाप्रभृतिशूद्रश्चयोषिद्वापिनसंस्पृशेदितिवृ**हन्नारदीया**दस्पर्शेपूजाकल्पकाभावाच्चनाधिकारः । यत्तु—लिंगंगृहीयतिर्वापिसंस्थाप्यतुयजेत्सदेति**देवीपुराणं** तत्रयतिसाहचर्याद्गृहिपदंद्विजपरम् । नचपरप्रतिष्ठितलिंगादिपूजायुक्ता—यःशूद्रेणार्चितंलिंगविष्णुंवापिनमेन्नरः । तस्येहनिष्कृतिर्नास्तिप्रायश्चित्तगतैरपीतिवृ**हन्नारदीये**ऽनमस्कार्यत्वोक्तेः । नचैतदन्यथानुपपत्त्यैवशूद्रस्यलिंगादिपूजाकल्पनं अन्यदीयलिंगपूजानिषेधेनापिचरितार्थत्वात् । **निथितत्त्वेस्कांदे**—ब्रह्मचारीगृहस्थोवावानप्रस्थव्रतेस्थितः[1] । एवंदिनेदिनेदेवंपूजयेदंबिकापतिम् । संन्यासीदेवदेवेशंप्रणवेनैवपूजयेत् । नमोंतेनशिवेनैवस्त्रीणांपूजाविधीयते । **बौधायनः**—स्त्रीशूद्राणांचभवतिनाम्नावैदेवतार्चनम् । सर्वेवागममार्गेणकुर्युर्वेदानुसारिणा । **पंचायतनसारेभागवते**—वैदिकस्तांत्रिकोमिश्रइतिमेत्रिविधोमखः । वैदिकोमिश्रकोवापिविप्रादीनांविधीयते । तांत्रिकोविष्णुभक्तस्यशूद्रस्यापिप्रकीर्तितः ॥

---

१ वानप्रस्थश्चसुव्रत ।

मंत्रराजानुष्टुप्विधाने—श्रौतार्चनंतुविप्राणांविशेषेणभवेत्सदा । स्मार्तागमार्चनंक्षत्रेवैश्येकेवलमागमः । तस्माद्देवार्चनंश्रौतंविप्रस्यैवत दुच्यते । **बह्वृचपरिशिष्टे**—प्रतिमाःप्राङ्मुखीरुदङ्मुखोयजेतान्यत्रप्राङ्मुखःसंभृतसंभारोयजनभवनमेत्यद्वारेस्थित्वाहस्ततालत्रयेण—अपसर्पं तुतेभूतायेभूताभुविसंस्थिताः । येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञयेतिविघ्नानुद्वास्यप्रविश्य येभ्योमातामधुमत्पिन्वतेपयएवापित्रेविश्वदेवायवृष्ण इतिजपित्वा शुभासने—पृथिवित्वयाधृतालोकादेवित्वंविष्णुनाधृता।त्वंचधारयमांदेविपवित्रंकुरुचासनमित्युपविश्यायतप्राणःकर्मसंकल्प्य शुचि शंखंअद्भिःप्रणवेनपूरयित्वागंधाक्षतपुष्पाणिप्रक्षिप्यसावित्र्याभिमंत्र्यतीर्थान्यावाह्याभ्यर्च्य पत्रपुष्पाणितदुदकेनापोहिष्ठीयाभिरात्मानमायत नंयजनांगानिचाभ्युक्ष्यक्रियांगोदकुंभंगंधादिभिरभ्यर्च्यनमोंतनाम्नातत्तन्मंत्रेणवोपचारान्कुर्यादावाहनमासनंपाद्यमर्घ्यमाचमनीयंस्नानमाचमनं वस्त्रमाचमनमुपवीतमाचमनंगंधपुष्पाणिधूपंदीपमुपहारमाचमनंमुखवासंस्तोत्रंप्रणामंप्रदक्षिणाविसर्जनंचकुर्यादसंपन्नोमनसासंपादयेदाचमनमपृ थगुपचारःप्रणामस्तोत्रंप्रदक्षिणाविसर्जनांगम् । अथमंत्राः—गणानांत्वेतिगणपतेः । कुमारश्चित्पितरमितिस्कंदस्य । आकृष्णेनेत्यादित्यस्य । पावकानइतिसरस्वत्याः। जातवेदसइतिशक्तेः । त्र्यंबकमितिरुद्रस्य । गंधद्वारामितिश्रियः। इदंविष्णुरितिविष्णोरेवंषोडशेमानुपचारान्पौरुषेणवासू क्तेनप्रत्यृचंसावित्र्यावाजातवेदस्यावाप्राजापत्यावाव्याहृतिभिर्वाप्रणवेनवाकुर्वतिसएषदेवयज्ञोऽहरहर्गोदानसंमितःसर्वाभीष्टप्रदःस्वर्गापवर्गदश्चत स्मादेनमहरहःकुर्वीतेति । **टोडरानंदेवाराहे**—अभावेवेदमंत्राणांपंचरात्रोदितोविधिः । उदङ्मुखइतिस्थिरप्रतिमाविषयमितिपारिजातः । **वैशाखमाहात्म्येपाद्मे**—स्वर्णघर्मानुवाकेनमहापुरुषविद्यया । पौरुषेणचसूक्तेनसामभीराजनादिभिः । अर्चयेदितिशेषः । **टोडरानंदे योगयाज्ञवल्क्यः**—दद्यात्पुरुषसूक्तेनयःपुष्पाण्यपएववा । अर्चितंस्याज्जगदिदंतेनसर्वंचराचरम् ।

अथन्यासादि। शौनकः—अंगुष्ठाग्रेतुगोविंदंतर्जन्यांतुमहीधरम्। मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमम् ।कनिष्ठिक्यांन्यसेद्विष्णुंकरम

ध्येतुमाधवम् । एवंन्यासंपुराकृत्वादेहांगन्यास[1]माचरेत् । मस्तकेकेशवंन्यस्यभालेनारायणंतथा । माधवंकर्णयोरक्ष्णोर्विष्णुंचैवतुनासयोः । मुखेतुम
धुसूदनंकंठदेशेत्रिविक्रमम् । वामनंविन्यसेद्बाह्वोःश्रीधरंहृदिविन्यसेत् । नाभ्यांविद्याद्धृषीकेशंकट्यांतैपद्मनाभकम् । दामोदरंपादयोश्चन्यासंद्वादश
धाचरेत् ।ततःपुरुषसूक्तेनसर्वांगन्यासमाचरेत् ।**अपरार्केनारसिंहे**—आनुष्टुभस्यसूक्तस्यत्रिष्टुब्वतस्यदेवता ।पुरुषोयोजगद्बीजमृषिर्नारायणःस्मृतः ।
प्रथमांविन्यसेद्वामेद्वितीयांदक्षिणेकरे । तृतीयांवामपादेतुचतुर्थींदक्षिणेपदे । पंचमींवामजानौतुषष्ठींवैदक्षिणेन्यसेत् । सप्तमींवामकुक्षौचअष्टमींदक्षि
णेन्यसेत् । नवमींनाभिमध्येतुदशमींहृदयेतथा । एकादशींकंठदेशेवामबाहौततःपराम् । त्रयोदशींदक्षिणेतुआस्यदेशेचतुर्दशीम् । अक्ष्णोःपंचदशीं
चैवषोडशींमूर्ध्निविन्यसेत् । यथादेवेतथादेहेन्यासंकृत्वाविधानतः । एवंन्यासविधिंकृत्वापश्चाद्यागंसमाचरेत् । **गोविंदराजीये योगयाज्ञव
ल्क्यः**—षडंगन्यासइत्येकेउत्तरेपुरुषसूक्तके । अद्भ्यःसंभूतइतिहृदयायनमः । वेदाहमितिशिरसेस्वाहा । प्रजापतिश्चरतीतिशिखायैवषट् । योदेवेभ्य
इतिकवचायहुम् । रुचंब्राह्ममितिनेत्रत्रयायवौषट् । श्रीश्चेत्यस्त्रायफट् । **चंद्रिकायांनारदीये**—एवंन्यासंतुकृत्वादौपश्चाद्देवस्यपूजनम् । गंधमा
ल्यैःसुरभिभिरात्मानंचार्चयेद्बुधः । ततःपीठसमाराध्यगंधपुष्पाक्षतैःशुभैः । **ऋग्विधाने**—वक्ष्येपुरुषसूक्तस्यविधिनात्वर्चनेपुनः । आद्ययावाहयेद्देव
मृचातुपुरुषोत्तमम् । द्वितीययासनंदद्यात्पाद्यंचैवतृतीयया । चतुर्थ्यार्घ्यंप्रदातव्यंपंचम्याचमनीयकम् । षष्ठ्यास्नानंप्रकुर्वीतसप्तम्यावस्त्रमेवच । यज्ञो
पवीतमष्टम्यानवम्यागंधमेवच । दशम्यापुष्पदानंचएकादश्यातुधूपकम् ।द्वादश्याचतथादीपंत्रयोदश्योपहारकम् । चतुर्दश्यानतिंकुर्यात्पंचदश्याप्र
दक्षिणाम् । षोडश्योद्वासनंकुर्याद्देवमेवंसमर्चयेत् । पौरुषेणचसूक्तेनतद्विष्णोःपरमेणच । नैताभ्यांसदृशोमंत्रोवेदेषूक्तश्चतुर्ष्वपि । **पूजोत्तरंऋग्वि
धाने**—हुत्वाषोडशभिर्मंत्रैःषोडशान्नस्यचाहुतीः । शेषंनिवेदयेत्तस्मैदद्यादाचमनंततः । जानुभ्यांधरणींगत्वामूर्ध्नाहरिमथोवहेत् । पुनःषोडशभि

१ न्यासमारभेत् ।

मंत्रैर्दद्यात्पुष्पाणिषोडश । तच्चसर्वंजपेद्भूयःपौरुषंसूक्तमुत्तमम् । षण्मासात्सिद्धिमाप्नोतिह्येवमेवसमर्चयेत् । **पूजांतेकर्तव्यमाहयोगयाज्ञवल्क्यः**—निवेदयेत्तदात्मानंतद्विष्णोरितिमंत्रतः । **पाद्मे**—ब्रह्माणंविष्णुमीशंवासूर्यमग्निगणाधिपम् । दुर्गांसरस्वतीलक्ष्मीगौरींवानित्यमर्चयेत् । एतेष्वन्यतरार्चनेनापिनप्रत्यवैतीत्यर्थः। **केचित्तुपंचायतनपूजांनित्यांब्रुवते**—शिवंभास्करमग्निंचकेशवंकौशिकीमपि । मनसानर्चयन्याति देवलोकादधोगतिम्। वरंप्राणपरित्यागःशिरसोवापिकर्तनम्। नत्वसंपूज्यभुंजीतकौशिकीकेशवंशिवमिति**कालिकापुराणा**दित्याहुः। केचित्तु—अग्निर्गणेशःपावकःकार्तिकेयोविनायकइति**भविष्योत्तरात्तत्पूजामाहुः** । एतेनाग्निस्मार्तमितिवदन्नर्थानभिज्ञत्वादपास्तः । कौशिकींदुर्गां अनर्चयन्नपूज्यत्वज्ञानवानितिव**र्धमानसमयप्रदीपादयः**। पुष्पाद्यभावेमनसापिपूजयेदितिवयम् । केचित्तुविष्णुपूजैवनित्या शिवदुर्गादिपूजा तुकाम्येत्याहुः। यस्त्वेषांपूजायाअकरणेनिंदार्थवादःससंकल्पेसतिनित्यतापरइति**श्रीदत्तवाचस्पती** ।'तन्न । विष्णुपूजायामपितत्वापत्तेः—ब्रह्माणंविष्णुमीशंवागौरीवानित्यमर्चयेदिति**पाद्मे**वाशब्दश्रवणेपि—तस्मादनादिमध्यांतंनित्यमाराधयेद्धरिमिति**चंद्रिकायांकौर्मा**द्विष्णुपूजानित्या । —तत्रापिशालग्रामशिलांवापिचक्रांकितशिलांतथा । ब्राह्मणःपूजयेन्नित्यंक्षत्रियादिर्नपूजयेदिति**मंत्रराजानुष्टुब्विधानात्** । शालग्रामशिलापूजांविनायोश्नातिकिंचन । सचंडालोहिविष्ठायामाकल्पंजायतेकृमिरिति**हलायुधा**च्चशालग्रामपूजैवनित्येतिकेचित् । अन्येतुपूर्ववाक्येशालग्रामपदंमूर्त्युपलक्षणमिति**पंचायतनसारात्**—केशवार्चागृहेयस्यनतिष्ठतिमहीपते। तस्यान्नंनैवभोक्तव्यमभक्षणसमंस्मृतमिति**हलायुधे**वचनान्मूर्तिपूजापिनित्येत्याहुः । अत्रविष्णोरर्चेतिपाठमाश्रित्य—शंखारिभ्यांगदाब्जाभ्यांपूज्योविष्णुःश्रियैनरैरित्युक्तलक्षणाविष्णुप्रतिमाशालग्रामसद्भावेप्यावश्यकीतिटो**डरानंदः** । लिंगेदेवोमहादेवःसर्वेदैवव्यवस्थितः । अनुग्रहायलोकानांतस्मान्नित्यंप्रपूजयेदिति**भविष्योत्तरा**ल्लिंगपूजानित्येत्याहुः। **चंद्रिकायांकौर्मे**—योमोहादथवालस्यादकृत्वादेवतार्चनम् । भुंक्तेसयातिनरकान्सूकरेष्विहजायते । **यत्त्वाश्वलायनः**—दानाध्य

यनदेवार्चाजपहोमव्रतादिकान् । नकुर्याच्छ्राद्धदिवसेप्राग्विप्राणांविसर्जनादिति तन्नित्यवर्जमितित्रोपदेवः । विष्णुभिन्नपरमितिपरिचर्या । पूजयित्वाशिवंभक्त्यापितृश्राद्धंप्रकल्पयेदिति लैंगात् —श्राद्धाहितुसमभ्यर्च्यनृवराहजनार्दनमितिविष्णुधर्मोक्तेश्चविहितभिन्नपरमित्यपिके चित् । **सर्वादौसूर्यपूजा**—अपूज्यप्रथमंसूर्यमपरान्यःप्रपूजयेत् । नतद्भूतकृतंपाद्यंसंप्रतीच्छतिदेवताइतित्राह्मात् ।—रविर्विनायकश्चंडीईशो विष्णुश्चपंचमः । अनुक्रमेणपूज्यंतेव्युत्क्रमेणमहद्भयमिति । गणेशार्कौसमभ्यर्च्यशैवोविष्णुंप्रपूजयेत् । अर्चयेच्चशिवंपश्चाद्विष्णुमादौतुवैष्णवः । ततःशि वंततोदुर्गामेवंस्यादर्चनक्रिया । अत्रगणेशार्कयोःक्रमेनतात्पर्यंकिंतुतावपूजयित्वाप्रधानंनपूजयेत् । आदौनसर्वादौकिंतुविष्ण्वादौ । पौराणोयंक्रमः ।

आगमोक्तस्तुयोगिनीतंत्रे—गणेशसूर्यविष्ण्वीशदुर्गाआवाह्यपूजयेत् । **भैरवीतंत्रे**—आदौगणपतिंदेवंसूर्यंविष्णुमुमापतिम् । दुर्गांच पूजयेद्विद्वानिति । **आपस्तंबस्मृतौ**—प्रत्यहंदेवताःपूज्याइत्युक्तिर्वैश्वदेवदेवताभ्योन्याःपराशराद्युक्तप्रतिपदादितिथिदेवताःपूज्याइत्येतदर्थेति **टोडरानंदः** । तन्न । पूर्ववचनैकवाक्यतयास्यगणेशादिपूजापरत्वात् प्रतिपदादिदेवतापूजनस्यान्यत्रविधानाच्च । **पंचायतनस्थापनमाह्य मलप्रकाशेवोपदेवः**—शंभौमध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवौहरगणेशाजांबिकाःस्थापयेत् । देव्यांविष्णुशिवैकदंतरवयोलं बोदरेजेश्वरार्येनाःशंकरभागतोऽतिसुखदाव्यस्तास्तुतेहानिदाः । यस्ययइष्टोदेवःसतेनमध्येस्थाप्यःसाधारणतयापूजनेविष्णुः । **श्लोकार्थस्तु**—पंच सुदेवतासुपूजकाभ्यर्हितत्वेनशिवादौमध्यस्थेशिष्टानामेपक्रमः । शंभौमध्यगे—ईशानेहरिःआग्नेयेसूर्यःनैर्ऋत्येगणेशःवायव्येदुर्गा । हरौमध्यगे— ईशानेशंकरःआग्नेयेगणेशःनैर्ऋत्येसूर्यःवायव्येदुर्गा । रवौमध्यगे—ईशानेहरःआग्नेयेगणेशःनैर्ऋत्येविष्णुःवायव्येदुर्गा । देव्यांमध्यगायाम्—विष्णु रीशानेशिवआग्नेयेगणेशोनैर्ऋत्येरविर्वायव्ये । गणेशेमध्यगे—विष्णुरीशानेईश्वरआग्नेयेदुर्गानैर्ऋत्येरविर्वायव्येइति**गोविंदराजः** । **मंत्रमहो दधौ**—पंचायतनपक्षेतुमध्येविष्णुंततोर्चयेत् । अग्निनैर्ऋतवायव्येशानेषुगणनायकम् । रविंशिवांशिवंमध्येगणेशश्चेच्छिवंशिवाम् । रविंविष्णुंरवौ

मध्येविघ्नाजनगजेश्वरान् । भवान्यांमध्यसंस्थायामीशविघ्नार्कमाधवान् । हरेमध्यगतेसूर्यगणेशगिरिजाच्युतान् । संपूज्यादौमध्यगतंगणेशादिं ततोयजेत् । गणेशेमध्यसंस्थेतुपूजयेद्भास्करादितः । एतेनाजेश्वरेनार्याइतिपाठंवदन्नाचारचंद्रोदयोपास्तः ॥

अत्रपूज्यपूजकांतरालंप्राची । तदुक्तमागमे—पूज्यपूजकयोर्मध्येप्राचीप्रोक्ताविचक्षणैः। प्राच्येवप्राचीसोद्दिष्टामुक्त्वावैदेवपूजनं । **प्रयोगपारिजातेमंत्रशास्त्रे**—देवस्यमुखमारभ्यदिशंप्राचींप्रकल्पयेत् । तदादिपरिवाराणामंगाद्यावरणस्थितिः । **देवपूजायां**—प्राकूपश्चिमोदगास्यश्चप्रातःसायंनिशासुचेतिवचनाव्यवस्थेति**वाचस्पतिमिश्राः**।सूर्यसप्ताक्षरमंत्रपरमेतदितिपूजारत्नाकरेतिथितत्त्वेच। **टोडरानंदे गौतमः**—रात्रावुदङ्मुखःकुर्याद्देवकार्यंसदैवहि । शिवार्चनंसदाचैवशुचिःकुर्यादुदङ्मुखः । अर्कमर्कंतनुर्यजेदिति**भविष्योक्तेः** । सूर्यनित्यार्चनेप्रणवेनपूरकादिभिर्वायुधारणशोषणादिभिर्भूतशुद्धिरंगमिति**टोडरानंदः** । **आगमिकास्तु**नादेवोदेवमर्चयेदितिवाक्यात्सर्वदेवार्चनांगमित्याहुः ॥

अथसूर्यपूजाभविष्ये—मेरुमंदरतुल्योपिराशिःपापस्यदारुणः । आसाद्यभास्करंमर्त्यस्तंनाशयतितत्क्षणात् । प्रदद्याद्वैगवांलक्षंदोग्ध्रीणां वेदपारगे।एकाहमर्चयेद्भानुंतस्यपुण्यंततोधिकम्। **स्मृतिरत्नावल्याम्**—शिवंसूर्यंतथाचेंद्रंदुर्गाद्याउग्रदेवताः।योर्चयेत्पणपूर्वंतुसद्यःपततिमानवः। **प्रयोगपारिजातेसंग्रहे**—संवत्सरत्रयंकुर्याद्यःपरार्थसुरार्चनम्।संवत्सरंचगायत्रीषण्मासंरुद्रमेवच।प्रणवंवादिनंचैकंसचपातित्यमाप्नुयात् । तदपिमूल्येनभरणे । देवार्चनपरोविप्रोवित्तार्थीवत्सरत्रयम् । सवैदेवलकोनामहव्यकव्येषुगर्हितइति**चंद्रिकायांविष्णूक्तेः** । आपःक्षीरंकुशाग्राणिघृतंदधितथामधु । रक्तानिकरवीराणितथारक्तंचचंदनम् । अष्टांगमर्घमापूर्यभानवेद्भिर्निवेदयेत् । **हरनाथीयेस्मृतिसारे**—दारवेणार्घपात्रेणदत्वार्घ्यंयत्फलंलभेत् । तस्माच्छतगुणंपुण्यंमृत्पात्रेणनराधिप । ताम्रपात्रार्घदानेनपुण्यंदशगुणंस्मृतम्। पालाशपद्मपत्राभ्यांताम्रपात्रसमंलभेत् ।

रौप्यपात्रेणविज्ञेयंलक्षांशोनात्रसंशयः। सुवर्णपात्रविन्यस्तमर्घकोटिगुणंभवेत्। एवंस्नानेपुनैवेद्येवलिपूजादिपुक्रमात्। मृन्मयमत्रहस्तकृतग्राह्यम्। चक्रकृतस्यासुरत्वेननिषेधात्। **तथाभविष्ये**—कालेयकंतुरुष्कंचरक्तचंदनमेवच । यान्यात्मनःसदेष्टानियान्यशस्तान्यपाकुरु । कालेयं कृष्णागरुं। कालियाकाष्ठमित्यन्ये। तुरुष्कंसिह्लकम् ॥

अथपुष्पाणितत्रैव—पुष्पैररण्यसभूतैःपत्रैर्वागिरिसंभवैः। आत्मारामोद्भवैर्वापिभक्त्यासंपूजयेद्रविम्। **पुष्पमालायाम्**—जातिंकुंदशमीकुशेशयकुशाशोकबकंकिंशुकंपुन्नागंकरवीरचपकजपानेपालिकाकुब्जकम् । वासंतीशतपत्रिकाविचकिलंमंदारमर्काह्वयंपीताम्रातकनागकेसरमिदपुष्पंरवेःशस्यते। लोध्रकैरवमुत्पलंचसकलसिंहास्यकंपाटलायूथीकुंकुमकर्णिकारतिलकावाणंकदंवंजपा। काशंकेशरकेतकीमरुवकंद्रोणंत्रिसध्याह्वयपुष्पंशस्तमिदंचपूजनविधौसर्वसहस्रार्चिषः। तमालतुलसीविल्वशमीभृंगारजोद्भवम्। केतकीदूर्वयोर्धात्र्याःपत्रंदिनकरप्रियम्। पुष्पंशस्तंभृंगराजशाल्मलीकांचनालजम्। निषिद्धंविहितंसूर्येतगरकंटकारिका। गुंजापराजितोन्मत्तवराहक्रांतयासह। **भविष्ये**—करवीरेनृपैकस्मिन्नकार्यविनिवेदिते। दशदत्वासुवर्णस्यनिष्कानांलभतेफलम्। ग्रथितेनृपशार्दूलतदेतद्विगुणंभवेत्। भक्त्यापूजयतेयोर्कमर्कपुष्पैःसितासितैः। तेजसासोर्कसंकाशोह्यर्कलोकेमहीयते। जपापुष्पसहस्रेभ्यःकरवीरंविशिष्यते। करवीरसहस्रेभ्योविल्वपत्रंविशिष्यते। विल्वपत्रसहस्रेभ्यःपद्ममेकंविशिष्यते। वीरपद्मसहस्रेभ्योबकपुष्पंविशिष्यते। वकपुष्पसहस्रेभ्यःकुशपुष्पविशिष्यते। कुशपुष्पसहस्रेभ्यःशमीपुष्पंविशिष्यते। सर्वासांपुष्पजातीनांप्रवरंनीलमुत्पलम्। नीलोत्पलसहस्रेणनीलोत्पलशतेनच । रक्तैश्चकरवीरैस्तुयश्चपूजयतेरविम्। वसेदर्कपुरेश्रीमान्सूर्यतुल्यपराक्रमः। शमीपुष्पंबृहत्याश्चकुसुमंतुल्यमुच्यते। करवीरसमाज्ञेयाजातीबकुलपाटलाः। श्वेतमंदारकुसुमंसितपद्मंचतत्समम्। नागचंपकपुन्नागमुकुराश्चसमाःस्मृताः। प्रहरंतिष्ठतेजातीकरवीरमहर्निशम्। प्रत्येकमुक्तपुष्पेणदशसौवर्णिकंफलम्। स्रजोभिर्मुनिशार्दूलतदेवद्विगुणंभवेत्। मुकुराणिकदंबानिरात्रौदेयानिभानवे। दिवाशेषाणिपुष्पाणि

दिवारात्रौचमल्लिका। तथा—मल्लिकामालतीचैवदूर्वाकाशोतिमुक्तकः। पाटलाकरवीरंचजपाजायंतिरेवच। कुब्जकंतगरंचैवकार्णिकारःकुरंटकः। चंपकोवेणिकःकुंदोवालोवर्बरमल्लिका। अशोकस्तिलकोलोध्रस्तथाचैवाटरूषकः। शतपत्राणिचान्यानिबकाह्वंचविशेषतः। अगस्त्यंकिंशुकंतद्वत्पूजायांभास्करस्यतु। तुलसीकालतुलसीतथारक्तंचचंदनम्। केतकीपुष्पपत्रंचसद्यस्तुष्टिकरंरवेः। नकंटकारिकापुष्पंतथान्यद्गंधवर्जितम्। नचाम्रातकजैः पुष्पैरर्चनीयोदिवाकरः। येषांनप्रतिषेधोस्तिगंधवर्णान्वितानिच। तानिपुष्पाणिदेयानिभानवेलोकभानवे। मुकुरो विचकिलः। अवचयोत्तरंजाती पुष्पंप्रहरपर्यंतंपूजार्हम्। **भविष्ये**—यथानलंघयेत्कश्चित्स्नपनंभास्करस्यच। तथाकार्यंप्रयत्नेनलंघितंत्वशुभावहम्॥

अथगणेशपूजा गोविंदराजीयेभविष्ये—गणेशःपूजनान्नित्यंसर्वविघ्नानपोहति। सर्वान्कामानवाप्नोतिगणेशंपूजयन्नरः। **वाराहे**—गृहेलिंगद्वयंनार्च्यंगणेशत्रितयंतथा। नर्मदातीरसंभूतांस्त्रीन्गृहीनार्चयेत्सुधीः। गृहिग्रहणात्संन्यासिव्रतिनोर्ननिषेधः। **अथदुर्गापूजा।टोडरानंदेभविष्यपुराणे**—दिग्विभागेषुसर्वेषुकौबेरीदिक्शिवाप्रिया। तस्मात्तन्मुखआसीनःपूजयेत्तुसदांबिकाम्। **गोविंदराजीयेभविष्ये**—यःसदापूजयेद्दुर्गांप्रणमेद्वापिभक्तितः। सयोगीसुमतिर्धीमांस्तस्यमुक्तिःकरेस्थिता। आपःक्षीरंकुशाग्राणिअक्षतादधितंदुलाः। सहसिद्धार्थकादूर्वा कुंकुमंरोचनामधुः। अर्घोयंकुरुशार्दूलद्वादशांगउदाहृतः। **तथा**—नागकेशरकर्पूरंमुरामांसीसवालका। उद्वर्तनसमाख्यातामातृणांसर्वतःप्रिया। **शिवार्चनचंद्रिकायाम्**—चंदनागरुकर्पूरकाश्मीरैरोचनान्वितैः। ससिह्लकजटामांसीसटीभिःशक्तिसंभवम्। गंधाष्टकंशुभंवश्यंशक्तिमंत्रेषुयोजयेत्। सिह्लकंशिलारसइतिप्रसिद्धम्॥

अथपुनःपुष्पाणि देवीपुराणे—शृणुशक्रप्रवक्ष्यामिपुष्पाध्यायंसमासतः। ऋतुकालोद्भवैःपुष्पैर्मल्लिकाजातिकुंकुमैः। सितरक्तैश्चकुसुमैस्तथापद्मैश्चपांडुरैः। किंशुकैस्तगरैश्चैवकिंकिरातैःसचंपकैः। बकुलैश्चैवमंदारैःकुंदपुष्पैस्तिरीटकैः। करवीरार्कपुष्पैश्चशांशपैश्चापराजितैः। सितरक्तै

स्तथापीतैःकृष्णैश्चैवचतुर्विधैः। धत्तूरकातिमुक्तैश्चबंधूकागस्त्यसंभवैः। मदनैःसिंदुवारैश्चसुरभीरुचकैस्तथा। लताभिर्ब्रह्मवृक्षस्यपुष्पैश्चैवमनोहरैः। मंजरीभिःकुशानांचबिल्वपत्रैःसुशोभितैः । पत्रैःपुष्पैर्यथालाभंसर्वौषधिमयैःशुभैः । धान्यानांसर्वपत्रैश्चपुष्पैश्चैवप्रपूजयेत् । कालोद्भवैरित्याकालिकपुष्पनिषेधः । मंदारैरितिमंदारार्कयोर्दुर्गायां । तौविहितनिषिद्धावित्यन्ये । ब्रह्मवृक्षःपलाशः । **देवीपुराणे**—केतकीचातिमुक्तश्चबंधूकबकुलारिषिः(?) । कदंबःकर्णिकारश्चसिंधुवारःसमुद्गहः । पुन्नागश्चंपकश्चैवयूथिकावनमल्लिका । तगरार्जुनमल्लीचबृहतीशतपत्रिका । वीरकुसुमकह्लारबिल्वपाटलमालती । जपाविचकिलाशोकवर्णनीलोत्पलासिता । पंकजंशतपत्रंचदशधापुण्यवृद्धये । द्रोणपुष्पसमाक्षीरनीलापामार्गपत्रिका । सुरसावर्चरीभद्रासुरभीकणमल्लिका । मदनोमरुपत्रश्चशतधापुण्यवृद्धये । कदंबैरर्चयेद्रात्रौमल्लिकोभयतःशुभा । दिवाशेषाणिपुष्पाणियथालाभंनियोजयेत् । प्रत्येकंमुक्तपुष्पेषुदशसौवर्णिकंफलम् । सन्निबद्धेषुतेष्वेवद्विगुणंफलमादिशेत् । सुरसा तुलसीविशेषः । सौवर्णेत्वक्षिणीराजन्भगवत्यैप्रयच्छति । गोसहस्रफलंप्राप्यसूर्यलोकेमहीयते । तथासुवर्णतिलकंदुर्गादेव्यैप्रयच्छति । सगच्छतिपरंस्थानंयत्रसापरमाकला । **धूपोदेवीपुराणे**—धूपंकल्याणनागंतुनित्यंदेव्याःप्रियंनृप । दीपनैवेद्येपूर्वोक्तेएव ।

अथशिवपूजारुद्राक्षादिचतिथितत्वेलैंगे—विनाभस्मत्रिपुड्रेणविनारुद्राक्षमालया । पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः । तस्मान्मृदापिकर्तव्यंललाटेवैत्रिपुंड्रकम् । **कृत्यकल्पद्रुमेउमासंवादे**–उच्छिष्टोवाविकर्मस्थःसंलिप्तःसर्वपातकैः । नासौलिप्यतिपापेनरुद्राक्षस्यतुधारणात् । लक्षंतुस्पर्शनेपुण्यंकोटिर्भवतिचालनात् । दशकोटिसहस्राणिधारणाल्लभतेफलम् । रुद्राक्षदेहसंस्थोपिकुक्कुरोम्रियतेयदि । सोपिरुद्रपदंयातिकिंपुनर्मानवोगुरुः।सप्तविंशतिरुद्राक्षमालयादेहसंस्थया । यत्करोतिनरःपुण्यसर्वंकोटिगुणंभवेत् । हस्तेचोरसिकंठेयःशिरसाचैवधारयेत् । सुरासुराणांसर्वेषांसवंद्योहियथाशिवः । शिखायांबाहुकंठेचकर्णयोश्चापियोनरः । रुद्राक्षंधारयेद्भक्त्यासशैवंलोकमाप्नुयात् । नववक्त्रंचरुद्राक्षंधारयेद्वामपा

णिना । चतुर्दशमुखंचैवशिखायांधारयेद्बुधः । निश्छिद्राश्चसुपक्वाश्चरुद्राक्षाधारणेस्मृताः । **नववक्रादिभेदाःशिवरहस्येपुरुषार्थप्रबोधेच**—बभूवुस्तेचरुद्राक्षाअष्टत्रिंशप्रभेदतः । सूर्यनेत्रसमुद्भूताःकपिलाद्वादशस्मृताः । सोमनेत्रोत्थिताःश्वेतास्तेषोडशविधाःक्रमात् । वह्निनेत्रोद्भवाःकृष्णादशभेदाभवंतिहि । श्वेतवर्णंतुरुद्राक्षंजातितोब्राह्ममुच्यते । क्षात्रंरक्तंतथामिश्रंवैश्यंकृष्णंतुशूद्रकम् । एकवक्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति । द्विवक्रेहरगौरीस्याद्गोवधंनाशयेद्ध्रुवम् । त्रिवक्रस्त्वनलःसाक्षात्स्त्रीहत्यांदहतिक्षणात् । चतुर्वक्रःस्वयंब्रह्मानरहत्यांव्यपोहति । पंचवक्रस्तुकालाग्निःसर्वपापप्रणाशकृत् । षड्वक्रःकार्तिकेयस्तुभ्रूणहत्यादिनाशयेत् । सप्तवक्रस्त्वनंतःस्यात्स्वर्णस्तेयादिपापहृत् । विनायकोष्टवक्रस्तुसर्वाव्रतविनाशकृत् । भैरवोनववक्रस्तुशिवसायुज्यकारकः । दशवक्रःस्मृतोविष्णुर्भूतप्रेतभयापहः । एकादशमुखोरुद्रोनानायज्ञफलप्रदः । द्वादशास्यस्तथादित्यःसर्वरोगनिबर्हणः । त्रयोदशमुखःकामःसर्वकामफलप्रदः । चतुर्दशास्यःश्रीकंठोवंशोद्धारकरःपरः । **पंचायतनसारेतिथितत्त्वेच**—विनामंत्रंतुयोधत्तेरुद्राक्षान्भुविमानवः । सयातिनरकान्घोरान्यावदिंद्राश्चतुर्दश । **आचारदर्पणेबोपदेवः**—रुद्राक्षान्कंठदेशेदशनपरिमितान्मस्तकेविंशतीद्वेषट्षट्कर्णप्रदेशेकरयुगलकृतेद्वादशद्वादशैव । बाह्वोरिंदोःकलाभिर्नयनयुगकृतेएकमेकंशिखायांवक्षस्यष्टाधिकंयःकलयतिशतकंसस्वयंनीलकंठः । **पुरुषार्थप्रबोधे**—प्रक्षाल्यगंधतोयेनपंचगव्येनचोपरि । शिवांभसाथप्रक्षाल्यश्रीरुद्रेणाभिषेचयेत् । श्रीरुद्राणांप्रतिष्ठेयमेवंवैदिकसंमता । तांत्रिकेणप्रतिष्ठासाग्राह्यानोवैदिकेनतु । अथवावैदिकमतेप्रतिष्ठानैवविद्यते । **शिवरहस्ये**—पंचामृतंपंचगव्यंस्नानकालेप्रयोजयेत् । रुद्राक्षस्यप्रतिष्ठायांमंत्रंपंचाक्षरंतथा । **पंचायतनसारेपाद्मे**—शालग्रामशिलालिंगेयःकरोतिममार्चनम् । तेनार्चितःकार्तिकेयोयुगानामेकसप्ततिम् । **शूलपाणौलैंगे**—वरंप्राणपरित्यागःशिरसोवापिकर्तनम् । नचैवापूज्यभुंजीतशिवलिंगेमहेश्वरम् । सूतकेमृतकेचैवनत्याज्यंशिवपूजनम् । **भारतेमूर्तावपिशिवपूजोक्ता**—ताभ्यांलिंगेर्चितोदेवस्त्वर्चायांचयुगे

युगेइति । शिवमूर्तिर्दशभुजापूज्या—पिनाकिनंवज्रिणंदीप्तशूलंपरश्वधिनंगदिनंखायतासिम् । दिव्यंचापमिषुवीचाददानंव्याघ्राजिनंपरि
धिणदंडपाणिमिति**भारतात्**। चतुर्भुजेत्यन्ये । त्रियंबकेतिमंत्रंतुतथातत्रप्रयोजयेत् । **देवीपुराणे**—वार्क्षवित्तप्रदंलिंगंस्फाटिकसर्वकाम
दम् । नर्मदागिरिजश्रेष्ठमन्यद्वापिहिलिंगवत् । कृत्वापूजयविप्रेंद्रलप्स्यसेचेप्सितफलम् । **तिथितत्त्वेभविष्ये**—तथामलकमात्रंतुकृत्वा
लिगहिरण्मयम् । सपूज्यरत्नजटितशिवलोकेमहीयते । मृद्भस्मगोशकृत्पिष्टताम्रकांस्यसमुद्भवम् । कृत्वालिंगसकृत्पूज्यवसेत्कल्पायुतदिवि ।
काशीखंडेनर्मदेशमाहात्म्ये—यावत्योदृपदःसतितवरोधसिनर्मदे । तावत्योलिंगरूपिण्योभविष्यतिवरान्मम । **भविष्ये**—बाण
लिगानिराजेंद्रख्यातानिभुवनत्रये । नप्रतिष्ठानसंस्कारस्तेषामावाहनंनच । एवमेवप्रपूज्यानिशिवरूपाणिभावतः । **कालोत्तरे**—त्रिपचवारं
यस्यैवतुलासाम्यनजायते । तद्बाणहिसमाख्यातशेषंपाषाणसंभवम् । **क्रियासारे**—लिंगस्यशिवनाभेस्तुनहिपीठप्रकल्पनम् । तदाधारशिले
वस्यात्तस्यपीठमितिस्मृतम् । उत्तममध्यमचैवाधमलिंगत्रिधोच्यते । एष्वेकैकंत्रिधातद्वदुक्तमंगुलिमानतः । नवाष्टसप्तांगुलिकलिंगश्रेष्ठतथास्मृ
तम् । षट्पंचकचतुर्मानमध्यमत्रिविधस्मृतम् । त्रिद्व्येकांगुलिकंलिंगत्रिविधतुकनीयसम् । उत्तमंबुद्बुदाकारंमध्यमकुकुटांडवत् । अधमगोकंकुद्व
त्स्यादितिलिंगंत्रिधास्मृतम् । **तिथितत्त्वेकालकौमुद्यांचस्कांदे**—अक्षादल्पपरिमाणंनलिंगकुत्रचिन्नरः । कुर्वीतांगुष्ठतोह्रस्वंनकदाचित्स
माचरेत् । अगुष्ठतोंगुष्ठपर्वग्रथे. । अगुष्ठांगुलिमानतुयत्रयत्रोपदिश्यते । तत्रतत्रबृहत्पर्वग्रथिभिर्मिनुयात्सदेतिछंदोगपरिशिष्टादित्युक्ततिथि
तत्वे । **सिद्धांतशेखरे**—अगुलादिवितस्त्यतलिंगगेहेप्रपूजयेत् । प्रासादेतुतदूर्ध्वंस्यात्पूजनीयप्रयत्नतः । लिंगमस्तकविस्तारपूजाभागस
मंनयेत् । नाहंतत्रिगुणंकुर्यान्नाहवत्पीठविस्तृतिः । विस्तारद्विगुणंकुर्यादुन्नतपीठमुत्तमम् । वृत्तवाचतुरस्रवामध्येकठसमन्वितं । द्विगुणलिंग
नाहाच्चकंठनाहसमाचरेत् । त्रिमेखलमधश्चोर्ध्वसमंवायद्विमेखलम् । लिंगमस्तकविस्तारेपड्भागंविभजेत्ततः । मेखलामेकभागेनकुर्यात्खातचतत्स

मम् । लिंगदैर्घ्यसमंकुर्यात्प्रणालंपीठबाह्यतः । विस्तारंतत्समंमूलेतदग्रेचतदर्धतः । जलमार्गःप्रकर्तव्यस्तस्यमध्येत्रिभागतः । कुर्यात्पीठार्धदीर्घंवाप्रणालंचशिवोदितम् । सर्वेषांरत्नलिंगानांसपीठानांविशेषतः । लौहादीनांचलिंगानामेवंलक्षणमाचरेत् । **गौतमीतंत्रेतु**— लिंगमस्तकविस्तारोलिंगोच्छ्रायसमोभवेत् । परिधिस्तत्रिगुणितस्तद्वत्पीठंव्यवस्थितम् । प्रणालिकातथैवस्यात्पंचसूत्रविनिर्णयः । लिंगमस्तकविस्तारदैर्घ्यलिंगोच्चतेसमे । तद्विगुणवेष्टनाहंलिंगस्थौल्यम् । तत्समंवृत्तचतुरस्रंवापीठमधश्चोर्ध्वंचेतितत्वम् । पीठोच्चतालिंगोच्चताद्विगुणा । **नंदिपुराणे**— त्रिकोणंफलकाकारंशूलाग्रंजर्जरंनतम् । कपिलंचापियल्लिंगंतद्गृहस्थोनपूजयेत् । तथादीक्षितानांद्विजान्येषांस्त्रीणामपितथैवच । लिंगेस्वगुरुणादत्तेपूजानान्यत्रचोदिता । **सूतसंहितायां**शिवपूजाविधिंप्रक्रम्य—समासीनःसदामौनीनिश्चलोदङ्मुखःशुचिः । **सोमशंभुः**—देवस्यदक्षिणेभागेसन्निविष्टःसुखासने । **ज्ञानरत्नावल्याम्**—नप्राच्यामग्रतःशंभोर्नोत्तरेयोषिदाश्रये । नप्रतीच्यांयतःपृष्ठंतस्माद्दक्षंसमाश्रयेत् । दक्षंदक्षिणभागं । **तिथितत्वेनंदिपुराणे**—चरलिंगेर्चयेद्देवंपूर्वाभिवदनंबुधः । स्थिरलिंगेयथाकामंसुखमादौतथार्चयेत् । **चंद्रिकायांहारीतः**—आराधयेन्महादेवंभावपूतोमहेश्वरम् । मंत्रेणरुद्रगायत्र्याप्रणवेनाथवापुनः । ऐशानेनाथवारौद्रेत्र्यंबकेणसमाहितः । तथोत्तमःशिवायेतिमंत्रेणानेनवायजेत् ।

बौधायनः—अथातोमहादेवस्याहरहःपरिचर्याविधिंव्याख्यास्यामः । स्नात्वाशुचौदेशेगोमयेनोपलिप्यप्रतिकृतिंकृत्वाक्षतपुष्पैर्यथालाभमर्चयेत्सहपुष्पोदकेनमहादेवमावाहयेदोंभूर्महादेवमावाहयामिॐभुवोमहादेवमावाहयामिॐस्वर्महादेवमावाहयामिॐभूर्भुवःस्वर्महादेवमावाहयामीत्यावाह्यायातुभगवान्महादेवइत्यथस्वागतेनाभिनंदयतिस्वागतंसुस्वागतंभगवतेमहादेवायैतदासनमुपक्लृप्तमत्रास्तांभगवान्महादेवइत्यत्रकूर्चंददाति भगवतेयंकूर्चोदर्भमयस्त्रिवृद्धरितःसुपर्णस्तंजुषस्वेत्यत्रस्थानासनानिकल्पयत्यग्रेब्रह्मणेकल्पयामिविष्णवे दक्षिणतःस्कंदाय विनायकाय पश्चिमत शूलायमहाकालाय उत्तरतःउमायै नंदिकेश्वरायकल्पयामीतिकल्पयित्वा सावित्र्या योरुद्रोअग्नावितिचपात्रमभिमंत्र्य प्रक्षाल्यत्रिप

तिरःपवित्रमपआनीय सहपवित्रेणादित्यंदर्शयेदोमित्यातमितोस्तासांत्वरितरुद्रेणपाद्यंदद्यात्प्रणवेनार्घ्यमथव्याहृतिभिर्निर्माल्यंव्यपोह्योत्तरतश्चंडेशा
यनमइत्यथैनंस्नपयत्यापोहिष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइत्येतेनानुवाकेनाथाद्भिस्तर्पयतिभवंदेवं
तर्पयामिशर्वंदेवंईशानदेवंपशुपतिदेवंरुद्रदेवंउग्रदेवंभीमदेवमहांतदेवतर्पयामि ब्रह्मजज्ञानंकेतुरुद्रायत्वरितरुद्रवामदेव्यमापोवाइदमितिचाभिषेकं
कुर्याद्व्याहृतिभिःप्रदक्षिणमुदकंपरिषिच्य ॐनमोभगवतेरुद्रायत्र्यंबकायेतितर्पयित्वाथैतानिवस्त्रयज्ञोपवीतानिदद्याद्भवायदेवायनमइतिव्याहृतिभि
र्दत्वाव्याहृतिभिःप्रदक्षिणमुदकंपरिषिच्यनमस्तेरुद्रमन्यवइतिगंधंदद्यात्सहस्राणिसहस्रशइतिपुष्पंदद्यात्ईशानंत्वाभुवनानामभिश्रियामित्यक्षतंदद्या
त्सावित्र्याधूपमुद्दीप्यस्वेतिदीपदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांभगवतेमहादेवायजुष्टंचरुंनिवेदयामीतित्रियंबकमितिपरिषेकम
मृतोपस्तरणमसीतिप्रतिपदंकृत्वाहविरुद्वासयामीतिनिवेद्यामृतापिधानमसीतिप्रतिपदंकृत्वात्र्यंबकमित्याचमनीयमथाष्टभिर्नामधेयैरष्टौपुष्पाणिदद्या
द्भवायदेवायनमः। शर्वायदेवायनमः। ईशानायदेवायनमः। पशुपतयेदेवायनमः। रुद्रायदेवायनमः। उग्रायदेवायनमः। भीमायदेवा
यनमः। महतेदेवायनमः। ब्रह्मणेनमः। विष्णवेनमः। स्कंदायनमः। विनायकायनमः। शूलायनमः। महाकालायनमः। उमायैनमः। नंदिकेश्वरा
यनमः। इतिचरुशेषेणनामधेयैरष्टाहुतीर्जुहोति। भवायदेवायस्वाहा। शर्वायदेवायस्वाहा। ईशानायदेवायस्वाहा। पशुपतयेदेवायस्वाहा।
रुद्रायदेवायस्वाहा। भीमायदेवायस्वाहा। महतेदेवायस्वाहेत्यथशिष्टैर्गंधमाल्यैर्ब्राह्मणानात्मानंवालंकृत्याथैनमृग्यजुःसामाथर्वभिःस्तुवतिसहस्राणि
सहस्रशइत्यनुवाकंजप्त्वाअन्यांश्चरौद्रान्मंत्रान्यथाशक्तीत्येके ॐ भूर्भुवःसुवर्महरोंभगवतेमहादेवायचरुमुद्वासयामीतिचरुमुद्वास्योद्वासनकालं ॐ
भूर्भुवःस्वः महादेवमुद्वासयामीत्युद्वास्य। प्रयातुभगवानीशःसर्वलोकपरायणः। अनेनहविषातुष्टःपुनरागमनायच। पुनःपुनःसंदर्शनायचे
तिलिंगेप्रतिमास्थानेष्वप्स्वग्नावावाहनविसर्जनवर्जंसर्वसमानंमहत्स्वस्त्ययनमित्याहभगवान्बौधायनः॥

शिवपूजायांविशेषोभविष्ये—आपःक्षीरंकुशाग्राणिदध्यक्षतसितामधु । सिताश्वसर्षपाश्चैवअर्घोष्टांगःप्रकीर्तितः । तत्रैव—चंदनेप्यगरौज्ञेयंपुण्यमष्टगुणंनृप । कृष्णागरौविशेषेणद्विगुणंफलमादिशेत् । तस्माच्छतगुणंपुण्यंकुंकुमस्यविधीयते । चंदनागरुकर्पूरैःसूक्ष्मपिष्टैःसकुंकुमैः । शिवस्यार्चासमालभ्यवसेत्कल्पायुतंदिवि । अर्चेतिलिंगोपलक्षणम् । **शिवार्चनचंद्रिकायांभविष्ये केदारखंडे**—करवीराद्दशगुणमर्कपुष्पंविशिष्यते । अर्कपुष्पाद्दशगुणंधत्तूरंहिविशिष्यते । चंपकंनागपुष्पंचकह्लारंचविशिष्यते । नीलोत्पलंचकह्लारात्सहस्रेणविशिष्यते । बकपत्रसहस्रेभ्यएकंधत्तूरकंवरम् । धत्तूरकसहस्रेभ्योवृहतीपुष्पमुत्तमम् । वृहतीपुष्पसाहस्राद्द्रोणपुष्पंविशिष्यते । द्रोणपुष्पसहस्रेभ्योह्यपामार्गंविशिष्यते । अपामार्गसहस्रेभ्यःकुशपुष्पंविशिष्यते । कुशपुष्पसहस्रेभ्यःशमीपुष्पंविशिष्यते । शमीपुष्पसहस्रेभ्यःश्रीमन्नीलोत्पलंवरम् । शमीपुष्पवृहत्योश्चकुसुमंतुल्यमुच्यते । अपामार्गः अपामार्गपुष्पं । करवीरसमाज्ञेयाजातीवकुलपाटलाः । श्वेतमंदारकुसुमंसितपद्मंचतत्समम् । नागचंपकपुंनागाधत्तूरकुसमाःस्मृताः । तत्समं करवीरसमम् । नागो नागकेसरः । तथा—केतकीचातिमुक्तंचकुंदोयूथीमदंतिका । शिरीषसर्जबंधूककुसुमानिविवर्जयेत् । कुंदंवार्षिकशिवपूजायांमाघेविहितम् । अन्यथानिषिद्धम् । तथा—कंदकानिकदंबानिरात्रौदेयानिशंकरे । दिवाशेषाणिपुष्पाणिदिवारात्रौचमल्लिका । प्रत्येकमुक्तपुष्पेषुदशसौवर्णिकंफलम् । मंत्रान्वितेषुतेष्वेवद्विगुणंफलमिष्यते । विल्वपत्रैरखंडैस्तुशंकरंपूजयेत्क्वचित् । सर्वपापविनिर्मुक्तःशिवलोकेमहीयते । तुलसीविल्वनिर्गुंडीजंवूराव्रणकंतथा । पंचविल्वमितिप्रोक्तमर्चयेदिंदुशेखरम् । वृहतीकुंकुमैर्भक्त्यायोलिंगंसकृदर्चयेत् । गवामयुतदानस्यफलंप्राप्यशिवंव्रजेत् । तथा—अशोकश्वेतमंदारकर्णिकारवकानिच । करवीरार्कमंदारशमीतगरकेशरम् । पुष्पैरेतैर्यथालाभंयोनरःपूजयेच्छिवम् । सयत्फलमवाप्नोतितदेकाग्रमनाःशृणु । सूर्यकोटिप्रतीकाशैर्विमानैःसर्वकामिकैः ।

१ कदकानि केतकानि ।

दोधूयमानश्चमरैः शिवलोकेमहीयते । करवीरोबकश्चैवअर्कउन्मत्तकस्तथा । पालाशोबृहतीचैवतथाचगिरिकर्णिका । तथाकाशस्यपुष्पाणिमंदार श्चापराजिता । शमीपुष्पाणिचान्यानिकुंजकःशिखिनातथा । अपामार्गस्तथापद्मंजातीपुष्पंसकोपनम् । चंपकोशीरतगरंतथावैनागकेसरम् । पुंनागःकिकिरातंचद्रोणपुष्पंतथाशुभम् । शिशपोदुंबरश्चैवजपामल्लीतथैवच । पुष्पाणियज्ञवृक्षस्यतथाविल्वदलंशुभम् । कुसुंभस्यचपत्राणितथा वैकुंकुमस्यच । नीलंचकुमुदंचैवतथारक्तोत्पलानिच । सुरभीणिचसर्वाणिस्थलजान्यंबुजानिच । गृह्णामिशिरसादेवियोमेभक्त्यानिवेदयेत् । केसरो बकुलः । किकिरातःकुरंटकः । सर्वाणीतिनिषिद्धेतरपरम् । वसंतेतुऋतौप्राप्तेसर्वैःपुष्पैर्मनोरमैः । पूजितेतुमहादेवेअश्वमेधफलंलभेदितिवचना दत्रनिषिद्धैरपिपूजा । सर्वशब्दसकोचेमानाभावात् निषेधस्यकालांतरेसावकाशत्वाच्च । **देवीपुराणे**—वैशाखेमासिकर्तव्यापूजापाटलयासदा । सर्वान्कामानवाप्नोतिज्येष्ठेपद्मार्चनैःसदा । आषाढेविल्वकह्लारैरीप्सितलभतेफलम् । नवमल्लिकयापूजानभोमासिमहाफला । कदंबैश्चंपकैरेव नभस्येसर्वकामदा । पूजापंकजमालत्याइषेप्युदयदायिनी । शतपत्रिकयापूजाकार्तिकेसर्वकामदा । मार्गेनीलोत्पलैःपूजापौषेतुकुब्जकैःसदा । मा घेतुकुंदकुसुमैरुचकेनचफाल्गुने । शतपत्रैस्तथाचैत्रेयोर्चयेदिदुशेखरम् । लभतेसर्वयज्ञानांसर्वदानफलतथा । **केदारखंडे**—जातीपुष्पंमल्लि कायाश्चपुष्पंसमोगरनीलपुष्पतथैव । तथापुष्पंकुटजकर्णिकारकौसुंभाख्यंवारिजंरक्तवर्णम् । एतान्येवचपुष्पाणिमध्याह्नेलिंगपूजने । रात्रौमो गरकान्येवपवित्राणिविशेषतः ।

अथधूपः । शिवपुराणे—गुग्गुलंघृतसंयुक्तंशिवेयश्चनिवेदयेत् । रुद्रलोकमवाप्नोतिगाणपत्यंचगच्छति । **भविष्ये**—दधित्थंघृतसं- युक्तंदग्धबिल्वमथापिवा । अग्निष्टोमस्ययज्ञस्यफलप्राप्नोतिमानवः । दधित्थःकपित्थः । विल्वविल्वफलम् । दीपस्तुपूर्वोक्तएव । **आदि त्यपुराणे**—प्रदक्षिणात्रयकुर्वन्शिवस्यायतनेनरः । अश्वमेधसहस्रस्यइष्टस्यलभतेफलम् । **बह्वृचपरिशिष्टे**—एकाविनायकेदद्याद्द्वेसूर्येत्री

णिशकरे । चत्वारिकेशवेदद्यात्सप्ताश्वत्थेप्रदक्षिणाः । **बृहन्नारदीये**—एकांचंड्यांरवौसप्ततिस्रोदद्याद्विनायके । चतस्रःकेशवेदद्याच्छिवेत्व र्धप्रदक्षिणम् । पदांतरेपदन्यस्येत्करौचलनवर्जितौ । स्तुतिर्वाचिहृदिध्यानंचतुरंगप्रदक्षिणम् । **लैंगे**—सव्यंव्रजेत्ततोऽसव्यंप्रणालंनैवलंघयेत् । **स्कांदे**—प्रदक्षिणप्रकुर्वीतशतमष्टोत्तरंतथा । **बृहन्नारदीये**—शिवप्रदक्षिणेमर्त्यःसोमसूत्रंनलंघयेत् । **प्रदक्षिणाप्रकारस्तु**—वृषंचडं वृषचैवसोमसूत्रपुनर्वृषम् । चंडंचसोमसूत्रंचपुनश्चडपुनर्वृषम् । **प्रतिष्ठाहेमाद्रौ**—प्राच्यांनंदिमहाकालौयाम्येभृंगिविनायकौ । वारुणेवृ षभस्कदौदेवीचडौतथोत्तरे । **ऐंद्रविक्रम्यांत्वीशान्यांचंडउक्तः** । तत्रैव—बाणलिंगेचलेलैहेसिद्धलिंगेस्वयंभुवि । प्रतिमासुचसर्वासुनचं डोऽधिकृतोभवेत् । **आदित्यपुराणे**—लिंगेस्वायंभुवेचैवरत्नेतैजसनिर्मिते । सिद्धप्रतिष्ठितेचैवनचडोधिकृतोभवेत् । तथा—अपसव्यंयतिः कुर्यात्सव्यतुब्रह्मचारिणः । सव्यापसव्यंगृहिणोनित्यंशंभोःप्रदक्षिणम् । तृणैःकाष्ठैस्तथापर्णैःपाषाणैर्वेष्टकादिभिः । अंतर्धानंपुरःकृत्वासोमसूत्रं तुलंघयेत् । **तत्प्रमाणंतत्रैव**—प्रासादविस्तारसमानसूत्रंसोमस्यसूत्रेदिशिसोमसूत्रम् । सूत्राद्बहिर्लंघनतोनदोषःस्याद्दोषआभ्यंतरलंघनेन । **शिल्पशास्त्रे**—लिंगमस्तकमध्यात्तुसूत्रंस्यादाप्रणालकम् । लिंगप्रणालीपुष्टत्वंतावदेवप्रकीर्तितम् । **विशेषांतरंतत्रैव**—सोमसूत्रद्वयंय त्रयत्रवाविष्णुमंदिरम् । अपसव्यंनकुर्वीतकुर्वीतैवप्रदक्षिणम् । **केदारखंडे**—वृषभांतरितोभूत्वापीठकांतरमेवच । प्रदक्षिणंनकुर्वीतकुर्वन्किल्बिष माप्नुयात् । **कालिकापुराणे**—स्पृष्ट्वारुद्रस्यनिर्माल्यंसवासाआप्लुतःशुचिः । इदमशुचिविषयम् । निर्माल्यंयोहिमद्भक्त्याशिरसाधारयिष्यति । अशुचिर्भिन्नमर्यादोनरःपापसमन्वितः । नरकेपच्यतेघोरेतिर्यग्योनौचसंभवेदितिस्कांदादितिश्रीदत्तः । **अपास्तएवायंदोषःस्कांदे**— शिवनिर्माल्यभोक्तारःशिवनिर्माल्यलंघकाः । शिवनिर्माल्यदातारःस्पर्शस्तेषांहिपुण्यहृत् । शिवैकभक्तानांननिषेधः । पादोदकंचनिर्माल्यंभक्तै र्धार्यंविशेषतइत्यग्निपुराणात् ।—निर्माल्यंधारयेद्भक्त्याशिरसापार्वतीपतेः । राजसूयस्ययज्ञस्यफलंप्राप्नोतिनिश्चितमित्यादित्यपुराणाच्च ।

लोभात्तुनधार्यम् । लोभान्नाधरयेच्छंभोर्निर्माल्यंनचभक्षयेत् । नस्पृशेदपिपादेनलंघयेन्नापिनारदेतिपाद्मात् । अग्निपुराणे—बाणलिंगेचले लौहेसिद्धलिंगेस्वयंभुवि । प्रतिमासुचसर्वासुनदोपोमाल्यधारणे । शालग्रामसंसर्गेतुनदोषः । अग्राह्यशिवनिर्माल्यपत्रपुष्पंफलजलम् । शालग्रामस्यससर्गात्सर्वंयातिपवित्रतामितिस्कांदवाराहोक्तेः । अस्यार्थः—पचायतनपूजायांकांडानुसमयपदार्थानुसमयौविहायसहैवपचानांपूजनेशालग्रामसंसर्गाच्छिवनैवेद्यभक्ष्यम् । यदाशिवेनैवेद्यपृथक्कृतदानभक्ष्यमिति ॥

अत्रपुरुषार्थप्रबोधेचतुर्धाव्यवस्थोक्ता—द्विजानांनिषेधोद्विजानांविधिरित्याद्या । वैदिकतांत्रिकविषयेत्यन्या । दीक्षितादीक्षितविषयेतितृतीया । ततःसिद्धांतकृतः—ज्योतिर्लिंगविनालिंगयःपूजयतिमानवः । तस्यनैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकम् । शालग्रामोद्भवेलिंगेबाणलिंगेस्वयंभुवि । रसलिंगेतथार्षेचसुरसिद्धप्रतिष्ठिते । हृदयेचद्रकांतेचस्वर्णरूप्यादिनिर्मिते । शिवदीक्षावताभक्तेनेदंभक्ष्यमितीर्यते । इतिभविष्योक्तेः । तथा—बाणलिंगेस्वयंभूतेचद्रकांतेहृदिस्थिते । चांद्रायणसमज्ञेयशंभोर्नैवेद्यभक्षणम् । यत्रचडाधिकारोस्तिनभोक्तव्यंचमानवैः । चडाधिकारोनोयत्रभोक्तव्यतत्रभक्तितइतितत्रैवोक्तेः ।—निवेदितयद्देवेशेतच्छेषंचात्मशुद्धये । श्रद्दधानोनलोभेनचडायह्यनिवेदितमितिवायुपुराणाच्च ।—येवीरभद्रशपिताःशिवभक्तिपराङ्मुखाः । शंभोरन्यत्रदेवेषुयेभक्तायेनदीक्षिताः । तेषामनर्हमीशस्यतत्प्रसादचतुष्टयमितिशिवपुराणाच्चसामान्यविधिरेतत्परएव । एतैर्विशेषवाक्यैरुपसंहारात्, अन्यथानिषेधानांनिरवकाशत्वापत्तेः । यत्तुशिवनिर्माल्यस्पर्शेप्रायश्चित्तंतदेतदन्यपरम् । यत्तुशिवनैवेद्यभक्षणादेःकाम्यत्वात्तत्सकलशिवस्वभक्षणादिनिषेधबाधकत्वमिति तत्रपूर्वोक्तव्यवस्थासंभवात् फलरहितविधिसद्भावाच्चेतिश्रीभट्टनारायणचरणाः । सिद्धांतशेखरे—धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान् । विहायशेषनिर्माल्यचंडेशायनिवेदयेत् । अन्यदन्नादिपानीयंतांबूलगंधपुष्पकम् । दद्याच्चडायनिर्माल्यशिवभुक्ततुसर्वशः । आचार्यंशिवचंडानामाज्ञाभंगेतुलक्षकम् ।

धनस्यभक्षणेतेषांपादोनंलक्ष्मीरितम्। निर्माल्येभक्षितेपादलक्षतःशुद्धिरीरिता। दानंचभक्षणसमंतदर्धंतदुपेक्षणे। अकामाद्भक्षणेयद्वानिर्माल्यस्यज पेत्सुधीः। ब्रह्मपंचकसाहस्रमर्धेनसहितंततः। कामतोभक्षणेदीक्षाप्रायश्चित्तंनचान्यतः। निर्माल्यलंघनेघोरंप्रजपेदयुतंततः। स्पर्शश्वविक्रयस मोविक्रयोभक्षणेनच। **स्मृत्यर्थसारे**—शैवसौरनिर्माल्यभक्षणेचांद्रम्। अभ्यासेद्विगुणम्। मत्याभ्यासेपतनम्। अन्यनिर्माल्येप्यनापद्येव मिति। अत्र—ब्रह्महापिशुचिर्भूत्वानिर्माल्यंयस्तुधारयेत्। तस्यपापंमहच्छीघ्रंनाशयिष्येमहाव्रतेतिस्कांदादशुचिनानधार्यं किंतुस्नात्वेति **स्मार्ताः**। अनुपनीतेननधार्यमिति**श्रीदत्तः**। शिवदीक्षाहीनैर्नधार्यमिति**शैवाः**। **माघमाहात्म्येपाद्मे**—द्रव्यमन्नंफलंतोयंशिवस्वंनस्पृशेत्क चित्। निर्माल्यंलंघयेन्नैवकूपेसर्वंतुतत्क्षिपेत्। **हरनाथीयेस्मृत्यर्थसारे**—ब्रह्मांगलग्नंविप्रेभ्योविष्णवेचप्रदीयते। रुद्रांगलग्नमग्नौचदहेत्सर्वं तुतत्क्षणात्। विप्रेभ्यस्त्वथतद्देयंब्रह्मणेयन्निवेदितम्। वैष्णवंसात्वतेभ्यश्चभस्मांगेभ्यश्चशांभवम्। सौरमृगेभ्यःशाक्तेभ्यस्तापिने[1]यन्निवेदितम्। वाडवे[2]भ्यस्तुतद्देयंगणेशायनिवेदितम्। भूतप्रेतपिशाचेभ्योयत्तद्दीनेषुनिक्षिपेत्। मृगःशाकद्वीपीयोब्राह्मणइतिपं**चायतनसारः**। **विष्णुः**— देव्यैनिवेदितंकुमार्यै। विष्णवेनिवेदितंसात्वताय ब्राह्मणायवेति। सात्वतो देवलकः। **पुराणे**—नैवेद्यप्रतिपत्त्यर्थंसात्वतश्चेन्नलभ्यते। ग्रासमात्रंसमुद्धृत्यजलेग्नौवाक्षिपेदिति। यद्वासात्वतप्रतिपत्तिः साधारणप्रतिमादत्तपरा, सात्वतपूज्यदेवतादत्तपरावा। यद्योनिरत्तिनैवेद्यंदा तुश्चानवधानतः। दातातद्योनिमाप्नोतितस्माद्देयंतदुत्तमेइति**विष्णुरहस्योक्तेः** उत्तमपदंहीनान्यपरम्। तेनोत्तमजातिनिवेदितंनीचजातिभ्यो नदद्यादित्यर्थइतिपं**चायतनसारः**। वस्तुतस्तुसात्वतपदंभक्तपरम्। निवेदितंतद्भक्तायदद्याद्भुंजीतवास्वयमिति**महापुराणात्**। सर्वमेत त्साधारणस्थावरप्रतिमादत्तपरं रागप्राप्तपरवेति **गोविंदराजः**। अतएव**जाबालोपनिषदि**—रुद्रभुक्तंभुंजीयादित्युपक्रम्य तस्माद्ब्राह्मणाः

१ तापिने बुद्धाय। २ वाडवेभ्य अनुपनीतब्राह्मणेभ्य।

शिवनिर्माल्यंभक्षयंतीत्युक्तम्। अत्रब्राह्मणग्रहात्तदन्यस्यनिषेधः। अतएवपाद्मे—शिवस्यैवतुपूजापिभक्त्याधेयाद्विजातिभिः। **विष्णुनैवेद्यभक्षणमुक्तं गारुडे**—पादोदकपिबेन्नित्यंनैवेद्यभक्षयेद्धरेः। **पाद्मे**—गौरींप्रतिशिवः—अग्निष्टोमसहस्रैश्चवाजपेयशतैरपि। तत्फलंलभतेदेवि विष्णोर्नैवेद्यभक्षणात्। **कौर्मे**—मध्याह्नेविधिवत्पूज्यःश्रीविष्णुर्वैष्णवोत्तमैः। नैवेद्यशिरसानत्वाश्लोकमेतमुदीरयेत्। यस्योच्छिष्टंहिवांञ्छति ब्रह्माद्याऋषयोऽमलाः। सिद्धाद्याश्चहरेस्तस्यवयमुच्छिष्टभोजिनः। इति।

अथविष्णुपूजा। तदाधारश्चनरसिंहे—अप्स्वग्नौहृदयेसूर्येस्थंडिलेप्रतिमासुच। पट्स्वेतेपुहरेःसम्यक्पूजनमुनिभिःस्मृतम्। सम्यगितिषण्णांप्राशस्त्यम्। एतच्चाधारपरिगणन **नारसिंहे**वक्ष्यमाणपूजाद्वये अर्चनवक्ष्यामीत्युपक्रम्य तयोरेवोक्तत्वात्। **वाराहे**—कुड्येलेख्येचमेकश्चित्पटेकश्चित्तुमानवः। पूजयेद्यदिवाचक्रेममतेजोशसंभवम्। चक्रेशालग्रामशिलाचक्रे। तथा—पद्मेसंपूजनशस्तगस्तचैवतु स्थंडिले। सर्वत्रसप्रतिष्ठामिपूजामग्नस्त्वहंततः। **पाद्मे**—कृत्वाताम्रमयेपात्रेयोर्चयेन्मधुसूदनम्। फलमाप्नोतिपूजायाःप्रत्यहंशतवार्षिकम्। **आधारविशेषेविधिविशेषमाह**—हविषाग्नौजलेपुष्पैर्मनसारविमडले। ध्यानेनहृदयेवाह्यैर्गंधाद्यैःस्थडिलादिषु। **शौनकः**—उत्तमा हरिपूजाप्सुमध्यमास्थडिलेरवौ। अधमाप्रतिमादौतुपूजासात्रिविधामता। **भागवते**—सूर्योग्निर्ब्राह्मणागावोवैष्णवःखंमरुज्जलम्। भूरात्मासर्वभूतानिभद्रपूजापदानिमे। सूर्येतुविद्ययात्रय्याहविषाग्नौयजेतमाम्। आतिथ्येनचविप्राग्र्येगोष्वगयवसादिना। वैष्णवेवंधुसत्कृत्याहृदिखेध्याननिष्ठया। स्थंडिलेमत्रहृदयैर्भोगैरात्मानमात्मनि। क्षेत्रज्ञसर्वभूतेषुसमत्वेनयजेतमाम्। **पाद्मे**—अग्निहोत्रहुततेनदत्तापृथ्वीससागरा। येनार्चितोहरिश्चक्रेशालग्रामसमुद्भवे। शालग्रामशिलारूपीयत्रतिष्ठतिकेशवः। तत्रदेवाःसुरायक्षाभुवनानिचतुर्दश। शालग्रामसमीपेतुक्रोशमात्रसमं

---

१ ग्रहणादुक्तप्रतिपत्तिस्तदन्यपरा। अतएवतन्नैवेद्यभक्षणमुक्तपुराणेषुगारुडेपि इतिपाठ।

ततः । कीटकोपिमृतोयातितद्विष्णोःपरमंपदम् । मनोधृतिर्धारणास्यात्समाधिर्ब्रह्मणिस्थिति. । अमूर्तौचेत्स्थिरानस्यात्ततोमूर्तिंविचिंतयेत् । चतुर्विंशतिमूर्तिःस्याच्छालिग्रामशिलास्थित. । द्वारकादिशिलासंस्थोध्येयःपूज्योथवाहरिः । **तत्रैव**—मौक्तिकंचप्रवालंचपद्माक्षंतुलसीमणीन् । जपपूजनवेलायांधारयेद्यःसवैदिकः । इति ।

अथकेशवादिचतुर्विंशतिमूर्तयः । **तत्र बोपदेवः**—केविगोवादापुहृपेप्रजाच्युकृममात्रिना । वाधोनृहसानिश्रीपशाचगेविगपे चपे । **अस्यार्थः**—केशवविष्णुगोविंदवामनदामोदरपुरुषोत्तमहृषीकेशउपेंद्रप्रद्युम्नजनार्दनाच्युतकृष्णमधुसूदनमाधवत्रिविक्रमनारायणवासुदेवाधोक्षजनृसिंहहरिसंकर्षणानिरुद्धश्रीधरपद्मनाभानां क्रमेणमूर्तयोभिधीयंते । तत्रकेशवे शात्शखात् चगेचक्रगदेइत्यर्थः । शिष्टेभुंजेपद्ममर्थात्सिद्धम् । इदंदक्षिणोर्ध्वकरप्रभृतिप्रादक्षिण्येनज्ञेयम् । दक्षिणोर्ध्वकरक्रमादितिहेमाद्रिवचनात् । तथाचदक्षिणोर्ध्वभुजेशंखः । वामोर्ध्वभुजेचक्रं वामाधोहस्तेगदा दक्षिणाधःपद्मम् । विष्णौवामोर्ध्वप्रभृतिशंखचक्रगदापद्मानि । गोविंदेवामाधः प्रभृतिशंखचक्रगदापद्मानि । वामनेदक्षिणाधः प्रभृतिशंखचक्रगदापद्मानि विपरीतगचेइत्यर्थः । दामोदरेदक्षिणोर्ध्वप्रभृतिशंखगदाचक्रपद्मानि । दक्षिणोर्ध्वेपांचजन्यमधस्तात्तुकुशेशयं । सव्योर्ध्वेकौमुदीदेवीहेतिराजमधःस्थितम् । अनिरुद्धस्यभेदोयंदामोदरइतिस्मृतइति **हयशीर्षपंचरात्रात्** । पुरुषोत्तमेवामोर्ध्वप्रभृतितानि । हृषीकेशेवामाधःप्रभृतितानि । उपेंद्रेदक्षिणाधःप्रभृतितानि । शात्गपेगदापद्मेइत्यर्थः । शिष्टेचक्रमर्थात् । प्रद्युम्नेदक्षिणोर्ध्वप्रभृतिशंखगदाचक्रपद्मानि । जनार्दनेवामोर्ध्वप्रभृतितानि । अच्युतेवामाधःप्रभृतितानि । कृष्णेदक्षिणाधःप्रभृतितानि । विपरीतपगेइत्यर्थः । दक्षिणोपरिशंखंचचक्रंचाधःप्रदृश्यते । वामोर्ध्वेपंकजंयस्यगदाचाधोव्यवस्थिता । मधुसूदननामायंभेदःसंकर्षणस्यचेति**हयशीर्षपंचरात्रात्** । मधुसूदनेदक्षिणोर्ध्वप्रभृतिशखपद्मगदाचक्राणि । माधवेवामोर्ध्वप्रभृतितानि । नारायणेदक्षिणाधःप्रभृतितानि । शात्चपे चक्रपद्मेइत्यर्थः शिष्टेगदा

ऽर्थात् । वासुदेवेदक्षिणोर्ध्वप्रभृतिशखचक्रपद्मगदाः । अधोक्षजेवामोर्ध्वप्रभृतितानि । नृसिंहेवामाधःप्रभृतितानि । हरोदक्षिणाधःप्रभृतितानि । विपरीतपद्मेइत्यर्थः । संकर्षणोगदाशंखपद्मचक्रधरःस्मृतः । एताश्चमूर्तयोज्ञेयादक्षिणाधःकरक्रमादितिसिद्धार्थसंहितोक्तेः । सकर्षणेदक्षिणोर्ध्वप्रभृतिशखपद्मचक्रगदाः । अनिरुद्धेवामोर्ध्वप्रभृतिताः । श्रीधरेवामाधःप्रभृतिताः । पद्मनाभेदक्षिणाधःप्रभृतिताः । अत्रमूलंहेमाद्रिकाशीखंडशिवार्चनचंद्रिकादौज्ञेयम् । **वाराहे**—शक्तित्रयंमत्स्यकूर्मवराहदशकंनच । अर्च्यमितिपूर्वेणसंबंधः ।

पंचायतनपूजासारेपाद्मे—स्वमंत्रेणबुधैःपूज्यःस्वकैर्ध्यानैःस्वमुद्रया । शालग्रामेनायनियमइत्युक्तस्कांदे—पूज्यानिजनिजैरेवमंत्रैःस्वस्वेष्टमूर्तयः ।शालग्रामात्मकेरूपेनियमोनैवविद्यते। **भारते**—यामेवदेवतामिच्छेदाराधयितुमव्ययाम् । सर्वोपायैःप्रयत्नेनसपूजयतुसद्विजान् । **लैंगे**—शालग्रामशिलाग्रेतुयच्छ्राद्धक्रियतेनृभिः । तस्यब्रह्मांतिकस्थानतृप्ताश्चपितरोदिवि । **पाद्मे**—स्कंधेकृत्वातुयोध्वानवहतेशिलनायकम् । तेनव्यूढभवेत्सर्वंत्रैलोक्यसचराचरम् । कृतार्चनाहरेर्येनपित्रर्थंमुनिसत्तम । गयायांपिंडदानंतुकृततेनपदेपदे । यमुद्दिश्यहरेःपूजाक्रियतेमुनिसत्तम । उद्धृतोनरकाद्दुःखात्सयातिपरमपदम् । पित्रर्थमपिक्रियमाणाविष्णुपूजासव्येनैव एकादशाहशय्यादिदानवत् । **स्कांदे**—शालग्रामनमस्कारःशाठ्येनापीहयैःकृतः । मद्भक्ताअपितेनैवमांनमस्यंतुमानवाः । **हलायुधेपाद्मे**—अपिपापसमाचाराःकर्मण्यनधिकारिणः । शालग्रामार्चकावैश्यनैवयांतियमालयम् । शालग्रामोद्भवंदृष्ट्वान्यस्तंद्विजनाधिप । नैवेक्षितुशक्नुवंतिसर्वेतेयमकिंकराः । **हयग्रीवपंचरात्रे**—चांडालमद्यपस्पर्शदूषितावह्निनाथवा । अपुण्यजनसस्पृष्टाविप्रक्षतजदूषिता । पुनःसंस्कार्यैतिशेपः । पुनःसस्कारःशालग्रामस्यमहापूजेतिशिष्टाः । **पदार्थादर्शेब्राह्मे**—खंडितेस्फुटितेदग्धेभ्रष्टेमानविवर्जिते । यागहीनेपशुस्पृष्टेपतितेदुष्टभूमिषु । अन्यमंत्रार्चितेचैवपतितस्पर्शदूषिते । दशस्वेतेषुनोचक्रुःसंनिधानदिवौकसः । यागः पूजा । पशुर्गर्दभादिः । अर्चाभगादावुपवासःकार्यः । नराज्ञोवैष्णवेश्रीयात्सुरार्चाविप्लवेतथेतिवि

१ तेपुनोचक्रुःसनिधानदिशेरकचित् इतिपाठ ।

ष्णुधर्मोक्तेः। सिद्धांतशेखरे—चौरचांडालपतितोदक्यादेःस्पर्शनेसति । शवाद्युपहतेचैवप्रतिष्ठांपुनराचरेत् । पंचरात्रे—अंगादंगा दिसंघातेप्रतिष्ठांपुनराचरेत् । पूजाभावेविशेषमाहबौधायनः—पूर्वप्रतिष्ठितस्याबुद्धिपूर्वकमेकरात्रंद्विरात्रमेकमासंवार्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शेजलेऽधिवास्य श्वोभूतेद्वौकलशावधिवास्यैकंपंचगव्येनपूरयेदपरंशुद्धोदकेनाथस्नपयेदष्टशतमष्टाविंशतिवाकलशैः पुरुषसूक्ते नमूलमंत्रेणच ततःपुष्पाणिदत्वायथासंभवसंपूज्यगुडौदननिवेदयेद्बुद्धिपूर्वमर्चनादिविच्छेदेप्येवमिति । शालग्रामस्थावरव्यावृत्त्यर्थंपूर्वप्रतिष्ठितस्ये त्युक्तम्। बुद्धिपूर्वविच्छेदेपुनःप्रतिष्ठा—द्रव्यवत्कृतशौचानांदेवतानांभूयःप्रतिष्ठापनेनशुद्धिरितिशुद्धिविवेकेविष्णूक्तेरितिकेचित्। तन्न। तत्रापिबौधायनोक्तविधिसत्वात्। विष्णूक्तिस्तुमद्यादिस्पर्शपरा मासद्वयाधिकविच्छेदपरावा । अर्चादिपदंलिंगस्याप्युपलक्षणम् ॥

चंद्रिकायांनारदः—शृण्वंतुमुनयःसम्यक्पुरुषोत्तमपूजनम् । स्नात्वायथोक्तविधिनाप्राङ्मुखःशुद्धमानसः । स्वशाखोक्तक्रियांकृ त्वाहुत्वाचैवाग्निहोत्रकम् । कुर्यादाराधनंविष्णोर्देवदेवस्यचक्रिणः । बौधायनः—अथातोमहापुरुषस्यपरिचर्याविधिंव्याख्यास्यामः । स्नात्वाशुचिःशुचौदेशेगोमयेनोपलिप्य प्रतिकृतिकृत्वाक्षतपुष्पैर्यथालाभमर्चयेत् सहपुण्योदकेनमहापुरुषमावाहयेदोंभूः पुरुषमावाह यामि । ॐ भुवःपुरुषमावाहयामि। ॐ स्वःपुरुषमावाहयामि । ॐ भूर्भुवःस्वःपुरुषमावाहयामीत्यावाह्य । आयातुभगवान्म हापुरुषइत्यथस्वागतेनाभिनंदयति स्वागतमनुचागतंभगवतेमहापुरुषायैतदासनमुपक्लृप्तमत्रास्तांभगवान्महापुरुषइत्यत्र कूर्चंददातिभगवतेयं कूर्चोदर्भमयस्त्रिवृद्धरितस्तंजुषस्वेत्यत्रस्थानासनानिकल्पयति अग्रतःशंखायकल्पयामि चक्रायदक्षिणतो गदायैक० वनमालायैक० पश्चि मतः श्रीवत्सायगरुत्मते । उत्तरतः श्रियैसरस्वत्यै पुष्ट्यैतुष्ट्यै । अथसावित्र्यापात्रमभिमंत्र्यप्रक्षाल्यत्रिरपःपवित्रमानीयसहपवित्रेणादित्यं दर्शयेदोमित्यादितस्तासांत्रीणिपदाविचक्रमेइतिपाद्यंप्रणवेनार्घ्यंमहाव्याहृतिभिर्निर्माल्यंव्यपोह्योत्तरतोविष्वक्सेनायनमइत्यथैनंस्नपयत्यापोहिष्ठे

तितिस्रभिर्ब्रह्मजज्ञानंवामदेव्यर्चायज्ञःपवित्रेणेत्येताभिःपड्भिःस्नपयित्वाद्भिस्तर्पयति । केशवंतर्पयामि नारायणं माधवं गोविंदं विष्णु मधुसूदनं त्रिविक्रमं वामनं श्रीधरं हृषीकेशं पद्मनाभ दामोदरं । इत्यथैतानिवस्त्रयज्ञोपवीताचमनीयान्युदकेनव्याहृतिभिर्द त्वाव्याहृतिभिःप्रदक्षिणमुदकपरिषिच्येदंविष्णुरितिगंधंतद्विष्णोरितिपुष्पंइरावतीत्यक्षताःसावित्र्याधूपमुद्दीप्यस्वेतिदीपदेवस्यत्वाहस्ताभ्यांभगवते महापुरुषायजुष्टंचरुंनिवेदयामीतिनैवेद्य । अथकेशवादिद्वादशनामभिर्नमोन्तैःपुष्पाणिदत्वा शंखायनमश्चक्रायनमोवनमालायैनमःश्री वत्सायनमोगरुत्मतेनमःश्रियैनमःसरस्वत्यैनमः पुष्टयैनमस्तुष्टयैनमोऽथशिष्टैर्गंधमाल्यैर्ब्राह्मणान्स्वमात्मानंचालंकृत्यैनमृग्यजुःसामाथर्वभिःस्तु तिभिःस्तुवंति । ध्रुवसूक्त पुरुषसूक्तंचान्यांश्चवैष्णवमंत्रानित्येके ॐ भूर्भुवःसुवर्महरोंभगवतेमहापुरुपायचरुमुद्वासयामीतिचरूद्वासनकाले ॐ भूःपुरुषमुद्वासयामि ॐ भुवःपुरुषमुद्वासयामि ॐ सुवःपुरुपमुद्वासयामि ॐ भूर्भुवःसुवःपुरुपमुद्वासयामीत्युद्वास्य । प्रयातुभगवान्महापुरुषो नेनहविषातृप्तोहरिःपुनरागमनायपुनःसंदर्शनायचेतिप्रतिमास्थानेष्वग्नावावाहनविसर्जनेयाग्नावावाहनविसर्जनवर्जंसमानं महत्स्वस्त्ययथानमित्याह भगवान्बौधायनः । **ध्यानमुक्तंचंद्रिकायांनारसिंहे**—ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसंनिविष्टः । केयूरवान्मक रकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः । **शिवार्चनचंद्रिकायाम्**—ह्रीवेरचंदनंकुष्टमगरुकुंकुमंमुरम् । सेव्यकंचजटामांसीवैष्णव तदुदीरितम् । ह्रीवेरंवालकम् । मुरंमोरहरीतिप्रसिद्धम् । **अथपुष्पाणि—चंद्रिकामदनपारिजातयोर्नारसिंहे**—दशदत्वासुवर्णा नियत्फललभतेनरः । तत्फलंलभतेविष्णोर्द्रोणपुष्पप्रदानतः । द्रोणपुष्पसहस्रेभ्यःखादिरंपुष्पमुत्तमम् । खादिरात्पुष्पसाहस्राच्छमीपुष्पविशि ष्यते । शमीपुष्पसहस्राद्धिविल्वपत्रंविशिष्यते । विल्वपत्रसहस्राद्धिवकुलंपुष्पमुत्तमम् । वकुलात्पुष्पसाहस्रान्नंद्यावर्तविशिष्यते । नंद्यावर्तसहस्रे भ्यःकरवीरविशिष्यते । करवीरसहस्रेभ्यःपालाशपुष्पमुत्तमम् । पालाशपुष्पसाहस्रात्कुशपुष्पविशिष्यते । कुशपुष्पसहस्राद्धिवनमाला

विशिष्यते । वनमालासहस्राद्धिचंपकापुष्पमुत्तमम् । चंपकापुष्पसाहस्रादशोकंपुष्पमुत्तमम् । अशोकपुष्पसाहस्रात्सेवंतीपुष्पमुत्तमम् । सेवतीपुष्पसाहस्राद्गोजुकापुष्पमुत्तमम् । गोजुकापुष्पसाहस्रान्मालतीपुष्पमुत्तमम् । मालतीपुष्पसाहस्रात्सध्यारक्तपुष्पकम् । संध्यारक्त सहस्राद्धिकुंदपुष्पंविशिष्यते । कुंदपुष्पसहस्राद्धिशतपत्रविशिष्यते । शतपुष्पसहस्राद्धिमल्लिकापुष्पमुत्तमम् । मल्लिकापुष्पसाहस्राज्जातीपुष्पं विशिष्यते । जातीपुष्पसहस्रेणयोमालांसंप्रयच्छति । विष्णवेविधिवद्भक्त्यातस्यपुण्यफलंशृणु । कल्पकोटिसहस्राणिकल्पकोटिशतानिच । वसेद्वि[1]ष्णुपुरेश्रीमान्विष्णुतुल्यपराक्रमः । इति ।

अथद्वात्रिंशदपराधाः । वाराहे—भुक्त्वातुपरकीयान्नंतत्परस्तन्निवर्तकः । प्रथमश्चापराधोयंधर्मविज्ञायजायते १ अभुक्त्वादंतकाष्ठंच यस्तुमामुपसर्पति । अपराधोद्वितीयोयंधर्मविज्ञायजायते २ कृत्वामैथुनसयोगंयस्तुमांस्पृशतेनरः । तृतीयमपराधंतंकल्पयामिवसुंधरे ३ स्पृष्ट्वार जस्वलांनारीमस्नात्वायःप्रपद्यते । चतुर्थमपराधंतंकल्पयामिवसुंधरे ४ स्पृष्ट्वातुमृतकंचैवअसत्कारकृतंतुवै । पंचमंचापराधंतनक्षमामिवसुंधरे ५ स्पृष्ट्वातुमृतकंयश्चनाचम्यस्पृशतेहिमाम् । षष्ठंतंचापराधंवैकल्पयामिवसुंधरे ६ ममार्चनस्यकालेतुपुरीषंयस्यगच्छति । सप्तमंचापराधंतंकल्पया मिवसुधरे ७ त्यक्त्वातुममशास्त्राणिवाक्यमन्यत्प्रभाषते । अष्टमंचापराधंवैकल्पयामिवसुंधरे ८ ममैवार्चनकालेतुयस्त्वसत्यंप्रभापते । नवम चापराधंतंकल्पयामिवसुंधरे ९ अविधानेनमांस्पृश्यमामेवप्रतिपद्यते । दशमश्चापराधोयंममचाप्रियकारकः १० सक्रोधोमेस्पृशेद्गात्रंचित्तंकृत्वा चलाचलम् । एकादशंचापराधंनसहिष्येवसुंधरे ११ अकर्मण्यानिपुष्पाणियस्तुमामुपकल्पयेत् । द्वादशंचापराधंतंकल्पयामिवसुंधरे १२ यस्तुरक्तेनवस्त्रेणकौसुंभेनोपगच्छति । त्रयोदशंचापराधंकल्पयामिवसुंधरे १३ अंधकारेतुमांदेवियःस्पृशेतकदाचन । चतुर्दशंचापराधंकल्पयामि

[1] विष्णुपदे इति पाठ ।

वसुंधरे १४ यस्तुकृष्णेनवस्त्रेणममकर्माणिकारयेत् । पचदशापराधंतंकल्पयामिवसुंधरे १५ अधौतेनचवस्त्रेणयस्तुमामुपसर्पति । षोडशंत्वपराधं तंकल्पयामिवसुंधरे १६ स्वयमन्नंचयोदद्यादज्ञानायचमाधवि । सप्तदशापराधंतंकल्पयामिवसुंधरे १७ यस्तुमत्स्यांश्चमांसानिभक्षयित्वोपसर्पति । अष्टादशापराधतंकल्पयामिवसुंधरे १८ जालपादंभक्षयित्वायस्तुमांप्रतिपद्यते । ऊनविंशापराधतकल्पयामिवसुंधरे १९ दीपंस्पृष्ट्वातुयोदेविममकर्मा णिकारयेत् । विंशकंचापराधतंकल्पयामिवसुंधरे २० श्मशानंयस्तुवैगत्वामामेवप्रतिपद्यते । एकविंशापराधंतकल्पयामिवसुंधरे २१ पिण्याकं भक्षयित्वातुयोमामेवाभिगच्छति । द्वाविंशंचापराधंतंकल्पयामिवसुधरे २२ यस्तुवाराहमांसानिभक्षयित्वोपसर्पति । अपराधंत्रयोविंशंकल्पया मिवसुंधरे २३ सुरांपीत्वातुयोमर्त्यःकदाचिदुपसर्पति । अपराधंचतुर्विंशंकल्पयामिवसुंधरे २४ भुक्त्वाकुसुंभशाकचयस्तुमामुपसर्पति । अपराधंपचविंशकल्पयामिवसुंधरे २५ परप्रावरणेनैवयस्तुमामुपसर्पति । षड्विंशमपराधंतंकल्पयामिवसुंधरे २६ नदेवान्नपितॄनिष्ट्वानवान्नंयस्तुभक्ष येत् । सप्तविंशंचापराधंकल्पयामिवसुंधरे २७ उपानहौचप्रपदेतथार्चायांचगच्छति । अपराधमष्टाविंशंकल्पयामिवसुंधरे २८ शरीरंमंडयित्वा तुयोमामाप्नोतिमाधवि । ऊनत्रिंशापराधतंत्वंविजानीहिमेदिनि २९ अजीर्णेनसमाविष्टोयस्तुमामुपसर्पति । त्रिंशकंचापराधंतंकल्पयामिवसुंधरे ३० गंधपुष्पाण्यदत्वातुयस्तुधूपंप्रयच्छति । एकत्रिंशंचापराधंकल्पयामिवसुंधरे ३१ विनातूर्यादिशब्देनद्वारस्योद्घाटनंमम । महापराधंजानीयाद्द्वात्रिं शंतंममप्रिये ३२ ॥ **कृष्णभट्टीये प्रकारान्तरेणद्वात्रिंशदपराधाः**–तिर्यक्पुड्रधरोभूत्वाह्यकृत्वादेवतार्चनम् । याचितैःपत्रपुष्पाद्यैर्यः करोतिममार्चनम् । अप्रक्षालितपादोयःप्रविशेन्मममंदिरम् । ममदृष्टेरभिमुखंतांबूलंचर्वयेच्चयः । ममार्चामासुरेकालेयःकरोतिविमूढधीः । अवैष्णवस्यपक्वान्नंयोमह्यंविनिवेदयेत् । अवैष्णवेषुपश्यत्सुममपूजांकरोतियः । दिनांतरितपक्वान्नंयन्मह्यंविनिवेदयेत् । अमौनीघर्मलिप्तांगो मत्पूजांविदधातियः । वातमूत्रनिरोधेनमत्पूजाविदधातियः । कृत्वावातमनाचम्यतथाप्रावृत्यकंबलम् । पीठासनोपविष्टःसन्पूजयेद्वानिरासनः ।

मृन्मयेधूपदहनंदीपंयःकुरुतेर्चने । मत्पूजकोनकुरुतेतंतुपूजांचदामनीम् । मत्पूजकोशिवद्वेषीशिवभक्तश्चमांद्विषेत्। भूताष्टम्योर्नकुरुतेनक्तंनहरिवासरम्। अपूजयित्वाविघ्नेशमसंभाव्यकपालिनम् । क्रुद्धोयत्कर्मकुरुतेत्रिकालार्चनविघ्नकृत् । वामहस्तेचमांकृत्वास्नापयेद्यदिमूढधीः । इति प्रकारांतरेणद्वात्रिंशदपराधाउक्ताः । परवस्त्रं परपरीधानं । कुसुंभभुजिः कुरवकपुष्पभक्तिः । **एषुप्रत्येकंप्रायश्चित्तंतत्रैव**—संवत्सरस्यमध्येचतीर्थेसूकरकेमम । कृतोपवासःस्नानेनगंगायांशुद्धिमाप्नुयात् । मथुरायांतथाचैवसापराधःशुचिर्भवेत् । **स्कांदेअवंतीखंडे**—जागरेद्वादशीरात्रौपठेद्यस्तुलसीस्तवम् । द्वात्रिंशदपराधांश्चक्षमतेतस्यकेशवः । तुलसीस्तवोत्रतरत्नेज्ञेयः ।

अथचिह्नविशेषेणशालग्राममूर्तयः । पाद्मे—चक्राकारेणरेखासायत्ररेखामयीभवेत् । ससुदर्शनइत्येवंख्यातःपूजाफलप्रदः । उपर्यधश्चचक्रेद्वेनातिदीर्घमुखेबिलम् । मध्येचरेखालंबैकासचदामोदरःस्मृतः । यस्यदीर्घमुखंपूर्वंकथितैर्लक्षणैर्युतम् । रेखाश्चकेशराकारानारसिंहोमतोहिसः । वाराहाकृतिराभुग्नश्चक्ररेखास्वलंकृतः । वाराहइतिसंप्रोक्तोवामनोबदरोपमः । गरुडःसतुविज्ञेयश्चतुश्चक्रैर्जनार्दनः । हयग्रीवोयथाद्वाररेखाढ्यायाशिलाभवेत् । तथासौम्याद्धयग्रीवःपूजितोज्ञानदोभवेत् । चतुश्चक्रःसूक्ष्मद्वारोवनमालांकितोदरः । लक्ष्मीनारायणःश्रीमान्भुक्तिमुक्तिफलप्रदः । कूर्माकाराचचक्रांकाशिलाकूर्मःप्रकीर्तितः । एवंमत्स्यादयोज्ञेयाःशालग्रामामनीषिभिः । अनंतचक्रैर्बहुभिश्चिह्नैरप्युपलक्षितः । अनंतःसतुविज्ञेयःसर्वपूजाफलप्रदः । चक्रंचकेवलंयत्रपद्मेनसहसंयुतम् । केवलावनमालावाहरिर्लक्ष्म्यासहस्थितः । विदिक्षुदिक्षुसर्वासुयस्योर्ध्वंदृश्यतेमुखम् । पुरुषोत्तमःसविज्ञेयोभुक्तिमुक्तिफलप्रदः । दृश्यतेशिखरेलिंगंशालग्रामसमुद्भवम् । सचयोगेश्वरोनामब्रह्महत्यांव्यपोहति । आरक्तंपद्मनाभाख्यंपद्मच्छत्रसमन्वितम् । तुलस्यापूजयेन्नित्यंदरिद्रस्त्वीश्वरोभवेत् । वामपार्श्वेतथाचक्रेरेखाचैवतुदक्षिणे । दक्षिणावर्तचक्राचवनमालाविभूषिता । याशिलाकृष्णसंज्ञासाधनधान्यसुखप्रदा । **नारदः**—द्वारदेशेसमेचक्रेदृश्येतेनांतरीयके । वासुदेवःसविज्ञेयःशुक्लाभश्चातिशोभनः । नानाव

र्णोह्यनंतःस्यान्नागभोगेनचिह्नितः। अनेकमूर्तिसंयुक्तःसर्वकामफलप्रदः । प्रद्युम्नःसूक्ष्मचक्रस्तुपीतदीप्तिस्तथैवच । शिखरछत्रवहुलंदीर्घाकारं तुयद्भवेत् । अनिरुद्धस्तुनीलाभोवर्तुलश्चातिशोभनः । रेखात्रयंतुतद्द्वारेपृष्ठंपद्मेनलांछितम् । शिवनाभिरितिख्यातंयत्रदेशेव्यवस्थितम् । तच्छैव' विष्णुवत्तीर्थंशालग्रामसमुद्भवम् । नाभौलिंगेनयुक्तावागर्तेनचतथापुनः । शिवनाभिरितिख्याताभुक्तिमुक्तिप्रदायिका । यवमात्रंतुगर्तस्याद्यवा र्धलिंगमुच्यते । वासुदेवमयक्षेत्रंलिंगंशिवमयंशुभम् । तस्मात्तद्धारितेक्षेत्रेपूजयेच्छंकराच्युतौ । पांचजन्यांकितायातुपद्मेनगदयायुता । तत्र श्रीःप्रत्यहंतिष्ठेत्सदासंपदमादिशेत् । शालग्राममयीमुद्रासंस्थितायत्रकुत्रचित् । वाराणस्यायवाधिक्यंसमंताद्योजनत्रयम् । एकमूर्तिर्नैवपूज्या गृहिणावृद्धिमिच्छता । अनेकमूर्तिसपन्नासर्वकामफलप्रदा । अन्येपिभेदाग्रंथगौरवान्नोक्ताः । **गोविंदराजीयेस्कांदे**—स्निग्धासिद्धिकरी मंत्रेकृष्णाकीर्तिंददातिच । पांडुरापापदहनीपीतापुत्रप्रदायिनी । नीलाचदिशतेलक्ष्मींरक्तारोगप्रदायिनी । रूक्षाचोद्वेगदानित्यवक्रादारिद्र्यदा यिका । दुःखदासातुविज्ञेयानारसिहीतथैवच । वहुचक्रा मुखंविनावहुचक्रा । अन्यथात्रिविक्रमानंतपूजाविरुध्येत । यथायथाशिलासूक्ष्मात थातथामहत्फलम् । तथाचामलकीतुल्यासूक्ष्माचातीवयाभवेत् । तस्यामेवशिलायांतुश्रियासहवसेद्धरिः । कपिलोनारसिंहश्चपृथुचक्रःसुशोभनः । ब्रह्मचर्येणपूज्यस्तुअन्यथाविघ्नदोभवेत् । इदसकामपरम् । निष्कामेनशालिग्रामशिलामात्रपूज्यम् । येकेचिच्चैवपाषाणाविष्णुचक्रेणमुद्रिताः । तेषांस्पर्शनमात्रेणमुच्यतेसर्वकिल्बिषैरितिवाराहात् । खंडितंत्रुटितभग्नपार्श्वेभिन्नसुभेदितम् । शालग्रामसमुद्भूतशैलंदोपावहनहीतिपाद्मोक्तेः । शालग्रामशिलाभग्नापूजनीयासचक्रकेतिवाराहाच्च । यत्तुलग्नंभग्ननपूजयेदितितत्रलग्नंलग्नचक्रम् । भग्नंभग्नचक्रम् । चक्रेतरप्रदेशभग्नस्यापिपू ज्यत्वम् । शिलारूपीरमाप्रोक्ताचक्ररूपीजनार्दनइतिविष्णुपुराणे चक्ररूपेणहरिसान्निध्योक्तेः ।

पूज्यशालग्रामसंख्योक्ता हेमाद्रौ । साकाम्येतिकश्चित् । ततःकामनाश्रवणात् । **मानसोल्लासेपाद्मवाराहयोः**—यःपुनः

पूजयेद्भक्त्याशालग्रामशिलाशतम् । उषित्वासहरेर्लोकेचक्रवर्तीहजायते । शिलाद्वादशभोवैश्यशालग्रामसमुद्भवाः । विधिवत्पूजितायेनतस्य पुण्यंवदामिते । कोटिद्वादशलिंगैस्तुपूजितैःस्वर्णपंकजैः । यत्स्याद्द्वादशकल्पेषुदिनेनैकेनतद्भवेत् । **स्कांदे**—प्रत्यहंद्वादशशिलाःशालग्रामस्ययो र्चयेत् । द्वारावत्याःशिलायुक्ताःसवैकुंठेमहीयते । **लैंगे**—ततोबह्वीरर्चयतिशालग्रामशिलास्तुयः । नहिब्रह्मादयोदेवाःसंख्यांजानंति तत्फले । **स्मृत्यंतरे**—शालग्रामाःसमाःपूज्याविषमानकदाचन । समेषुनद्वयंपूज्यंविषमेष्वेकएवहि । विषमेष्वेकएवेज्यःसमेद्वेषट्वि वर्जयेत् । **प्रयोगपारिजातेस्कांदे**—एवंलक्षणसंपन्नामध्यमायाचिताधमा । उत्तमासातुविज्ञेयापारंपर्यक्रमागता । फलपुष्पैश्चतत्स्थानंशा लग्रामोद्भवंहरिम् । ऐहिकामुष्मिकार्थायममदेहिगुरूत्तम । इत्युक्त्वापादयोःपुष्पंदत्वाचप्रणिपत्यच । गुरुःपुष्पफलैःसार्धंगृहीत्वापूजितंहरिम् । दत्वापुष्पांजलिंब्रूयाच्छांतिरस्तुशिवंत्विति । **स्कांदे**—शालग्रामशिलायास्तुमूल्यंयःकुरुतेनरः । विक्रेताचानुमंताचयःपरीक्षानुमोदकः । सर्वेते नरकंयांतियावदाभूतसंप्लवम् । **त्याज्याःशिलाउक्तास्तत्रैव**—तिर्यक्चक्रापरित्याज्याबद्धचक्रातथैवच । रूक्षापिसंपरित्याज्यास्फोटारूक्षात थैवच । कुरूपानिष्ठुरास्याचकरालविकरालिका । कपिलावेपमानाचवृत्तास्याकर्बुरातथा । आसनेचलनाभग्नामहास्थूलाविगर्हिता । आस नेमुष्टिरस्यास्तुचक्रेणैकेनसंयुता । दर्दुराबहुचक्राचलग्नचक्राप्यधोमुखी । छिद्रादग्धासुरक्ताचबृहच्चक्रातिभीषणा । बहुरेखासमायुक्ताभ ग्नचक्रातथैवच । दीर्घचक्रापरित्याज्यापृष्ठचक्राविशेषतः । मस्तकास्याह्यचक्राचवर्ज्याह्येताःसदाबुधैः । क्रूरदंष्ट्रासमायुक्तास्फोटाबुद्बुदसं युता । अचिराच्छुष्कतांयातियस्यालिप्तंतुचंदनम् ॥ इति ॥

अथद्वारवतीचक्रमहिमा । **प्रह्लादसंहितायांहलायुधेच**—शालग्रामशिलायत्रयत्रद्वारवतीशिला । उभयोःसंगमोयत्रमुक्तिस्त त्रनसंशयः । शिलेतिविशेषोक्तेर्नास्थिचक्राणांपूज्यता । **प्रयोगपारिजातेस्कांदे**—संवत्सरंतुयःकुर्यात्पूजास्पर्शनदर्शने । विनासांख्येनयो

गेनमुच्यतेनात्रसंशयः । चक्रसंख्यायास्तन्नामानिप्रह्लादसंहितायाम्—एकःसुदर्शनोद्वाभ्यांलक्ष्मीनारायणःपरः । त्रिभिस्त्रिविक्रमोना मचतुर्भिश्चजनार्दनः । पंचभिर्वासुदेवःस्यात्पड्भिःप्रद्युम्नउच्यते । सप्तभिर्बलदेवश्चअष्टाभिःपुरुषोत्तमः । नवभिश्चनवव्यूहोदशभिर्दशमूर्तिकः । एकादशाऽनिरुद्धोवैद्वादशद्वादशात्मकः । अतऊर्ध्वंपरमात्मासुखंयच्छतिपूजितः । अग्निपुराणे—चक्रैर्द्वादशभिर्युक्तोहृषीकेशउदाहृतः । अतऊर्ध्वमनंतःस्यात्पूजितोनंतकामदः । श्वेताःस्निग्धाःशिलाःपूज्याअच्छिद्राश्चसुसंयताः । सुखदाःसमचक्राश्चविषमादुःखदाःस्मृताः । सुदर्शनाद्यास्तुशिलाःपूजिता·सर्वकामदाः । एकः एकचक्रः । गालवः—वर्तुलाचतुरस्राचनराणांचसुखप्रदा । प्रह्लादसंहितायाम्—कृष्णामृत्युप्रदानित्यकपिलाचभयावहा । रोगार्तिंकर्बुरादद्यात्पीतावित्तविनाशिनी । धूम्राभावित्तनाशायभग्नाभार्याविनाशिका । सच्छिद्राचत्रिकोणाचतथाविषमचक्रिका । अर्धचंद्राकृतिर्यातुपूज्यास्तानभवंतिहि । एकचक्रविषयेविशेषउक्तस्तत्रैव—एकचक्रेविशेषोस्तितंविशेषंतुवच्म्यहम् । शुक्लनीलतथारक्तद्विवर्णचत्रिवर्णकम् । यद्येकचक्रेस्युरेवंतेषांसंज्ञानिबोधमे । पुंडरीकःप्रलंबघ्नोरामोवैकुंठएवच । विष्वक्सेनइतिब्रह्मन् तेषांपूजाफलंशृणु । मोक्षंमृत्युंविवादंचदारिद्र्यमक्षतंतथा । पाद्मवाराहयोः—द्वेचक्रेद्वारकायास्तुनार्च्यंसूर्यद्वयंतथा । विष्णुधर्मे—चक्रांकमिथुनंपूज्यंनैकंचक्रांकमर्चयेत् । इति ।

तज्जलादिमहिमास्कांदे—शालग्रामोद्भवोदेवोयत्रद्वारवतीभवः । उभयोःस्नानतोयेनब्रह्महत्यानिवर्तते । हेमाद्रौस्कांदे—कुंकुमंचंदनंपत्रंनैवेद्यंचफलंजलम् । शालग्रामशिलालग्नंतीर्थंकोटिशताधिकम् । पाद्मे—सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः । शालग्रामशिलातोयैर्योभिषेकसमाचरेत् । गौतमांबरीषसंवादे—हरेःस्नानीयशेषंतुजलंयस्योदरेस्थितम् । अंबरीषप्रणम्योच्चैःपादपांसुप्रगृह्यताम् । जन्मप्रभृतिपापानांप्रायश्चित्तंयदीच्छसि । शालग्रामशिलावारिपापहारिनिषेव्यताम् । येतुद्वादश्यल्पत्वेतीर्थपानाम्नानाद्भोजनस्थानीयंतन्मत्वोपवासदिनेश्राद्धादे

श्वप्रोक्तन्नेच्छंतितेभ्रांताः । तस्यशरीरशुद्ध्यर्थत्वात् । **गारुडे**—जलंनयेषांतुलसीविमिश्रंपादोदकंचक्रशिलासमुद्भवम् । नित्यंत्रिसंध्यंप्लवतेहगा ग्रंखगेंद्रतेधर्मबहिष्कृतानराः । **आह्निकप्रदीपे**—सूतकेमृतकेवापिआशौचंनैवविद्यते । येषांपादोदकंमूर्ध्निप्राशनंयेचकुर्वते । अंतकालेपियस्ये हृदीयतेपादयोर्जलम् । सोपितद्गतिमाप्नोतिसदाचारैर्बहिष्कृतः । **वाराहेविष्णुपूजाप्रकरणे** शूद्रंप्रकृत्य—चरणामृतपानेनसर्वपापक्षयोभवेत् । अत्रकेचिच्छालग्रामोदकमेवग्राह्यंनचक्रांकोदकमित्याहुः । तन्न । विष्णुपादोदकंयस्यमुखेशिरसिविग्रहे । इतिनृसिंहपुराणात् । शालग्रा मशिलातोयमस्थिचक्रशिलाजलम् । मिश्रितंतत्पिबेद्यस्तुदेहेशिरसिधारयेत् । तस्यचक्रांकितोदेहोभवत्येवनसंशयः । **तीर्थपानविधिर्गारुडे**— शालग्रामशिलातोयमपीत्वायस्तुमस्तके । प्रक्षेपणंप्रकुर्वीतब्रह्महत्यासमंस्मृतम् । शालग्रामशिलातीर्थंपिबेत्तोयंकरेणतु । अज्ञानादैंदवंप्रोक्तंज्ञाना द्द्वंदंसमाचरेत् । विष्णोःपादोदकंपीत्वाकोटिजन्माघनाशनम् । तदेवाष्टगुणंपापंभूमौबिंदुनिपातनात् । **भक्तिचंद्रोदये**—आयसेचतथाकां स्येकाष्ठेवालाबुकेतथा । उद्धृत्यपादसलिलंकरेकृत्वामुखेक्षिपेत् । अदत्वातुपिबेत्तोयंरौरवेनरकेवसेत् । करेणतीर्थपानंतत्पानोत्तरंचजलपानंनकार्य मित्यर्थः । **विप्रपादोदकग्रहणमुक्तंकाशीखंडे**—निःस्पृहाःसोमपायेवैविप्रपादोदपाश्रये । तएतेमत्प्रियाभक्तास्त्यक्ततीर्थप्रतिग्रहाः । श्रद्धाबीजोविप्रपादांबुसिक्तइति । तत्रपूर्वंविप्रपादोदकंग्राह्यं ततःशालग्रामशिलोदकमितिशिष्टाः । **स्कांदे**—कृत्वापादोदकंशंखेवैष्णवानांम हात्मनाम् । यद्ददातितिलैर्मिश्रंचांद्रायणफलंलभेत् । **ग्रहणमंत्रोहलायुधे**—अकालमृत्युहरणंसर्वव्याधिविनाशनम् । विष्णोःपादोदकं पीत्वाशिरसाधारयाम्यहम् । इतिश्रीमन्नारायणभट्टात्मजरामकृष्णभट्टसुतलक्ष्मणभट्टकृताचाररत्नेपूजाविधिः ।

अथवैश्वदेवः । तत्राधिकारिणआह **चंद्रिकायांसंवर्तः**—ततःपंचमहायज्ञान्कुर्यादहरहर्द्विजः । ततोविवाहानंतरमिति**मदनपा रिजातः** । **शंखः**—पंचयज्ञविधानंचगृहीयज्ञंनहापयेत् । शूद्रस्याप्यधिकारइत्युक्तंप्राक् । नास्तिस्त्रीणांपृथग्यज्ञइति**याज्ञवल्क्योक्तेः**,

नस्त्रीजुहुयान्नानुपेतइति**आपस्तंबोक्ते**श्च स्त्रीणांनाधिकारः । यत्तु**स्मृत्यर्थसारे**—स्त्रीबालश्चकारयेदितितद्विधवापरम् । यदपि**स्मृति सारे**—स्नातकोब्रह्मचारीपृथक्वैश्वदेवंकुर्यादिति । तन्न । भैक्षेणवर्तयेन्नित्यमिति**मनूक्ते**र्ब्रह्मचारिणःपाकाभावात् पंचमहायज्ञाधिकारेगृहीति पदश्रवणाच्च नत्वेनमग्निहवनबलिहरणयोर्नियुंज्यादिति । **शौनकः**—स्नातकेनापितत्कार्यंपृथक्पाकोभवेद्यदि । वानप्रस्थस्याप्यधिकारः। अत्र वैश्वदेवमकृत्वैवश्राद्धंकुर्यादनग्निकइतिविशिष्टोक्तेरनग्नेरप्यधिकारः । **शौनकः**—पुत्रोभ्राताथवापत्नीशिष्योदासोबलिहरेत् । **मदनरत्ने-ऽत्रिः**—पुत्रोभ्राताथवाऋत्विक्शिष्यश्वशुरमातुलाः । पत्नीश्रोत्रिययाज्याश्चदृष्टास्तेबलिकर्मणि । प्रतिनिधयइत्यर्थः । अतोबलावेवप्रतिनिधिरिति **मदनरत्ने** । बलिपदंवैश्वदेवोपलक्षणमिति**पृथ्वीचंद्रः** । अन्यैस्तुकारयेदेतानातुरोपिस्पृशन्द्विजः । सूतकाद्यैस्त्वशुद्धात्मानकुर्यान्नचका रयेदिति होमोपीति**चंद्रिका** । एतत्प्रवासादिपरमिति **चंद्रिकामदनरत्नयोः** । ऋत्विक्साहचर्यात्साग्निकपर**मित्याचारादर्शः** । नस्त्री जुहुयादि**त्यापस्तंबोक्तेः** । पत्नीबलिकुर्यान्नहोममिति**पृथ्वीचंद्रः** । सायंत्वन्नस्यसिद्धस्यपत्न्यमंत्रबलिहरेदिति**मनुस्मृते**रुपलक्षणत्वात्पत्न्या अपिहोमइति**पृथ्वीचंद्रः** । वस्तुतस्तुसदास्वयंकर्तृकत्वविकल्पः । स्वयत्वेवैतान्यावद्गृहेवसन्बलिहरेदपिवान्योब्राह्मणइति **गोभिलोक्तेः** । निरग्नेस्तुसदास्वकर्तृकत्वमेववैश्वदेवइ**त्याचारादर्शः** । **बौधायनः**—प्रवासंगच्छतोयस्यगृहेकर्तानविद्यते । पंचानांमहतामेषांसयज्ञैःसहग च्छति । प्रवासेकुरुतेचैतद्यदन्नमुपपच्यते । नचेदुत्पद्यतेन्नंतुअद्भिरेतान्समापयेत् । **मिताक्षरायांनारदः**—भ्रातॄणामविभक्तानामेकोधर्मः प्रवर्तते । विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथक् । **चंद्रोदयेमरीचिः**—बहवःस्युर्यदापुत्राःपितुरेकत्रवासिनः । सर्वेस्वानुमतंकृत्वाज्येष्ठेनै वतुयत्कृतम् । द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत् । एकपाकेनवसतांपितृदेवद्विजार्चनम् । एकंभवेद्विभक्तानांतदेवस्याद्गृहेगृहे । **आश्वला यनः**—वसतामेकपाकेनविभक्तानामपिप्रभुः । एकस्तुचतुरोयज्ञान्कर्याद्वाग्यज्ञपूर्वकान् । वाग्यज्ञपूर्वकानित्यतद्गुणसंविज्ञानोबहुव्रीहिः ।

अतएवचतुरइत्युक्तम् । एकपाकेनवसतामविभक्तानामितिकश्चित्।तत्र अस्यविभक्ताविभक्तस्यसाधारणत्वात् विभक्तानामित्यस्यानुवादकत्वेनसं कोचकत्वायोगाच्च अविभक्तेषुसंसृष्टेष्वेकेनापिकृतंतुवेति**व्यासोक्तेश्च** । अतःपाकैक्यएवाविभक्तानांयज्ञैक्यम् । नचैवंकदाचित्पाकभेदेभे दापत्तिः । वसतामित्यनेनबहुकालिकपाकैक्योक्तेः । यद्येकस्मिन्कुलेबहुधान्नंपच्येत गृहपतिमहानसादेवतद्बलितंत्रंकुर्वीतेति**गोभिलोक्तेश्च** । यत्त्वविभक्तस्यभ्रात्रधिकारे**गोभिलः**—यस्यत्वेषामग्रतोन्नंसिद्ध्येत्सतियुक्तमग्नौकृत्वाग्रंब्राह्मणायदत्वाभुंजीतेतितत्कनिष्ठभ्रातुःकदाचित्पाकभेदे ज्ञेयमिति**पृथ्वीचंद्रः** । नियुक्तंभोज्यमन्नं । अग्नौकृत्वाहुत्वेत्यर्थः । इदमपिप्रथममन्नसिद्धौज्येष्ठेनकृतेवैश्वदेवेपश्चात्कनिष्ठस्यपाकभेदेतेनाहुत्वै वभोक्तव्यम् । अयंचान्नप्रक्षेपस्तूष्णीमित्युक्तं **चंद्रोदये** । देशांतरगमनेपाकभेदेत्वेकपाकेनवासाभावात्पृथग्वैश्वदेवः । अविभक्ताविभक्तावा पृथक्पाकाद्द्विजातयः । कुर्युःपृथक्पृथग्यज्ञान्भोजनात्प्राग्दिनेदिने । इति **प्रयोगपारिजातेआश्वलायनोक्तेः** । भ्रातृणामविभक्ता नांपृक्पाकोभवेद्यदि । वैश्वदेवादिकंश्राद्धंकुर्युस्तेवैपृथक्पृथगितिवाक्यमेतद्विषयकमेव । नचेदंनिर्मूलम् । **अन्येतु**–वैश्वदेवासंभवेतुकुक्कुटांड प्रमाणकम् । अन्नमग्नौसंप्रहृत्यकिल्बिषात्तुप्रमुच्यते इति**जीवत्पितृकनिर्णये**कुक्कुटांडप्रमाणान्नप्रक्षेपइत्याहुः । पाकासाध्येतुजपोपवासादाव विभक्तानांपृथगधिकारः । पृथगप्येकपाकानांब्रह्मयज्ञोद्विजन्मनां । अग्निहोत्रंसुरार्चांचसंध्यानित्यंपृथग्भवेदिति**प्रयोगपारिजातेआश्व लायनोक्तेः** । यत्तु—एकपाकेनवसतांपितृदेवद्विजार्चनमेकमिति तत्रदेवार्चनंवैश्वदेवइति**पृथ्वीचंद्रः**। भ्रातृणामविभक्तानांपृथक्पाकोभवे द्यदि । वैश्वदेवादिकंश्राद्धंकुर्युस्तेवैपृथक्पृथक् । इतिवाक्यमेतद्विषयमेव । नचेदंनिर्मूलं।एकपाकेनवसतामित्यादिवाक्यनिचयेनविभक्तानामपि पाकभेदेपंचयज्ञभेदानुक्तेरविभक्तानामपिपाकभेदेपंचयज्ञभेदोक्तेरन्वयव्यतिरेकाभ्यांपाकभेदस्यैवपंचयज्ञाभेदानुष्ठानेप्रयोजकत्वात्पूर्वोक्तवचननि चयविरोधाभावाच्च । यत्त्वेकेनापीतितत्पाकभेदेइतिवयंप्रतीमः । पूज्यदेवतामूर्तिभेदेइतिवयम् ।

अथ वैश्वदेवकालः । तत्रनिरग्निनानित्यश्राद्धोत्तरंसकार्यः । दद्यादहरहःश्राद्धं०इत्युक्त्वावैश्वदेवश्चगृह्येऽग्नौविधिपूर्वकमितिमनूक्तेः ।
पितृभ्योथमनुष्येभ्योदद्यादहरहर्द्विजइतिकात्यायनेनश्राद्धोत्तरंमनुष्ययज्ञोक्तेर्वैश्वदेवोत्तरनित्यश्राद्धमितिपक्षद्वयचंद्रोदयेउक्तं । आहिता
ग्निनाश्राद्धात्प्राक्कार्यइत्युक्तं **मदनरत्ने** । श्राद्धांतरेतुवृद्धगौतमः—पितृश्राद्धमकृत्वातुवैश्वदेवंकरोतियः । आसुरतद्भवेच्छ्राद्धपितृ
णांनोपतिष्ठते । एतदनग्निकपरम् । श्राद्धात्प्रागेवकुर्वीतवैश्वदेवचसाग्निकः । एकादशाहिकमुक्त्वातनघेतद्विधीयतेइति । एकादशाहिकपदमे
तश्राद्धोपलक्षणमिति **मदनरत्नेबहृचपरिशिष्टे** । स्मार्ताग्निरनग्निश्चाग्नौकरणोत्तर ब्राह्मणविसर्गोत्तरंवाकुर्यात् । आद्यउक्तोहेमाद्रौ
ब्रह्मांडे—वैश्वदेवाहुतेरग्नावर्वाग्ब्राह्मणभोजनात् । जुहुयाद्भूतयज्ञादिश्राद्धंकृत्वातुतत्स्मृतम् । भूतयज्ञोबलिः । **श्राद्धंप्रक्रम्यमनुः**—ततोगृ
हबलिकुर्यादितिधर्मोव्यवस्थितः । बलिपदंवैश्वदेवोपलक्षणार्थमितितुकर्कः । काकादिबलिपरमितिदिवोदासः । विकिरमित्यन्ये । द्विती
यउक्तोहेमाद्रौभविष्ये—पितृन्सतर्प्यविधिवद्बलिंदद्याद्विधानतः । वैश्वदेवंततःकुर्यात्पश्चाद्ब्राह्मणवाचनम् । बलिंयेअग्निदग्धाइतिदी
यमानम् । **तृतीयोप्युक्तस्तत्रैव**—कृत्वाश्राद्धमहाबाहोब्राह्मणांश्चविसृज्यच । वैश्वदेवादिककर्मततःकुर्यान्नराधिप । एतदनग्निपरम् ।
यदाश्राद्धंपितुःकश्चित्कर्तुमिच्छत्यनग्निमान् । वैश्वदेवंतदाकुर्यान्निवृत्तेश्राद्धकर्मणि । वृद्धावादौक्षयेचान्तेमध्येजुहुतिपार्वणे । एकोद्दिष्टेतथाचां
तेवैश्वदेवोविधीयतइतिहेमाद्रौस्मृतिसारात् । **मेधातिथिरप्येवं** । **वृत्तिकृता**विसर्जनांतंश्राद्धमुक्त्वा उच्छेपणंत्वितिमनुवाक्यो
दाहरणाद्बहृचानांश्राद्धांतेएववैश्वदेवः । मध्यपक्षस्तुयच्छाखायामुक्तस्तच्छाखीयपरइतित्रोपदेवः । **स्मृतिसारे**—बलिकारादयोपिबहुस्मृ
त्युक्तत्वात्सर्वेषांविसर्जनांतेवैश्वदेवइतिमेनिरे । साग्नितैत्तिरीयाणांतुसर्वत्रादौवैश्वदेवः । पंचयज्ञाश्चादावंतेचेतिसुदर्शनभाष्येदिवोदासी
येस्मृतिः—याजुषाःसामगाःपूर्वमध्येश्राद्धंतुबहृचाः । अथर्वापाकशेषेणवैश्वदेवेविधिःस्मृतः । याजुषसामगौसाग्नी । इतरौनिरग्नी । सर्वशाखि

नामनग्निकानामपिप्रागेवेतिदिवोदासः। तत्रपिंडदानात्पूर्ववैश्वदेवपक्षेभिन्नः । पितृपाकात्समुद्धृत्यवैश्वदेवंकरोतियः। आसुरंतद्भवेच्छ्राद्धंपितॄणांनोपतिष्ठतइतिपैठीनसिस्मृतेः । पितृसंबंधश्चापिंडदानात् । श्राद्धोत्तरंतुश्राद्धशेषेणपाकांतरेणच—श्राद्धंनिर्वर्त्यविधिवद्वैश्वदेवादिकंततः । कुर्याद्भिक्षांततोदद्याद्धंतकारादिकंतत इतिपैठीनसिस्मृतेः। द्वितीयस्ततःशब्दःश्राद्धशेषपरइतिहेमाद्रिः । नित्यश्राद्धंतुश्राद्धशेषेणपाकांतरेणवा । ततोनित्यक्रियांकुर्याद्भोजयेच्चततोऽतिथीन् । पृथक्पाकेननैत्यकमितिहेमाद्रौमार्कंडेयपुराणात् । एकादशाहश्राद्धेतुपृथक्पाकेनैव । एकोद्दिष्टेतुशेषेणब्राह्मणेभ्यश्चउत्सृजेदितिदेवलोक्तेः। एकोद्दिष्टंमहैकोद्दिष्टमितिहेमाद्रिः। दार्शवैश्वदेवयोरेकःपाकइतिकर्कहरिहरौ। तन्न। पित्र्यर्थनिर्वपेत्पाकंवैश्वदेवार्थमेवच । वैश्वदेवोनपित्र्यर्थनदार्शवैश्वदेविकम् । दार्शशब्देनतद्विकृतयोयुगादिमन्वादयइतिहेमाद्रिः॥ ॥

अथपाकः। सस्वयंपत्न्यावाकार्यः। आश्रमधर्माविरोधेनतंडुलान्वाप्रातःपत्न्यैदद्यात्स्वयंवाधिश्रयेदिति चंद्रिकायांशंखलिखितोक्तेः। आपस्तंबः—आर्याप्रयतावैश्वदेवान्नकर्तारइतिछंदोगपरिशिष्टे। पत्नीभूतप्रवचनेयद्यसंनिहिताभवेत्। रजोरागादिनातत्रकथंकुर्वंतियाज्ञिकाः। महानसेनवाकुर्यात्सवर्णांतांप्रवाचयेत्। प्रणवाद्यपिवाकुर्यात्कात्यायनवचोयथा। शातातपः—नैवेद्यार्थंपृथग्भांडेस्नातापत्नीपचेत्तथा। वैश्वदेवार्थमन्यस्मिन्व्यंजनानिपृथक्पृथक्। एकस्मिन्वाप्यशक्तौचेत्पूर्वंविष्णुनिवेदनम्। वैश्वदेवंततःशिष्टाद्व्यासस्यवचनंयथा। विष्णुपदंयजनीयोपलक्षणमितिपृथ्वीचंद्रः। माधवीयेपिनारसिंहकौर्मयोः—पौरुषेणचसूक्तेनततोविष्णुंसमर्चयेत्। वैश्वदेवततःकुर्याद्बलिकर्मतथैवच। चंद्रिकामाधवभागवतटीकासुचैवं। इदंबह्वृचभिन्नपरम्। तमेवंवैश्वदेवशेषेणकुर्यान्नास्यशेषेणवैश्वदेवंकुर्यादितिबह्वृचपरिशिष्टात्। केचित्सर्वंतुपूर्ववदितिमार्कंडेयपुराणात् देवयज्ञादीनामेकःपाकइतिहेमाद्रिः। मदनरत्नेतुसर्वेषांपृथक्पाकः। पितृयज्ञस्यवापृथक्पाक

इत्युक्तम् । **मनुः**—वैवाहिकेग्नौकुर्वीतगार्ह्यंकर्मयथाविधि । पंचयज्ञविधानंचपक्तिंदैनंदिनीमपि । **काशीखंडेप्येवम्** । **मदनरत्नेपरिशिष्टे**—प्रवसेदाहिताग्निश्चेत्कदाचित्कालपर्ययात् । यस्मिन्नग्नौभवेत्पाकोवैश्वदेवस्तुतत्रवै । **शातातपः**—लौकिकेवैदिकेवापिहुतोत्सृष्टेजलेक्षितौ । वैश्वदेवस्तुकर्तव्यःपंचसूनापनुत्तये । वैदिकेस्मार्ते । अन्यसंभवेभूम्यादावितिवृद्धपराशरः । अभावादग्निहोत्रस्यतथाचावसथस्यच । यस्मिन्नग्नौपचेदन्नंतत्रहोमोविधीयते । सर्वाधानिपरमिदमितिचंद्रिका । **आपस्तंबः**—औपासनेपचनेवापड्भिराद्यैःप्रतिमंत्रंहस्तेनजुहुयादिति । पचनःसर्वाधानिपरइत्युक्तंतद्भाष्ये**अंगिराः**—शालाग्नौतुपचेदन्नंलौकिकेवापिनित्यशः । **माधवीयेदेवलः**—चांडालाग्नेरमेध्याग्नेःसूतिकाग्नेश्चकर्हिचित् । पतिताग्नेश्चिताग्नेश्चनशिष्टैर्ग्रहणंस्मृतम् । अत्रायंनिष्कर्षः—आपस्तंबस्यस्मार्तेलौकिकेवापिपाकेस्मार्तएवहोमस्तदभावेलौकिके । बह्वृचस्यतुपचनेलौकिकेवापाकः । स्मार्तेपचनेलौकिकेवाहोमइतिवृत्तिः । देशांतरस्थितोवाशाकलहोमः । छंदोगानामप्येवम् ।

स्मार्तेपाकपक्षेविशेषःकर्मप्रदीपे—प्रातर्होमंचनिर्वर्त्यसमुद्धृत्यहुताशनम् । शेषंमहानसेकृत्वातत्रपाकंसमाचरेत् । तमग्निंपुनराहृत्यशालाग्नावेवनिक्षिपेत् । ततोस्मिन्वैश्वदेवादिकर्मकुर्यादतंद्रितः । शूद्रेणवैश्वदेवोलौकिकेग्नौकार्यइत्यपरार्के**मेधातिथिः**—**शूद्राचारशिरोमणौतु** त्रैवर्णिकानामग्न्यभावेजलादेरुक्तत्वाच्छूद्रस्यापिजलादावित्युक्तम् । एतत्सायंप्रातश्चकार्यम् । सायंप्रातर्वैश्वदेवःकर्तव्योबलिकर्मच । अनश्नतापिसततमन्यथाकिल्बिषीभवेदितिचंद्रिकायां**कात्यायनोक्तेः** । प्रातःशब्दोमध्याह्नपरः । पूर्वाह्णोवैदेवानांमध्याह्नोमनुष्याणामितिश्रुतेः । अनश्नतापीत्युक्तेरेकादश्यादावपिपक्वंचेदंकार्यमिति **नारायणवृत्तिः** । इदमपिबह्वृचपरम् । अन्येषांतुतंडुलादिनातदभावेजलेन । नचेदुत्पद्यतेन्नंतुअद्भिरेतान्समापयेदितिबोधायनोक्तेः । दधिघृतादितुबह्वृचान्यपरम् । पक्वाभावेप्रवासेचतंडुलानोषधीस्तथा । दद्याद्दधिघृतंवापिकंदमूलफलानिच । योजयेद्देवयज्ञादौजलेवाप्सुवाजलमितिचंद्रोदयेवचनात् । पक्वाभावइतिशुद्धोपवासपरमितिचंद्रोदयः ।

एतेनैकादश्यांवैश्वदेवोनकार्यइतिवदंतःपरास्ताः । अत्रकेचित्—स्नात्वागृहंसमागत्यवैश्वदेवंसमाचरेत् । प्रातरेवद्विरावृत्त्याकुर्याद्वासहतद्वि
जः । सायंवायदिभुंजीयात्तत्कृत्वाजात्वपिस्वयमितिप्रयोगपारिजातेआश्वलायनस्मृतेः । द्वितीयभोजनाभावेपिसायंकालिकवैश्वदे
वस्यसायंवानुष्ठानंप्रातर्वेत्याहुः । पितृचरणास्तुआश्वलायनवाक्येयदिभुंजीयादित्युक्तेःसायंवैश्वदेवोद्वितीयभोजनेसत्येवप्रातर्द्विरावृत्तिस्तुप्रातः
पाकेनैवसायंपुनर्भोजने । यदिभुंजीयादित्यस्यतत्रापिसंबंधात् । पुनःपाकमुपादायसायमप्यवनीपते । वैश्वदेवनिमित्तंवैपत्न्यासार्धंबलिंहरेत् ।
तत्रापिश्वपचादिभ्यस्तथैवान्नापवर्जनमितिविष्णुपुराणाच्च । वैश्वदेवंतथारात्रौकुर्याद्बलिहृतिंतथा । महतःपंचयज्ञांस्तुदिवैवेत्याहधर्मविदि
तिमदनपारिजातेजमदग्निवाक्ये—तदासायंचप्रातश्चजुहोतीत्यादिवत्समुच्चयबोधकत्वशब्दाद्यभावाच्च सायंप्रातरितितुकातीयपरमि
त्याहुः । वस्तुतस्तुनित्यवच्छ्रुतस्यसूत्रोक्तस्यसायंकालिकस्यकादाचित्कत्वेमानाभावात् वैश्वदेवद्वयाकरणेप्रायश्चित्तश्रवणात् दिवाचारिभ्यइति
लिंगाच्च दिवास्यप्रारंभइतिवृत्तेश्च यथाकथंचित्सायंप्रातरनुष्ठानंयुक्तं । असतिबाधकेऽतिसंकोचस्यायुक्तत्वादितियुगपद्वैश्वदेवपक्षेसहपद
श्रवणात्प्रातस्तनंसंपूर्णंवैश्वदेवंकृत्वासायंकालिकवैश्वदेवकरणेसहपशूनालभतइतिवत्सहत्वबाधात् पूर्वंहोमौततोबलीततःपितृयज्ञाविति । आ
पस्तंबानांवैश्वदेवप्रथमारंभेविशेषउक्तोधर्मप्रश्ने वैश्वदेवंचतुर्दशमहोभवतीतिज्ञात्वादंपत्योर्द्वादशाहमधःशय्याब्रह्मचर्यंक्षारलवणवर्जनं
त्रयोदशेहन्युपवासश्चतुर्दशेहनिवैश्वदेवःस्थालीपाकंकृत्वागृहपाकाद्वाहविष्यान्नमादायजुहुयादितिचंद्रोदयेबृहत्पराशरेणान्नसंस्कारोक्तेः,
अहरहःकुर्यादितिपुरुषार्थत्वावगतेश्च । अन्नस्यचात्मनश्चैवसंस्कारार्थंतदिष्यतइतिमदनरत्नेशौनकोक्तेश्च । यत्तुचंद्रिकायांपरि
शिष्टम्—प्रोषितोप्यात्मसंस्कारंकुर्यादेवाविचारयन्नितितदुभयार्थत्वेप्यविरुद्धम् । आश्वलायनवृत्तौमदनरत्नेस्मृत्यर्थसारेचैवम् ।
तत्रस्विष्टकृद्वत्प्रक्षेपांशेऽन्नसंस्कारता । यत्त्वश्चौहूयतेनैवेत्युक्तेः त्यागांशेपुरुषार्थता । चंद्रिकामिताक्षरयोस्तुपुरुषार्थत्वमेवो

क्तंतद्वचनविरोधाच्चिंत्यम् । **व्यासः**—वैश्वदेवंप्रकुर्वीतस्वशाखाविहितंततः । संस्कृतान्नैश्वविविधैर्हविष्यैर्व्यंजनान्वितैः । इदंबहृचान्यपरं । वर्जयित्वाविशेषान्नंशुद्धेनान्नेनकेवलमितिशौनकोक्तेः, हविष्याहविष्यपाकेहविष्येणैवसिद्धस्यहविषस्यजुहुयादित्याश्वलायनोक्तेः । **हविष्याणिटोडरानंदेस्मृतौ**—हैमंतिकसितास्विन्नंधान्यंमुद्गास्तिलायवाः । कलायकंगुनीवारावास्तुकंहिलमोचिका । षष्टिकाःकालशाकंचमूलकंकेमुकेतरत् । कंदःसैंधवसामुद्रेलवणेदधिसर्पिषी । पयोनुद्धृतसारंचपनसाम्रहरीतकी । पिप्पलीजीरकंचैवनागरंचैवर्तिंतिणी । कदलीलवलीधात्रीफलान्यगुडमैक्षवम् । अतैलपक्वंमुनयोहविष्याणिप्रचक्षते । सर्पिःपयश्चात्रगव्यम् । अतैलपक्कमित्युक्तानामेवविशेषणमितित्रत**हेमाद्रिः** । हैमंतिकमितिवार्षिकव्यावृत्तिः । सितमितिश्यामव्यावृत्तिः । अस्विन्नमितिस्विन्नव्यावृत्तिः । युगपत्क्रमेणवाहविष्यद्वयपाकेन्यतरेण । यद्येकस्मिन्कालेव्रीहियवैःपच्येतान्यतरस्यहुत्वाहुतंमन्येत । यद्येकस्मिन्कालेपुनःपुनरन्नंपच्येतसकृदेवबलिंकुर्वीतेति**गोभिलोक्तेः** । अहविष्यान्नमात्रपाकेफलादिनावैश्वदेवःकार्यः । अहविष्यंत्वसंस्कृतमेवभोज्यमितिकेचित् । **बोपणभट्टस्तु** गृहमेधिनोयदशनीयंतस्यहोमाबलयश्चस्वर्गपुष्टिसयुक्ताइत्या**पस्तंबोक्ते**रहविष्येणापिहोममाह । शृतफलाहारेतेनैववैश्वदेवोनतंडुलादिना ।—अजानन्योद्विजोनित्यमहुत्वात्तिशृतहविः । पितृदेवमनुष्याणामृणयुक्तःसयात्यधइतिचंद्रोदयेवृद्धपराशरोक्तेः, अशृतफलाहारेतेनैवपूर्वोक्तापस्तंबोक्तेः । शुष्कोपवासेतंडुलादिना ।—पक्काभावेप्रवासेचतंडुलानौषधीस्तथा । दद्याद्दधिघृतंचापिकंदमूलफलानिवा । योजयेद्देवयज्ञादौजलेवाप्सुवाजलमितिचंद्रोदयेवचनात् । पक्काभावइतिशुद्धोपवासपरम् । प्रवासेत्वनियमः । क्षारादिमिश्रहविष्यपाकेतु**बोधायनः**—अंगारान्भस्ममिश्रांस्तुनिरुह्योत्तरतोत्रतु । जुहुयाद्वैश्वदेवार्थंयदिक्षारादिमिश्रितम् । **वृद्धपराशरः**—स्वगृह्योक्तविधानेनजुहुयाद्वैश्वदेविकम् । हविष्यस्यद्विजोऽभावेयथालाभंशृतंहविः । फलंवायदिवामूलंरसंवायदिवापयः । पक्कान्नप्रतिग्रहेपितेनैववैश्वदेवः । तस्यपाकाप्रयोजकत्वात्तृप्तिकृत्पाकप्रयोजकतामाह ।

शूद्रलब्धेनवैश्वदेवादिनकार्यम् । आमंशूद्रस्ययत्किंचिच्छ्राद्धिकंप्रतिगृह्यते । तत्सर्वंभोजनायालंनित्येनैमित्तिकेनचेतिषट्त्रिंशन्मतात् । **वृद्धपराशरः**—जुहुयात्सर्पिषाभ्यक्तंगव्येनपयसापिवा । क्रीतेनगोविकारेणतिलतैलेनवापुनः । संप्रोक्ष्यपयसावापिनानक्तंजुहुयादपि । अस्नेहायवगोधूमशालयोहवनीयकाः । इति ।

वैश्वदेवेनिषिद्धद्रव्यमुक्तंकाशीखंडे—निष्पावान्कोद्रवान्माषान्कलायांश्चणकांस्त्यजेत् । तैलपक्वंचपक्वान्नंसर्वंलवणयुक्त्यजेत् । आढकीचमसूरांश्चवर्तुलान्वदरांस्तथा । भुक्तशेषंपर्युषितंवैश्वदेवेविवर्जयेत् । निष्पावा वल्लाः । **आपस्तंबः**—नक्षारलवणहोमोविद्यते तथापरान्नसंसृष्टस्येति । क्षारलवणमूषरलवणमितिकल्पतरुः । **व्यासः**—जुहुयात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितम् । **क्षाराश्चाग्नेये**—तिलमुद्गादृतेशिम्ब्यंसस्येगोधूमकोद्रवौ । चीनकंदेवधान्यंचशमीधान्यंतथैक्षवम् । स्विन्नधान्यंतथार्षेयंमूलंक्षारगणःस्मृतः । जुहुयाव्यंजनक्षारवर्ज्यं मन्नंहुताशने । व्यंजननिषेधोहविःपरःकेवलव्यंजनपरोवा । हविष्यव्यंजनान्वितैःपूर्वोक्तैः । चीनकं कलायः । **चतुर्विंशतिमते**—पयोदधिघृतैःकुर्याद्वैश्वदेवंस्रुवेणतु । हस्तेनान्नादिभिःकुर्यादद्भिरंजलिनाजले । अत्रभूसंस्कारादिनभवतीतिवृत्तिःकर्कश्च । **मार्कंडेये**—संपूजयेत्ततोवह्निंदद्याच्चाहुतयःक्रमात् । **हविःपरिमाणमुक्तंप्राक्** । **चंद्रोदयेस्मृतिः**—उत्तानेनतुहस्तेनअंगुष्ठाग्रेणपीडितम् । संहतांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविः । **बह्वृचपरिशिष्टे**—नात्रपाकतंत्रंसिद्धंहविष्यमधिश्रित्याद्भिःप्रोक्ष्योदगुद्वास्याग्नेःप्रत्यग्रदर्भेषुनिधायसव्यपाणितलंहृदयेन्यस्यसकृदवदायजुहुयादंतेचपरिसमुह्यपर्युक्ष्यपर्यूहनोक्षणेअपिवानकुर्वंतीति । **शौनकः**—त्रिधाविभज्यसिद्धान्नंत्रिःप्रो

१ पाकतन्त्रइध्माबर्हिरित्यादि । २ अविश्रित्याग्नेरुपरिकृत्वा ।

क्ष्यपुरतःस्थितम् । **काशीखंडे**—पृष्ठोदिवीतिमंत्रेणपर्युक्षणमथाचरेत् । एपोहिदेवमंत्रेणकुर्याद्दर्हिंचसंमुखम् । तथादेवकृतस्याद्याज्जुहुयाच्चषडाहुतीः । यमायतूष्णीमेकांचतथास्विष्टकृदाहुतिम् । **अत्रिः**—साग्निकःपितृयज्ञान्नाद्वलिकर्मसमाचरेत् । अनग्निर्हुतशेषेणवलिंकाकवलिंहरेत् । नरयज्ञाद्दतेनास्तिनिरग्नेस्तुमहामखः । हुत्वाकाकवलिरेव । **वसिष्ठः**—अनग्निकस्तुयोविप्रःसोऽन्नंव्याहृतिभिःस्वयम् । हुत्वाशाकलमंत्रैश्चशिष्टाद्भूतवलिंहरेत् । **व्यासः**—शाकलेनविधानेनजुहुयाल्लौकिकेऽनले । व्यस्ताभिश्चव्याहृतिभिःसमस्ताभिस्ततःपरम् । षड्भिर्देवकृतस्येतिमंत्रवद्भिर्यथाक्रमम् । अयविधिःकातीयपरइतिकेचित् । निरग्नेरपितस्यसूत्रोक्तएवहोमः । **जयंतकृष्णभट्टीययोस्तुव्या**हृतिभिर्व्यस्तसमस्ताभिर्जुहुयादित्युक्तम् । **मनुः**—वैश्वदेवस्यसिद्धस्यगृह्येऽग्नौविधिपूर्वकम् । आभ्यःकुर्याद्देवताभ्योब्राह्मणोहोममन्वहम् । अग्नेःसोमस्यचैवादौतयोश्चैवसमस्तयोः । विश्वेषांचैवदेवानांधन्वंतरयएवच । कुह्वैचैवानुमत्यैचप्रजापतयएवच । सहद्यावापृथिव्योश्चतथास्विष्टकृदाहुतिः । **विष्णुपुराणे**—अपूर्वमग्निहोत्रंचकुर्यात्प्राग्ब्रह्मणेततः । प्रजापतिंसमुद्दिश्यदद्यादाहुतिमादरात् । गृह्येभ्यःकश्यपायाथततोनुमतयेक्रमात् । अयमेववैश्वदेवःशूद्रस्येति**शूद्राचारशिरोमणिः** । मनूक्तइति**कौमुदीराघवानंदतीर्थौच** । शूद्रस्यशाकलमंत्रोक्तदेवतानाम्नाहोमइति**गोविंदराजः**। पाकयज्ञैःस्वयंयजेतेत्येकेइति**गौतमोक्तेः** स्वयंकरणविकल्पःशूद्रस्येति**हरिहरः**। **पाकयज्ञःप्रयोगपारिजातेहेमाद्रौच** । आसुरेभ्यःप्रहीणेभ्यःशिशुभ्योयच्चदीयते । वैश्वदेवंनतत्कुर्याच्छ्राद्धार्थंयच्चपच्यते । इति ।

अथभूतयज्ञः । **मनुः**—एवंसम्यग्घविर्हुत्वासर्वदिक्षुप्रदक्षिणम् । इंद्रांतकाप्पतीदुभ्यःसानुगेभ्योवलिंहरेत् । मरुद्भ्यइतितुद्वारिहरेदप्स्वद्भ्यइत्यपि । वनस्पतिभ्यइत्येवंमुसलोलूखलेहरेत् । उच्छीर्षकेश्रियैकुर्याद्भद्रकाल्यैतुपादतः । ब्रह्मवास्तोष्पतिभ्यांतुवास्तुमध्येवलिंहरेत् ।

---

१ सस्कृतमितिपाठ । २ अग्नीषोमाभ्यामिति । ३ अग्नयेस्विष्टकृतेस्वाहेति ।

विश्वेभ्यश्चैवदेवेभ्योबलिमाकाशउत्क्षिपेत् । दिवाचारिभ्योनक्तंतुनक्तंचारिभ्यएवच । पृष्ठवास्तुनिकुर्वीतबलिंसर्वानुभूतये । पितृभ्योबलिशेषंतुस
र्वंदक्षिणतोहरेत् । शुनांचपतितानांचश्वपचांपापरोगिणाम् । वायसानांकृमीणांचशनकैर्निक्षिपेद्भुवि । सायंत्वन्नस्यसिद्धस्यपत्न्यमंत्रंबलिंहरेत् ।
वैश्वदेवंहिनामैतत्सायंप्रातर्विधीयते । यजमानतत्पुत्रादीनामसन्निधौपत्नीबलिंहरेदितिकल्पतरुः । द्वंद्वंचमुसलोलूखलयोः । मुसलोलूखलेक्षि
स्वातंत्र्यैकोबलिरितिसर्वज्ञनारायणः । युक्तंचैतदेवलाघवात् । मुसलोलूखलोद्देश्यत्वात्प्रत्युद्देश्यंबलिक्षेपविधेर्बलिद्वयमितिमेधातिथिः ।
उलूखलइत्येकवचननिर्देशादितरेतरयोगः । द्वंद्वेद्विवचनापत्तेः समाहारद्वंद्वाश्रयणेनमुसलयुक्तमुलूखलमितिवा समासाश्रयणेनमुसलयुक्तमुलूख
लमित्येकत्वम् । उच्छीर्षकं शय्याशिरःवास्तुशिरोवा । पादतः शय्यायावास्तोर्वा । पृष्ठवास्तूपरिगृहमितिमेधातिथिः । पश्चाद्गृहंकाशी
खंडे । निर्णेजनोदकातंतुपावन्यां (?) यक्ष्मणेर्पयेत् । कात्यायनः—असुष्यैनमइत्येवंबलिदानंविधीयते । स्वधाकारःपितॄणांचहंत
कारोनृणांकृतः । नारायणवृत्तौतुबलिदानेस्वाहाकारउक्तः । नेत्याशार्कः । शूद्रस्यनमइत्येव । आशार्के—स्वधाकारेणनिनयेत्पित्र्यंब
लिमतःसदा । तदप्येकेनमस्कारंकुर्वतेनेतिगौतमः । तत्रनेत्यर्थ । मार्कंडेये—स्वधानमइतिह्युक्त्वापितृभ्यश्चापिदक्षिणे । हुतावशेषमन्नंवै
तोयंदद्याद्यथाविधि । विष्णुपुराणे—तच्छेषमणिकेपृथ्वीपर्जन्याद्भ्यःक्षिपेत्ततः । द्वारेधातुर्विधातुश्चमध्येचब्रह्मणःक्षिपेत् । गृहस्यपुरुषंचै
वदिग्देवानांचमेशृणु । इंद्रायधर्मराजायवरुणायतथेंदवे । प्राच्यादिषुबुधोदद्याद्धुतशेषात्मकंबलिम् । प्रागुत्तरेचदिग्भागेधन्वंतरिबलिंबुधः ।
वायव्यांवायवेदिक्षुसमस्तासुततोदिशम् । ब्रह्मणेचांतरिक्षायवायवेचक्षिपेद्बलिम् । विश्वेदेवान्विश्वभूतांस्ततोविश्वपतीन्पितॄन् । यक्ष्माणंचसमुद्दि
श्यबलिंदद्यान्नरेश्वर । ततोन्यदन्नमादायभूमिभागेशुचौबुधः । दद्यादशेषभूतेभ्य स्वेच्छयातत्समाहितः । देवामनुष्याःपशवोवयांसिसिद्धाश्चय
क्षोरगदैत्यसंघाः । प्रेताःपिशाचास्तरवःसमस्तायेचान्नमिच्छंतिमयाप्रदत्तम् । पिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मनिबंधबद्धाः । प्रयांतु

१ निक्षिपेद्बलिम् ।

तेतृप्तिमिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतु । येषांनमातानपितानबंधुर्नचान्नसिद्धिर्नतथान्यदस्ति । तस्मादहंभूतनिकायभूतमन्नंप्रयच्छामिभ वायतेषाम् । चतुर्दशोभूतगणोपियस्तुतत्रस्थितायेखिलभूतसंघाः । तृप्त्यर्थमन्नंहिमयाविसृष्टंतेषामिदंतेमुदिताभवंतु । इत्युच्चार्यनरोदद्यादन्नं श्रद्धासमन्वितः । भुविभूतोपकारायगृहीसर्वाश्रयोयतः । श्वचांडालविहंगानांभुविदद्यात्ततोनरः । येचान्येपतिताःकेचिदपुत्राभुविमानवाः । इदमेवबलिदानंशूद्रस्येत्युक्तंशूद्राचारशिरोमणौस्मृतिकौमुद्यांच ।

बलिदेशसंस्कारः । आपस्तंबः—बलीनांदेशस्यसंस्कारोहस्तेनपरिमृज्यावोक्ष्यन्युप्यचेति । **छंदोगपरिशिष्टे**—नावराध्यांबलयो भवंतिमहामार्जारश्रवणप्रमाणात् । एकत्रचेदविकृष्टाभवंतिइतरेतरमसंसक्ताश्चेदिति । नानास्थानेबलिदानासंभवे अविकृष्टा अव्यवहिताः । **शौनकः**—बदरीफलमात्रान्नमंगुल्यग्रैर्विनिक्षिपेत् । **बलिहरणेविशेषोबह्वृचपरिशिष्टे**—अथगृहबलिदेवतानांकीर्तयिष्यामोयत्र यत्रवसंतिताः । द्वारेपितामहंविद्यात्क्रोळेतुउमापतिम् । आग्नेय्यामित्यग्रेदर्शनात् द्वारे प्राच्याम् । आग्नेय्यांबलभद्रंचयमंविष्णुचदक्षिणे । नैर्ऋत्यांस्कंदवरुणौसोमंसूर्यंचपश्चिमे । वायव्यामश्विनौ । वसवःसौम्यां । रुद्रईशान्यां । नैर्ऋत्यांस्कंदं । वरुणसोमौपश्चिमे । सूर्योवायव्यामि त्यर्थः । नक्षत्रेदुग्रहाःपूर्वांदिशमाश्रिताः । गृहमध्येब्रह्माणंप्रतिष्ठाप्यऋद्धिर्वृद्धिःश्रीःकीर्तिरिति प्रदक्षिणंब्रह्मणःप्रागादिदिक्ष्वित्यर्थः । निष्क्रम्य गृहनिवेशनात्प्राङ्मुखःप्रोक्ष्यबलीन्निनयेत् । निवेशनंमुख्यगृहम् । ऐंद्रवारुणवायव्यायाम्यावैनैर्ऋतास्तथा । तेकाकाःप्रतिगृह्णंतुभूम्यांपिंडं मयार्पितम् । **इतिकाकबलिः** । द्वौश्वानौश्यामशबलौवैवस्वतकुलोद्भवौ । ताभ्यांपिंडंप्रयच्छामिस्यातामेतावहिंसकाविति**श्वबलिः** । येभू ताःप्रचरंतिदिवानक्तंबलिमिच्छंतोविदुरस्यप्रेष्ठाः । तेभ्योबलिंपुष्टिकामोददामिमयिपुष्टिंपुष्टिपतिर्ददात्विति**भूतबलिः** । प्रक्षाल्यपाणिपादौ गृहंप्रविश्यजपेत् शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोअस्तु । शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपांतुसर्वतःशांतिः २ ॥

अत्रकेचित्बलिहरणेनत्यागोहरणमात्रोक्तेःयजतिजुहोतिचोदितत्वाभावाच्च । अन्यथातर्पणेपित्यागापत्तेरित्याहुः । तन्न । सूक्तवाककरणत्वा
अत्रापिहरतेर्यागार्थत्वौचित्यात् । इति ॥
न्यथानुपपत्त्याहरतेर्यागकल्पवन्मन्वादिष्विंद्रादिषुचतुर्थीनिर्देशान्यथानुपपत्त्या
बलिहरणभेदानाह शौनकः—चक्राकारमथाष्टारंकुर्यादग्निसमीपतः । आयुःकामोदिवारात्रौछत्राकारंबलिहरेत् । आयुरारोग्यका
मोवाध्वजाकारंबलिंहरेत् । मृत्युरोगविनाशार्थीनराकारंबलिंहरेत् । आयुरारोग्यसौभाग्यपुत्रविद्यापशूनपि । कामश्रीधर्ममोक्षार्थीचक्राकारं
बलिंहरेत् । पंचस्वेतेषुविप्राणांमुख्याचक्राकृतिर्भवेत् । बह्वृचानांनराकारोमुख्यइतिकृ**ष्णभट्टीयेजयंतवृत्तौनारायणवृत्तौच** । यत्तु व्यज
नाकारंबलिमापस्तंबाहरंतितत्रमूलंमृग्यम् । **पृथ्वीचंद्रोदये**—अनुद्धृत्यबलीनश्नन्प्राणायामान्षडाचरेत् । स्वयमुद्धरणेचैवप्राजापत्यंसमाच
रेत् । बलिप्रतिपत्तिमाह**कात्यायनः**—पिंडवच्चपश्चिमाप्रतिपत्तिरिति । यथापिंडप्रतिपत्तिर्गोजविप्राग्न्यंबुषुतथाश्वादिबलिभिन्नबलीनामि
त्यर्थः । **चंद्रिकायांकात्यायनः**—वैश्वदेवंचपित्र्यंचबलिमग्नौविनिक्षिपेत् । शेषंभूतबलेर्विप्रस्त्यक्त्वाकाकबलेःसमम् । **अग्निस्मृतौ**—
वैश्वदेवबलेःशेषंनाश्नीयाद्ब्राह्मणोगृही । काकादिभ्यस्तुतद्देयंविप्रेभ्योवाविशेषतः । इति ।

अथपितृयज्ञः । सद्वेधाबलिहरणरूपोनित्यश्राद्धरूपश्च । श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथापिवेति**कात्यायनोक्तेः** । द्विविधोपिब
ल्युत्तरंकाकबलेःपूर्वकार्यः । भूतयज्ञस्त्वयंनित्यःसायंप्रातर्यथाविधि । एकंतुभोजयेद्विप्रंपितॄनुद्दिश्ययत्नतः । पूजयेदतिथिंनित्यंनमस्येदर्चयेत्तथेति
कौर्मात् । भूतयज्ञस्तथाश्राद्धंनित्यंत्वतिथितर्पणम् । क्रमेणानेनकर्तव्यंस्वाध्यायाध्ययनंतथेति **शातातपोक्तेः** । अदत्वावायसबलिंनि
त्यश्राद्धंसमाचरेदिति**काशीखंडाच्च** । **वसिष्ठेनतु** मनुष्ययज्ञोत्तरंश्राद्धमुक्तं—श्रोत्रियायाग्रंदत्वाब्रह्मचारिणेचानंतरंपितृभ्योदद्यादिति ।
एतद्बल्युत्तरंश्रोत्रियादेरुपस्थिताविति**आचारादर्शः** । **मनुस्मृतौ** वैश्वदेवात्पूर्वंनित्यश्राद्धमुक्तम् । **श्रुतौतु** देवयज्ञःपितृयज्ञोभूतयज्ञोमनु

व्ययज्ञोब्रह्मयज्ञइतिक्रमउक्तः । अपवर्गेतुसर्वत्रनित्यमेवप्रकीर्तितमितिशातातपोक्तेः वैश्वदेवोत्तरंनित्यश्राद्धमितिगोविंदराजः ।

अथनित्यश्राद्धम् । **मनुः**—दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा । पयोमूलफलैर्वापिपितृभ्यःप्रीतिमावहन् । **कात्यायनेन**तर्पणेनापिनित्यश्राद्धसिद्धिरुक्ता पितृयज्ञस्तुतर्पणमिति । **बौधायनोपि** अपिवाअपस्तर्पयेत्पितृयज्ञइति । अत्रतुल्यवद्विकल्पइतिकर्कः । शक्ताशक्तविषयत्वेनव्यवस्थेतिपित्र्यबलिनित्यश्राद्धयोःसमुच्चयः **मनुमार्कंडेयपुराणादि**पूभयोर्नित्यत्वावगतेरित्युक्तं**मदनरत्ने** । **प्रयोगपारिजाते**तुपित्र्यबलेर्दैवपित्र्यर्थत्वान्नित्यश्राद्धस्यमनुष्यपित्र्यर्थत्वादुभयोःसमुच्चयउक्तः । तन्न । देवताभेदेमानाभावात् । **नारायणवृत्तिकृत्तुवह्वृचा**नांपित्र्यबलिनैवनित्यश्राद्धसिद्धिमाह । **तदयमर्थः**—शक्तस्यनित्यश्राद्धंबलिश्च । श्राद्धाशक्तावुद्धृतान्नदानंबलिश्च । तदसंभवेबलिमात्रं । उद्धृतान्नप्रतिपत्तिश्च**कौर्मे**—उद्धृत्यवायथाशक्तिकिंचिदन्नंसमाहितः । वेदतत्वार्थविदुषेद्विजायैवोपपादयेत् । पित्र्यबलेर्नित्यश्राद्धत्वेतत्रगोत्राद्युच्चारोपिभवति । येषांतुपित्र्यबलौस्वधापितृभ्यइतिमंत्राम्नानंतेषांनगोत्राद्युच्चारःमंत्रानर्थक्यापत्तेः । नित्यश्राद्धंचअमादौप्रसंगसिद्धेःपृथङ्कार्यम् । नित्यश्राद्धंनकुर्वीतप्रसंगाद्यत्रसिध्यति । श्राद्धांतरेकृतेन्यत्रनित्यत्वात्तन्नहापयेदितिहेमाद्रौ**नागरखंडात्** । यत्रद्रव्यकर्त्रैक्ये । अन्यत्रतदभावे । श्राद्धंकृत्वातुतस्यैवपुनःश्राद्धंनतद्दिने । नैमित्तिकंतुकर्तव्यंनिमित्तानुक्रमोदयमिति**जाबालिस्मृतेश्च** । **त्रिस्थलीसेतौतु**—आमेनहेम्नावातीर्थश्राद्धेकृतेनित्यश्राद्धंपृथक् । तस्यपक्वद्रव्यकत्वनियमात् । यत्तुनांदीमुखतीर्थश्राद्धाभ्यांनित्यश्राद्धस्यसिद्धिरितिहेमाद्रिरूचेतत्तीर्थश्राद्धस्यान्नेनकरणेज्ञेयमित्याहु**र्भट्टपादाः** । अस्यदिवाकरणेलोपःरात्रौश्राद्धंनकुर्वीतेतिवचनात्किंतुप्रायश्चित्तमेवेत्युक्तं**मदनरत्नेगोविंदार्णवेप्रयोगपारिजातेच** । **अत्रकेचित्**—नित्यश्राद्धंरात्रावपिकार्यम् । दिवोदितानीत्यादि**बृहन्नारदीयात्** । रात्रौप्रहरपर्यंतमित्यादिचंद्रोदयेसंग्रहाच्च । नचैवंदार्शिकाद्यपिरात्रौस्यादितिवाच्यम् । तिथिसंबधित्वेनदिवासंबंधित्वादित्याहुः । प्रांचाअप्येवम् । तन्न ।—संध्यारात्र्योर्नकर्त

व्यंश्राद्धंखलुविचक्षणैरिति**विष्ण्वादि**वचनैर्नित्यश्राद्धस्यापिरात्रौनिषेधात् । नचेदममावास्यादितिथिसंबंधिश्राद्धपरम् । संकोचेमानाभावात् । तस्याप्यपराह्णसंबंधित्वेनदिवासंबंधित्वाच्च । नचैवमल्पद्वादश्यामपररात्रेनित्यश्राद्धंनस्यादितिवाच्यम् । इष्टापत्तेः अपकर्षविधेर्बलीयस्त्वा द्वातत्करणम् । यत्तु**स्मृत्यर्थसारे**—नित्यश्राद्धेन्नदेशकालनियमोनास्तीतितदप्यपराह्णनियमोनास्तीत्येतत्परंनतुरात्रिप्राप्तिपरम् । अतएवतीर्थ द्रव्योपपत्तौचनकालमवधारयेदितिदे**वलो**क्तावपराह्णनियमएवोक्तोनतुरात्रिग्रहणमपीत्युक्तम् । **शूलपाणिनातीर्थश्राद्धे**—रात्रौवायदि वादिवेतिस्पष्टंरात्रिविधेरात्रावनुष्ठानंयुक्तम् । नत्वत्र—श्राद्धंसायाह्नदत्तंहिराक्षसैर्विप्रलुप्यते । ग्रहोपरागसंक्रांतितीर्थश्राद्धादिकंचनेतिग्रहादि पर्युदासेनरात्रौश्राद्धनिषेधप्रतीतेश्च । अन्यथापरिगणनवैयर्थ्यापत्तेः । यत्तुत्रिमुहूर्तंतुसायाह्नस्तत्रश्राद्धंविवर्जयेदितितन्ननित्यश्राद्धपरम् । स्वकालातिक्रमेकुर्याद्रात्रेःपूर्वतयाविधिरिति**कालमाधवीयेव्यासोक्तेः** । पित्र्यबलेर्नित्यश्राद्धेपिनरात्रौनिषेधः । प्रतिनिधौनिषेधाप्रवृत्तेः । समुच्चयपक्षेस्थानापत्त्यभावाच्च । नित्यश्राद्धंशक्तस्याप्यनग्न्यादेरामेन । अनग्निश्चप्रवासीचयस्यभार्यारजस्वला । आमश्राद्धंप्रकुर्वीतमाससंवत्सरा द्वतइति**मरीच्युक्तेः** । नचनित्यश्राद्धेवृद्धिश्राद्धेचभोजनमेवप्रधानमित्या**शार्को**क्तेर्नामप्राप्तिरितिवाच्यम् । वृद्धिश्राद्धेपितदभावापत्तेरितिके चित् । **हेमाद्रि**स्त्वनग्न्यादेरपिपाकासंभवएवामेनेत्यूचे । युक्तंचैतत् । इंगुदैर्बदरैर्बिल्वैरामस्तर्पयतेपितॄन् । यदन्नःपुरुषोलोकेतदन्नास्तस्य देवताइति**रामायणात्** । नित्यश्राद्धेततोदद्याद्भुक्त्वेयत्स्वयमेवहीति**ब्रह्मांडा**च्च । नित्यश्राद्धस्यपक्वद्रव्यकत्वनियमादिति**पितामहोक्तेश्च** । अतः प्रवासादावपिपक्वेनैवेदम् । यत्तु**स्मृत्यर्थसारे** अन्ननियमोनास्तीतितदप्यन्यश्राद्धवद्धृतपक्वादिनियमोनास्तीत्येतत्परं नतुपक्वानियम परम् । अस्मादेववचनद्वयान्नित्यश्राद्धंनिषिद्धद्रव्येणापितैलादिनाकार्यमित्युक्तं**हेमाद्रौचंद्रिकायांदिवोदासीये**च । **श्राद्धहेमाद्रौ यमः**—सपिंडीकरणेनित्येनाधिमासंविवर्जयेत् । **निर्णयदीपेगार्ग्यः**—नांदीश्राद्धेकृतेपश्चाद्यावन्मातृविसर्जनत् । दर्शश्राद्धंक्षयश्राद्धंस्नानं

शीतोदकेनच । अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवच । ब्रह्मयज्ञंचाध्ययनंनदीसीमातिलंघनम् । उपवासव्रतंचैवश्राद्धभोजनमेवच । नैवकुर्युः सपिंडाश्चमडपोद्वासनावधि । एतद्वर्षपर्यंतमावश्यकमूर्ध्वंकृताकृतम् । नित्यश्राद्धप्रकम्य—एवंसंवत्सरमित्युक्त्वाकृताकृतमतऊर्ध्वमित्या पस्तंबोक्तेरिति**शूद्राचारशिरोमणिः कल्पतरुश्च** । तन्न । आपस्तंबोक्तनित्यश्राद्धस्येतिकर्तव्यताभेदेनस्मृत्युक्तनित्यश्राद्धभेदात् । नित्यक्रियांपितॄणांतुकेचिदिच्छंतिसत्तमाइति **मार्कंडेयपुराणा**न्नित्यश्राद्धेविकल्पः । सचपट्पुरुषश्राद्धोत्तरंनित्यश्राद्धंनकार्यं श्राद्धोत्तरंतुकर्त व्यमितिव्यवस्थितइतिपितृभक्तिः**श्रीदत्तः** । नित्यश्राद्धाकारणेनदोषः करणेतुमहाफलमिति**कल्पतरुः** । तन्न नित्यसंयोगविरोधात् फलाश्रव णाच्च अकरणेप्रायश्चित्तोक्तेः । **हेमाद्रौदेवलः**—अनेनविधिनाश्राद्धंकुर्यात्संवत्सरंसकृत् । द्विश्चतुर्वायथाश्राद्धंमासेमासेदिनेदिने । अत्य हमनुष्ठानाशक्तौमासेमासे तत्राप्यशक्तौवर्षमध्येद्विश्चतुर्वासकृद्वाकार्यमिति**हेमाद्रिश्चंद्रिका**च । नेदंनित्यश्राद्धपरम् । अनेनविधिना श्राद्धंत्रिशुद्धस्येहनिर्वपेत् । हेमंतग्रीष्मवर्षासुपांचयज्ञियमन्वहमिति**मनूक्तेः** । **मात्स्ये**—पूर्वार्धंतदेव । कन्याकुंभवृषस्थेर्केकृष्णप क्षेषुसर्वदेति । सकृदितिकन्यास्थार्कपरम् । अतःसर्वामावास्याश्राद्धाशक्तौसर्वकृष्णपक्षेषुश्राद्धाशक्तौचेदमिति**श्राद्धशूलपाणिः** । युक्तंचैतदेव ॥

अथविधिः । **व्यासः**—नित्यश्राद्धेश्चगंधाद्यैर्द्विजानभ्यर्च्यशक्तितः । सर्वान्पितृगणान्सम्यक्सहैवोद्दिश्यभोजयेत् । नावाहनंस्वधा कारंपिंडाग्नौकरणादिकम् । ब्रह्मचर्यादिनियमोविश्वेदेवास्तथैवच । नित्यश्राद्धेत्यजेदेतान्भोज्यमन्नंप्रकल्पयेत् । दद्यात्तुदक्षिणांशक्त्यानमस्कारै र्विसर्जयेत् । ब्रह्मचर्यभावेदातृभोक्त्रोः भोक्तारंप्रतिदातारंव्रतंतत्रनविद्यतइति**देवलोक्तेः** **मात्स्ये**—नित्यंतावत्प्रवक्ष्येहमर्घावाहनवर्जितम् । अर्घ्यपात्रमेवनिषिद्धंनार्घ्यदानम् । नैत्यकेपितरएतद्वोर्घ्यमितिपाणिनैवार्घ्यंदद्यादितिगृह्यांतरादिति**दिवोदासः** । **प्रचेताः**—नामंत्रणंनहोमश्च नावाहनविसर्जने । नपिंडदानंनसुरान्नित्येकुर्याद्द्विजोत्तमः । उपवेश्यासनंदत्वासंपूज्यकुसुमादिभिः । निर्दिश्यभोजयित्वातुकिंचिद्दत्वाविसर्जे

येत् । वाजेवाजेइतिमंत्रविशिष्टविसर्जननिषेधोनकेवलस्य नमस्कारैर्विसर्जयेदितिपूर्वमुक्तेरितिश्राद्धहेमाद्रिः । आसनादित्वोक्तेर्नपाद्यमिति स एव । किंचिद्दत्वेतिकाकिन्यादक्षिणामितिकल्पतरुः । यत्तुदानहेमाद्रौ—सुवर्णरजतंताम्रंतंदुलाधान्यमेवच । नित्यश्राद्धेदेवपूजासर्वमेतदद क्षिणमिति । यदपिव्यासः—तत्तुषाट्पुरुषंज्ञेयदक्षिणापिंडवर्जितमिति । यदप्यपरार्केप्रचेताः—नावाहनाग्नौकरणेनपिंडानांविसर्जनम् । अनुव्रज्योदक्षिणाचत्रिभ्यश्चातिथिकल्पनमिति । तत्रदक्षिणाभावोद्विजानुपवेशनपक्षइतिपृथ्वीचंद्रः । त्रिभ्योधिकस्यननित्यश्राद्धेभोजनं किंत्वतिथिकल्प्यमित्यर्थः । षण्मुख्याइतिदिवोदासः । दक्षिणाविकल्पइतिमदनरत्नेमात्स्ये—यद्येकंभोजयेद्विप्रंत्रीनुद्दिश्यपितॄंस्तथा । छंदोगपरिशिष्टेच—एकमप्याशयेद्विप्रंपित्रर्थेपांचयज्ञिके । शौनकः—आचेन्नत्रजपेन्मंत्रंदशवारंसदाबुधः । नित्यश्राद्धंयदान्यूनंकुरुते नात्रसंशयः । नित्यश्राद्धाशक्तौमनुः—भिक्षांवापुष्कलंवापिहंतकारमथापिवा । असंभवेसदादद्यादुदपात्रमपिद्विजे । इति ।

अथप्रयोगः । आचम्यप्राणानायम्यापवित्रःपवित्रोवेतिपुंडरीकाक्षंस्मृत्वागायत्रींपठित्वाप्राङ्मुखोदेशकालौसंकीर्त्यदक्षिणामुखःप्राचीनावीती सव्यंजान्वाच्यास्मत्पितृपितामहप्रपितामहानाममुकशर्मणाममुकगोत्राणां वसुरुद्रादित्यस्वरूपाणांसपत्नीकानांमातामहानांचैवंविधानांनित्यश्राद्धमहंकरिष्यइतिसंकल्प्य संकल्पोत्तरमपसव्यादीतिपृथ्वीचंद्रः । पित्रादीनांमातामहादीनांचेदमासनमितिद्विगुणभुग्नंकुशंवामतोदत्वागंधादिदत्वामंडलेनिहितंभस्मादिनावेष्ट्यपरिविष्यगायत्र्याभ्युक्ष्यपात्रमालभ्यपृथिवीतइतिपठित्वेदंविष्णुरितिपंचभिर्द्विजांगुष्ठंहविषिनिवेश्यवामेनपाणिनापात्रमालभ्य नामगोत्रोच्चारणपूर्वंपित्रादिभ्यःसपत्नीकेभ्यइदमन्नंयथाशक्तिसोपस्करममृतरूपेणस्वधासंपद्यतांकव्यंनममेतित्यजेत् । एवंमातामहेभ्योपि । कल्पतरुरप्येवम् । त्रेधाविभज्यान्नंयुष्मभ्यंनमइतिविशेषमाह । इदमन्नंतुभ्यस्वधेतिप्रत्येकंषड्भ्योनमःपितृभ्यइतिषड्भ्यःसकृद्वात्यजेदितिश्रीदत्तः । गायत्रीमध्वितिजपित्वापोशनंदत्वागायत्रींपठित्वाभोजनोत्तरंतृप्तान्पृष्ट्वोत्तराचमनंदत्वासुप्रोक्षितादिकृत्वादक्षिणांदत्वाअ

दत्वावाविसर्जयेत् । भोक्त्रभावेन्नंभिक्षवेगोभ्योवादद्यात् अग्नौजलेवाक्षिपेत् । **दिवोदासीयेग्रंथांतरे**—सहचेदश्नीयात्पूर्वमेवस्वधाक्षय्यं स्वस्तीतिचेदित्युक्तेसहाशनंनमुख्यम् इतिनित्यश्राद्धम् ।

अथमनुष्ययज्ञः । सचमनुष्यभोजनात्मकः । यन्मनुष्येभ्योददातीत्याश्वलायनसत्रात् । नियुज्यैकमनेकंवाश्रोत्रियंप्राङ्मुखं सदा । निवीतीतद्गतमनाऋषीन्ध्यायन्समाहितः इति **चंद्रिकायांनारायणोक्तेः** । ऋषीन् सनकादीन्मनुष्यान् । तत्राप्यतिथिभोजनं मुख्यम् । **यत्तयाज्ञवल्क्यः**—भोजयेच्चागतान्कालेसखिसंबंधिबांधवानितितदतिथेर्भोजनोत्तरमपिपंक्तौसख्यादयोभोज्याइत्येतदर्थं । मनुष्ययज्ञार्थमथिर्तिभोजयेदित्यापस्तंबपरिशिष्टात् । पितृभ्योदद्यात्ततोतिथीन्भोजयेदितिवसिष्ठस्मृतेर्नित्यश्राद्धोत्तरंमनुष्ययज्ञइत्या **चारादर्शः। कल्पतरौमदनरत्नेचैवम्** । नित्यश्राद्धात्पूर्वमनुष्ययज्ञइति **दिवोदासः** । अतिथ्यभावेन्येनापिब्राह्मणेनमनुष्ययज्ञसिद्धिः । अहरहर्ब्राह्मणेभ्योदद्यान्मूलफलशाकेभ्योऽप्येवंमनुष्ययज्ञमाप्नोतीतिबौधायनोक्तेः । तत्राशक्तौ**चंद्रिकायांनारायणः**—अशक्तावन्नमुद्धृत्यहतेत्येवंप्रकल्पयेत् इति ॥ ॥ यत्किंचिन्मनुष्यभोजनेनहंतकारादिनावाकृतेपिमनुष्ययज्ञेऽ**तिथिभोजनमावश्यकम्**—अतिथिर्गृहमभ्येत्ययस्यप्रतिनिवर्तते । असत्कृतोनिराशश्चससद्योहंतितत्कुलमितिमाधवीयेदेवलोक्तेः । **विष्णुपुराणे**—ततोगोदोहमात्रंवैकालतिष्ठेद्गृहांगणे । अतिथिग्रहणार्थायतदूर्ध्वंवायथेच्छया । अतिथितत्रसंप्राप्तंपूजयेत्स्वागतादिना । **अतिथिलक्षणं व्यासः**—मुहूर्तस्याष्टमंभागमुद्वीक्ष्योह्यतिथिर्भवेत् । दूराच्चोपगतंश्रांतवैश्वदेवउपस्थितम् । अतिथितंविजानीयान्नातिथिः पूर्वमागतः । **मनुः**—एकरात्रंतुनिवसन्नतिथिर्ब्राह्मणःस्मृतः । नैकग्रामीणमतिथिविप्रंसांगतिकंतथा । उपस्थितंगृहेविद्याद्भार्यायत्राग्नयोपिच । **शातातपः**—अचिंतितमनाहूतदेशकाल उपस्थितम् । अतिथितंविजानीयान्नातिथिः पूर्वमागतः । **यमः**—तिथिपर्वोत्सवाःसर्वेत्यक्तायेनमहात्मना । सोऽतिथिःसर्वभूतानांशेषानभ्यागतान्विदुः । व्रतीयतिर्वैकरात्रंनिवसन्नुच्यतेऽतिथिः । **श्राद्धहेमाद्रौशातातपः**—प्रियोवायदिवाद्वेष्योमूर्खःपंडितएववा । प्राप्तस्तुवैश्वदे

वांतेसोऽतिथिःस्वर्गसंक्रम' । **चंद्रोदयेपाद्मे**—देशंनामकुलंविद्यांपृष्ट्वायोऽन्नंप्रयच्छति । नसतत्फलमावाप्नोतिदत्वास्वर्गंनगच्छति । **मनुः**—ब्राह्मणस्यनत्वतिथिर्गृहेराजन्यउच्यते । वैश्यःशूद्रःसखाचैवज्ञातयोगुरुरेवच । यदित्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत् । भुक्तवत्सुचविप्रेषुकामंतमपिभोजयेत् । वैश्यशूद्रावपिप्राप्तौकुटुंबेतिथिधर्मिणौ । काममिच्छया नत्ववश्यं । कुटुंबेतद्वदितिगृहे नप्रवासादौ । **आपस्तंबः**—शूद्रमभ्यागतंकर्मणिनियुंज्यादथास्मैदद्यांदासावाराजकुलादाहृत्यातिथिवच्छूद्रंपूजयेयुरिति । राजकुलं स्वस्वामिगृहम् । **पूजामंत्रमाहपराशरः**—अतिथेऽमरदेहस्त्वमुत्तारार्थमिहागतः । संसारपंकमग्नंमामुद्धरस्वाघनाशन । अतिथिबहुत्वेविशेषमाहतु**र्बौधायनशंखौ**—ब्राह्मणक्षत्रियविट्शूद्रानभ्यागतान्यथाशक्त्यापूजयद्यदिबहूनांनशक्नुयादेकस्मैगुणवतेदद्याद्योवाप्रथममागतःस्याच्छ्रोत्रियस्तस्माइति । **आपस्तंबः**—अतिथिंनिराकृत्योपोष्यश्वोभूतेयथामनसंतर्पयित्वासंसाधयेदिति । संसाधयेत्प्रेषयेत् । **पराशरः**—यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ । तयोरन्नमदत्वातुभुक्त्वाचांद्रायणंचरेत् । दद्याच्चभिक्षात्रितयंपरिव्राट्ब्रह्मचारिणाम् । इच्छयावाततोदद्याद्विभवेसत्यवारितम् । **कौर्मे**—भिक्षांचभिक्षवेदद्याद्विधिवद्ब्रह्मचारिणे । **भिक्षूनाहव्यासः**—ब्रह्मचारीयतिश्चैवविद्यार्थीगुरुपोषकः । अध्वगःक्षीणवृत्तिश्चषडेतेभिक्षुकाःस्मृताः । वैश्वदेवात्पूर्वमप्येतेपूज्याः । अकृतेवैश्वदेवेतुभिक्षुकेगृहमागते । वैश्वदेवार्थमुद्धृत्यभिक्षांदत्वाविसर्जयेत् । वैश्वदेवकृतंदोषंशक्तोभिक्षुर्व्यपोहितुम् । नतुभिक्षुकृतंदोषंवैश्वदेवोव्यपोहतीति**व्यासोक्तेः** । **चंद्रोदयेशातातपः**—ग्रासमात्राभवेद्भिक्षाचतुर्ग्रासंतुपुष्कलम् । पुष्कलानिचचत्वारिहंतकारःप्रकीर्तितः । **मदनरत्नेप्रकारांतरम्**—ग्रासमात्राभवेद्भिक्षाअग्रंग्रासचतुष्टयम् । अग्रंचतुर्गुणीकृत्यहंतकारोविधीयते । मयूरांडप्रमाणोग्रासइति**मिताक्षरा** । **गौतमस्तु**—ग्रासप्रमाणस्याविकारेणेति । कुक्कुटांडार्द्रामलकप्रमाणमप्युक्तंस्मृत्यंतरे । **शातातपेनप्र**कारांतरमु

१ तस्यदासा स्वस्वामिगृहादागत्य ।

त्कम् । यावन्मात्राशनोवास्याद्धुताशीस्नातकोद्विजः । तस्यान्नस्यचतुर्भागंहंतकारंविदुर्बुधाः । हंतकारादिदानंमनुष्यभोजनेकृतेपिनित्यमितिकेचित् । मनुष्यभोजनाशक्ताविल्यन्ये । **ब्राह्मे**—यःपात्रपूर्णीभिक्षांयतिभ्यःसम्प्रयच्छति । विमुक्तःसर्वपापेभ्योनासौदुर्गतिमाप्नुयात् । **व्यासः**—यतिहस्तेजलदद्याद्भैक्षंदद्यात्पुनर्जलम् । तद्भैक्षंमेरुणातुल्यतज्जलसागरोपमम् । पाखंडेभ्योपिभिक्षांदद्यादित्युक्तंचंद्रोदयेब्राह्मे—तेभ्योदेयं[२] गृहाद्बहिरिति । **विष्णुः**—भिक्षुकाभावेऽन्नंगोभ्योदद्यादग्नौवाक्षिपेदिति । **प्रोषितभर्तृकायाःपराशरः**—भार्याभोजनवेलायांभिक्षाःससाथपचवा । दत्वाशेपंसमश्नीयात्सायंसाभृत्यकैःसह ॥

अथगोग्रासः । सचशिष्टाचारात्पंचयज्ञोत्तरमितिमदनरत्ने । **प्रभासखंडे**—तृणान्नाद्यपरागावःकर्तव्याभक्तितोऽन्वहम् । अकृत्वास्वयमाहारंकुर्वन्प्राप्नोतिदुर्गतिम् । आत्माहारप्रमाणेनप्रत्यहंगोषुदीयते । आत्माहारप्रमाणान्नाशक्तौचंद्रोदयेब्रह्मांडे—सौरभेय्यःसर्वहिताः पवित्राःपुण्यराशयः । प्रतिगृह्णंतुमेग्रासंगावस्त्रैलोक्यमातरः । दद्यादनेनमत्रेणगवांग्रासंसदैवहि । सदैवेत्युक्तेरकरणेप्रत्यवायश्रुतेश्चायंनित्यइत्याचारादर्शः । **प्रभासखंडे** मंत्रांतरमुक्तं—सौरभेयीजगत्पूज्यादेवीविष्णुपदेस्थिता । सर्वदेवमयीग्रासमयादत्तंप्रतीक्षतु । अयंकाम्यश्च—तृणोदकेनसंयुक्तंयःप्रदद्याद्गवाह्निकम् । कपिलाशतदानस्यफलंविद्यान्नसशयइतिचंद्रोदयेभविष्यात् । इतिश्रीमन्नारायणभट्टात्मजसूरिरामकृष्णभट्टसूनुदिनकरभट्टानुजलक्ष्मणभट्टकृतावाचाररत्नेपंचमहायज्ञप्रकरणम् ॥

अथभोजनविधिः । **वसिष्ठः**—वारुण्यांभोजनगृहंनैर्ऋत्यांसूतिकागृहम् । इति । **याज्ञवल्क्यः**—बालःसुवासिनीवृद्धगर्भिण्यातुरकन्यकाः । संभोज्यातिथिभृत्यांश्चदंपत्योःशेषं[३]भोजनम् । कन्यानूढा । **मनुविष्णू**—सुवासिनीकुमारांश्चरोगिणोगर्भिणीस्तथा । अतिथिभ्योग्रएवै

---

१ चतुर्थांशम् । २ तेभ्योदद्याद्गृहात् । ३ इदभोजनभृत्यादिवर्गेभुक्तेपश्चादेकातेविधेय–दपत्यो शेषभोजनमिति **याज्ञवल्क्योक्तेः** । आहारनिर्हारविहारयोगा सदैवसद्भिर्विजनेविधेयाइतिवचनात् ।

तान्भोजयेदविचारयन् । अग्रेप्रथमम् । नात्रयथाश्रुतेतात्पर्यं किंत्वेतेषुभुक्तवत्सुस्वयंभुंजीतेत्यत्रेतिकल्पतरुः । वयंत्वेवकारानुपपत्तेर्यथाश्रुते एवतात्पर्य अतएवाविचारयन्नित्युक्तमितिब्रूमः । **याज्ञवल्क्यः**—बालः(स्व)सुवासिनीवृद्धगर्भिण्यातुरकन्यकाः । संभोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनम् । भोजयेच्चागतान्कालेसखिसंबंधिबांधवान् । शक्ताविदम् । तथाच**मार्कंडेये**—कुटुंबिनोभोजनीयाःस्वसमंविभवे सति । **आचारादर्शेनंदिपुराणे**—यतेद्ब्राह्मणपूर्वंतुभोक्तुमन्नंसदागृही । **पराशरः**—एकद्वित्रिचतुर्विप्रान्भोजयेत्स्नातकान्द्विजः । **शंखः**—पंचार्द्रोभोजनंकुर्याद्भूमौपात्रंनिधायच । उपवासेनतत्तुल्यंमनुराहप्रजापतिः । उपलिप्तेशुचौदेशेपादौप्रक्षाल्यवैकरौ । आचम्यार्द्रानोह्येवंपंचार्द्रोभोजनंचरेत् । आचमनंचभोजनशालायाबहिःकार्यम् । यस्तुभोजनशालायांभोक्तुकामउपस्पृशेत् । आसनस्थोनचान्यत्रस विप्रःपंक्तिदूषकइतिचं**द्रोदयेआपस्तंबोक्तेः**।तस्माद्बहिरुपस्पृश्यआचांतःप्रविशेद्गृहमित्या**चारादर्शेत्राह्माच** । **यमः**—आर्द्रपादस्तु भुंजानःशतंवर्षाणिजीवति । इति ॥

अथभोजनपात्राणि । **चंद्रोदयेग्निपुराणे**—भुंजीतपात्रेसौवर्णेपद्मिन्यादिदलादिके । **माधीयेमेधातिथिः**—सौवर्णेराजतेताम्रे पद्मपत्रपलाशयोः । भुंजीतेतिशेषः । **चंद्रोदयेत्रिः**—पंचाशत्पलिकंकांस्यंह्यधिकंभोजनायवै । गृहस्थैस्तुसदाकार्यमभावेहेमरौप्ययोः । तत्रैव**प्रचेताः**—पलाद्विंशतिकान्नार्वागतऊर्ध्वंयदृच्छया । **चंद्रिकायांपैठीनसिः**—एकएवतुयोभुङ्क्तेविमलेकांस्यभाजने । भाजनेभोजने चैवत्रिरात्रंफलमश्नुते । चत्वारितस्यवर्धंतेआयुःप्रज्ञायशोबलम् । भोजनंकांस्यपात्रेणयःकरोतिसकृद्द्विजः । वर्धंतेतस्यचत्वारिआयुःकांतिर्यशोबलम् । **हेमाद्रौहारीतः**—राजतपार्णताम्रकांस्यपात्राणिभोजनेइति । ताम्रविधिर्गृहस्थेतरपरः । ताम्रपात्रेनभुंजीतभिन्नकांस्येमलाविले । पलाश

१ वल्लीपलाशपत्रेपुइतिपाठः ।

पद्मपत्रेषुगृहीभुक्त्वैदवंचरेदितिपृथ्वीचंद्रः। ताम्रविधिःश्राद्धपरइत्यन्ये। **यत्त्वपरार्के**—सप्तम्यांनैवकुर्वीतताम्रपात्रेचभोजनमिति तत्पूर्वोक्तनिषेधोपसंहारार्थंदोषाधिक्यार्थंवा। ताम्रवत्पैत्तलेपिनिर्णयः। यत्तु–नायसान्यपिकार्याणिपैत्तलानिनतुकचिदितिश्राद्धहेमाद्रौवाराहं तत्प्रकरणाच्छ्राद्धपरं। भिन्नदोषोनकांस्येएवकिंतुतत्रदोषाधिक्यम्। नकार्ष्णायसे नमृत्पात्रे नभिन्नावकीर्णेइतिहारीतोक्तेः। शूद्रभाजनभिन्नभाजनेभुक्त्वोपवासोभिन्नकांस्येत्रिरात्रमितिस्मृत्यर्थसाराच्चभिन्नदोषस्ताम्राद्यन्यपरः। ताम्ररजतसुवर्णशंखमुक्ताश्मस्फटिकानांभिन्नमभिन्नमितिपैठीनसिस्मृतेः। **स्कांदेकार्तिकमाहात्म्ये**—पत्रभोजीभवेदूर्जेकांस्यंत्याज्यंप्रयत्नतः। तथा—योव्रतीकांस्यभोजीस्यान्नसव्रतफलंलभेत्। **ज्योतिर्निबंधे**—भोज्यपात्रसुधासिंधौघटयेद्द्वासमाहरेत्[1]। तत्रान्नप्राशनप्रोक्तेकालेभोजनमाचरेत्। सुधासिंधौ सोमे। **स्मृतिरत्नावल्याम्**—वल्लीपलाशपत्रेषुस्थलजेपुष्करेतथा। गृहस्थस्तुनचाश्नीयाद्भुक्त्वाचांद्रायणंचरेत्। करेकर्पटकेचैवआयसेताम्रभाजने। वटार्काश्वत्थपत्रेषुभुक्त्वाचांद्रायणंचरेत्। **चंद्रिकायांपैठीनसिः**—वटार्काश्वत्थपर्णेपुकुम्भीतिंदुकजेपुच[2]। श्रीकामोनैवभुंजीतकोविदारकरंजयोः। **आग्नेये**—वटार्काश्वत्थधवलसर्जभल्लातकीस्त्यजेत्। **स्कांदेप्रभासखंडे** शूद्रप्रक्रम्य—मध्यपत्रेनभुंजीतब्रह्मवृक्षस्यभामिनि। **प्रचेताः**—मृन्मयेपर्णपृष्ठेवाकार्पासेतांतवेतथा। नाश्नीयान्नपिबेच्चैवकरेणांजलिनापिच। यस्तुनकदलीपत्रमितिहेमाद्रौनिषेधःसश्राद्धपरः। **नृसिंहांबुधिमहोदधौगोविंदार्णवेच**—करंजपिप्पलवटप्लक्षकुंभ्यर्कतिंदुकाः। एषांपत्रेषुनाश्नीयात्कोविदाराम्रयोरपि। विपर्यस्तेषुपत्रेषुतिर्यक्पत्रेचदारुजे। अजपीतब्रह्मपत्रेषुशूद्रस्यूतेतदाहृते। कटकैःसीवितपत्रेतथावेणुदलेनच। अत्रमूलमृग्यम्। **चंद्रिकायांपुराणे**—पालाशेषुचपत्रेषुमध्यमेषुविशेषतः। यःकरोत्यशनंतस्यप्राजापत्यंदिनेदिने। यदीच्छत्यूर्ध्वगामित्वंपरस्थानंचशाश्वतम्। पत्रेपर्णेषुभोक्तव्यंमासमेकंनिरंतरम्। इति॥

---

१ घटयेद्ग्रासमाहरेत्। २ पर्णपत्रेषु।

अथभोजनेदिगादिनियमाः । **यमः**—प्राङ्मुखोन्नानिभुंजीतसूर्याभिमुखएवच । **ब्राह्मे**—प्राङ्मुखोदङ्मुखोवापिस्वाचांतोवाग्यतः
शुचिः । भुंजीतान्नंचतच्चित्तोह्यंतर्जानुःसदानरः । **यत्तुकौर्मे**—योभुंक्तेवेष्टितशिरायश्चभुङ्क्तेउदङ्मुखः । सोपानत्कश्चयोभुङ्क्तेसर्वंविद्यात्तदासुर
मिति । तत्रविकल्पइतिकेचित् । भोजनेउदङ्मुखत्वादिनिषेधोनिष्कामपरइत्या**चारादर्शः** । पुत्रिपरइतिवयम् । पुत्रवान्स्वगृहेनित्यंनाश्नी
यादुत्तरामुखइति**स्मृतिमंजर्यांवचनात्** । **प्रयोगपारिजातेस्मृतिमंजर्याम्**—पितरौजीववंतौचेन्नाश्नीयादुत्तरामुखः । तयोस्तुजीव
वानेकस्तथैवनियमःस्मृतः । **विष्णुपुराणे**—विशुद्धवदनःप्रीतोभुंजीतनविदिङ्मुखः । **मनुः**—आयुष्यंप्राङ्मुखोभुङ्क्तेयशस्यंदक्षिणामुखः ।
श्रियंप्रत्यङ्मुखोभुङ्क्तेऋतंभुङ्क्तेउदङ्मुखः ।आयुषेहितमायुष्यं । श्रियंऋतंचेच्छन्निति शेषः । सकृदनुष्ठानेनापिफलमितिकेचित् । यावज्जीवंनियमः।
फलायविधीयतइत्यन्ये । **कौर्मे**—नांतरिक्षेनचाकाशेनचदेवालयादिषु । भुंजीतेतिशेषः । **हारीतः**—भूमावेवनिदध्यान्नोपरिपात्राणीति ।
वसिष्ठः—नोत्संगेनभुविनपाणौनाकाशइति । पात्राणिनिदध्यादितिशेषः । भुविकेवलायाम् । अतएवा**पस्तंबः**—नवाविभुंजीतकृतभूमौतु
भुजीतेति । कृतत्वंनावोमृत्प्रक्षेपेणेति**कल्पतरुः** । कृतायांगोमयादिनासंस्कृतायामिति**हरदत्तः** ॥

मंडलविचारः । **मदनरत्नेब्राह्मे**—अकृत्वामंडलंयेतुभुंजतेऽधमयोनय. । तेषांतुयक्षरक्षांसिहरंत्यन्नस्यतद्बलम् । **तत्रैवशंखः**—
आदित्यावसवोरुद्राब्रह्माचैवपितामहः । मंडलान्युपजीवंतितस्मात्कुर्वीतमंडलम् । चतुष्कोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्यतु । मंडलाकृतिवैश्य
स्यशूद्रस्याभ्युक्षणंस्मृतम् । **मदनपारिजातेव्यासः**—चतुरस्रंत्रिकोणंचवर्तुलंचार्धचंद्रकम् । कर्तव्यमानुपूर्व्येणब्राह्मणादिषुमंडलम् ।
तत्रैवब्राह्मे—मंडलंगोमयेनस्यादथवागौरमृत्स्नया। **आचारादर्शेबौधायनः**—भस्मनावारिणावापिकारयेन्मंडलंततः । **अग्निस्मृतौ**—
नासंदी[1]भोजनेशस्ताविप्राणांतुकदाचन । **यत्तुस्मृत्यर्थसारे**—प्राणाहुत्यूर्ध्वमुत्क्षिप्यपात्रंयंत्रेविनिक्षिपेदिति तत्क्षत्रियादिपरं श्लोकेविप्रग्रहणादि

१ आसदीलौहत्रिपदमुपवेशनदीपस्थापनादिसाधनम् ।

तिकेचित् । पंचग्रासांस्तुभुक्त्वादौकचिद्देश्मनिसकटे । पात्रमुद्धृत्यशेषंतुभक्षयेत्सांकराद्ध्यादितिब्राह्मोक्तेः । आसंदीआपस्तंबेतिमदनरत्ने । श्राद्धेआसंदीनिषेधोहेमाद्रौब्राह्मे—पित्र्येकर्मणिभुंजानोभूमेःपात्रंनचालयेत् ॥ स्मृत्यर्थसारे—नंयत्रिकायांयतिर्व्रतीब्रह्मचारीविधवाभुंजीतेति ।

भोजनकालविचारः । श्रुतौ—सायंप्रातराश्येवस्यादिति । गौतमः—सायंप्रातरत्वन्नमभिपूजितमनिंदन्भुंजीतेति । प्रातःशब्दःपंचमभागपरः । सायंशब्दोघटिकात्रयोर्ध्वरात्रिपरः । चत्वार्येतानिकर्माणिसंध्यायांपरिवर्जयेत् । आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकमितिशातातपोक्तेः । मुनिभिर्द्विरशनमुक्तंविप्राणांमर्त्यवासिनांनित्यम् । अहनिचतथातमस्विन्यांसार्धप्रहरयामांतइतिछंदोगपरिशिष्टात् । अत्र सार्धप्रहरानुज्ञाआपद्विषया । निशायाःप्रथमेयामेजपयज्ञार्चनादिकम् । स्वाध्यायोभोजनप्रोक्तवर्जयित्वामहानिशामितिशौनकोक्तेः । महानिशाशब्देनयामद्वयमुच्यतइत्युक्तंप्राक् । दिवाचनभोजनद्वयम् । सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितम् । नांतराभोजनंकुर्यादग्निहोत्रसमोविधिरितियमोक्तेः । द्विजग्रहणाच्छूद्रस्यनायनियमः । अतरानिषेधादेवरात्राविपभोजनद्वयंन । अतएवापस्तंबेनहरदत्तेनचद्विर्भोजनविधिःपरिसंख्येत्युक्तं । परिसंख्यात्वोक्तेरेतन्मतेद्वितीयभोजनंनावश्यकम् । विज्ञानेश्वरेणतुद्विर्भुंजीयादेवेतिनियमविधित्वोक्तेः शक्तस्यद्विर्भोजनमावश्यकम् । चंद्रिकाप्येवम् । अशक्तौतुयत्किंचिदल्पभक्ष्यम् । औपवस्तमेवैंकालांतरेभोजनमित्यापस्तंबोक्तेः । औपवस्तंउपवासस्तत्तुल्यमितिहरदत्तः । तदशक्तौअद्भिर्वासायमिति बौधायनोक्तंज्ञेयम् । नांतरेतिफलमूलान्यपरम् । दिवाचनांतराभुंजीतान्यत्रमूलफलेभ्यइत्यापस्तंबोक्तेः । आचारादर्शेतुद्विरशननियमःप्राणाग्निहोत्रमात्रपरः अग्निहोत्रसाम्यादित्युक्तम् । साम्योक्तिरुपासनापरेतिवाचस्पत्ये । साग्निकब्रह्मचारिणोस्तुनद्विर्भोजननियमः । आहिताग्निरनड्वां

१ एकस्मिन्काले ।

श्वब्रह्मचारीचतेत्रयः । अश्नंतएवसिध्यंतिनैषांसिद्धिरनश्नतामित्य**परार्केवसिष्ठस्मृतेः** । ब्रह्मचारीतुउपकुर्वाणकोनैष्ठिकश्च । अनडुत्प देनकालानियमउक्तइत्यु**ज्ज्वला** । यत्तु—ब्रह्मचारिणःसायंप्रातर्भिक्षेथाइतिनियमःसभिक्षायाएवनं[1]भोजनस्य । गृहस्थोब्रह्मचारीचयोनश्नंस्तु तपश्चरेत् । प्राणाग्निहोत्रलोपेनअवकीर्णीभवेत्तुसइत्य**परार्केबौधायनोक्ते**रुपवासादिरनयोर्न । एकादश्यादेस्तुनित्यत्वात्तयोरुपवासत्वा भावाच्चानुष्ठानम् । अत्रगृहस्थःसाग्निः । अनग्नयस्तुयेविप्रास्तेषांश्रेयोविधीयते । व्रतोपवासनियमैर्नानादानैस्तथानृपेति**मदनरत्नेभविष्यो क्तेः** । **अपरार्केबौधायनः**—प्राणा[3]ग्निहोत्रमंत्रांस्तुनिरुद्धेभोजनेजपेत् । त्रेताग्निहोत्रमंत्रांस्तुद्रव्यालाभेयथाजपेत् । **बृहस्पतिः**—दि वानिद्रापरान्नंचपुनर्भोजनमैथुने । क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत् । पुनर्भोजनमध्वानंभारमायासमैथुने । श्राद्धकृच्छ्राद्धभुक्चैवस र्वमेतद्विवर्जयेत् । **हेमाद्रौव्यासः**—आदित्येहनिसंक्रांतावसितैकादशीग्रहे । व्यतीपातेकृतेश्राद्धेपुत्रीनोपवसेद्गृही । **अपरार्के**—अयनेर विसंक्रांतौरविवारेचपर्वसु । मृताहेजन्मदिवसेनकुर्याद्रात्रिभोजनम् । **हेमाद्रौजातूकर्ण्यः**—अहन्येवतुभोक्तव्यंकृतेश्राद्धेनराधिप । **हेमाद्रौ कौर्मे**—शाकंमांसंमसूरांश्चपुनर्भोजनमैथुने । द्यूतमत्यंबुपानंचदशम्यांसप्तसंत्यजेत् । क्वचिद्व्रतपरमिति**हेमाद्रिः** । दशम्यांपुनर्भोजननिषेधः काम्यैकादशीव्रते । सायमाद्यं[4]तयोरह्नोःसायंप्रातश्चमध्यमे[5] । उपवासफलंप्रेप्सुरित्युक्तेरिति**हेमाद्रिमाधवकालादर्शनिर्णयामृतादयः** । **चंद्रिकायां**तुनित्येपिफलसत्वान्नित्यपरत्वमपीत्युक्तम् । इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतम् । विशेषनियमाशक्तोहोरात्रंभुजिवर्जितइति**माध वीयेब्रह्मवैवर्तात्** । भूताष्टम्योर्दिवाभुक्त्वारात्रौभुक्त्वाचपर्वसु । एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेत् । अत्र—शुक्लाष्टमीकृष्णचतुर्दशी चदर्शोऽथराकारविसंक्रमश्चेतिग्रंथांतरेशुक्लाष्टमीकृष्णचतुर्दश्योःपर्वत्वात्कृष्णाष्टमीशुक्लचतुर्दशीपरंभूताष्टमीपदम् । तेनतयोरेवदिवाभोजनंनेत्युक्तं

---

१ भोजनतुवारवारम् । २ तपोरुपत्वाभावादितिपाठ । ३ प्राणायस्वाहेत्यादय प्राणाग्निहोत्रमत्रा । ४ एकादशीदिने । ५ दशमीद्वादश्यो । ६ एकादश्या ।

निर्णयामृते । **स्मृत्यर्थसारे**—अष्टमीचतुर्दश्योर्नक्तंकार्यमेकभक्तंचेति । अत्रकेचिदुपवासात्पूर्वदिनेदशम्यल्पत्वेदशमीमध्यएवभोजनं कार्यम् । एकादश्यांनभुंजीतेत्येकादश्यांभोजननिषेधात् । निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षतइतिन्यायाच्चेत्याहुः । तन्न । दशम्यामेकभक्तस्तुमांसमैथुनवर्जितइति**चंद्रिकायांदेवलेन**मध्याह्नकालिकैकभक्तव्रतविधानाद्विधिस्पष्टेचनिषेधानवकाशात् द्वादश्यादिवन्माध्याह्निकापकर्षकाभावाच्च । नचायंनव्रतविधिःकिंतुपुनर्भोजननिषेधमात्रमितिवाच्यम् । निषेधकल्पनेमानाभावात् । हविष्याशनमध्याह्नाद्यप्राप्तिप्रसंगात् । सर्वत्रैकभक्तादौतथाप्रसंगाच्च । नचहविष्यादिकाम्यैकादशीव्रतमात्रांगं संकोचेमानाभावात् । **प्रयोगपारिजातेदेवलः**—श्राद्धंकृत्वातुयोमर्त्योनचभुंक्तेकदाचन । देवाहविर्नगृह्णंतिकव्यानिपितरस्तथा । एकादश्यादौतुसएव—उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत् । उपवासंतदाकुर्यादाघ्रायपितृसेवितम् । **प्रयोगपारिजात**स्त्वेकादशीमात्रपरम् । मातापित्रोःक्षयेप्राप्तेभवेदेकादशीयदा । संभाव्यपितृदेवांश्चआजिघ्रेत्पितृसेवितमिति**कात्यायनोक्ते**स्तेनशिवरात्र्यादौभोजनमेवेत्याह । पितृपदंजनकपरमिदं । तेनान्यश्राद्धेनावघ्राणम् । **हेमाद्रिस्तु**—चतुर्दश्यांयदाचैवश्राद्धंनैमित्तिकंतथा । उपवासंतदाकुर्यादाघ्रायपितृसेवितमिति**प्रभासखंडा**च्छिवरात्रावप्यवघ्राणम् । एवंचयस्मिन्नुपवासेकृतेपुण्यंत्यक्तेमहत्पापंतत्रावघ्राणम् । यत्रद्वयमप्यल्पंतत्रायाचितमेकभक्तंवाकार्यम् । उपवासदिनेश्राद्धंकथंचिद्यदिजायते । उपवासेश्वमेधाख्यराजसूयमयाचिते । वाजपेयंलभेद्धोक्ताएकभक्तेऽग्निहोत्रजमिति**प्रभासखंडा**दित्याह ॥

अथभक्ष्याभक्ष्यनिर्णयः । **याज्ञवल्क्यः**—अदत्तमग्निहीनस्यनान्नमद्यादनापदि । कदर्यबद्धचौराणांक्लीवरंगावतारिणाम् । वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम् । अग्निहीनःशूद्रः । शूद्रान्ननिषेधोऽसच्छूद्रपरः । गौर्भूमिरन्नंहोमार्थंसच्छूद्रस्यगृहेगृहेइति**ब्राह्मादितिटोडरानंदः** । तन्न । राजान्नंतेजआदत्तेशूद्रान्नंब्रह्मवर्चसम् । आयुःसुवर्णकारान्नंयशश्चर्मावकर्तिनः । भुक्त्वायोन्यतमस्यान्नममत्याक्षपणंत्र्यहमिति

मनूक्तेः। आत्मानंधर्मकृत्यंचपुत्रान्दारांश्चपीडयेत्। लोभाद्यःपितरौभृत्यान्सकदर्यइतिस्मृतः। वद्धोवाचानिगडैश्च। गणोत्राविभक्तभिन्नानाम्। अन्यथातेषामपिस्वान्नाभक्षणापत्तेः। चिकित्सकातुरक्रुद्धपूंश्चलीमत्तविद्विषाम्। क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनाम्। अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम्। शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्तिनाम्। नृशंसराजरजककृतघ्नवधजीविनाम्। चैलधावसुराजीविसहोपपतिवेश्मनाम्। पिशुनानृतिनोश्चैवतथाचाक्रिकबंदिनाम्। एषामन्नंनभोक्तव्यंसोमविक्रयिणस्तथा। क्रूरोभयानकः। उग्रःक्रूरकर्मेति**मिताक्षरा**। राजन्याच्छूद्रायामुत्पन्नइति**मदनरत्ने**। **शंखः**—भीतावगीतरुदितक्रंदितावघुष्टपरिभुक्तविस्मितोन्मत्तावधूतराजपुरोहितान्नानिवर्जयेदिति**मदनरत्ने**। **यमः**—स्वसुतान्नंतुयोभुंक्तेसभुंक्तेपृथिवीमलम्। तत्रैव**विष्णुपुराणे**—विष्णुंजामातरंमत्वातस्यकोपंनकारयेत्। अप्रजायांतुकन्यायांनाश्नीयात्तस्यवैगृहे। **मनुः**—उग्रान्नंसूतिकान्नंचपर्याचांतमनिर्दशम्। नाद्याच्छूद्रस्यपक्वान्नंविद्वानश्राद्धिकोद्विजः। आददीताममेवास्मादवृत्तावेकरात्रिकम्। सूतिकान्नंसूतिकामुद्दिश्यपक्वं। पर्याचांतमुत्तराचमनोत्तरंपात्रस्थितम्। पार्श्वाचांतमितिपाठेपंक्तिस्थेउत्थितेस्वपात्रस्थमपिनभक्ष्यम्॥

निषिद्धभोजनेप्रायश्चित्तम्। **शौनकः**—अराइवेज्जपेन्मंत्रंदशवारंनसंशयः। सीमंतेचयदाभुंक्तेमुच्यतेकलुषात्तदा। उषासानक्तासूक्तंतुजपेद्दशजलेपिवा। प्रमादाद्यस्ततोभुंक्तेसूतकान्नमकल्मषम्। प्रविष्टःप्रजपेन्मंत्रंशतवारंशिवालये। सूतकान्नंयदाभुंक्तेतदापापात्प्रमुच्यते। पर्जन्यवातावर्गंचशतवारंजपेज्जले। सूतकस्यगृहेभुंक्तेतदापापात्प्रमुच्यते। इंद्रोअश्रायिमंत्रचअयुतंचेन्नकल्मषम्। ज्ञानतोज्ञानतःस्पृष्ट्वाभुक्तिकालेरजस्वलाम्। इदंनमोजपेन्मंत्रंसहस्रंचेन्नदुष्कृतम्। ज्ञानतोज्ञानतोदृष्ट्वाभुक्तिकालेरजस्त्रियाः। अग्निंनमाजपेन्मंत्रंदशकृत्वोविशेषतः। अंत्यजानांध्वनिंश्रुत्वापश्चाद्भुंक्तेनकल्मषम्। अज्येष्ठासोजपेन्मंत्रंदशवारंनकल्मषम्। श्वानादिदर्शनंकृत्वापश्चाद्भुंक्तेयदातदा। आयेतस्थुर्जपेन्मंत्रंदशवैविष्णुमंदिरे। हस्तदत्तंयदाभुंक्तेतदापापात्प्रमुच्यते। तेअज्येष्ठाजपेन्मंत्रंशतंविद्यालयेसदा। दिवाद्विर्भोजनंकृत्वातस्मान्मुच्येतकल्म-

षात् । ह्ययोनप्रजपेन्मंत्रंशतवारंजलेतथा । रात्रौद्विर्भोजनंकृत्वाकल्मषाच्चप्रमुच्यते । त्र्यंसुमेषंजपेन्मंत्रंदशवारंशिवालये । अष्टम्यांवाचतुर्दश्यांदिवाभुङ्क्तेनकिल्बिषम् । सहिद्वरोजपेन्मंत्रंशतंवैविष्णुमंदिरे । एकादश्यामहोरात्रेभुङ्क्तेयद्विचपातकम् । आपःपृणीतमंत्रंचशतवारंनकिल्बिषम् । रात्रौभुक्त्वावत्सरेतुमन्वादिषुयुगादिषु । अश्वाइवजपेन्मंत्रंदशवारंजलेपिवा । नित्यश्राद्धेयदाभुंक्तेतदापापात्प्रमुच्यते । मयोभूश्चजपेत्सूक्तंवृषोत्सर्गेतुरौद्रकम् । भुक्त्वायदिविनश्येतविंशद्वारंजलेतदा । त्वेषंगणंजपेन्मंत्रंदशवैविष्णुमंदिरे । व्यतीपातेयदाभुङ्क्तेतदादोषाद्विमुच्यते । आप्यायस्वजपेन्मंत्रंदशलक्षंशिवालये । सूर्यग्रहेयदाभुङ्क्तेतदापापात्प्रमुच्यते । अराइवेजपेन्मंत्रंदशवारंयदातदा । बहवश्चैकपात्रेषुभुजतेतन्नकल्मषम् । अग्नेमरुद्भिर्मंत्रचशतसंख्यंजपेद्यदि । भुंजतेसहपात्रेतुबहवोब्रह्मचारिणः । मानस्तोकेजपेन्मंत्रंशतवारंनकिल्बिषम् । प्रमादाज्ज्ञानतोभुङ्क्तेगणान्नंतुयदातदा । यज्ञायज्ञाजपेत्सूक्तंएकरात्रंजलेपिवा । गणकान्नंयदाभुङ्क्तेतदापापात्प्रमुच्यते । अच्छानइंद्रसूक्तंतुएकवारंजलेजपेत् । विधुरान्नंयदाभुङ्क्तेतदापापात्प्रमुच्यते । ईळेअग्निजपेन्मत्रंदशवारंयदातदा । पंचयज्ञविहीनस्यगृहेभुङ्क्तेनपातकम् । किमंगत्वाजपेन्मंत्रमयुतंवैजलेसुधीः । ज्ञानतोपियदाभुङ्क्तेकुष्ठान्नंचेन्नपातकम् । सत्येनोत्तभितामंत्रंजपेद्विष्णवालयेयदा । उच्छिष्टेतुयदाभुङ्क्तेतदामुच्येतकिल्बिषात् सहस्रवारंगायत्रीन्व्याहृतीभिःससंपुटाम् । किल्बिषान्नंयदाभुङ्क्तेदोषोनास्तितदाजपेत् । इति ।

शूद्रादेर्ग्राह्यवस्तूनि । **अपरार्केसुमंतुः**—गोरसचंवसक्तूंश्चैतिलंपिण्याकमेवच । अपूपान्[1]भक्षयेच्छूद्राद्यच्चान्यत्पयसाकृतम् । **तथा**—कंदुपक्वंस्नेहपक्वंपायसंदधिसक्तवः । एतान्यशूद्रान्नभुजोभोज्यानिमनुरब्रवीत् । तत्रैव **कौर्मे**—कंदुपक्वानितैलेनपायसंदधिसक्तवः । द्विजैरेतानिभोज्यानिशूद्रैरेवकृतान्यपि । **मदनरत्नेगिराः**—मांसंदधिघृतंधान्यंक्षीरमाज्यमथौषधम् । गुडोरसस्तथोदश्विद्भोज्यान्येता

१ घृतपक्वान्यपूपादीनि.

निनित्यशः । अमृतंचारनालंचकंदुकाःसक्तवस्तिलाः । सक्तुपदमनार्द्रपक्वस्योपलक्षणम् । **प्रायश्चित्तशूलपाणावंगिराः**—स्वपात्रे यत्तुविन्यस्तंदुग्धंयच्छतिनित्यशः । पात्रांतरेणतद्ग्राह्यंशूद्रात्स्वगृहमागतम् । शूद्रवेश्मनिविप्रेणक्षीरंवायदिवादधि । निवृत्तेननभोक्तव्यंशूद्रान्नंतदपिस्मृतम् । तच्चप्रोक्ष्यग्राह्यमितिशूलपाणिः ।

निषिद्धान्नादीनि । अपरार्केशातातपः—गोकारुकंदुशालायांतैलयंत्रेक्षुयंत्रयोः । अमीमांस्यानिशौचानिस्त्रीषुचानंतरेषुच । कंदुपक्वादिचकलौनिषिद्धम् । एतानिलोकगुप्त्यर्थंकलेरादौमहात्मभिः । निवर्तितानिकर्माणिव्यवस्थापूर्वकंबुधैरितितत्रैव**शातातपोक्तेः** । **शंखः**—नापणीयान्नमद्यादिति । सएव—अपूपाःसक्तवोधानास्तक्रंदधिघृतंमधु । एतत्पण्येषुभोक्तव्यंभांडलेपोनचेद्भवेत् । **शूलपाणौ शातातपः**—घृतंतैलंपयःक्षीरंतथैवेक्षुरसोगुडः । शूद्रभांडस्थितंतक्रंतथामधुनदुष्यति । पयस्तुनवभांडस्थमेव । नवभांडेषुपानीयंशूद्रविट्क्षत्रजन्मनाम् । पेयंतदपिविप्राणांपयोदधितथैवचेति तत्रैव**जाबालोक्तेः** । **शंखः**—घृतदधिपयस्तक्राणामाकरभांडस्थानामदोषइति । **याज्ञवल्क्यः**—अनर्चितंवृथामांसंकेशकीटसमन्वितम् । भुक्तंपर्युषितोच्छिष्टंश्वस्पृष्टंपतितेक्षितम् । उदक्यास्पृष्टसंघुष्टंपर्यायान्नंचवर्जयेत् । गोघ्रातं शकुनोच्छिष्टंपदास्पृष्टंचकामतः । अनर्चितमवज्ञातम् । वृथामांसमात्मार्थमेवपक्वं । उपलक्षणमेतत् । नपचेदन्नमात्मानइत्यात्मार्थमन्नमात्रपाकस्य निषेधात् । पित्राद्युच्छिष्टंभोज्यम् । मातापित्रोरथोच्छिष्टंकलौभुंजन्भवेत्सुखीति**चंद्रिकायामादिपुराणात्** । पितुर्ज्येष्ठस्यभ्रातुरित्यप्येके । इति **आपस्तंबस्मृतेश्च** शुक्तंदध्यादिभिन्नम् । नपर्यायान्नमश्नीयान्नद्विःपक्वंनशुष्कंनपर्युषितमन्यत्ररागषाडवचुक्रदधिगुडगोधूमयवपिष्टविकारेभ्यइति**शंखोक्तेः** । यस्यान्नस्यैकैकेनपाकेननस्वरूपसिद्धिस्तद्द्विःपक्वमपिभोज्यमिति**मदनरत्नेश्राद्धहेमाद्रौच** । एतेनयच्छाकादिसंकारार्थंजीरकादिसंस्कारेणयत्पुनःपच्यतेतत्पुनःपक्वमिति**मदनपारिजातोक्तिः**परास्ता । पाकादावेवसंस्कारेपुनर्नसंस्कारः । यस्तुव्यंजनादेरात्मविनिगमार्थंपु

नःसंस्कारःसवर्ज्यएवेति**मदनपारिजातः** । अन्यंदीयंस्वीयत्वेनदत्तंपर्यायान्नम् । **शातातपः**—केशकीटशुनास्पृष्टंवायसोपहतंचयत् । क्लीबाभिशस्तपतितैःसूतिकोदक्यनास्तिकैः । दृष्टंचसाद्यदन्नंतुतस्यनिष्कृतिरुच्यते । अभ्युक्ष्यकिंचिदुद्धृत्यतद्भुंजीतविशेषतः । भस्मनावापिसंस्पृश्यसंस्पृशेदुल्मुकेनच । सुवर्णरजताभ्यांवाभोज्यंघ्रातमजेनवा । स्पृष्टमित्युक्तेःसहपाकेअभोज्यं । नित्यमभोज्यंकेशकीटावपन्नमिति**गौतमोक्तेः**। **हारीतः**—पिपीलिकादिभिरन्नाद्युपघातेकांचनभस्मरजतताम्रवज्रवैडूर्यगोवालाजिनदंतानामन्यतमेनाद्भिःसंस्पृष्टमन्नंप्रोक्षणपर्यग्निकरणादित्यदर्शनाच्छुद्धमिति । **मनुः**—पक्षिजग्धंगवाघ्रातमवधूतमवक्षुतम् । दूषितंकेशकीटैश्चमृत्प्रक्षेपेणशुध्यतीति । **जमदग्निः**—शृतान्नंद्रोणमात्रंतुश्वकाकाद्युपघातितम् । ग्रासमुद्धृत्याग्नियोगात्प्रोक्षणतत्रशोधनम् । **माधवीयेसंवर्तः**—विडालमूषिकोच्छिष्टेपंचगव्यंपिबेद्द्विजः । तत्रैव **उशनाः**—ब्राह्मणोच्छिष्टेप्राणायामशतमिति**याज्ञवल्क्यः** । अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितम् । अस्नेहाअपिगोधूमयवगोरसविक्रियाः । चिरस्थितमविकृतंचेत् । पर्युषितःशाकोपिभोज्यइति**हरदत्तः** । **कल्पतरौयमः**—अपूपाश्चकरंभश्चधानावटकसक्तवः । शाकमांसमपूपंच सूपंकृसरमेवच । यवागूंपायसंचैवयच्चान्यत्स्नेहसंयुतम् । सर्वपर्युषितभोज्यशुष्कचेत्परिवर्जयेत् । मिताक्षरायांयावकमप्युक्तम् ।

पलांड्वादिनिषिद्धवर्गः । **भविष्ये**—लशुनंगृंजनंचैवपलांडुंकवकानिच । वृंताकनालिकालाबुजानीयाज्जातिदूषकम् । गृंजनंलशुनाकारकंदविशेषइति**मिताक्षरायाम्** । **मदनरत्ने**—यदीयंचूर्णगायकाःकंठशुद्ध्यर्थंभक्षयंतितानिपत्राणि । मूलविशेषोगाजरापरपर्यायइति **माधवोहेमाद्रिश्च** । तन्न । **हेमाद्रावेवब्रह्मांडे**—गृंजनंचुक्रिकांचैवगाजरंजीरकंतथेति । श्राद्धेगृंजनभिन्नगाजरनिषेधात् । गृंजनो

---

१ शूद्रान्नब्राह्मणेनमदीयमितिकृत्वादत्तम् । २ कीटादिनासहपाकेजाते ।

यवनेष्टश्चपलांडोर्देशजातयइतिसुश्रुतोक्तेरपिनगाजरंगृंजनशब्दवाच्यम् । **हेमाद्रा**वप्युत्तरत्रपलांडुविशेषएवगृंजनमित्युक्तम् । **वैजयंत्याम**प्येवम् । **राजनिघंटौ**—रसोनोहिमहाकंदोगृंजनोदीर्घपत्रकः । पृथुपत्रःस्थूलकंदोयवनेष्टोविलोहितः । गृंजनस्यमधुरंकटुकंदंनालमप्युपदिशंतिकषायम् । पत्रश्चयमुशंतिचतिक्तंसूरयोलवणमस्थिवदंति । गाजरंपिंडमूलंचपीतकंदःसुमूलकम् । स्वादुमूलंसुपीतंचनागरंपीतमूलकम् । गाजरंमधुरंरुच्यंकिंचित्कटुकफापहम् । आध्मानकृमिशूलघ्नंदाहपित्ततृषापहम् । **यत्तुसारसंग्रहे**—गृंजनंपीतकंचान्यत्स्थौणेयंरक्तपित्तलम् । गृंजनंशीतलंग्राहिदाहमांद्यविषापहम् । तद्बीजंवीर्यदंश्रेष्ठमुष्णंगर्भहरंपरमिति । तन्न । गाजरेगृंजनशब्दोलाक्षणिकः । **वैद्यके**—गृंजनंशिखिमूलंचयवनेष्टंचवर्तुलम् । ग्रंथिमूलंशिखाकंदंकंदंडिंडीरमोदकम् । गृंजनंकटुरुष्णंचकफवातरुजापहम् । रुच्यंचदीपनंहृद्यंदुर्गंधिगुल्मनाशनम् । **मदनविनोदेपि**—गृंजनःपित्तलोग्राहीतीक्ष्णोष्णोरोगनाशनः । गंधाकृतिरसैस्तुल्यःसूक्ष्मनालःपलांडुना । तथागृंजनोयोमहाकंदोजर्जरीदीर्घपत्रकइतिलशुनभेदोप्युक्तः । तथा—कासमर्दःकर्कशःस्याद्गृंजनोगाजरस्तथा । गृंजनःकटुकस्तीक्ष्णस्तिक्तोष्णोदीपनोलघुः । संग्राहीरक्तपित्तार्शोग्रहणीकफवातजित् । त्रिविधेपिगृंजनेगार्जरंनांतर्भवति । गुणभेदात् । लवणयुतंदुग्धंदुग्धयुतंदधिचनभोज्यम् । **विनायकशांतौ**वलिदानेब्राह्मणस्यसुरामांसस्थानेतादृशयोस्तयोरुक्तेः । **चतुर्विंशतिमते**—मूलकंमातृमूलंचश्वेतरक्तौचसूरणौ । चत्वार्यभोज्यमूलानिपंचमीचार्द्रमूलिका । मातृमूलंमाइणीमूलमितिप्रसिद्धम् । **कल्पतरौब्राह्मे**—राजमाषाःस्थूलमुद्गास्तथावृषकवासकौ । मसूराःतशपुष्पाश्चकुंसूलकनिकेतनम् । सस्यान्येतान्यभक्ष्याणिनचेदयानिकस्यचित् । **तत्रैवापस्तंबः**—कृष्णधान्यंचशूद्रान्नंयेचान्येनाश्यसंमिताः । वर्जयेदितिसंबंधः । कृष्णधान्यंकलिंगकानि । **शूलपाणौदेवलः**—कुविंदांश्वेतवृंताकंकूष्मांडंचनभक्षयेत् । कुविंदा

१ कुसूला कुलित्थाः ।

घोटकः । तत्रैव**हारीतः**—श्लेष्मातकप्राशनेसांतपनमिति । **अपरार्केहारीतः**—कुसुंभंश्वेतवृंताकंकुंभांडचविवर्जयेत् । **हेमाद्रौविष्णुः**—
वर्जयेच्छ्वेतवृंताकमलाबुवर्तुलत्यजेत् । श्वेतोक्तेःकृष्णवृंताकस्यानिषेधइति**कल्पतरौमदनरत्नेमाधवीयेच** । **स्मृत्यर्थसारेपि**—क्षुद्रश्वेत
कटकिवृंताकानिवर्जयेदिति । तत्रैव—यतिव्रतिभ्यांसदालाबुशिग्रुवृंताकानिजातिमात्रेणवर्ज्यानीति । **व्रतहेमाद्रावग्निपुराणे**—व्रतंश्चक्र
म्य—कूष्मांडालाबुवार्ताकपालकीज्योत्स्निकास्त्यजेत् । **मदनरत्नेपैठीनसिः**—नलिकायौतकुसुंभाश्मतकाश्चेतिशाकानामभोज्याइति ।
नलिकाकलविकेति**शूलपाणिः** । तत्रैव**कौर्मे**—गृंजनंकिंशुकंचैवककुरचतथैवच । उदुंबरमलाबुंचजग्ध्वापततिवैद्विजः । अलाबुर्वर्तुलः ।
पूर्वोक्त**विष्णुस्मृतेः** । **स्मृत्यर्थसारेप्येवम्** । **हारीतः**—नवटप्लक्षाश्वत्थदधित्थमातुलिंगानिभक्षयेदिति । दधित्थंकपित्थम् ।
माधवीयेवृद्धयमः—नलिकानालिकेरीचश्लेष्मातकफलानिच । भूतृणंशिग्रुकंचैवखट्वांककनकतथा । वर्जयेदितिशेषः । तत्रैवचतु
र्विंशतिमते—तृणराजफलवल्लीभुक्त्वाचांद्रंचरेद्द्विजः । कदमूलफलादीनिअज्ञात्वोपवसेत्तथा । **याज्ञवल्क्यः**—देवतार्थहविःशिग्रु
लोहिताव्रश्चनांस्तथा । लोहितपदमुभयत्रान्वितम् । तेनरक्तशिग्रुर्निषिद्धइति**माधवः** । **स्मृत्यर्थसारेप्येवम्** । विट्जानितंदुलीयादीनिनि
षिद्धानि । विट्जानांफलानिभक्ष्याणीत्याह**बौधायनः**—अमेध्येषुचयेवृक्षाउप्ताःपुष्पफलोपगाः । तेषामपिनदुष्यंतिपुष्पाणिचफलानिच ।
तथाचोशनाः—नलिकाशणछत्राककुसुभालाबुविड्भवान् । कुंभीकंकेबुवृंताककोविदारांश्चवर्जयेत् । तथाकालप्ररूढानिपुष्पाणिचफलानिच ।
देवलः—नबीजान्युपभुंजीतरोगापदमृतेबुधः । बीजानिकूष्मांडस्येत्युक्त**कल्पतरौमदनरत्नेच** । **वर्ज्यानुवृत्तौशंखः**—कुनखीकुष्ठि
संस्पृष्टमिति । **कृष्णभट्टीयेस्कांदे**—आज्यपात्रेस्थितंतक्रमधुमिश्रंतुयद्धृतम् । ताम्रपात्रस्थितक्षीरंत्रपुसर्पिःसुरासमम् । आर्द्रकसगुडंमद्यसै

---

१ खट्वाकछत्राक । कनकधत्तूरबिल्ववा ।

क्षवंबदरंतथा । नारिकेलरसंकांस्येदध्नासंमिश्रितोगुडः । **वसिष्ठः**—अभोज्यंस्वोच्छिष्टोपहतंवसनकेशकीटोपहतंचेति । स्वोच्छिष्टंस्वभुक्तशिष्टंत्यक्तं । वसनंप्ररिहितमितिमदनरत्ने । **सुमंतुः**—क्षुतवचोभिहतमदधिपर्युषितंश्वचांडालवीक्षितमन्नमभोज्यमन्यत्रहिरण्योदकैःस्पृष्टादिति । वचोभिहतंतात्कालिकमुखवातादिदुष्टं । दधिस्नेहलक्षकं स्नेहरहितंपर्युषितमित्यर्थः । स्पृष्टात्भावेक्तः । श्वचांडालदृष्टंभोज्यमन्नांतराभावइति**मदनरत्ने** । वर्ज्यानुवृत्तौ**यमः**—लशुनंगृंजनंचैवविलयःसंमुखंतथा । विलयोघृतकिट्टम् । संमुखंघृतफेनस्तन्मंडश्च । **विष्णुपुराणे**—भुंजीतोद्धृतसाराणिनकदाचिन्नरेश्वर । **स्कांदे**—वृंताकंवृहतीचैवदग्धमन्नंमसूरिका । यस्योदरेप्रवर्ततेतस्यदूरतरोहरिः । अलाबुंभक्षयेद्यस्तुदग्धमन्नकलंबिकाम् । सनिर्लज्जःकथंब्रूतेपूजयामिजनार्दनम् । **स्कांदे**—शिरःकपालमंत्राणिनखचर्मतिलानिच । एतानिक्रमशोनित्यमष्टम्यादिषुवर्जयेत् । चर्मपदेनमसूरिकाउच्यंतइति**कालनिर्णयदीपिका** । **हरिभक्तिविलासेयामले**—यत्रमद्यतथामांसंतथावृंताकमूलकौ । निवेदयेन्नैवतत्रहरेरैकांतिकीरतिः । **भारते**—तिलान्भृष्टान्नचाश्नीयात्तथास्यायुर्नरिष्यति । **गौतमः**—उद्धृतस्नेहविलयनपिण्यकमथितप्रभृतीनिनाश्नीयादिति । मथितंजलंविनालोडितंदधीति**मदनरत्ने** । **आमिषंपाद्मेकार्तिकमाहात्म्ये**—प्राण्यंगमामिषंचूर्णेफलेजंवीरमामिषम् । धान्येमसूरिकाप्रोक्ताह्यन्नंपर्युषितंतथा । गोकांजिकंचमहिषीदुग्धादिचतथामिषम् । द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा । ताम्रपात्रस्थितंगव्यंजलंपल्वलसंभवम् । आत्मार्थंपाचितंचान्नमामिषंतत्स्मृतंबुधैः । नचेदंप्रकरणात्कार्तिकमात्रपरम् । अन्यत्रापितद्ग्रहेबाधकाभावात् । **मदनरत्ने**—घृतात्फेनंघृतान्मंडंपीयूषमथवार्द्रगोः । सगुडंमरिचाक्तंतुतथापर्युषितंदधि । दीर्णतक्रमपेयंचनष्टस्वादुचफेनवत् । गुडमरीचयुक्तंपर्युषितंदधिचनभक्षयेत् । दीर्णस्फुटितम् । **हारीतः**—नरजस्वलयादत्तंनक्रुद्धयानमलवद्वाससानापरयाद्वारापन्नमिति । **याज्ञवल्क्यः**—वृथाकृसरसंयावपायसापूपशष्कुलीः । अत्र नपचेदन्नमात्मनेइत्यनेननिषेधेसिद्धेपुनर्निषेधोदोषाधिक्यार्थइति**मदनरत्ने** ।

मनुः—अनिर्दशायागोःक्षीरमौष्ट्रमैकशफंतथा। आविकंसंधिनीक्षीरं विवत्सायाश्चगोःपयः। गोग्रहणमजामहिष्योरुपलक्षणम्। गोमहिष्य जानामनिर्दशानांपयोनपेयमितिवसिष्ठोक्तेरितिमदनरत्ने। वत्सग्रहणेनसवत्साधेनुरानीयतामितिवद्गोग्रहणेसिद्धेपुनर्गोग्रहणमजामहिष्यो र्व्यपत्सयोःपयसोनिषेधार्थमितिमेधातिथिः।

संस्कारादिभोजननिषेधः—**मदनरत्नेंगिराः**—जन्मप्रभृतिसंस्कारेबालस्यान्नस्यभोजने। असपिंडैर्नभोक्तव्यंचूडायांचविशेषतः। नारीप्रथमगर्भेषुभुक्त्वाचांद्रायणंचरेत्। **पराशरमाधवीयेधौम्यः**—ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा। जातकर्मनवश्राद्धेभुक्त्वा चांद्रायणंचरेत्। तत्रैव—निवृत्तचूडहोमेतुप्राङ्नामकरणात्तथा। चरेत्सांतपनंभुक्त्वाजातकर्मणिचैवहि। अतोन्येपुतुसंस्कारेपूपवासेन शुद्ध्यति। **चंद्रिकायाम्**—नवश्राद्धस्ययच्छिष्टंगृहेपर्युषितंचयत्। दंपत्योर्भुक्तशिष्टंचभुक्त्वाचांद्रायणंचरेत्। **आचारदर्पणे**—भानुवारे तथारात्रावष्टम्यांचतथैवच। धात्रीफलंनरःखादन्नलक्ष्मीकोभवेत्सदा। सप्तम्यांरविवारेचदिवारात्रौतथैवचेतिकृष्णभट्टीपूर्वार्धपाठः। अमावास्यापितृश्राद्धेसंक्रांतौपारणेतथा। परान्नंनैवभोक्तव्यंयस्यान्नंतस्यतत्फलम्। **हेमाद्रौ**—दिवादधित्थवानासुरात्रौचदधिसक्तुषु। श्लेष्मातकेतथाऽलक्ष्मीर्नित्यमेवकृतालया। **काशीखंडे**—नदिवोद्धृतसारंचभक्षयेद्दधिनोनिशि। **स्कांदे**—रात्रौदधिनभोक्तव्यंदिवाननवनीतकम्। **यमः**—नभिन्नभांडेभुंजीतनरात्रौदधिसक्तुकान्। **भारतेप्येवम्**। **आचारादर्शेलघुहारीतः**—पृथग्यानपुनर्दान मांसेनपयसानिशि। दंतच्छेदनमुष्णंचसप्तसक्तुषुवर्जयेत्। सक्तूनत्तुंदिनक्षयइतिभारतेशतपथाच्च। **सुमंतुः**—कूष्मांडबृहतींचैवतरुणीं मूलकंतथा। श्रीफलंचकलिंगंचधात्रीप्रतिपदादिषु। शिरःकपालमंत्राणिनखचर्मकृतानिच। उदुंबरफलंचैवतिलानपितथैवच। यदीच्छे त्स्वर्गगमनमष्टम्यादिषुवर्जयेत्। **रत्नमालायाम्**—कूष्मांडमातुलिंगंचपटोलंबृहतीफलम्। श्रीफलंपिचुमंदंचधात्रीपक्षादितस्त्यजेत्।

नालिकेरंशिरःप्रोक्तंकपालंतुंबकंस्मृतम् । अंत्राणिनलिकाशाकंनखानिग्रामशिंबिकाः । चर्माख्यंपोइकाशाकंवृंताकंतिलमुच्यतइति । **धर्मसारे**—धात्रीफलंभानुवारेश्रीफलंशुक्रवासरे । शमीफलंमंदवारेश्रीकामःपरिवर्जयेत् । **गौडनिबंधे**—रविवारेचसंक्रांतौषष्ठ्यावैसप्तमीतिथौ । आरोग्यकामस्तुनरोनिंबपत्रंनभक्षयेत् । **भारतेदानधर्मे**—आज्याहुतिविनाचैवयत्किंचित्परिविष्यते । दुराचारैश्चयद्भुक्तंतंभागंरक्षसांविदुः । इदंश्राद्धपरमितिकेचित् ।

अथपरिवेषणम् । **चंद्रोदयेगिराः**—नीलरक्तेनवस्त्रेणयःपाकःश्रपितोभवेत् । तेनभुक्तेनविप्राणांदिनमेकमभोजनम् । **वैद्यः**—भक्ष्यंचदक्षिणेपार्श्वेपेयंलेह्यंचवामतः । हस्तदत्तानिचान्नानिप्रत्यक्षंलवणंतथा । मृत्तिकाभक्षणंचैवगोमांसाशनवत्स्मृतम् । **हेमाद्रौयमः**—एकेनपाणिनादत्तंशूद्राद्दत्तंचयद्भवेत् । **पैठीनसिः**—लवणंव्यंजनंचैवघृतंतैलंतथैवच । लेह्यंपेयंचविविधंहस्तदत्तंनभक्षयेत् । **एतदपवादः स्मृतिरत्नावल्याम्**—अपक्वंस्नेहपक्वंचहस्तेनैवप्रदापयेत् । यत्किंचिदितरद्भक्ष्यंदर्व्यादेयंतुयत्नतः । **कल्पतरौभविष्ये**—आयसेनतुपात्रेणयदन्नमुपनीयते । भोक्ताविष्ठासमभुंक्तेदाताचनरकंव्रजेत् । **मात्स्येपि**—उभाभ्यामपिहस्ताभ्यामाहृत्यपरिवेषयेत् । **मनुः**—दर्व्यादेयंशृतान्नंतुसमस्तव्यंजनानिच । उदकंयच्चपक्वान्नयोदर्व्यादातुमिच्छति । सभ्रूणहासुरापश्चसस्तेनोगुरुतल्पगः । **काशीखंडे**—फाणितंगोरसंचैवलवणंमधुकानिच । हस्तेनब्राह्मणोदद्यात्कृच्छ्रंचांद्रायणंचरेत् । **हेमाद्रौहारीतः**—पङ्क्तौसहोत्थितानांतुभोजनादिसमंस्मृतम् । **तत्रैववसिष्ठः**—यद्येकपंक्तौविषमंददातिस्नेहाद्भयाद्वायदिवापिहेतोः । वेदेषुदृष्टामृषिभिश्चगीतांतांब्रह्महत्यांमुनयोवदंति ।

परिवेष्टुरुच्छिष्टस्पर्शेहारीतः—द्रव्यहस्तस्तुसंस्पृष्टउच्छिष्टंवाकदाचन । भूमौनिक्षिप्यतद्द्रव्यमपःस्पृष्ट्वाततःशुचिः । अद्भिरभ्युक्ष्यतद्द्रव्यंपुनरादायदापयेत् । **यत्तुमनुः**—उच्छिष्टेनतुसंस्पृष्टोद्रव्यहस्तःकथंचन । अनिधायैवतद्द्रव्यमाचांतःशुद्धिमाप्नुयादिति । **आचार**

चंद्रोदये—अंगधारणयोग्यमंगेनिधायाचामेत् तदयोग्यंस्पृष्ट्वा । यद्वाभक्ष्येतरद्रव्यंभूमावनिधायाचम्यशुचिर्भवेत् । भक्ष्यंभूमानिधाया चामेत् । **मार्कंडेयः**—पक्वान्नेनगृहीतेनमूत्रोच्चारंकरोतियः । अनिधायैवतद्रव्यमगेकृत्वासमाश्रितम् । शौचकृत्वायथान्यायमपःस्पृश्ययथा विधि । अन्नमभ्युक्षयेच्चैवउद्धृत्यार्कप्रदर्शयेत् । त्यक्त्वाग्रासमथैतस्माच्छेपंशुद्धिमवाप्नुयात् । द्रव्यस्यैवसाक्षादुच्छिष्टस्पर्शेत्यागइतिचंद्रिका । **स्मृत्यर्थसारे**—परिवेषणंकुर्वन्मूत्रोच्छिष्टश्चेदन्नादिनिधायशौचाचमनेकृत्वान्नादिप्रोक्ष्याग्निमर्कंवासंस्पृश्यपरिविष्यादिति ।

आपोशनबलिप्राणाहुत्यादि । मार्कंडेयः—अन्नंदृष्ट्वाप्रणम्यादौप्रांजलिःकथयेत्ततः । अस्माकंनित्यमस्त्वेतदितिभक्त्याथवंदयेत् । **आपस्तंबः**—भापांकासंक्षवशुमित्यभिमुखोन्नवर्जयेदिति । भापांशब्दोच्चारणम् । **याज्ञवल्क्यः**—अपोशानेनोपरिष्टादधस्तादश्नतातथा । अनग्नममृतंचैवकार्यमन्नद्विजन्मना । अत्रयद्यपि—अद्यतेत्तिचभूतानितस्मादन्नतदुन्यतइतिश्रुतौसर्वमविशेपेणान्नत्वेनप्रतीयते तथापिजला दावपितदापत्तेः । भिःसाश्त्रीभक्तमंधोन्नमितिकोशादन्नमोदनः । अतएव-अन्नाश्रितानिपापानीत्यत्राप्योदनवर्जनम् । तेनभक्तेएवापोशन नान्यत्रेतिकेचित् । अन्येतु - सस्यक्षेत्रगतप्राहुःसतुपधान्यमुच्यते । आमंवितुपमित्युक्तस्विन्नमन्नमुदाहृतमितिनिश्चितत्वेवसिष्ठोक्तेः स्विन्नमात्रेआपोशनम् । नचैवगुडादावपितदापत्तिः । अन्नेनव्यंजनमित्यादिपुव्रीह्यादिविकारएवान्नपदप्रयोगात् गुडादेश्चसरसत्वात् अतोगु- डादौनापोशनम् । **मदनरत्नेमाधवीयेचकौर्मे**—महाव्याहृतिभिस्त्वन्नपरिपिच्योदकेनतु । अमृतोपस्तरणमसीत्यपोशानक्रियांचरेत् । **मदनपारिजातेतु**—व्याहृतिभिर्गायत्र्याचान्नमभिमंत्र्याभ्युक्ष्यपरिपिच्य धर्मराजादिबलीन्दद्यादिति । **माधवीये**—ऋतेनसाय सत्येनप्रातश्चपरिषिंचयेत् । **भविष्ये**—भोजनार्त्किचिदन्नाग्रधर्मराजायवैबलिम् । चित्रायचित्रगुप्तायप्रेतेभ्यश्चेदमुद्धरेत् । यत्रक्वचनस

---

१ पक्वमन्नमितिपाठ ।

स्थानांक्षुत्तृषोपहतात्मनाम् । प्रेतानांतृप्तयेक्षय्यमिदमस्तुयथासुखम् । **स्कांदे**—प्रदद्याद्भूतपतयेभुवनपतयेतथा । भूतानांपतयेस्वाहेत्यु क्त्वाभूमौबलित्रयम् । **ब्राह्मे**—ब्रह्मणेनमइत्येवंब्रह्मादिभ्योबलीन्दद्यादिति । **स्मृत्यर्थसारे**—यमायनमःचित्रगुप्तायनमःसर्वेभ्योभूतेभ्यइतिब लीन्दद्यादिति । **श्रौतवृत्तिः**—यःकश्चनास्मिन्छास्त्रेदेवतोद्देशेनद्रव्यात्मकोव्यापारोयागोहोमोभ्यादानंबलिहरणादयोवामंत्रेणसाध्यंतेतत्रसर्व त्रस्वाहाकारःकर्तव्यइति । **आश्वलायनानां**स्वाहांतत्वमेवबलिदाने । एतानिबलिदानादीनियथाशाखंव्यवस्थितानि । इदंचपरिषेचनो त्तरंकार्यमित्युक्तं**माधवीयेमदनरत्नेच** । **यत्तुस्मृत्यर्थसारे** बल्युत्तरंपरिषेचनमुक्तंतत्पदार्थगणनमात्रंनतत्रक्रमेतात्पर्यम् । परिषे चनोत्तरंपादक्षालनोक्तेः । अत्रब्रह्मरुद्रेंद्रचंद्रार्कवसवोमंडलांतरात् । निवेदितनरैरन्नंयस्माद्गृह्णंतिनान्यथेति**ब्राह्मात्** ब्रह्मादिभ्योभुजिकाले बलिर्देयः । मंडलार्थवादोयमितिचेत् तस्यापि सालंबनत्वात् । अर्थाभावोपिस्तुतिरितिचेत्असंभवेह्येवंस्यात् । नचवाक्यभेदः । सूक्तवाका दौदृष्टत्वादित्या**चारादर्शः** । तन्न । तद्धितादीनामेवदेवतात्वबोधकत्वात् । सूक्तवाकस्यकरणत्वेप्युक्तं हरतौदेवताकल्पकत्वम् । अर्थ वदेवतुदेवताकल्पत्वमत्यंतासंभवीत्यलंमीमांसागंधशून्यहृदयप्रलापेन । **श्राद्धेबलिदानाभावमाहहेमाद्रावत्रिः**—दत्तेवाप्यथवा दत्तेभूमौयोनिक्षिपेद्बलिम् । तदन्नंनिष्फलयातिनिराशैःपितृभिर्गतैः । **स्मृत्यर्थसारे**—पायसेनतथाज्येनमाषान्नेनतथैवच । नकुर्याद्बलि दानंतुओदनेनप्रकल्पयेत् । **कृष्णभट्टीये**—भोजनादौबलिंमुक्तंसमुद्धृत्यैवभोजयेत् । अनुद्धृत्यतुयोभुंक्तेप्राणायामाष्टकंचरेत् । आखुमा र्जारसंस्पर्शेषोडशैवतथाचरेत् । तत्रैव—दत्वाथचित्रगुप्तायहस्तंप्रक्षालयेत्ततः । अप्रक्षाल्यकरौभुंजन्रौरवेनरकेवसेत् ।

अपोशनविचारः । **ब्राह्मे**—अपोशनंचगृह्णीयात्सर्वतीर्थमयंचतत् । हस्तेनलंघयेन्नान्नंसोदकेनकदाचन । आपोशनाकरणेदोष— **श्चिंतामणौ**—अपोशानमकृत्वातुयोभुंक्तेऽनापदिद्विजः । भुंजानोयदिवाब्रूयाद्गायत्र्यष्टशतंजपेत् । इदंचबलिंदत्वाहस्तंप्रक्षाल्यकार्यमि

त्युक्तमाधवीये—हस्तंप्रक्षालयेच्चैवपश्चात्प्रयतमानसः । धारयेत्सव्यहस्तेनपात्रंतद्वाग्यतोद्विजः । अपोशानशूद्रेणनकार्यम् । द्विजश्रुतेः । नैवेद्यभक्षणमत्रमिथ्या । लोके—उच्छिष्टभोजिनस्तस्यवयमक्लिष्टकारिणः । येनलीलावराहेणहिरण्याक्षोनिपातितः । स्मार्तोपीदंलिलेख । **पात्रधारणेविशेषश्चिंतामणौ**—अंगुष्ठस्तर्जनीचैवमध्यमाचतृतीयका । तिस्रोद्वेवांगुलीचैवप्रशस्ताःपात्रधारणे । **बृहन्नारदीये**—यावद्विजोऽन्नमश्नीयात्पात्रंनैवपरित्यजेत् । **आपस्तंबः**—नापजिहीतापजिहीतवेति । अपजिहीतत्यजेत् । अतःपात्रधारणेविकल्पः । सोपि प्राणाहुत्युत्तरमिति । **मदनरत्ने**—प्राणाहुत्युत्तरंपात्रंधृत्वानमुचेदन्यथामुंचेदितिकल्पतरुः । **यत्तुषट्त्रिंशन्मते**—समुत्थितस्तुयोभुंक्तेयोभुंक्तेमुक्तभाजने । एवंवैवस्वतःप्राहभुक्त्वासांतपनंचरेदिति तद्भोजनोपक्रमेपात्रंधृत्वातन्मध्यत्यागे । **स्मृतिमंजर्याम्**—पात्रस्यधारणंमौनंत्यजेच्चभ्रातृमान्गृही । **शातातपः**—अग्रासनोपविष्टस्तुयोभुंक्तेप्रथमद्विजः । बहूनांभुजतांसोंतःपंक्त्याहरतिकिल्बिषम् । **अत्रिः**—मौनव्रतमहाकाष्ठहुंकारेणविनश्यति । एतत्पंचग्रासपरम् । पंचग्रासान्महामौनंप्राणाद्याप्यायनंचतदितिविष्णुपुराणादिति **माधवः** । महामौनंकाष्ठमौनम् । तथाच**स्मृतिमंजर्याम्**—काष्ठमौनेनभुंजीतप्राणादिग्रासपंचकम् । प्राणाहुत्युत्तरंनमौननियमः । मौनीवाप्यथवामौनीप्रहृष्टःसंयतेंद्रियः । भुजीतविधिवद्विप्रोनचोच्छिष्टानिदापयेदितिव्यासोक्तेरिति**मदनरत्ने** । **रत्नावल्याम्**—यवीयान्सपितायश्चभुक्त्वाश्रांद्धादिभोजनम् । प्राणाग्निहोत्रादन्यत्रनासौमौनसमाचरेत् । यवीयान्कनिष्ठः । अतोभ्रातृमतोमौननिषेधोजीवज्ज्येष्ठभ्रातृकपरः । तत्रैव—यदिभुंजीततूष्णीतुसर्वत्रैवतुभोजने । सपापोभ्रातरहंतिसंततिंचाचिराद्ध्रुवम् । **गोभिलः**—अथातःप्राणाहुतिकल्पोव्याहृतिभिर्गायत्र्यान्नमभिमंत्र्यऋतंत्वासत्येनपरिषिंचामीतिसायं सत्यंत्वर्तेनपरिषिंचामीतिप्रातरंतश्चरतिभूतेषुगुहायांविश्वतोमुखः ।

---

१ श्राद्धिकभोजनम् । २ विश्वमूर्तिषु ।

त्वंयज्ञस्त्वंवषट्कारस्त्वंब्रह्मत्वंप्रजापतिस्त्वंतदापआपोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोममृतोपस्तरणमसीत्यपःपीत्वा दशहोतारंमनसानुद्रुत्यात्वरन्पं चग्रासान्गृह्णीयात् प्राणायस्वाहापानायस्वाहाव्यानायस्वाहोदानायस्वाहासमानायस्वाहेति । दशहोत्राश्चित्तिः स्रुगित्याद्याः । अमृतोपस्तरणम सिस्वाहेत्याचारादर्शः कृष्णभट्टश्च । तन्न । स्वाहांतत्वेमानाभावात् । गोभिलाद्यलिखनाच्च ।

प्राणाहुतिविचारः । **कौर्मे**—स्वाहाप्रणवसंयुक्तांप्राणायान्नाहुतिंततः । **शौनकः**—तर्जनीमध्यमांगुष्ठलग्नाप्राणाहुतिर्भवेत् । मध्य मानामिकांगुष्ठैरपानेजुहुयाद्बुधः । कनिष्ठानामिकांगुष्ठैर्व्यानेतुजुहुयाद्धविः । तर्जनीचबहिःकृत्वाउदानेजुहुयाद्बुधः । समानेसर्वहस्तेनसमुदाया हुतिर्भवेत् । एताश्चदंतैर्नच्छेद्याः । प्राणायस्वाहेतिसमस्तानिगिरतीत्याचारादर्शेहारीतोक्तेः । अंगुष्ठानामिकामात्रग्राह्यानान्येनताआहुतयइ तिहारीतव्याख्यातारः । सर्वाभिरंगुलीभिरश्नीयादितिसामान्यविधेःपंचग्रासपितथैवेत्याचारादर्शः । उभयमप्ययुक्तम् । पूर्वोक्तशौ नकविरोधात् । **भारते**—यथारसंनजानातिजिह्वाप्राणाहुतौनृप । तथासमाहितंकुर्यात्प्राणाहुतिमतंद्रितः । **अपरार्केबौधायनः**— अथशालीनयायावरात्मयाजिनांप्राणाहुतिंव्याख्यास्यामः प्रक्षालितपाणिपादआचम्यशुचौदेशेप्राङ्मुखउपविश्य भुवाद्यौरितिपृथिवीमावाहयेद्भूत वतीमितिभूमौपात्रंनिधायमूर्धानंदिवइत्युद्धृत्यतमाह्रियमाणंभूर्भुवःस्वरोमित्युपस्थायवाचंयच्छेत्प्राक्तुमहाव्याहृतिभिःप्रदक्षिणमन्नमुदकंपरिषि च्यसव्येनपाणिनाविमुंचन्नमृतोपस्तरणमसीत्यपःपीत्वापंचान्नेनप्राणाहुतीर्जुहोतिप्राणेनिविष्टोऽमृतंजुहोमिशिवोमाविशाप्रदाहायप्राणायस्वाहाअपा नेनिविष्टोऽमृतंजुहोमिशिवोमा० व्यानेनिविष्टो० उदाने० इतिसमाने० हुत्वातूष्णींभूयोव्रतयेत् प्रजापतिंमनसाध्यायन्नांतरावाचंविसृजेत्भूर्भुवःस्व रोमितिजपित्वापुनर्भुंजीत त्वक्केशनखकीटाखुपुरीषाणिदृष्ट्वातदेशात्पिंडमुद्धृत्याभ्युक्ष्यभस्मावकीर्यपुनःप्रोक्ष्यवाचाशस्तंभुंजीतसर्वभक्ष्यापूपकंदमू लमांसानांदंतैर्नाद्येन्नातिसुहितोमृतापिधानमसीत्युपरिष्टादपःपीत्वाचांतोहृदयमभिमृशतिप्राणानांग्रंथिरसिरुद्रोमाविशांतकइत्यतस्तेनान्नेनाप्याय

१ त्वयज्ञस्त्वंविष्णुस्त्वंवषट्कार । २ विशांतर्गतेनान्नेन ।

स्वेतिपुनराचम्यदक्षिणपादांगुष्ठेपाणिंस्रावयति । अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रितः । ईशःसर्वस्यजगतःप्रभुःप्रीणातुविश्वभुगितिहुत्वानु मत्रणमूर्ध्वहस्तःसमाचरेत्—श्रद्धायांप्राणेनिविश्यामृतंहुतंशिवोमाविशशिवमाविशप्राणमन्त्रेनाप्यायस्वेतिपंचब्रह्मणिमआत्मामृतत्वायेत्यनेनचाक्षरे णात्मानयोजयेदेवमेवाहरहःसायंप्रातर्जुहुयादद्भिर्वासायमिति । **अत्रिः**—अपोशानंवामभागेसुरापानसमंभवेत् । दक्षभागेतुयःकुर्यात्सो मपानसमंभवेत् । पुनरापूर्यापोशानंसुरापानसमंभवेत् । इदंश्राद्धपरमितिकेचित् । नित्यभोजनेपीतिकृ**ष्णभट्टः** ।

भोजनविचारः । प्राणाहुत्युत्तरमाहव**सिष्ठः**—सर्वाभिरंगुलीभिरश्नीयादिति**बौधायनः** । यावद्ग्रासंसन्नयन्नस्कंदयन्कृत्स्नंग्रासं ग्रसीत । **विष्णुपुराणे**—अश्नीयात्तन्मनाभूत्वापूर्वंतुमधुरंरसम् । लवणाम्लौतथामध्येकटुतिक्तादिकततः । प्राक्द्रवंपुरुषोऽश्नीयान्मध्येतुक ठिनंपुनः । अंतेपुनर्द्रवाशीतुबलारोग्येनमुचति । **कौर्मे**—ततोन्यदन्नमश्नीयात्पूरणायोदरस्यच । **स्मृतिमंजर्यांकाशीखंडे**—दर्भ पाणिस्तुयोभुङ्क्तेतस्यदोषोनविद्यते । केशकीटादिसभूतस्तदश्नीयात्सदर्भकः । **यत्त्वाश्वलायनः**—ग्रंथीकृतपवित्रेणनभुंजीयान्नचाचमेदिति तद्वर्तुलान्यपरम् । भोजनेवर्तुलइत्य**त्रिस्मृतेः** । **विष्णुः**—नतृतीयमथाश्नीयान्नापथ्यंश्चकदाचन । अपश्यन्नंधकारादौ । **कौर्मे**—नाश्नी यात्प्रेक्षमाणानामप्रदायैवदुर्मतिः । नायज्ञशिष्टमद्याद्वानक्रुद्धोनान्यमानसः । आत्मार्थंभोजनंयस्यरत्यर्थंयस्यमैथुनम् । वृत्त्यर्थंयस्यचाधीतं निष्फलंतस्यजीवितम् । नोच्छिष्टोघृतमादद्यान्नमूर्धानस्पृशेदपि । नब्रह्मकीर्तयन्वापिननिःशेषंनभार्यया । नैकवस्त्रस्तुभुंजीतनवापिशयन स्थितः । नपादुकाधिष्ठितोवानहसन्विलपन्नपि । **पराशरः**—अदुष्टासंतताधारावांतोद्धूताश्वरेणवः । भोजनपात्रमुद्धृत्यजलादिनपेयमित्युक्तं **माधवीयेबृहन्नारदीये**—द्विजोनाभोज्यमश्नीयात्पात्रंनैवपरित्यजेत् । संस्थाप्यह्यासनेपादौवस्त्रार्धंपरिधायच । मुखेनधमितभुक्त्वासु रापीत्युच्यतेबुधैः । खादितार्धंपुनःखादन्मोदकानिफलानिच । प्रत्यक्षलवणंखादन्गोमांसाशीनिगद्यते । **नृसिंहाब्धिमहोदधौ**—सासुद्र

सैंधवंचैवलवणेपरमाद्भुते । प्रत्यक्षेअपितेग्राह्येनिषेधस्त्वन्यगोचरः । **हेमाद्रौब्रह्मांडे**—सैधवंलवणंयच्चतथामानससंभवम् । पवित्रेपरमे ह्येतेप्रत्यक्षेअपिनित्यशः । **देवलः**—नभुंजीताधृतंनित्यंगृहस्थोभोजनंस्वयम् । पवित्रमथहृद्यंचसर्पिराहुरघापहम् । **ब्राह्मे**—यस्तुपाणि तलेभुंक्तेयश्चफूत्कारसंयुतम् । प्रसृतांगुलिभिर्यश्चतस्यगोमांसवच्चतत् । हस्त्यश्वरथयानोष्ट्रमास्थितोनैवभक्षयेत् । श्मशानाभ्यंतरस्थोवादे वालयगतोपिवा । शयनस्थोनभुंजीतनपाणिस्थंनचासने । **तत्रैव**—नार्द्रवासानार्द्रशिरानचायज्ञोपवीतवान् । नप्रसारितपादस्तुपादारोपि तपाणिमान् । नावसक्थिकसंस्थश्चनचपर्यंकिकास्थितः । नवेष्टितशिराश्चापिनोत्संगकृतभाजनः । नचर्मोपरिसंस्थश्चचर्मवेष्टितपार्श्ववान् । **भारते**—निषण्णश्चापिखादेतनतुगच्छन्कदाचन । **क्षत्रियेविशेषस्तत्रैव**—क्षत्रियःप्रावृतशिराभुंजीतासन्नशस्त्रभृदिति । अन्नस्य जन्मकालुष्यंदुष्पक्तिंचनकुत्सयेत् । ग्रासशेषंचनाश्नीयात्पीतशेषंपिबेन्नतु । शाकमूलफलेक्ष्वादिदंतच्छेदैर्नभक्षयेत् । संवपेन्नान्नमन्नेनविक्षि प्तपात्रसंस्थितम् । बहूनांभुंजतांमध्येनाश्नीयात्त्वरयान्वितः । वृथानविकिरेदन्नंनोच्छिष्टंतुघृतंत्यजेत् । तिलकल्कंजलंक्षीरंदधिक्षौद्रंघृतानिच । नत्यजेदर्धजग्धानिसक्तूश्चाथकदाचन । संवपेद्राशीकुर्यात् । **त्रिकांडमंडनः**—शिरोवेष्ट्यतुयोभुंक्तेयोभुंक्तेदक्षिणामुखः । वामपादेकरं न्यस्यतद्वैरक्षांसिगच्छति ।

भोजनकालेस्पर्शास्पर्शौ । शुद्धितत्त्वेवृद्धशातातपः—यदाभोजनकालेतुअशुचिर्भवतिद्विजः । भूमौनिक्षिप्यतंग्रासंस्नात्वाविप्रो विशुध्यति । भक्षयित्वातुतंग्रासमहोरात्रेणशुध्यति । अशित्वासर्वमेवान्नत्रिरात्रेणविशुध्यति । अशुचिपदंनस्नानार्हमात्रपरंस्नानविधिवैय र्थ्यापत्तेरित्युक्तम् । **तत्रैवमार्कंडेये**—अगुलिंचोद्धरेद्यस्तुगोमांसाशनवत्स्मृतम् । **अत्रिः**—मुखेनचान्नमश्नातितुल्यंगोमांसभक्षणैः । मुखेनगवादिवत् । **चंद्रिकायांवृद्धमनुः**—नपिबेन्नचभुंजीतद्विजःसव्येनपाणिना । नैकहस्तेनचजलंशूद्रेणावर्जितंपिबेत् । पीत्वावशेपितं

कृत्वाब्राह्मणःपुनरापिबेत् । त्रिरात्रंतुव्रतकुर्याद्वामहस्तेनवापुनः । इदंभोजनकालेएव । अन्यत्रास्य प्रायश्चित्तोक्तेः । **कौर्मे**—नवाम हस्तेनोद्धृत्यपिबेद्वक्रेणवैजलम् । वामहस्तेनकेवलेनेत्यर्थः । एकहस्तेनेत्यस्यवामहस्तेनोपसंहारइतिकश्चित् । तन्न । पुनरेकहस्तनिषेधात् । अतःसव्येननपिबेत् । एकहस्तेनासव्येनापिनपिबेदित्यर्थः । ननुभोजनेपात्रधारणेसव्यहस्तस्यव्यापृतत्वाद्दक्षिणहस्तस्यचोच्छिष्टत्वात्कथंजल पानमितिचेत्—दक्षिणेनपात्रधृत्वावामेनद्रोणादौजलकृत्वावामेनपात्रधृत्वादक्षिणेनजलपानसंभवात् । एकहस्तनिषेधोभोजनभिन्नकालविषयः । नचैकहस्तनिषेधाद्धस्तद्वयप्राप्तौजलंपिबेन्नाञ्जलिनेत्यादिवाक्यविरोधः । तस्यानुद्धृतजलपानपरत्वात् । एतस्यपात्रादिद्वाराजलपानपरत्वात् हस्त द्वयप्राप्तावपिसव्येनान्वारभणात् आचमनादौतथैवदर्शनादितिचंद्रिका ।

भोजनेग्रासप्रमाणम् । अपरार्केवसिष्ठः—अष्टौग्रासामुनेर्भैक्षंषोडशारण्यवासिनः । द्वात्रिंशतंगृहस्थस्यअमितंब्रह्मचारिणः । वक्त्रप्रमाणपिंडंचग्रसेदेकैकशःपुनः । वक्त्राधिकस्तुयःपिंडआत्मोच्छिष्टःसउच्यते । पिंडावशिष्टमन्नंचदंतनिःसृतमेवच । अभोज्यंतद्द्विजानी याद्भुक्त्वाचांद्रायणंचरेत् । **आदित्यपुराणे**—नोच्छिष्टोग्राहयेदाज्यजग्धशेषंनसंत्यजेत् । शूद्रभुक्तावशिष्टंतुनाद्याद्भांडस्थितत्वपि । **भारतेदानधर्मे**—समानमेकपात्रेतुभुंजेन्नान्नंकदाचन ।

भार्ययासहभुक्तिनिषेधः । मनुः—नाश्नीयाद्भार्ययासार्धंनैनामीक्षेतवाश्नतीम् । नभार्यादर्शनेऽश्नीयादिति । **वसिष्ठः**— भार्ययासहनाश्नीयादवीर्यवदपत्यंभवतीति । इदंचासवर्णाविषयम् । **तथाचांगिराः**—ब्राह्मण्यासहयोश्नीयादुच्छिष्टंवाकदाचन । न तत्रदोषंमन्यंतेसर्वएवमनीषिणः । उच्छिष्टमितरस्त्रीणांयोऽश्नीयाद्ब्राह्मणःक्वचित् । प्रायश्चित्तीसविज्ञेयःसंकीर्णोभूद[1]चेतनः । ब्राह्मणीपदंभर्तृ सवर्णोपलक्षणम् । अतएवाग्रेब्राह्मणग्रहणम् । तेनक्षत्रियादिरप्यसवर्णयासहनाश्नीयादित्यर्थइतिपृथ्वीचंद्रः । **ब्राह्मेपि**—ब्राह्मण्या

---

१ मृदुचेतन ।

भार्ययासार्धंक्वचिद्भुंजीतचाध्वनि । असवर्णस्त्रियासार्धंभुक्त्वापततितत्क्षणात् । **चंद्रिकायामादित्यपुराणेतु**—अधोवर्णस्त्रियासार्धमिति तृतीयपादउक्तः । क्वचिदितिदेशकालाद्यसंभवविषयंविवाहविषयंवेति**विज्ञानेश्वरः** । इदमपिदाक्षिणात्यभिन्नपरम् । पंचधाविप्रतिपत्तिर्दक्षिणातोनुपनीतेनभार्ययासहभोजनमित्युक्त्वाइतरइतरस्मिन्दुष्यतिनेतरइतरस्मिन्देशप्रामाण्यादिति**माधवीयेबोधयनोक्तेः** । यत्तुमाधवीयेवृद्धयमः—माताचभगिनीवापिभार्याचान्याश्चयोषितः । नताभिःसहभोक्तव्यंभुक्त्वाचांद्रायणंचरेदितितदसवर्णापरम् । यदपि **प्रायश्चित्तहेमाद्रौगालवः**—एकयानसमारोहएकपात्रेचभोजनम् । विवाहेपथियात्रायांकृत्वाविप्रोनदुष्यति । अन्यत्रदोपमाप्नोतिपश्चाच्चांद्रायणंचरेदितितदप्यसवर्णापरम् ।

पंक्तिभेदावश्यकता । **मदनरत्नेबृहस्पतिः**—अप्येकपंक्त्यानाश्नीयात्संयुतःस्वजनैरपि । कोहिजानातिकिंकस्यप्रच्छन्नंपातकंभवेत् । एकपङ्क्त्युपविष्टानांदुष्कृतंयद्दुरात्मनाम् । सर्वेषांतत्समंतावद्यावत्पंक्तिर्नभिद्यते । **बृहस्पतिः**—अग्निनाभस्मनाचैवस्तंभेनसलिलेनवा । द्वारेणचैवमार्गेणपंक्तिभेदोबुधैःस्मृतः । तृणेनापिपंक्तिभेदइति**माधवीयेमदनरत्नेच** । तथाच**चंद्रिकायांहारीतः**—तृणेनांतरितंकृत्वापंक्तिदोषोनविद्यते । सएव—नस्पृशेद्वामहस्तेनभुंजानोहिकदाचन । नपादौनशिरोवस्तिनपदाभाजनंतथा । **गोभिलः**—एकपंक्त्युपविष्टानांविप्राणांसहभोजने । यद्येकोपित्यजेत्पात्रंनाश्नीयुरपरेप्यनु । मोहाद्भुंक्तेतुयस्तत्रससांतपनमाचरेत् । सहएककाले ।

उदक्यादिशब्दश्रवणनिषेधः । **माधवीयेआश्वमेधिके**—उदक्यामपिचांडालंश्वानंकुक्कुटमेववा । भुंजानोयदिपश्येतक

१ इतरेतिदाक्षिणात्यअनुपनीतेनभार्ययाचसहइतरस्मिन्नुत्तरदेशेनदुष्यतिऔदीच्योवाइतरस्मिन्दक्षिणेनदुष्यतीत्यर्थः ।

तदन्नंतुपरित्यजेत् । **कात्यायनः**—चांडालपतितोदक्यावाक्यंश्रुत्वाद्विजोत्तमः । भुजीतग्रासमात्रंतुदिनमेकमभोजनम् । उत्तरार्धेयदीति शेषः । **बृहन्नारदीये**—स्नानदानजपादीनांभोजनाध्वरयोस्तथा । मध्येशृणोतियद्येपांशब्दंकुर्यात्कदाचन । उद्वमेद्भुक्तमखिलंस्नात्वाचोप वसेत्तदा । द्वितीयेह्निघृतंप्राश्यशुद्धिमाप्नोतिमानवः । **माधवीयेगौतमः**—काहलभ्रमणंग्राव्णांचक्रस्योलूखलस्यच । एतेपांनिनदाया वत्तावत्कालमभोजनम् । **कात्यायनः**—नृणांभोजनकालेतुयदिदीपोविनश्यति । पाणिभ्यांपात्रमालभ्यभास्करंमनसास्मरेत् । पुनश्चदीपिकां कृत्वातच्छेषभोजयेन्नरः । पुनरन्ननभोक्तव्यंभुक्त्वापापैर्विलिप्यते । अन्नंगृहीत्वेत्यर्थः । **स्मृत्यर्थसारे**—अन्नभोजनकालेऽस्थ्नादूपिते स्नानंघृतप्राशनंच दंतपातेचैवमिति । **विष्णुपुराणे**—जठरंपूरयेदर्धमन्नैरर्धंजलेनच । वायोःसचरणार्थायचतुर्थमवशेपयेत् । **पुलस्त्यः**— भोजनंतुननिःशेषंकुर्यात्प्राज्ञःकथंचन । अन्यत्रदधिसक्त्वाज्यपललक्षीरमध्वपः । **चंद्रिकायांवृद्धमनुः**—भार्याभर्तृकदासेभ्यउच्छिष्टशे पयेत्ततः । **भारते**—पानीयंपायसंसक्तून्सर्पिर्मधुदधीन्यपि । निरस्यशेपमेतेपांनप्रदेयंतुकस्यचित् । **टोडरानंदेविष्णुपुराणे**—नाशे षंपुरुषोश्नीयादन्यत्रजगतीपतेः । ओदनोपिसशेपोभोज्यइतिटोडरानंदे । **मदनरत्नेब्राह्मे**—कुर्यात्क्षीरांतमाहारंनदध्यंतंकदाचन । **का शीखंडे**—अनुपीयततःक्षीरंतक्रंपानीयमेवच । अमृतापिधानमसीत्येवंप्राश्योदकसकृत् । पीतशेपक्षिपेद्भूमौतोयमंत्रमिमंपठन् । अप्रक्षा लितहस्तस्यदक्षिणांगुष्ठमूलतः ।—रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम् । उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम् । **देवलः**—भुक्तोच्छिष्टा त्समादायसर्वस्मात्किंचिदाचमन् । उच्छिष्टभागधेयेभ्यःसोदकंनिर्वपेद्भुवि । उत्तराचमनंचाक्षालितहस्तेनकार्यम् । हस्तंप्रक्षाल्यगंडूपंयःपिबे त्पापमोहितः । सदैवेचैवपित्र्येचआत्मानमवसादयेत् । अर्धपीत्वातुगंडूपमर्धंत्यक्त्वामहीतले । रसातलगतानागास्तेनप्रीणंतिनित्यशइति **व्यासोक्तेः** । गंडूपममृतापिधानमसीतिजलपानम् । एतदकरणेप्रायश्चित्तमुक्तं**भारते**—यद्युत्तिष्ठत्यनाचांतोभुक्तवानासनात्ततः । सद्यः

स्नानंप्रकुर्वीतसोनयप्रयतेभवेत् । **शातातपः**—आचम्यपात्रमुत्सार्यकिंचिदार्द्रेणपाणिना । केचिदुत्तरापोशनोत्तरंप्रथमंगंडूषःपश्चाद्धस्तप्रक्षालनमाहुः । तन्न । पूर्वोक्तग्रंथविरोधात् । **देवलः**—भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत् । दंतलग्नमसंहार्यंज्ञेयंतदपिदंतवत् । नतत्रबहुशः कुर्याद्यत्नमुद्धरणंप्रति । **मार्कंडेये**—अनूत्तिष्ठन्नकुर्वीतभुक्त्वादंतविशोधनम् । दंतलग्नेकालांतरच्युतेबौधायनः—तत्त्यक्त्वैवंशुचिर्नपुनस्त्यागोत्तरमाचामेदिति । निगिरन्नेवतच्छुचिरितियाज्ञवल्क्यः । अतस्त्यागनिगिरणयोर्विकल्पः । **मदनरत्नेगौतमः**—गंडूषस्याथसमयेतर्जन्यावक्रघर्षणम् । यःकरोतिसमूढात्मारौरवेनरकेवसेत् । हस्तक्षालनोत्तरंहस्तादौस्नेहशेषेनदोषः । द्वावेवोष्ठौश्मश्रुकरौसस्नेहौभोजनादनु । अदुष्टान्शक्तिजःप्राहबालवृद्धस्त्रियोमुखमितिवृद्धपराशरोक्तेः । गंडूषप्रक्षेपश्चकांस्यपात्रेनकार्यः । तथा**चांगिराः**—गंडूषंपादशौचंचकृत्वावैकांस्यभाजने । भूमौनिक्षिप्यषण्मासात्पुनराहारमादिशेत् । उत्तरार्धेकांस्यपात्रमितिशेषः । पुनराहारंतक्षणंपात्रांतरानयनंवा । **माधवीयेव्यासः**—तस्मादेशान्मनागपसृत्यविधिवदाचामेदिति । तदुत्तरंद्विराचामेदित्युक्तं । **विष्णुपुराणे**—अंतर्बलायमेभूमेरपामन्यनिलस्यच । भवत्वेतत्परिणतंममास्त्वव्याहतंसुखम् । अगस्तिकुंभकर्णंचशनिचवडवानलम् । आहारपरिणामार्थंसंस्मरामिवृकोदरम् । आतापिर्भक्षितोयेनवातापिश्चमहासुरः । समुद्रःशोषितोयेनसमेऽगस्त्यःप्रसीदतु । इत्युच्चार्यस्वहस्तेनपरिमृज्यात्तथोदरम् । **अत्रिः**—आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् । उद्धृतेप्यशुचिस्तावद्यावद्भूमिर्नलिप्यते । भूमावपिहिलिप्तायांतावत्स्यादशुचिःपुमान् । आसनादुत्थितस्तस्माद्यावन्नस्पृशतेमहीम् । **आपस्तंबः**—यत्रभुज्यतेतत्समूह्यानिहृत्यावोक्ष्यतंदेशंलेप्यलेपात्संसृत्याद्भिःसंश्रित्योत्तरतःशुचौदेशेरुद्रायनिनयेदेवंवास्तुशिवंभवत्विति । **आश्वलायनः**—ततःशतपदंगत्वावीक्ष्यादित्यंशनैःशनैः । पाणिनोदकमालभ्यमंत्रमेनंसमुच्चरेत् । **काशीखंडे**—इत्यन्नपरिसंकल्प्यप्रक्षाल्यचरणौकरौ । ततोन्नपरिणामार्थंमंत्रानेतानुदीरयेत् । अग्निराप्याययन्धातून्पार्थिवान्परिवारितः । दत्तावकाशोनभसो

जरयत्वस्तुमेसुखम् । प्राणापानसमानानामुदानव्यानयोस्तथा । अन्नंपुष्टिकरंचास्तुममाप्यव्याहतंसुखम् । समुद्रोवडवाग्निश्चब्रह्मोब्रह्मस्यनंदनः । मयाभ्यवहृतंयत्तदशेषंजरयंत्वमी । **विष्णुः**—विष्णुःसमस्तेंद्रियदेहदेहिप्रधानभूतोभगवान्यथैकः । सत्येनतेनान्नमशेषमेतदारोग्यदमेपरिणाममेतु । इत्युच्चार्यस्वहस्तेनपरिमृज्यात्तथोदरम् । **ऋग्विधाने**शन्नोभवेतिद्वाभ्यांतुभुक्त्वान्नंप्रयतःशुचिः । हृदयंपाणिनास्पृष्ट्वाज्योग्जीवेदगदःसुखी । **हारीतः**—पश्चात्तदन्नशेषंबलिंहरेदिति । एतच्चपाकशिष्टेनरौद्रबलिहरणमितिजयस्वामी । **धर्मप्रश्नेब्रह्मचारिप्रकरणे**—भुक्त्वास्वयममत्रंक्षालयीतेति । अमत्रभोजनस्य । भिक्षापात्रस्यत्वन्येनक्षालनेनदोषइत्युज्ज्वला । उभयोरपिपात्रयोर्ग्रहणमित्यन्ये । स्नातकादीनामप्येतत् ।

तांबूलभक्षणविचारः । विशेषानुपक्रमेण **मार्कंडेये**—भूयोप्याचम्यकुर्वीतततस्तांबूलभक्षणम् । **माधवीयेवसिष्ठः**—सुपूगंचसुपत्रंचसुचूर्णेनसमन्वितम् । अदत्वाद्विजदेवेभ्यस्तांबूलंवर्जयेद्विजः । एकपूगंसुखारोग्यंद्विपूगंनिःफलंभवेत् । अतिश्रेष्ठंत्रिपूगंचअधिकंनैवदुष्यति । **मार्कंडेये**—पर्णाग्रंपर्णपृष्ठंचचूर्णपर्णंद्विपर्णकम् । दंतधावनपर्णंचशक्रस्यापिश्रियंहरेत् । अकृत्वाचमुखेपर्णंपूगंखादतियोनरः । दशजन्मदरिद्रस्तुअंतेचनहरिस्मृतिः । नित्यंखादतितांबूलंवक्त्रभूषाकरंनरः । नमुच्यत्यच्युतस्येवतस्यमंदिरमिंदिरा । चूर्णपूगदलाधिक्येसाम्येचापिसतिक्रमात् । दुर्गंधारगसौगंध्यबहुरंगान्विदुर्बुधाः । **मदनरत्नेवसिष्ठः**—पर्णमूलेभवेद्व्याधिःपर्णाग्रेपापसंभवः । चूर्णपर्णंहरेदायुःशिराबुद्धिविनाशिनी । तस्मादग्रंचमूलंचशिराश्चैवविशेषतः । चूर्णपर्णंवर्जयित्वातांबूलंभक्षयेद्बुधः । **आश्वलायनः**—यतेश्चविधवायाश्चदीक्षितस्यबटोरपि ।

---

१ यादृष्टि सर्वभूतानायाचदृष्टि स्वभावजा । तदृष्टीनाविनाशायनारदस्संस्मराम्यहम् । इतिसंचिंत्यभुजानदृष्टिदोषोनबाधते । अजनीगर्भसंभूतकुमारब्रह्मचारिणम् । दृष्टिदोषविनाशायहनूमतंस्मराम्यहम् ।

तांबूलभक्षणंवर्ज्यंमैथुनंचविशेषतः । विद्याकामोऽनिशंरात्रौतांबूलंतुनभक्षयेत् । **कृष्णभट्टीये**—मातापित्रोःक्षयश्राद्धेतथैवक्षयसूतके । तांबूलंचवर्वयेद्यस्तुपितृहासनिगद्यते । **हेमाद्रौजाबालः**—दंतधावनतांबूलंतैलाभ्यंगमभोजनम् । रत्यौषधपरान्नंचश्राद्धकृत्सप्तवर्जयेत् । **यत्तुकृष्णभट्टीये**—नित्यश्राद्धेत्वमाश्राद्धेश्राद्धेचापरपक्षिके । तांबूलचर्वणेदोषोनेतिशातातपोऽब्रवीदिति तन्निर्मूलम् । उक्तविरोधात् । **लघुनारदीये**—दशम्यादिमहीपालत्रिदिनंपरिवर्जयेत् । गंधतांबूलपुष्पाणिस्त्रीसंभोगंमहाशयः ।

दिनशेषभागकृत्यम् । **विष्णुरहस्ये**—गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानुलेपनम् । व्रतस्थोवर्जयेत्सर्वयच्चान्यच्चनिराकृतम् । **दक्षः**—भुक्त्वातुसुखमास्थायतदन्नपरिणामयेत् । इतिहासपुराणाद्यैःषष्ठसप्तमकौनयेत् । अष्टमेलोकयात्रातुबहिःसंध्याततःपुनः । **आयुर्वेदे**—भुक्त्वोपविशतस्तुंदंबलमुत्तानशायिनः । आरोग्यंवामकुक्षौतुमृत्युर्धावतिधावतः । इतिश्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णभट्टसुतलक्ष्मणभट्टकृतावाचाररत्नेभोजनप्रकरणम् ॥

सायंसंध्याविचारः । **व्यासः**—सच्छास्त्रादिविनोदेनसन्मार्गस्थाविरोधिना । दिनंनयेत्ततःसंध्यामुपतिष्ठेत्समाहितः । **यमः**—चत्वारिखलुकर्माणिसंध्याकालेषुवर्जयेत् । आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकम् । **संवर्तः**—सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्कराम् । अत्रसायंसंध्यायाःकालकर्तव्यतादिसंध्याप्रकरणेज्ञेयम् । **विशेषमाहचंद्रिकायांव्यासः**—प्रत्यङ्मुखोपविष्टस्तुगायत्रींतुजपेत्ततः । **बह्वृचसूत्रेपि**—उत्तरापराभिमुखोन्वष्टमदेशंसावित्रींजपेदिति । **श्राद्धेभुक्तवतःसंध्यानिषेधमाहश्राद्धचंद्रोदयेयमः**—पुनर्भोजनमध्वानं

१ वृद्धासरस्वतीकृष्णापीतवस्त्राचतुर्भुजाम् । शङ्खचक्रगदापद्महस्तागरुडवाहनाम् । वदर्याश्रमवासातामायातींसूर्यमंडलात् । वैष्णवीत्र्यक्षरासाक्षाद्देवीमावाहयाम्यहम् ॥ इति ।

भारमायासमैथुने । संध्यांप्रतिग्रहंहोमंश्राद्धभोक्ताष्टवर्जयेत् । अयंसंध्यानिषेधःप्रायश्चित्ताकरणे । तदाह—सायंसंध्यांप्रक्रम्य—दशकृत्वः पिबेदापोगायत्र्याश्राद्धभुग्द्विजः । ततःसंध्यामुपासीतशुध्येचतदनंतरम् । अत्रदशकृत्वःपिबेदितिसंबंधः । इदंमनूक्तप्रायश्चित्तंश्राद्धीयविषय मितिमाधवः । संध्याधिकारार्थमितिपृथ्वीचंद्रः । **गौडास्तु**—सायंसंध्यापरान्नंचछेदनंचवनस्पतेः । अमावास्यांनकुर्वीतरात्रिभोजनमेवच । द्यूतचकलहंचैवसायंसंध्यादिवाशयम् । श्राद्धकर्ताचभोक्ताचपुनर्भुक्तिंचवर्जयेदिति**कामधेनौचाराहात्** कर्तुरपिसायंसंध्यानिषेधमाहुस्तन्नि र्मूलम् । यत्तु—द्वादश्यांपंचदश्यांचसंक्रांतौश्राद्धवासरे । सायंसंध्यांनकुर्वीतकुर्वंश्चपितृहाभवेदिति**कालकौमुद्यां**वचनतदपिनिर्मूलम् । युक्तंचैतत् । ततःसंध्यामुपासीतेत्युक्तेः । तेनश्राद्धभोजननिमित्त अन्यत्प्रायश्चित्तम् । पार्वणश्राद्धेतुपट्प्राणायामाइति**विश्वादर्शः** । तदिदंनसंध्याधिकारार्थंकिंतुश्राद्धभोजननिमित्तम् । **यत्तु**—प्राणायामत्रयकृत्वाप्रणवेनाभिमंत्र्यपद् । ततःसंध्यामुपासीतशुद्धिःस्याच्छ्राद्ध भोजिनामिति तन्नवश्राद्धपरम् । प्रायश्चित्तगौरवादिति**प्रयोगपारिजातः** । **याज्ञवल्क्यः**—उपास्यपश्चिमांसंध्यांहुत्वाग्नीन्समुपास्यच । भृत्यैःपरिवृतोभुक्त्वानातितृप्याथसंविशेत् । चकारोवैश्वदेवादेरपिग्रहणार्थम् । सायवैश्वदेवःपाकांतरेणकार्योनपुनर्भुक्तशिष्टेन । नवश्रा द्धस्ययच्छिष्टंगृहेपर्युषितंचयत् । दंपत्योर्भुक्तशिष्टंचभुक्त्वाचांद्रायणंचरेदिति**चंद्रिकायां**वचनात् । यदार्याणामभोज्यस्यान्नतेनयजेतइत्या **पस्तंबोक्तेश्च** । **विष्णुपुराणे**—तत्रापिश्वपचादिभ्यस्तथैवान्नापवर्जनम् । तत्रैव—पुनःपाकमुपादायसायमप्यवनीपते । वैश्वदेव निमित्तंवैपत्न्यासार्धंबलिंहरेत् । सायंत्वन्नस्यसिद्धस्यपत्न्यमंत्रंबलिंहरेत् । **दक्षः**—प्रदोषपश्चिमौयामौवेदाभ्यासरतोनयेत् । यामद्वयंशयान स्तुब्रह्मभूयायकल्पते । **शौनकः**—निशायाःप्रथमेयामेजपयज्ञार्चनादिकम् । स्वाध्यायोभोजनंप्रोक्तवर्जयित्वामहानिशाम् । **व्यासः**— महानिशातुविज्ञेयामध्ययामद्वयंनिशि । **शौनकः**—पश्चात्तनेतथायामेजपयज्ञार्चनादिकम् । ब्रह्माभ्यासोपितत्रैववर्जयित्वातुभोजनम् । इति

शयनविचारः । **हारीतः**—नसंधिवेलायांशयीतननग्नोनाशुचिर्नप्रगेनोच्चैर्निशायांभाषेतेति । प्रगेप्रातः । अतएवपृथ्वीचंद्रोदयेस्मृ
त्यंतरे—आसनंशयनंयानंजायापत्यंकमंडलुम् । शुचीन्यात्मनएतानिपरेषामशुचीनितु । **कौर्मे**—अश्रद्धोऽशुचिःशयितःस्वाध्यायंस्नानभोज
नम् । वहिर्निष्क्रमणंचैवनकुर्वीतकदाचन । नवीजयेच्चवस्त्रेणनदेवायतनेस्वपेत् । **चंद्रिकायांगोभिलः**—स्नातकःस्वापकालेवैणवंदंड
मुपनिदधातीति । स्वप्यादित्यनुवृत्तौ**शंखलिखितौ**—नदीर्णायांखट्वायांनान्यसेवितायामनभ्युक्ष्यनभूतग्रहायतनेनश्मशानवृक्षच्छायासु
नपर्वणिरभसोत्सवेचेति । पर्वणिप्रतिपत्पंचदश्योःसंधौ । रभसोत्सवेपुत्रजन्मादौ । **हारीतः**—नप्रत्यक्तिर्यगुदक्शिराःकोणशिराःपश्चिम
शिराउत्तरशिराश्चेति । **मार्कंडेये**—प्राक्शिरःशयनेविंद्याद्धनमायुश्चदक्षिणे । पश्चिमेप्रचलांचिंतांहानिमृत्यूतथोत्तरे । शून्यालयेश्मशा
नेचपथिवृक्षेचतुष्पथे । महादेवगृहेवापिमातृवेश्मनिनस्वपेत् । नयक्षनागायतनेस्कंदस्यायतनेतथा । कूलच्छायासुचतथाशर्करालोष्ठपां
सुषु । नस्वपेच्चतथादर्भेविनादीक्षांकथंचन । धान्यगोदेवविप्राणांगुरूणांचतथोपरि । नाकाशेसर्वतःशून्येनचचैत्यद्रुमेतथा । **गार्ग्यः**—स्व
गृहेप्राक्शिराःशेतेश्वाशुर्येदक्षिणाशिराः । प्रत्यक्शिराःप्रवासेतुनकदाचिदुदक्शिराः । **भारते**—शय्यार्धतस्यचाप्यत्रस्त्रीपूर्वमधितिष्ठति ।
तद्दक्षिणेशयीतेति । **उशना**—नतैलेनाभ्यक्तशिराःस्वपेदिति । **पैठीनसिः**—नादीक्षितःकृष्णचर्मणिसुप्यादिति । **आपस्तंबः**—
सदानिशायांदारान्प्रत्यलंकुर्वीतेति । **विष्णुपुराणे**—शुचौदेशेविविक्तेतुगोमयेनोपलेपिते । प्रागुदक्प्रवणेचैवसंविशेत्तुसदाबुधः । मंग
ल्यंपूर्णकुंभंचशिरोदेशेनिधायतु । वैदिकैर्गारुडैर्मंत्रैरक्षांकृत्वास्वपेत्ततः । **हारीतः**—क्षालितचरणःसर्वतोरक्षांकृत्वोदकपूर्णघटादिमंगलोपे
तआत्माभिरुचितामनुपहतांसुत्रामाणमितिपठन्शय्यामधिष्ठायरात्रिसूक्तंजप्त्वाविष्णुंनमस्कृत्य । सर्पापसर्पभद्रंतेदूरंगच्छमहाविष । जनमेजयस्य
यज्ञांतेआस्तीकवचनंस्मर । आस्तीकवचनंश्रुत्वायःसर्पोननिवर्तते । शतधाभिद्यतेमूर्ध्निशिंशवृक्षफलंयथा । इत्येतच्छ्लोकद्वयंजप्त्वेष्टदेवतांस्मृत्वा

नचदंतमयीशय्यामधितिष्ठेदनास्तृताम् । मृतदंतमयेविद्युद्दग्धेदर्भेपलाशजे । नशयीतनरोधान्येशयनेपंचदारुजे । पंचदारूणिचोक्तानिचूत जंबूद्रुमास्तथा । अश्मपीठोत्थितांश्चैवघटसिक्तरूस्तथा । करिभग्नकृतेचैवनशयीतकचिन्नरः । संभोगेनिषिद्धदेशादिनादि माधव्यामादित्यपुराणे संभोगेनिषिद्धदेशाउक्ताः—चैत्यचत्वरसौधेपुनैवदेवचतुष्पथे । नैव श्मशानोपवनसलिलेषुमहीपते । काशीखंडे—एककाष्ठमयीशय्यांनातितृप्तोऽथसंविशेत् । विष्णुः—नविद्युद्दग्धेनवाल्पधान्योपरिनसं ध्यायांनार्द्रेति । कल्पतरौकात्यायनः—पौर्णमास्याममावास्यामधःशय्याविधीयते । अनाहिताग्नेरप्येपापश्चादग्नेर्विधीयते । टोडरानंदे तीर्थसौख्येस्कांदे—वार्षिकांश्चतुरोमासान्प्रसुप्तेवैजनार्दने । पंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः । अनृतौवर्जयेद्भार्यामांसंमधुपरौदनम् ।

साधिमास्थायान्यांश्चवैदिकान्मंत्रान्जस्वामंगलश्रुतिशंखंचशृण्वन्दक्षिणशिराःस्वपेदिति । विष्णुपुराणे—रात्रिसूक्तंजपन्स्मृत्वादेवांश्चसुखशा यिनः । तानाहगोभिलः—अगस्तिर्माधवश्चैवमुचुकुंदोमहामुनिः । कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः । शयीतेत्यधिकृत्यहा रीतः—नान्यपूर्वेनानुवंशास्तीर्णेनाश्मपीठोपधानेनचासनेइति । अन्यपूर्वेअन्योपभुक्ते । चंद्रोदयेस्मृतिः—आसनंशयनंयानंजायाप त्यंकमंडलुम् । शुचीन्यात्मनएतानिपरेषामशुचीनितु । विष्णुः—नाकाशेनपालाशेनपंचदारुकृतेनगजभग्नकृतेनभिन्नेनाग्निघुष्टेनघटसिक्तद्रुमजे नदेवायतनेनगणमध्येनहुताशोपरिनभस्मनिनाशुचौदेशेनपर्वतमस्तकेशयीतेति । पंचदारुजेपंचजातीयदारुकृतेइतिटोडरानंदः । तन्न । वक्ष्यमाणविष्णुपुराणविरोधात् । शंखलिखितौ—नविशीर्णखट्वायामनभ्युक्ष्यनभूतयक्षग्रहायतनेपुनश्मशानवृक्षच्छायासुशयीतेति । विष्णुपुराणे—नैकांशालांनवांभग्नांनासमांमलिनांतथा । चंद्रिकायांप्रचेताः—नविशीर्णखट्वायांनान्यवर्णोपशयितायांस्वपेदिति ।

तिथितत्वेस्कांदे—खंडनंनखकेशानांमैथुनाध्वगमेतथा । आमिषंकलहंहिंसांवर्षवृद्धौविवर्जयेत् । **पराशरः**—नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि । नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः । **यमः**—भुंजीतह्यार्द्रपाणिस्तुनार्द्रपाणिःस्वपेन्निशि । **विष्णुः**—निद्रासमयमासाद्यतांबूलंवदनात्त्यजेत् । पर्यंकात्प्रमदांभालात्पुंड्रंपुष्पाणिमस्तकात् । **बौधायनः**—नपर्वणिनश्राद्धेनव्रतीनदीक्षितश्चेति । दीक्षितोदीक्षाख्यसंस्कारवान् । सोप्यवभृथेष्टिंयावत् । **पर्वाणिविष्णुपुराणे**—चतुर्दश्यष्टमीचैवअमावास्याचपूर्णिमा । पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवच । तैलस्त्रीमांससंभोगीपर्वस्वेतेषुयःपुमान् । विण्मूत्रभोजनंनामनरकंप्रतिपद्यते । सामान्यतश्चतुर्दश्यष्टमीग्रहेपिकृष्णपक्षस्यतेग्राह्ये । कृष्णाष्टमीचतुर्दश्योःपूर्णिमादर्शसंक्रमइतिस्कांदादितिपृथ्वीचंद्रः । तन्न । षष्ठचष्टम्यावमावास्याउभेपक्षेचतुर्दशी । मैथुनंचनसेवेतद्वादशींचममप्रियामितिटोडरानंदेवाराहविरोधात् । **संस्कारटोडरानंदेकौर्मे**—ब्रह्मचारीभवेन्नित्यंतद्वज्जन्मत्रयाहनि । **कल्पतरौचंद्रिकायांवामने**—नाभ्यंगमर्केनचभूमिपुत्रेक्षौरंचशुक्रेथकुजेचमांसम् । बुधेचयोषित्परिवर्जनीयाशेषेपुसर्वाणिसदैवकुर्यात् । मूलेमृगेभाद्रपदासुमांसंयोषिन्मघाकृत्तिकयोत्तरासु । वर्ज्येतिपूर्वार्धानुपंगः । **याज्ञवल्क्यः**—एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत् । **यत्तुरत्नमालायां** मूलोत्तरयोरुक्तिःसैतद्विरोधादनित्या । **ऋतुः**—ऋतुकालाभिगामीस्यात्स्वदारनिरतःसदा । यःस्वदारानृतुस्नातान्स्वस्थःसन्नोपगच्छति । भ्रूणहत्यामवाप्नोतिनात्रकार्याविचारणेतिदेवलोक्तेः ।

ऋतुदिननियमः संभोगोत्तरंशौचंच । ऋतुमाहयाज्ञवल्क्यः—षोडशर्तुर्निशाःस्त्रीणांतस्मिन्युग्मासुसंविशेत् । ब्रह्मचार्येवप

---

१ विष्णुपुराणे–जरत्कारोर्जरत्कार्यासमुत्पन्नोमहायशा । आस्तीक सत्यसंधोमापन्नगेभ्योमिरक्षतु । रात्रीव्यख्यदायतीइतिरात्रीसूक्तजप्त्वा नमोनदिकेश्वरायेतिनत्वाप्राच्यादक्षिणतोवाशिर कृत्वास्वपेदितिकमलाकार । २ **वामनपुराणे**—बुधेचयोपानसमालभेतपूर्णासुयोपितपरिवर्जनीया ।

र्वण्याद्याश्चतस्रश्चवर्जयेत् । **मनुः**—तासामाद्याश्चतस्रस्तुनिंदितैकादशीचया । चतुर्दशीचशेपाःस्युःप्रशस्तादशरात्रयः । मैथुनप्रशस्तऋतुकालिकद
शरात्रमध्येमैथुननिषिद्धतिथिनक्षत्रवारादीनांदशानांक्रमेणसंभवस्तत्रपर्वस्वपिमैथुनेदोषाभावः । ऋतावुपेयादित्यत्यंतायोगात्प्रयोगव्यवच्छेदस्यवि
ध्यर्थत्वादितिशं**करोपाध्यायाः** । तन्न । पर्वस्वपिनिषेधात् । अतोयत्रदृष्टार्थोनिषेधःस्मृत्यर्थशास्त्रयोर्विरोधोवातत्रार्थशास्त्रबाधः । **बौधायनः**—
एवमजरोव्रजेत्काम्यंयावत्सन्निपातंचसहशय्याततोनानोदकस्पर्शनमपिवालेपान्प्रक्षाल्याचम्यप्रोक्षणमंगानामिति । यावत्स्खलनंतावत्सहवाशय्या
ततोनाना पृथक्शयीयातामित्यर्थः । उदकस्पर्शनंस्नानमितिह**रदत्तः** । एतदृतौ । अन्यत्रलेपान्प्रक्षाल्येत्यादि । ऋतौतुगर्भशंकित्वात्स्नानंमै
थुनिनःस्मृतम् । अनृतौतुयदागच्छेच्छौचंमूत्रपुरीषवदितिवृ**द्धशातानपात्** मूत्रपुरीषवच्छौचद्वयंकार्यमित्यर्थइतिचं**द्रिका** । अनृतावपिस्नान
मुक्तंचं**द्रिकायाम्**—अष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथुनम् । कृत्वासचैलंस्नात्वातुवारुणीभिश्चमार्जयेत् । **याज्ञवल्क्यः**—नग्नःस्नात्वाच
सुप्त्वाचगत्वाचैवदिवास्त्रियम् । **यत्तुशंखः**—दिवातुमैथुनंगत्वानग्नःस्नात्वातथांभसि । नग्नांपरस्त्रियंदृष्ट्वादिनमेकंव्रतीभवेदिति तदभ्यासपर
मिति**शूलपाणिः** । अत्रमैथुनोत्तरंसहशय्यानिषेधात्तदभावेसहशय्या । सन्निहितभर्तृकायाःपृथक्शयनस्यदंडत्वात् । पृथक्शय्यातुनारीणामश
स्त्रवधउच्यतइतिवचनात्—तस्मात्सर्वा स्त्रियोवालेभर्त्रासहापिवापृथक् । निशिनोशयनंकुर्युःकंचुकीकर्णभूषणैः । हारैश्चकंठसंसक्तैःसहचेद्विध
वास्तुताः । भविष्यंतिनसंदेहःकुर्युःशय्यांपतिव्रताइतिस**ह्याद्रिखंडाच्च** हारादिभिःसहेत्यर्थः । स्नानंपुंसःनस्त्रियाः । तस्याःशुचित्वात् ।
तदाह**योगयाज्ञवल्क्यः**—उभावप्यशुचीस्यातांदंपतीशयनंगतौ । शयनादुत्थितानारीशुचिःस्यादशुचिःपुमान् । **वृद्धपराशरः**—
चातुर्वर्ण्याशुचिर्नारीकृताभिगमनापिवा । विप्रेमैथुनिनिस्नानंराजकेपिशिगेविना । नाभियावद्विशस्तद्वलिंगशौचंचशूद्रके । स्त्रियाविशेषमा
हसएव—नचकुर्वीतसास्नानंनाभेरधस्तुशोधयेत् । **गौतमः**—नमैथुनीभूयशौचंप्रतिविलंवेदिति । **मनुः**—अमावास्यामष्टमीचपौर्णमासी

चतुर्दशीम् । ब्रह्मचारीभवेन्नित्यमनृतौस्नातकोद्विजः । ऋतौनिरवकाशेश्राद्धादावपिगच्छेत् । यथाषोडशेहनिपरदेशादागतस्याग्रेऋत्वभावादगमनेदोषोगमनेदातुर्भोक्तुश्चादोषः । तथाच**विज्ञानेश्वरः**—एवंगच्छन्ब्रह्मचार्येवभवतीति । यत्तु**हेमाद्रौशिवरहस्ये**—दिवाजन्मदिनेचैवनकुर्यान्मैथुनंव्रती । श्राद्धंदत्वाचभुक्त्वाचश्रेयोर्थीनचपर्वस्विति तदनृतुपरम् । ब्रह्मचार्येवभवतियत्रतत्राश्रमेवसन्निति**मनूक्तेः**। **माधवीयेतु**—ऋतुकालंनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित्। तत्रगच्छन्समाप्नोतिह्यातिष्ठन्फलमेवत्विति**वृद्धमनूक्तेः**। श्राद्धेब्रह्मचर्यमावश्यकमित्युक्तम् । यत्तु**धर्मप्रदीपे**—आमेहैमेतथानित्येनांदीश्राद्धेतथैवच । व्यतीपातादिकेश्राद्धेनियमान्परिवर्जयेदिति तन्निर्मूलम् । **भारते**—स्नातांचतुर्थेदिवसेरात्रौगच्छेद्विचक्षणः । यत्तु**नारदः**—रजोदर्शनतोऽस्पृश्यानार्योदिनचतुष्टयम् । ततःशुद्धक्रियाश्चैताःसर्ववर्णेष्वयंविधिरिति । तत्रास्पृश्यत्वंकर्मानधिकाररूपंज्ञेयम् । स्मृत्यंतरेचतुर्थनिषेधोऽपत्याल्पायुष्ट्वादिदोषार्थः । चतुर्थीप्रभृत्युत्तरोत्तराःप्रजानिःश्रेयसार्थमित्या**पस्तंबोक्तेः** । रात्रौचतुर्थ्यांपुत्रःस्यादल्पायुर्धनवर्जितइतिव्**यासोक्तेश्चेतिटोडरानंदः** । अन्येतुस्नानंरजस्वलायास्तुचतुर्थेहनिशस्यते । गम्यानिवृत्तेरजसिनानिवृत्तेकथंचनेत्या**पस्तंबोक्तेः**रजोनिवृत्त्यनिवृत्तिभ्यांव्यवस्थेत्याहुः । सर्वास्वयुग्मासुगमनं युग्मास्विति बहुवचनादिति**विज्ञानेश्वरः** । **अनृतावपिगमनमाहगौतमः**—ऋतावुपेयात्सर्वत्रवाप्रतिषिद्धवर्जमिति । यत्तु**भारते**—अनृतौमैथुनंगच्छेद्बीजस्तैन्यंकरोम्यहमिति तत्स्व्यनिच्छापरम् । **वाराहे**—यस्तुपाणिगृहीतायांमासेकुर्वीतमैथुनम् । भवंतिपितरस्तस्यतंमासंरेतसोभुजः ॥

अगम्याःस्त्रियः । **आश्वलायनः**—प्राग्रजोदर्शनात्पत्नींनेयाद्गत्वापतत्यधः । एतदपवादः**व्यवहारचमत्कारेकश्यपसंहितायाम्**—वर्षाद्द्वादशकादूर्ध्वंयदिपुष्पंबहिर्नहि । अंतःपुष्पंभवत्येवपनसोदुंबरादिवत् । अतस्तत्रप्रकुर्वीततत्संगंबुद्धिमान्नरः । **छंदोगपरि**

शिष्टे—अजातव्यंजनालोम्नीनतयासंहसविशेत् । **बौधायनः**—स्वदारेपुनातीर्थउपेयादिति । तीर्थंयोनिः । सएव—नदिवासंध्ययोर्न मलिनांनवयोधिकांनाभ्यक्तोनरोगपरइति । वयोधिकागतरजस्का । **आयुर्वेदे**—ग्राम्यधर्मेत्यजेत्पत्नीमनुत्तानांरजस्वलाम् । अप्रियामप्रि याचारांदुष्टसंकीर्णमैथुनाम् । अतिस्थूलांकृशांसूतांगर्भिणीमन्ययोषितम् । वर्णिनीमन्ययोनिचगुरुदेवनृपालये । चैत्यश्मशानायतनचत्वरांबु चतुष्पथे । पर्वण्यनगदिवसेशिरोहृदयताडिनिम् । अत्याशितोधृतःक्षुद्वान्दुःस्थितांगःपिपासितः । बालवृद्धोन्यवेगार्तस्त्यजेद्रोगीचमैथुनम् । ग्राम्यधर्मोमैथुनम् । वेगोविण्मूत्रादिः । प्रव्यक्तगर्भापतिरन्धियानंमृतस्यवाहंक्षुरकर्मसंगम् । तस्यानुयत्नेनगयादितीर्थयागादिकंवास्तुविधिंन कुर्यात् । प्रव्यक्तगर्भावनिताभवेन्मासत्रयात्परम् । संगतेत्यर्थः । **सांबपुराणे**—नदिवामैथुनगच्छेद्वंधकीमविवक्षिताम् । प्रव्राजिनीनो त्कृष्टांपिंगलांकुष्ठिनीयोगिनीचित्रिणीस्वकुलजांसंबंधिनीहीनामपस्मारिणीचवर्जयेदिति । **गारुडे**—शुष्कमांसाःस्त्रियोवृद्धाबालार्कस्तरुणंदधि । प्रभातेमैथुनंनिद्रासद्यःप्राणहराणिषड्इति ।

सुखसंभोगयोगः । तथा—शिरःसुधौतंचरणौसुमार्जितौवरांगनासेवनमल्पभोजनम् । अनग्नशायित्वमपर्वमैथुनंचिरप्रनष्टांश्रियमान यंति । तथा—साभार्यायागृहेदक्षासाभार्यायाप्रियंवदा । साभार्यायाप्रियप्राणासाभार्यायापतिव्रता । नित्यस्नातासुगंधाचनित्यंचप्रियवा दिनी । अल्पभुक्चाल्पवादाचसततंमंगलैर्युता । सततंधर्मबहुलासततंऋतुगामिनी । एवंयासत्क्रियायुक्तासर्वसौभाग्यवर्धिनी । यस्येदृशीभवेद्भा र्यासदेवेंद्रोनमानुषः । **कौर्मे**—इत्येतदखिलंप्रोक्तमहन्यहनियद्द्विजाः । ब्राह्मणानांकृत्यजातमपवर्गफलप्रदम् । नास्तिक्यादथवालस्याद्ब्राह्मणो नकरोतियः । सयातिनरकान्घोरान्काकयोनौचजायते ।

अथदुःस्वप्नशांतिः । **शौनकः**—स्वप्नोत्पातेषुचैतेषुकालरात्र्यधिदेवता । पूजाविधानंपूर्वोक्तंकुर्यादत्रापियत्नतः । पूर्वोक्तंरात्रिसूक्तक

ल्पवत् । होमंकुर्यात्प्रयत्नेनरात्रावेवद्विजोत्तमः । उक्तेनैवविधानेनसघृतंपायसंहुनेत् । प्रत्यृचंपायसंहुत्वारात्रीव्यख्यदितिक्रमात् । अष्टोत्तर शतंहुत्वासूक्तेनानेनवित्तथा । स्वप्नाधिपतिमंत्रेणहुनेदष्टोत्तरंशतम् । कालरात्रेर्नाममंत्रेणेत्यर्थः । गुरवेदक्षिणांदद्याद्वस्त्रंहेमपशूनपि । तद्युक्त दक्षिणाभावेप्यशक्तोहोमकर्मणि । हिरण्यंदक्षिणांदद्यात्तदानीमेववाबुधः । वस्त्रकुंभादिसकलंतद्धोत्रेप्रतिपादयेत् । ब्राह्मणान्भोजयेच्छक्त्या सुशीलान्वेदपारगान् । भक्ष्यैश्चपायसाद्यैश्चरत्नानिसुवहूनिच । अनेनविधिनायस्तुशांतिंकुर्वीतसंयतः । तस्यवर्षशतायुष्यंभवत्येवनसंशयः । इतिदुःस्वप्नशांतिः ।

अथाशौचेकार्याकार्यनिर्णयः । तत्र**प्रयोगपारिजाते**जा**बालिः**—संध्यांपंचमहायज्ञान्नैत्यकंस्मृतिकर्मच । तन्मध्येहापयेत्तेषां दशाहांतेपुनःक्रिया । नैत्यकंनित्यश्राद्धम् । पंचयज्ञसाहचर्यात् । स्मृतिकर्मस्मृत्युक्तंदेवतार्चनादि । पुनस्त्वर्थे । यत्तु**पुलस्त्यः**—संध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत् । नत्यजेत्सूतकेवापित्यजन्गच्छेदधोगतिमिति । यच्च**योगीश्वरः**—संध्यास्नानंत्यजन्विप्रःसप्ताहाच्छूद्रतां व्रजेत् । तस्मात्संध्यांचस्नानंचसूतकेपिनसंत्यजेदिति तन्मानससंध्यापरम् । निषेधस्तुमंत्रोच्चारणपरः । सूतकेमृतकेचैवसंध्याकर्मसमा चरेत् । मनसोच्चारयेन्मत्रान्प्राणायाममृतेद्विजइति**पुलस्त्योक्तेः**—मनसेत्यर्घ्यदानान्यपरम् । सूतकेसावित्र्यांजलिंप्रक्षिप्यप्रदक्षिणंकृत्वासूर्यं ध्यायन्नमस्कुर्यादिति**पैठीनसिस्मृतेः** । अर्घ्ये सावित्र्याःप्राप्तावपिपुनर्वचनंमानसोच्चारनिवृत्त्यर्थम् । अत्रदशसंख्ययागायत्रीजप्या । आप न्नश्चाशुचौकालेतिष्ठन्नपिजपेद्दशेत्या**श्वलायनोक्ते**रिति**प्रयोगपारिजातः** । अष्टाविंशतिकृत्वोत्रगायत्रींमनसाजपेदिति**देवजानीयेभर द्वाजः** । सूतकेमृतकेकुर्यात्प्राणायाममंत्रकम् । तथामार्जनमंत्रांस्तुमनसोच्चार्यमार्जयेत् । गायत्रींसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत् । मार्जनंतु नवाकार्यमुपस्थानंनचैवहि । अमंत्रकमितिप्राणायामेमानसोच्चारस्यापिनिवृत्त्यर्थम् । मनसोच्चार्येतितुसर्वस्यमानसोच्चारेप्राप्तेपिस्मृत्यंतरत्वाद

दोषः । तेनार्घ्यदानवर्जंसर्वंमनसाकार्यमुपस्थानंतुनेतिमाधवप्रयोगपारिजातस्मृतिरत्नाचल्यादयः । संध्यायामर्घ्यदानस्यश्रौतत्वात्तदे वाशौचेनुष्ठेयमितिचंद्रिका । विज्ञानेश्वरस्तु—उक्तवचनेषुपदार्थगणनंतदन्यपरिसंख्यार्थम् । अन्यथाविशेषगणनस्यवैयर्थ्यापत्तेः । तेनयावदुक्तमेवमनसाकार्यं उपस्थाननेतिविकल्पार्थमित्याह । दशगायत्रीजपस्तुचंडालादिस्पृष्टस्यस्नानाद्यसभवपरः । एकादशाहप्रातःसंध्या प्याशौचवदेव तत्कालस्यदशरात्रांतःपातात् । तदूर्ध्वतुशुद्धिदशावत् अशुचित्वाभावात् । नचमुख्यकालत्वदेवगौणकालेपितत्करणमिति युक्तं उक्तहेतोरितिकेचित् । निष्कर्षस्तु सूर्योदयोत्तरदंडत्रयस्यमुख्यकालत्वोक्तेः प्रधानविध्यनुग्रहाच्च सूर्योदयोत्तरंशुद्धकालइवसांगसंध्या वदनमिति । अर्घ्यांतामानसीसंध्याप्राणायामविवर्जितेतिच्यवनोक्तेरर्घ्यांतासंध्येति तच्चचंद्रिकाद्यलिखनान्निर्मूलम् । एतेनाशौचेर्घ्यांता संध्येतिवदन्विधानपारिजातोप्यपास्तः । कात्यायनः—सूतकेमृतकेचैवरोगोत्पत्तौतथाध्वनि । मानसींतुजपेत्संध्यांकुशवारिविवर्जि- ताम् । आशार्के—आशौचेकर्मणांत्यागःसंध्यादीनांविधीयते । होमःश्रौतेतुकर्तव्यःशुष्कान्नेनापिवाफलैः । होमःसायप्रातर्नतुवैश्वदेवः । जन्महानौसगोत्रस्यकर्मत्यागोनविद्यते । शालाग्नौकेवलेहोमःकार्यएवान्यगोत्रजैरितिजाबालस्मृतेः । विप्रोदशाहमासीतवैश्वदेवविवर्जित इतिसंवर्तोक्तेश्च । पंचयज्ञविधानंतुनकुर्यान्मृत्युजन्मनोरितिसंवर्तेनपंचयज्ञनिषेधाद्वैश्वदेवनिषेधेसिद्धेपुनःपृथङ्निषेधस्तैत्तिरीयाद्यर्थः । तेष पचयज्ञभिन्नवैश्वदेवोक्तेः । हरदत्तस्तु—बह्वृचानांसूतकेपिवैश्वदेवोभवति—तानेतान्यज्ञानहरहःकुर्वीतेतिसर्वेषानित्यत्वोक्तावपि—तस्यद्वाव नध्यायौयदात्माशुचिर्यद्देशइत्यनेनाशौचादौब्रह्मयज्ञस्यैवविशेषतोनिषेधादित्याह । तन्न । द्वावेवेत्यन्वयेनानध्यायांतरस्यैवव्यावृत्तेः । अत एवश्रुतिः—व्रजन्नासीनःशयानोवेति । नतुतस्यैवेत्यनध्यायातरव्यावृत्तिर्नस्यात् । वैश्वदेवादिनिषेधविरोधाच्च । अत्रवैश्वदेवनिषेधेप्यसंस्कृ तान्नभोजननिषेधादन्नसंस्कारोभवत्येव । तत्रापि—वैश्वदेवासंभवेतुकुक्कुटाडप्रमाणकमितिमृतपितृकस्यपाकांतरपक्षइवसूतकिनोपिभवतीत्याहुः ।

आशौचिनोदीक्षाश्रौतयोर्विचारः । **मदनपारिजाते**—शिवविष्णवर्चनंदीक्षायस्यचापिपरिग्रहः । श्रौतकर्माणिकुर्वीतनातः शुद्धिमवाप्नुयात् । श्रौतातिदेशादुपासनादीनिअहरहःस्वाहाकुर्यादन्नाभावेयेनकेनचिदाकाष्ठादितिश्रुतावुपासनहोमोक्तेः । अत्र— कर्मवैतानिकं कार्यस्नानोपस्पर्शनात्स्वयमितिहा**रीतोक्तौ** अग्निहोत्रस्यहोमार्थंशुद्धिस्तात्कालिकीभवेदिति**गोभिलोक्तौ**चवैतानिकपदस्योपलक्षणार्थत्वादाशौचेश्रौतंस्वयंकुर्यात् । स्मार्तेतुत्यागएवनस्वयंकर्तृत्वमिति**प्रयोगपारिजातः** । अन्यएतानिकुर्युरिति**पैठीनसिस्मृतेः** । सूतकेमृतकेचैव अशुचौश्राद्धभोजने । प्रवासादिनिमित्तेषुहावयेन्नतुहापयेदिति**वृहस्पतिस्मृतेश्च**श्रौतंस्मार्तंचान्येनकारयितव्यम् । त्यागमात्रेतुस्वयंकर्तृत्वम् ।

यज्ञादावाशौचिनोभ्यनुज्ञा । **याज्ञवल्क्यः**—ऋत्विजांदीक्षितानांचयज्ञियंकर्मकुर्वताम् । सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा । सद्यःशौचमितिसर्वत्रानुषंगः । दीक्षितस्यवैतानोपासनाःकार्याइत्यनेनसिद्धेप्यधिकारे पुनर्वचनंयाजमानेषुस्वयंकर्तृत्वविधानार्थं सद्यःस्नानविध्यर्थंचेति**विज्ञानेश्वरः** । वस्तुतस्तुहारीतवचनादिषुवैतानिकग्रहणादुपलक्षणार्थत्वेमानाभावादन्यद्वाराकरणस्यवचनविनानुपपत्तेश्च स्वयं होमःश्रौतविषयः । अन्यएतानिकुर्युरित्यादीनांविशेषोपादानात् । मृतकेतुसमुत्पन्नेस्मार्तंकर्मकथंभवेत् । पिंडयज्ञंचरुंहोममसगोत्रेणकारयेदिति**कर्मप्रदीपेजातूकर्ण्योक्तेश्च**नस्मार्तविषयत्वम् । श्रौतेतात्कालिकशुद्ध्याम्नानाच्च । **निर्णयामृतेपि**—स्मार्तउद्देशत्यागंस्वयंकुर्यादन्यद्वाराहोमादिकारयेत् नित्याग्निहोत्रादीनिस्वयमेवकुर्यादित्युक्तम् । तात्कालिकशुद्धिस्तुसंकल्पात्पूर्वक्षणमारभ्यकर्मापवर्गपर्यंतंधर्मयोग्यत्वलक्षणाज्ञेया । अतएव**गोभिलः**—अग्निहोत्रस्यहोमार्थंशुद्धिस्तात्कालिकीभवेत् । पंचयज्ञान्नकुर्वीतह्यशुद्धःपुनरेवसइति । **हारीतोपि**—कर्मवैतानिकंकार्यंस्नानोपस्पर्शनात्स्वयम् । एतेनाशौचेसंपूर्णाग्निहोत्रेस्वयंकर्तृत्वमुक्तम् । नचवैतानिकत्वेनदर्शेपिस्वयंकर्तृत्वापत्तिः । तत्रकार्यत्वमात्रोक्त्यासमाख्याप्राप्तकर्तृबाधेनानुपपत्तेः । अग्निहोत्रेतुलाघवाद्विकल्पप्राप्तस्वकर्तृकत्वनियामकत्वेनोपपत्तेः । यत्तु**प्रयोगपारि**

जातः—अग्निहोत्रेस्वकर्तृकत्वान्यकर्तृकत्वविकल्पः । यच्च**स्मृत्यंतरम्**—वर्जयेत्सूतकेकर्मनित्यनैमित्तिकादिकम् । आहिताग्नेःसदाशुद्धिःसद्य एवविधीयतइति तत्रपूर्वार्धमाशौचेकर्तव्यत्वेनाभिहितनित्यनैमित्तिकपरम् । उत्तरार्धंतुवैतानिकपरमिति । तन्न । श्रौतेऽन्यकर्तृकत्वविध्यभावात् । स्वकर्तृकत्वनिषेधाभावाच्च । नचैवंश्रौतंकार्यमितिवचनवैयर्थ्यं श्रौतनिषेधाभावादितियुक्तम् । अशुचित्वेनभ्रमप्राप्तश्रौतनिवृत्तिनिरासार्थत्वात् । वैतानोपासनाइति**याज्ञवल्क्योक्ति**र्नित्यकर्मपरा । दीक्षितानामित्यादितुप्रारब्धकर्मणियाजमानप्राप्त्यर्थमिति**स्मृत्यर्थसारः** । स्नानशौचाचमनभोजननियमास्पृश्यस्पर्शेस्नानंकुर्यादिति**टोडरानंदे** । **कालिकापुराणे**—जानूर्ध्वंक्षतजेजातेनित्यकर्मनचाचरेत् । नैमित्तिकचतदधःस्रवद्रक्तोनचाचरेत् । आर्त्विज्यंब्रह्मयज्ञचश्राद्धंदेवयुतंचयत् । गुरुमाक्षिप्यविप्रंचप्रहृत्यैवचपाणिना । नकुर्यान्नित्यकर्माणिरेतःपातेचभैरव ।

अथभोजनोत्तरंकार्याकार्यविचारः । स्नानकार्यसायंसंध्यादेःपूर्वतदधिकारार्थतदूर्ध्वंतु । प्रदोषपश्चिमेयामेदिनस्नानसमाचरेदिति **पराशरोक्तेः** । एतच्चदिनासभवेइतिहे**माद्रिश्चंद्रिका**च । अतःसकल्पःस्नानांगतर्पणाद्यपिभवति । नचानश्नदधिकारित्वाल्लोपः । स्नानाधिकारेतदशक्तौलोपप्रसंगात् । अतएवगौणस्नानाद्यंगीकारइतिचेत् । अत्रापिगौणकालांगीकारइतितुल्यम् । नह्यस्यभोजनार्थत्वेकिंचित्प्रमाणमस्ति । अतएवस्नानेजीवदधिकारित्वमित्य**ाचारादर्शः** । **संध्यात्रयंचकार्यम्** । सध्यात्रयंचकर्तव्यद्विजेनात्मविदासदेति**मनूक्तेः** । सर्वकालउपस्थानंसध्ययोःपार्थिवेष्यते । अन्यत्रसूतकाशौचविभ्रमातुरभीतितइति**विष्णुपुराणे**सूतकादिमध्येपिकथितत्वाच्च । सायसंध्यावद्भोजनोत्तरत्वेप्यविरोधाच्च । नचैवंसर्वदातदापत्तिः कालनियमात् । ब्रह्मयज्ञस्तुन—अनिवर्त्यमहायज्ञान्योभुङ्क्तेप्रत्यहंगृही । अनातुरःसतिधनेसकृच्छ्रार्धेनशुद्ध्यतीति**दक्षोक्त्या**वभोजनेएवाकरणेप्रत्यवायोक्तेः । अकृत्वापंचयज्ञांस्तुभुक्त्वाचांद्रायणचरेदितिच । अतए**वोज्ज्वलायांहरदत्तः**—ब्रह्मयज्ञस्यनित्यत्वेपिप्रातराशेकृतेप्रायश्चित्तमेवनब्रह्मयज्ञः । सर्वत्रानश्नदधिकारित्वनियमेपिब्रह्मयज्ञप्रकरणे**आपस्तंब**कृतावकृतप्रात

राशइतिविशेषोक्तिरिति । अंगत्वेतर्पणमपिन अंनगत्वेतुभवति । देवताश्चमुनींश्चैवपितॄन्वैयोनतर्पयेत् । देवादीनामृणीभूत्वानरकंसव्रजत्यधइतिहेमाद्रौब्रह्मवैवर्तेअकरणेप्रत्यवायश्रुतेः । नचात्राभुंजानस्यप्रत्यवायउक्तः । प्रातर्होमस्तुद्वादशदिनोर्ध्वमपिकिमुत—भोजनोर्ध्वदेवपूजामकृत्वादेवतार्चनम् । भुंक्तेसयातिनरकान्सूकरेष्विहजायतइत्यनर्चेन्भोजनकरणेप्रत्यवायोक्तेरिति । तत्रएकरात्रपूजाविच्छेदेबौधायनेनपुनःप्रतिष्ठोक्तेः । अतःपूजापिभवति । प्रातर्वैश्वदेवस्तुन अनश्नतेत्युक्तेरितिकेचित् । तन्न । पंचैतान्योमहायज्ञान्कुर्यादहरहर्द्विजइतिसंवर्तोक्तेः—आपद्यपिचकष्टायांपंचयज्ञान्नहापयेदितिव्यासोक्तेश्चावश्यकत्वावगतेर्भोजनोर्ध्वमपिभवति । अतोसंस्कृतान्नभोजननिमित्तमेवप्रायश्चित्तंनतुवैश्वदेवाकरणनिमित्तमिति । अभुक्त्वाबलिकर्मचेतिभारताद्बलिदानंनेतिकेचित् ॥ प्राच्यानुदीच्यानथदाक्षिणात्यान्ज्ञात्वाप्रतीच्यान्महतोनिबंधान् । आचाररत्नंसुधियाव्यधायिश्रीरामकृष्णात्मजलक्ष्मणेन ॥ निगदितमिहसाध्वसाधुवायद्धृतमतिनाप्रविचार्यलक्ष्मणेन । तदखिलमपहायदोषदुष्टंचिरमवलोक्यविलोकयंतुसंतः ॥ इतिश्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णभट्टसुतलक्ष्मणभट्टकृतावाचाररत्नेसायंकर्तव्यप्रकरणम् ॥ आचाररत्नग्रंथःसंपूर्णः ॥

इदमाचाररत्नम्—

गोमातकांतर्गतपेडणेग्रामवास्तव्येन पणशीकरोपाह्वविद्वद्वरश्रीमल्लक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा संस्कृतं तच्च मुंबय्या श्रेष्ठिवरैः

तुकाराम जावजी इत्यभिख्यैः स्वीये निर्णयसागराख्यमुद्रणयंत्रे रामचंद्र येसु शेडगे द्वारा कयित्वाप्राकाश्यंनीतम् ।

शाकः १८३७, सन १९१५

Published by Tukaram Javaji, and Printed by Ramchandra Yesu Shedge at the Nirnaya sagar Press, 23, Kolbhat Lane, Bombay

॥ इति आचाररत्नं संपूर्णम् ॥